CC-0. In Public Domain. Digitization by eGangotri

आचार्य दण्डी

काव्यादर्शः

(अनेक टीकाओं सहित)

- रत्नश्री
- हृदयङ्गमा
- प्रभा
- विवृति

प्रो० योगेश्वरदत्तशर्मा (पाराशरः)

NAG PUBLISHERS

नाग पब्लिशर्स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचार्य दण्डी

काव्यादर्श

(अनेक टीकाओं सहित)

- रत्नश्री
- हृदयङ्गमा
- प्रभा
- विवृति

प्रो० योगेश्वरदत्तशर्मा (पाराशरः)

नाग प्रकाशक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा 3068

पुस्तकालय

आचार्य दण्डी-काव्यादर्श

(अनेक टीकाओं सहित)

प्रथम खण्ड

Acc 3995E
31158

पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचार्य दण्डी-काव्यादर्श

(अनेक टीकाओं सहित)

NEPAL SANSKRIT UNIVERSITY
पुस्तकालय

प्रथम खण्ड

१ रत्नश्री
२. हृदयङ्गमा
३. प्रभा
४. विवृति

सम्पादकः
प्रो० योगेश्वरदत्तशर्मा (पाराशरः)
हिन्दू कालेज, दिल्ली विश्वविद्यालय
दिल्लीं-११०००७

NAG PUBLISHERS

नाग पब्लिशर्स
११ ए / यू० ए०, जवाहर नगर, दिल्ली-११०००७
(भारत)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

This Publication has been brought out with the financial assistance from Rashtriya Sanskrit Sansthan, New Delhi.

© लेखक

नाग पब्लिशर्स
(१) ११ए/यू. ए. जवाहर नगर, दिल्ली-११०००७
(२) जलालपुर माफी (चुनार-मिर्जापुर) उ० प्र०
दूरभाष-2915883, 3967975, 3957440

ISBN :81-7081-500-2 (Set)
ISBN : 81-7081-501-0 (Vol I)

प्रथम संस्करण : १९९९

४००/-

मूल्य : Rs. 1000.00 (4 Vols)

NAG PUBLISHERS DELHI

श्री सुरेन्द्र प्रताप द्वारा नाग पब्लिशर्स ११ ए०/यू० ए०, जवाहर नगर, दिल्ली ११०००७ द्वारा प्रकाशित तथा जी. आफसैट प्रिंटर्स ३०८/२ शहजादा बाग, दयाबस्ती दिल्ली ११००३५ द्वारा मुद्रित। अक्षरयोजक ए० आर० प्रिंटर्स, डी-१०२ न्यू सीलमपुर, दिल्ली-११००५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri
सा॰ 3068

भूमिका

आचार्यो दण्डी

संस्कृतसाहित्यव्योम्नि येऽपि लेखकाः कवयो वा सन्ति तेषु यदि कोऽपि काव्यकृत् तर्हि स काव्याकार एव, अन्यः चेन्नाटककारः तर्हि स नाटकरचयिता एव। परं स्वकीय-विविधरचनाकारकत्वेन केवलमेक एव सूर्यत्वेन नक्षत्रेषु ग्रहेषु वा दीव्यति यः काव्यलक्षणकारकत्वेन गद्यकर्तृत्वेन, कथाकर्तृत्वेन च परिचयमात्मानं समालोचक-समक्षमभिव्यनक्ति सोऽस्त्याचार्यो दण्डी।

एकत्राचार्यो दण्डी काव्यादर्शं (काव्यलक्षणं वा) रचयति, अन्यत्र गद्य-कृतिं दशकुमारचरितं चरित्रयति, अपरत्र चावन्तिसुन्दरीकथां गुम्फति। इदम-त्रविषये मुख्यतोऽभिधेयमस्ति-यथा कोऽपि आलोचकः नाटककर्तृत्वेन, काव्यकर्तृत्वेन वा कालिदासद्वयं स्वीकर्तुमीहते, कारिकाकर्तृत्वेन, वृत्तिकर्तृ-त्वेन वा साहित्यदर्पणकारं विश्वनाथं भिन्नत्वेनोररीकरोति, परं प्रामाणिक-ताया अभावेन निष्कर्षतः एक एव कालिदासः। एक एव विश्वनाथो वोररीक्रियते तथैव आचार्यो दण्डी वस्तुतः एक एव।

दण्डिन एकत्वम्

त्रयोऽग्नयस्त्रयो वेदास्त्रयो देवास्त्रयो गुणाः।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः॥[१]

अनुष्टुबिदं शार्ङ्गधरपद्धतौ, सूक्तिमुक्तावल्यां राजशेखरनाम्नोद्धृत-मस्ति। अस्यानुसारं दण्डी प्रबन्धत्रयस्य रचयिता वर्तते। प्रथमः-काव्यादर्शः, द्वितीयः दशकुमार-चरितम्, तृतीयश्चावन्तिसुन्दरीकथा। त्रय एवैते प्रबन्धा विषयशैलीभावस्वरदृष्ट्या च सुतरां भिन्नाः। अतो विद्वांसः स्पष्टतया न तु दण्डिनमेकं स्वीकुर्वते न चैव च दण्डित्रयम्। काव्यादर्शस्य कर्तृत्वेन तु

---

१ शार्ङ्गधरपद्धति-१७४, सूक्तिमुक्तवावली ४.७४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दण्डी सर्वेषामालोचकानामभिमतः। परं त्रिवेदीमहोदयः[1] आगाशे[2] महोदयश्च दशकुमारचरितमपि दण्डिकृतं न स्वीकुरुतः। एतयोरभिमतमस्ति यत् दण्डिविहितं दोषनिरूपणं दशकुमारचरित एव दृश्यते। परं नैतदुचितम्। यतो हि काव्यनियम-निरूपणमन्यत्, तेषां च स्वकृतिष्वनुपयोगोऽन्यत्। एतादृशं निरूपणं हि क्षेमेन्द्रस्यौचित्यविचारचर्चायां नैवोपलभ्यते, तेन हि स्वरचितपद्यान्येव उदाहरणत्वेन दर्शितानि।

अन्यदपि सम्भवं यत् काव्यादर्शस्य लक्षणदिनिरूपणपूर्वमेव दण्डिना दशकुमारचरितं लिखितं स्यात्। आगाशेमहोदयस्याभिमतमिव डा.ऐस.के.दे.महोदयोऽपि दशकुमारचरितं काव्यादर्शं अवन्तिसुन्दरीकथाञ्च दण्डिकृतां नैव मन्यते। तदनुसारं दशकुमारचरितावन्तिसुन्दरीकथयोः शैली-साम्यं नैव विद्यते। किञ्च काव्यादर्शानुसारेण काव्ये (पद्ये, गद्ये वा) भावेषु ग्राम्यता, कामुकता, द्यूतं, स्तेयं, व्यभिचारवर्णनं, रक्तरञ्जितवर्णनं च न स्यात्, परं दशकुमारचरिते तु सर्वेषामेतादृशवर्णनानां बाहुल्यमस्ति। परं देमहोदयस्यापि विचारो नैवानुकूल्यमर्हति, यतो हि संस्कृतसाहित्ये लक्षणोदाहरणानां सानुकूलत्वं प्रायशो दुर्लभमेव। अतः यत्समाधानमागाशेमहोदयस्य विचार-खण्डनार्थं प्रदत्तं तदेव समाधानं देमहोदयस्य मतनिराकरणार्थं दातुं शक्यते। एवं च एकाधिकदण्डिनां परम्पराया अभावाद् दण्डिन एकत्वमेव सिध्यति। यद्यद्, यादृशं तादृशं वा शैलीभेदो भावस्वरभेदो वा कैश्चिदालोचकैः प्रस्तूयते, तादृशमन्तरं तु आचार्यत्वेन, कवित्वेन च सामान्यतः स्वीक्रियते एव। अतः स्पष्टप्रमाण-राहित्येन त्रयः प्रबन्धा एव दण्डिकृताः। दण्डी च वस्तुत एक एव।[3]

दण्डिनः स्थितिकालः

> **आत्मनाम गुरोर्नाम नामातिकृपणस्य च।**
> **श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः॥**

भारतीयशास्त्रेषु, किं वा संस्कृतसाहित्येऽपि मनुसंदर्शिता धारणेयं पर्याप्ततः प्रचलिता। इदमेव मुख्यकारणं यत्प्राचीनाः संस्कृतसाहित्यलेखकाः स्वविषये स्वकीयं परिचयं नैव दत्तवन्तः। इयमेव स्थितिर्दण्डिनो विषयेऽपि

---

१ प्रतापरूद्रीययशोभूषणस्य भूमिकायाम्।

२ इण्डियन एंटिक्वेरी १९०५, खिस्ताब्दः पृ. ६७

३ इण्डियन हिस्टाॅरिकल क्वार्टरली १.३१,३.३९४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दरीदृश्यते। परमालोचकाः तु नीरक्षीरविवेकिनः। ते यथाकथञ्चिदपि साक्ष्य-स्यान्तर-गस्य प्रभावेण बाह्यसाक्ष्यस्य बलेन वा सर्वेषां साहित्यकाराणां स्थितिकालं प्रमाणीकृत्यैव विरमन्ति। अस्तु।

दण्डिनः स्थितिकालस्य विषये प्रमाणानीमानी प्राप्यन्ते—

१. बाह्यसाक्ष्यसम्मतानि—

(i) दशमशताब्दीकालीनः आचार्योऽभिनवगुप्तो ध्वन्यालोकस्य लोचननाम्न्यां व्याख्यायां लिखति-यथाह दण्डी-गद्यपद्यमयी चम्पूः।[१]

(ii) ख्रिस्ताब्दस्य ९२५ तमस्याचार्यः प्रतिहारेन्दुराजः काव्यालङ्कारसा-रसंग्रहे लघुवृत्त्यां लिखति—

अत एव दण्डिना लिम्पतीव[२]-इत्यादि

(iii) ७३७-७९७ शकाब्दस्य (८१५-८७५) तमस्य ख्रिस्ताब्दस्य वा राष्ट्रकूटराजकुमारप्रणीतस्य कनारीभाषायाः कविराजमार्गाभिधस्य ग्रन्थस्यानु-सारेणात्र प्रयुक्ताः साधारणोपमा-असम्भवोपमा-संभवोपमा-विशेषोक्त्या-द्यलङ्काराणां परिभाषाः काव्यादर्शस्य दण्डिरचितस्यालङ्कारलक्षणानामनुवादा एव। अन्यत्रापि च काव्यादर्शस्य प्रभावो लक्ष्यते।

(iv) महावंशानुसारं प्रथमराजसेनराज्यकाले वर्तमानः ८४६-८६६ तमस्य ख्रिस्ताब्दस्य सिंहलीभाषाया (सियाकसलकार) स्वभावालङ्काराभिधस्य लेखकः प्रायशः सर्वत्र दण्डिमतमेवानुकुरुते।[३]

(v) वामनरचितकाव्यालङ्कारसूत्रस्य दण्डिरचितकाव्यादर्शस्य च साम्यावधारणया विवेक्तुं शक्यते यद्-आचार्यो दण्डी वामनपूर्ववर्त्ती लेखकः। आचार्यो दण्डी काव्यस्य द्वौ मार्गौ सूचयति—

तत्र वैदर्भगौडीयौ—[४]

---

१ ध्वन्यालोकः, लोचनम्, उद्योतः वृत्तिः ३१७

२ काव्यालङ्कारसारसङ्ग्रहः—लघुवृत्तिः पृ.२८

३ के.बी.पाठकमहोदयेन सम्पादितम्-१८९८ ख्रिस्ताब्दः

४ काव्यादर्शः— १-४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचार्यो वामनश्च रीति (मार्ग) भेदं त्रित्वेनैव सूचयति-स हि पाञ्चालीनाम्नीं तृतीयां रीतिं दर्शयति[१]— पुनश्च काव्यसम्प्रदायेष्वन्यतमस्य रीतिसम्प्रदायस्य स्थापनामेवं विधत्ते—[२]

रीतिरात्मा काव्यस्य।

अतः सुस्पष्टमिदं यत्—पाञ्चालीमार्गेण, रीतिशब्देन वाऽऽचार्यो दण्डी सर्वथाऽपरिचित आसीत्। एषां प्रमाणानामनुसारं दण्डी वामनतः पूर्ववर्त्ती सिध्यत्येव।

(vi) **नीलोत्पलदलश्यामां विज्जिकां मामजानता।**[३]
वृथैव दण्डिना प्रोक्तं सर्वशुक्ला सरस्वती॥

पद्यमिदं विज्जिकया नाम्न्या विदुष्या लिखितम्-अनेन साऽऽचार्यदण्डिलिखितस्य मङ्गलाचरणस्य—

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती॥[४]

व्यङ्ग्यात्मकमुपहासं करोति। यद् दण्डी विज्जिकया कथमपरिचित आसीदित्यहं न जानामि।

विज्जिकां लेखिकां काव्यप्रकाशकारो मम्मटोऽप्युद्धरते।

जल्हणस्य सूक्तिमुक्तावल्यां राजशेखरनाम्ना पद्यमिदमुद्ध्रियते—

सरस्वतीव कार्णाटी विजयाङ्का जयत्यसौ।
या विदर्भगिरां वासः कालीदासादनन्तरम्॥[५]

---

१ काव्यालङ्कारसूत्रम्—३.१.१२

२ तत्रैव—१.२.६

३ शार्ङ्गधरपद्धति-संख्या १८०

४ काव्यादर्शः—१-१

५ सूक्तिमुक्तावली-जल्हणः-संख्या १८४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समालोचका विज्जिकां दाक्षिणात्यां मन्वते। चन्द्रादित्य-साम्राज्ञी भट्टारिकां विजियाङ्कामेव विख्यातां कार्णाटीमभिदधति। चन्द्रादित्यो द्वितीयपुलकेशिनोऽपत्यमासीत् समयो यस्य ख्रिस्ताब्दः ६६० तमः।[१]

संस्कृतसाहित्यगगने दृश्यन्त एतादृश्योऽनेकाः सूक्तयः, टिप्पण्यो वा, यासां व्याख्या स्पष्टतः पूर्ववर्तिनो लेखकान् निम्नपदाङ्कितान् विधातुं प्रयतते—

तद्यथा—

उपमा कालिदासस्य भारवेरर्थगौरवम्।

दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥

अत्र कालिदासभारविदण्डिनामेकैव विशेषता प्रदर्शिता-परं माघस्तु सर्वांस्ताननतिशेते।

एवमेव—

उदिते नैषधे काव्ये क्व माघः, क्व च भारविः ?

अत्र श्रीहर्षो भारविमाघावतिशेते—

अतो दाक्षिणात्या विज्जिकापि दण्डिनमतिशयितुं प्रयतन्ते चेत्तर्हि समुचितमेव।

विज्जिकायाः समयस्यैतिहासिकत्वाद् दण्डिनः समयः षष्ठशताब्दीखिस्ताब्द एव सिध्यति। महाकवेः सुबन्धोः समयः ख्रिस्ताब्दः शताब्दीषष्ठीयः। स स्वकीयायामेकस्यामेव कृतौ वासवदत्तायाम्—

१.यश्च छन्दोविचितिरिव कुसुमविचित्राभिः।[२]

२. छन्दोविचितिरिव मालिनी सनाथा।[३]

३. छन्दोविचितिमिव भ्राजमानतनुमध्याम्।[४]

त्रिष्वेतेषु स्थानेषु छन्दोविचितिशब्दं ग्रन्थं वा समुल्लिखति।

---

१ इण्डियन एंटिक्वेरी-पुस्तकम्-७ पृ.१६७, पु८ पृ.४८

२ इण्डियन ऐंटिक्वेरी-पुस्तकम्-७ पृ.१६७पु८ पृ.४८

३ इण्डियन ऐंटिक्वेरी-पुस्तकम्-७ पृ.१६७पु८ पृ.४८

४ इण्डियन ऐंटिक्वेरी-पुस्तकम्-७ पृ.१६७पु८ पृ.४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यप्यद्यावधि दण्डिविरचितश्छन्दोविचितिशीर्षकश्छन्दोग्रन्थो नैवोपलभ्यते परं समालोचकाः कतिपये मन्वते यत्सुबन्धुर्दण्डिविरचितं ग्रन्थं तमेवोद्धरते।

एतया परम्परयाऽपि दण्डिनः समयः ख्रिस्ताब्दः षष्ठशताब्दीकालीनो मन्तुं शक्यते।

श्रीमान् मोक्षमूलरः[१] (मैक्समूलर), श्रीमान् वेबरः[२], श्रीमान् मैक्डोनलः[३] श्रीमान् कर्नलजैक[४]बमहोदयश्च दण्डिनं षष्ठशताब्दीकालीनमेव स्वीकुर्वते। ये केचन समालोचकाः दण्डिनः समयस्य विषये कानिचिदन्यानि प्रमाणानि वितन्वते तेषां विचारा एवमुद्धर्तुं शक्यन्ते—

१. श्री कालिन्स महोदयः[५] कालिदासस्य रघुवंशस्य दशकुमारचरितस्य च साम्यं विदधत्कथयति—

दशकुमारचरिते द्विविधौ भौगोलिकौ स्वरूपौ स्तः।

(i) प्राचीनभौगोलिकनामानि—

अवन्ती, शूरसेनः, त्रिगर्तश्च। विदेहा-लिच्छवि-वंशीयाः। श्रावस्ती-स्थाण्वीश्वरः। परं नैतदुचितम्—

कालिदासस्तु बाल्मीकिरामायणोद्धृतं भौगोलिकं परिप्रेक्ष्यमेवोररीकरोति-अतः रघुदिग्विजयवर्णने मत्स्य-सिन्धुसौवरिकाशीसुराष्ट्राणामुल्लेखो नैव दृश्यते। कालिन्समहोदयः कालीदासस्य भौगौलिकवर्णने गुप्तपराजनीतिकपरिवर्तनं वर्णयति। चन्द्रगुप्तद्वितीयकाले हि मत्स्यमालवौ मिलितौ, काशी-कौशाम्ब्यौ संयुक्ते। परं इन्दुमतीस्वयंवरवर्णने विदर्भ-मगध-अंग-अवन्ती-अनूप-शूरसेन-कलिंग-पाण्ड्य-उत्तरकोशलादिह-प्रदेशानां वर्णनं समुपलभ्यते। दशकुमारचरिते च—

---

१ इंण्डिया-ह्वाट केन इट् टीच अस प्रथमसंस्करणम् पृ.३३२

२ हिस्ट्री ऑफ संस्कृत लिट्रेचर वेबरः पृ.२३२

३ हिस्ट्री ऑफ संस्कृत लिट्रेचर मैक्डानलः— पृ.४३४

४ जरनल आव्द रायल एशियाटिक सोसाइटी १८४७ ई.

५ एम.क्रांलिन्स-जियोग्राफिकल डेट, आफ पृ.२८७ रघुवंश एण्ड दशकुमारचरित लाइप्सीज १९०७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विदर्भ-मगध-अंग-मालव-माहिष्मती-कलिंगानां वर्णनं क्रियते। एवं मुख्यतः द्वयोः ग्रन्थयोः अष्टानां प्रदेशानां साम्यवर्णनं ज्ञात्वैव कालिन्समहोदयः रघुवंश-दशकुमारचरितयोः कालमेकं निश्चेतुं प्रयतते।

परं नैतत्कथमपि समीचीनम्-दण्डी बृहत्कथामाश्रित्य दशकुमारचरितं विरचयामास। सातवाहनाभिलेखानामालोचेनन च दशकुमारचरिते समुद्धृतानां विदर्भादीनां षण्णां प्रान्तानामाधारः सातवाहनयुग एव निश्चीयते। तेषामेव चोल्लेखो बृहत्कथायां वर्तते। अतः दण्डिनः समयः कालिदासेन कथमपि साम्यं नार्हति।

एवमेवआगाशे महोदयो दशकुमारचरितं ख्रिस्ताब्दस्यैकादशशताब्द्यन्तर्गतं स्वीकरोति। तस्याभिमतमस्ति—

दशकुमारचरितस्य सामाजिकं वर्णनमेकादशशताब्द्यनुकूलं दृश्यते। दण्डी यवनवणिज उद्धरतेऽतो दशकुमारचरितं दशमशताब्द्या अनन्तरमेव लिखितं स्यात्। आगाशेमहोदयः दशकुमारचरिते यवनवणिजं खनतिं, यवननाविकं रामेषुं च मुस्लिमवणिजमेव स्वीकरोति। परं डा. उनवालामहोदयानुसारेण 'रामेषु' सीरियनशब्दः। यस्याशयो वर्तते—'सुन्दर ईसा'। सुन्दरः ख्रिस्तः। अतः दशकुमारचरितं ख्रिस्ताब्दस्य षष्ठ्यां शताब्द्यामेव लिखितम्।

मोतीचन्द्रः प्राचीनभारतीयवेशभूषानाम्नि स्वग्रन्थे निश्चिनोति-यत्—

ईरानीप्रणिधिवर्गचित्रणे सीरियन प्रान्तादागता वणिजो भारतीयराज्ञां सम्मुखे उपहारान् दत्तवन्तः।[१]

अत आगाशेमहोदयस्य एकादशशताब्द्यभिमतं दशकुमारचरितसमयं वयं कथमपि स्वीकर्तुं नोत्सहामहे दण्डी यादृशस्य समाजस्य वर्णनं वर्णयति तादृशं शूद्रकस्य मृच्छकटिके, बुधस्वामिनः बृहत्कथाश्लोकसङ्ग्रहे, च दरीदृश्यते, द्वे रचने एव ख्रिताब्दस्य षष्ठीशताब्दीतः पूर्वमेव रचिते। अतः दण्डिनः समयः षष्ठीशताब्दी एव।

---

१ प्राचीन भारतीय वेशभूषा-मोतीचन्द्रः पृ.२११-२१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खिस्ताब्दस्याष्टमशताब्द्यन्तर्गतस्यापभ्रंशकवेः स्वयंम्भू महोदयस्य द्वयोरेव कृत्योः रिट्ठणोमिचारिउ (हरिवंश-पुराण,'पउमचारिउ' एतयोः दण्डिनः सादरमाचार्यत्वेनोल्लेखो वर्तते।[१]

अतो दण्डिनः समयः निश्चयेन षष्ठीशताब्दी ई. वर्तते।

भामहदण्डिनोः पौर्वापर्यविचारः

भामहदण्डिनोः कः पूर्वः कश्चापरः ? प्रश्नोऽयमपि प्रतीयतेऽनिर्णीत एव। परमस्मिन् विषये यथासंभवं, योऽपि निर्णयोऽत्र तावादित्थं विचार्यते—

अत्रापि अन्तः साक्ष्यबाह्यसाक्ष्ययोः साहाय्येनैव विचारः क्रियते—

भामहदण्डिनोः कृतौ समानाः पाठांशाः—

	भामहः	दण्डी
१. सर्गबन्धो महाकाव्यम्	१.१९	१.१४
२. मन्त्रदूतप्रयाणादिनायकाभ्युदयैश्च यत्	१.२०	१.१७
३. कन्याहरणसंग्रामविप्रलम्भोदयान्विताः	१.२७	१.२९
४. अद्य या मम गोविन्द जाता त्वयि गृहागते। कालेनैषा भवेत्प्रीतिस्तवैवागमनात्पुनः॥ (प्रेयालङ्कारोदाहरणम्)	३.५	२.२७६
५. भाविकत्वमिति प्राहुः प्रबन्धविषयं गुणम्	३.५३	२.३६४
६. अपार्थं व्यर्थमेकार्थं ससंशयमपक्रमम्। शब्दहीनं यतिभ्रष्टं भिन्नवृत्तं विसंधि च॥	४.१	३.१२५
७. समुदायार्थशून्यं यत्तदपार्थकमिष्यते	४.८	३.१२८
८. गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः।	२.८१	२.२४४

१ हिन्दी काव्यधारा पृ. २२-२४ संपादक-राहुलसांकृत्यायन।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९. आक्षेपोऽर्थान्तरन्यासो व्यतिरेको विभावना। २.६६ २.४

एतेषु नवसु पाठेषु दण्डी यत्पाठान्तरं विहितवान् नास्ति तत्र विशिष्टान्तरम्—

यथा—

द्वितीये पाठे—दण्डिना अभ्युदयैश्च इत्यत्र अभ्युदयैरपि कृतः।

तृतीये पाठे—उदयान्विताः, इत्यत्र **उदयादयः।**

पञ्चमे पाठे—भाविकत्वमित्यत्र तद्भाविक—

षष्ठे पाठे— विसंधि इत्यत्र **विसन्धिकम्।**

सप्तमे पाठे—तदपार्थकमिष्यते इत्यत्र **तदपार्थकमितीष्यते।**

एषु पाठांशेषु परस्परं सम्पूर्णप्रभावस्तु दृश्यते। केवलमित्येव निर्णेयं कः पूर्वः कः परः ?

भामहः कथामाख्यायिकां च परस्परं भिन्नां वर्णयति परं दण्डी प्रायशः समानामेव वर्णयति।

तत्कथाख्यायिकेत्येका जातिः संज्ञाद्वयान्विता।
अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः॥[१]

दण्डी परिहारिकां प्रहेलिकां वा पद्येनैतेन परिभाषते-यथा—

विजितात्मत्रवद्वेषिगुरूपादहतो जनः।
हिमापहामिभधरैर्व्याप्तं व्योमाभिनन्दति॥[२]

भामहस्तु पद्यस्यास्यांशं—

हिमापहामित्रधरैर्व्याप्तं व्योमेत्यवाचकम्।

अवाचकदोषोदाहरणरूपं कलयति।

---

१ काव्यादर्शः-दण्डी १-२८,२९

२ काव्यादर्शः-दण्डी ३.१२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दण्डी हेतुसूक्ष्मलेशालङ्कारान्[1] वाण्या उत्तमभूषणानि कथयति। परं भामहस्तु एतानलङ्कारानेव न स्वीक[2]रोति। एतया समालोचनया भामहः परवर्ती सिध्यति। दण्डी च उपमादोषांश्चतुरः भामहान्नैव गृहीतवान्। यतो हि भामहोऽपि मेधाविनः सप्त उपमादोषान् स्वीकृतवान्। अतो द्वयोरेवं आधारः मेधावी एव। एवं च दण्डिनः महाकाव्यवर्णनं भामहावलम्बितं न। दण्डिनः वाङ्मयस्य स्वभावोक्तिवक्रोक्तिभागयोर्विभाजनमपि भामहस्य—

युक्तं वक्रस्वभावोक्त्या सर्वमेवैतदिष्यते।[3] एतेन प्रेरितं नास्ति यतो भामह एतयोरलङ्कारत्वमेव न मन्यते।

काव्यालङ्कारे भामहः पूर्ववर्तिनामाचार्याणां नामनिर्देशं विनैव कतिपयान् सिद्धान्तान् परिभाषते। यथा—

स्वभावोक्तिरलङ्कार इति केचित् प्रचक्षते।
अर्थस्य तदवस्थत्वं स्वभावोऽभिहितो यथा॥[4]

दण्डी च इममेवालङ्कारं स्पष्टतः चित्रयति—यथा—

नानावस्थं पदार्थानां रूपं साक्षाद् विवृण्वती।
स्वभावोक्तिश्च जातिश्चेत्याद्या साऽलङ्कृतिर्यथा॥[5]

अनेन पुनः प्रश्नोऽयं समुद्भवति दण्डिभामहयोः कः पूर्वः ? कः परः ?

भामहः स्वकीयमलङ्कारनिरूपणं विधाय अतिरिक्तान् त्रयोविंशत्यलङ्कारान् निरूपयतिं, ते सर्वे चालङ्काराः समानकारिकाणां माध्यमेनैव दण्डिना काव्यादर्शे निरूपिताः। एतेन च दण्डिनः भामहपूर्ववर्त्तित्व सिध्यति।

अन्यत्र च भामहस्य दण्डिपूर्ववर्त्तित्वहेतुना निर्दिश्यते-भामहः उपमारूपकं, ससन्देहं, अनन्वयम्, उत्प्रेक्षावयवं च स्वतन्त्रालङ्काररूपेण स्वीकरोति[6]

---

१ **हेतुश्च सूक्ष्मलेशौ च वाचामुत्तमभूषणम्।** काव्यदर्शः—२.२३५

२ **हेतुश्च सूक्ष्मो लेशोऽथ नालङ्कारतया मतः।** काव्यालङ्कारः-२८६

३ काव्यालङ्कारः-भामहः-१.३०

४ तत्रैव २-९३

५ काव्यादर्शः, दण्डी २-८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परं दण्डी उपमारूपकं रूपके, संसन्देहं, अनन्वयं च उपमायां, उत्प्रेक्षावयवं चोत्प्रेक्षायां समावेशयन्नपि स्वतन्त्रालङ्कारत्वेन स्वीकरोति। परं नैतत्समीचीनं यतो हि दण्डी अनन्योपमां नैव निर्दिशति यस्याः समावेशं स उपमायां विदधाति।

भामहः कतिपयसूक्तिषु काँश्चिदाचार्यान् सव्यङ्ग्यं सुधी-सुमेधोमहात्मशब्दैश्च निर्दिशति, किं बहुना यदा-कदा तान् प्रति 'अमेधा' शब्दप्रयोगमपि प्रयुंक्ते। परं तेषु तेषु आचार्येषु दण्डिन उल्लेखो नैव।

दण्डी महाकाव्येषु शत्रोर्विजेतुर्नायकस्याभ्युदयवर्णनं, तत्परातिशायिपराक्रमवर्णनं वाऽनिवार्यं मन्यते[१]। परं भामहस्तु नायकोत्कर्षवर्णनमाक्षिपति[२]। परस्परं प्रयुक्तानां शब्दानां साम्यत्वेन भामहोऽत्र दण्डिनमेवाक्षिपति। अन्यत्रापि

मार्गविभागे भामहो दण्डिनमाक्षिपति। तद्यथा—दण्डी काव्यवाण्याः सूक्ष्मभेदान् निर्दिशन् वैदर्भगौड़ीयमार्गौ प्रस्फुटान्तरौ सूचयन् वैदर्भं श्रेष्ठं मार्गं स्वीकरोति। तमेतं प्रकारं खण्डयन् भामहः कथयति—गतानुगतिकतयाऽमेधसो जना एवं वक्तुं क्रमन्ते।[३]

---

६ काव्यालङ्कारः ३.३५-६, ४३८

१ गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम्।
निराकरणमित्येष मार्गः प्रकृतिसुन्दरः॥
वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि।
तज्जयान्नायकोत्कर्ष वर्णनं च धिनोति नः॥
काव्यादर्शः १-२१,२२

२ नायकं प्रागुपन्यस्य वंशवीर्यश्रुतादिभिः।
न तस्यैव वधं ब्रूयादन्योत्कर्षाभिधित्सया॥
यदि काव्यशरीरस्य न स व्यापितयेष्यते।
न चाभ्युदयभाक् तस्य मुधादौ ग्रहणं स्तवे॥
काव्यालङ्कारः१-२२,२३

३ वैदर्भमन्यदस्तीति मन्यन्ते सुधियोऽपरे।
तदेव च किल ज्यायः सदर्थमपि नापरम्॥
गौड़ीयमिदमेतत्तु वैदर्भमिति किं पृथक् ?
गतानुगतिकन्यायान्नाख्येयममेधसाम्॥
काव्यालङ्कारः—१-३१,३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतादृशाः खण्डनक्रमा बहवः। परं तैः खण्डनप्रकारैः निस्सन्दिग्धमिदं कथयितुं न पार्यते, कोऽस्ति पूर्वः, कश्चापरः गद्यपरिभाषायामपि भामहदण्डिनोर्मतवैभिन्न्यं दृश्यते। दण्डी-गद्यपरिभाषां परिभाषते—

ओजः समासभूयस्त्वमेतद् गद्यस्य जीवितम्[१]।

भामहः एतां परिभाषामपवदन् कथयति—

केचिदोजोऽभिधित्सन्तः समस्यन्ति बहून्यपि।
यथा मन्दारकुसुमरेणुपिञ्जरितालका॥[२]

ज्ञापकहेत्वलङ्कारवर्णनेऽपि एतयोर्भिन्नतैव। दण्डी ज्ञापकहेतुमुदाहरति—

गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः।
इतीदमपि साध्वेव कालावस्थानिवेदने॥[३]

परं भामह एतदुदाहरणमनुचितं मन्वानः केवलमेतं वार्त्तारूपिणमेव प्रकटयति।—

इत्येवमादि किं काव्यं वार्त्तामेनां प्रचक्षते।

एतादृशस्थलेषु समीक्षकाः परम्परया प्राप्तमिदं मतवैविध्यं द्वयोरेवाचार्ययोः स्वकीयमत्रप्रतिपादनमपि घोषयन्ति।

दोषसमुद्देशेऽपि द्वाचार्यौ परस्परं नाभिमतौ।

दण्डी पूर्वं दशदोषवर्णनं विधायैकादशं दोषं प्रतिज्ञा-हेतु-दृष्टान्तहानिं नाभिमन्यते। केवलं चर्चामात्ररूपेणैव वर्णयति।[४]

---

१ काव्यादर्शः—१-८०
२ काव्यालङ्कारः—२.२
३ काव्यादर्शः—२.२४४
४ काव्यादर्श-३-१२७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भामहस्तु पञ्चमाध्याये प्रतिज्ञाहेतुदृष्टान्तहानिं दोषं निरूप्य तं सर्वाधिकमहत्वपूर्णमुद्घोषयति।[१]

अत्र हि भामहस्य—

प्रथमालीढमधवः पिबन्ति कटु भेषजम्।

दण्डिनः तत्सम्बन्धे कथितस्य—

विचारः कर्कशप्रायस्तेनालीढेन किं फलम्।

प्रतिक्रियावचनमपि भवितुमर्हति।

एवं दोषनिदर्शनेऽलङ्कारनिरूपणे, कथाख्यायिकयोर्लक्षणे तु द्वयोरेवाचार्ययोः मतविपरीतत्वं, प्रतिक्रियात्वं, आक्षेपदर्शनं वाऽस्ति, युगपदेव काव्यहेतुप्रतिपादनेऽपि विचारवैविध्यं दृश्यते।

भामहः काव्यहेतुषु प्रतिभायाः स्वरूपं जन्मजातमेव प्रतिपादयति—

गुरूपदेशादध्येतुं शास्त्रं जडधियोऽप्यलम्।
काव्यं तु जायते जातु कस्यचित् प्रतिभावतः॥[२]

दण्डी च स्वाभाविक्या प्रतिभया सह काव्यशास्त्राध्ययनं, अभ्यासरूपिणं प्रयत्नं च काव्यसिद्धिपरं लक्षयति—

नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम्।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः॥
न विद्यते यद्यपि पूर्ववासनागुणानुबन्धिप्रतिभानमद्भुतम्।
श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम्॥[३]

---

१ प्रायेण दुर्बोधतया शास्त्राद् विभ्यत्यमेधसः।
तदुपच्छन्दनायैष हेतुन्यायलवोच्चयः॥
स्वादुकाव्यरसोन्मिश्रशास्त्रमप्युपयुञ्जते।
प्रथमालीढमधवः पिबन्ति कटु भेषजम्॥
काव्यालङ्कारः— ५-२, ३

२ भामहः-काव्यालङ्कारः—१-५

३ दण्डी-काव्यादर्शः—१-१०३,१०४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जे. नोबेलमहोदयो दण्डिनः काव्यपरिभाषां, काव्यरूपाणां वर्गीकरणं, महाकाव्यलक्षणं, मार्गसिद्धान्तनिरूपणम्, अलङ्काराणां निरूपणं च भामहात्सुस्पष्टतरं मन्यते।[१] कामं काव्यशास्त्रसम्प्रदायेषु भामहस्य काव्यलक्षणम्[२]-दण्डिनः काव्यलक्षणा[३]दधिकतरं प्रचलितमभवत्, तथापि विषयनिरूपणस्य क्रमबद्धा योजना, सविस्तरं निरूपणं च दण्डिनः शैल्या निजौ गुणावेव।

प्रो. ए. शंकरन् महोदयः भोजस्य श्रृङ्गारप्रकाशे समागतं श्लो[४]कमिमं समुद्धृत्य भामहं दण्डिपूर्ववर्त्तिनं दर्शयति। तस्यैवानुसारं च श्लोकस्योत्तरार्द्धः काव्यादर्शे[५] प्राप्यते। परं श्लोकस्यास्य पूर्वार्द्धस्य दण्डिकृतकाव्यादर्शेऽलभ्यत्वात् मतमेतत् प्रामाणिकतां नार्हति। यतो हि भोजस्तु दण्डिनः पद्यस्यार्धं कस्याप्यन्यलेखकस्य पद्यार्धेन सहैवं दर्शयति।[६]

भामहः काव्यालङ्कारे न्यासकारोल्लेखं करोति। जिनेन्द्र-बुद्धिरेव न्यासकारः आसीत्। तस्य च समयः ख्रिस्ताब्दस्य सप्तमशताब्दी अस्ति। केचित् समालोचकाः कस्यापि प्रचीनतरस्य न्यासकारस्योल्लेखं मन्वते। बौद्धदार्शनिकः शान्तरक्षितः सप्तमाष्टमशताब्दीमध्ये वर्तमानः स्वतत्त्वसङ्ग्रहे[७] अपोहवादालोचकान् भामहस्य त्रीन् श्लोकान् समुद्धरति। अनेन च भामहस्य कालोऽष्टमशताब्द्या द्वितीयचरणः स्वीक्रियते। दण्डी चास्यानुसारं भामहतः पूर्ववर्त्ती एव।

निष्कर्षः— दण्डिभामहयोः समये शताब्द्यन्तापेक्षया दशकान्तर एव सिध्यति। काव्यादर्शे[८] संख्यातप्रहेलिकाया लक्षणमेवं क्रियते—

नासिक्यमध्या परितश्चतुर्वर्णविभूषिता।

---

१ संस्कृतकाव्यशास्त्रस्येतिहासः पी.बी.क्राणे पृ.७८,७९

२ शब्दार्थौ सहितौ काव्यम्-काव्यालङ्कारः— १-१६

३ शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली। काव्यादर्शः— १-१०

४ **वक्रत्वमेव काव्यानां परा भूषेति भामहः।**
श्लेषः पुष्णाति सर्वासु प्रायो वक्रोक्तिषु श्रियम्॥
श्रृङ्गारप्रकाशः पृ.४३८

५ काव्यादर्शः—२.३६३

६ **श्लेषः पुष्णाति सर्वासु प्रायो वक्रोक्तिषु श्रियम्।**
वाकोवाक्येन हृयन्ति मनांसि कृषतामपि॥
श्रृङ्गारप्रकाशः— पृ.२८९

७ तत्त्वसंग्रहः—श्लोकः ६१२-६१४

८ काव्यादर्शः— ३-११४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्ति काचित्पुरी यस्यामष्टवर्णाह्वया नृपाः ॥

अस्य पद्यस्यांशः, सम्पूर्णपद्यं वा पल्लवनरेशस्य महेन्द्र-वर्मप्रथमस्य मामन्दूराभिलेखे समुपलभ्यते[१]। अतः दण्डिनः कालः काञ्च्याः पल्लवांशिनां राज्ञां राज्यकाल आसीत्। काव्यादर्शे शिवस्यानन्योपासकस्य राजवर्मणो नामकस्योल्लेखः प्राप्यते। एष राजवर्मा राजसिंह-राजसुन्दरवर्मोपाधिधारिणो नरसिंहवर्मद्वितीयादभिन्नः। यस्य कालः ६८०, ६९६ तमात् खिस्ताब्दाद्वाऽऽरभ्य ७२२ तमं यावदस्ति। अस्यैव राज्ञः कालकाल उपाधिरप्यासीद्, यस्योल्लेखः काव्यादर्शे—चतुष्पादगते, अव्यपेत-व्यपेतात्मके आदिमध्यान्तयमकस्योदाहरणे विद्यते[२]। अतो दण्डिनः कालः सप्तमशताब्द्या अन्तिमो भागोऽष्टमशताब्द्या आरम्भ एव। पूर्वोद्धृतो विज्जिकाश्लोकोऽपि मतमिदं पुष्णाति।

अवन्तिसुन्दरीकथायाः प्रस्तावनायां कतिपयेषां लेखकानां सार्थकोल्लेखः क्रियते। अत्रेदमैतिह्यवर्णनं वर्ण्यते—

दण्डिनः प्रपितामहो दामोदरस्वामी, महाकवि-भारविद्वारा चालुक्यराजपुत्रेण विष्णुवर्धनेन सह संपर्कं स्थापितवान्, मैत्रीं च कृतवान्। किंचित्कालानन्तरं दामोदरस्वामी गङ्गवंशिनो राज्ञो दुर्विनीतस्य राजसभां प्राप्तः। तदैव पल्लवराजः सिंहविष्णुः तत्प्रतिभाज्ञानं श्रुत्वा तं स्वराजसभायामाहूतवान्। अत्र यो भारविर्वर्णितः स निश्चितरूपेण किरातार्जुनीयस्य लेखको भारविरेव। यस्य कालः ६३४ तम खिस्ताब्दकालीनः[३]

पूर्वोद्धृतस्य गङ्गवंशिन राज्ञो दुर्विनीतस्य राज्यं मैसूरनगरे (कर्णाटक प्रदेशे) ५४० तमात् खिस्ताब्दात् ६०० तमं खिस्ताब्दं यावदासीत्। संस्कृतकन्नडभाषयोः विद्वान् नृप एष कवीनामाश्रय आसीत्। काञ्चीपुरस्य सिंहविष्णोः राज्यकालः ५७५ ई. तमात् ६०० ई. तमं यावदासीत्। एष पल्लववंशस्य प्रथमः प्रख्यातो राजाऽऽसीत्।

---

१ हिस्ट्री ऑफ संस्कृत लिट्रेचर, ऐम.कृष्णमाचारी पृ.४५५

२ कालकालगलकालकालमुखकालकाल— कालकालघनकालकालपन काल काल। कालकालसितकालका ललनिकालकाल— कालकालगतु कालकाल कलिकालकाल ॥

३ स विजयतां रविकीर्तिः कवितात्रितकालिदासभारविकीर्तिः—६३४ तमे खिस्ताब्दे ऐहोलाशिलालेखे समुद्धृतं पद्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं सिंहविष्णोः विष्णुवर्धनस्य च राज्यकालः सम एव। दामोदरस्वामी विष्णुवर्धनसामीप्यं विहाय दुर्विनीतसभां प्राप्तः। ततश्च काञ्चीपुरं गतः। काञ्चीपुरे दामोदरस्वामिनः त्रयः सूनवः समुत्पन्नाः। १-सिंहविष्णुः २-मनोरथः ३-अतिलोभश्च। मनोरथस्य चत्वारः सुताः प्रादुर्बभूवुः— १-दामोदरः २-भवदासः, ३-सिंहविष्णुः ४-वीरदत्तश्च। दण्डी च वीरदत्तस्यानेकासां कन्यानामनन्तरमुत्पन्नः कनिष्ठः पुत्र आसीत्[१]।

अतो दण्डी दाक्षिणात्य आचार्यो गद्यकारश्च। यदि वंशक्रमस्यान्तरो विंशतिवर्षीयः स्वीक्रियेत तर्हि दण्डिनः कालः सप्तमशताब्द्याः अन्तिमश्चरण एव।

आचार्यदण्डिनो व्यक्तिगतपरिचयः

आचार्यदण्डिनः सम्बन्धे प्रचलितानां किंवदन्तीनामनुसारं एतस्य कवित्वं गौरवपूर्णं ख्यातियुक्तं चाभूत्। विविधाः प्रशंसोक्तयः कालिदासभवभूतिभ्यां सहाप्यस्य सम्बन्धं सूचयन्ति। विशेषतः प्रख्यातोक्तिरस्ति—

उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥

अवन्तिसुन्दरीकथायाः प्रस्तावनायां दण्डिनः परिचय एवं निर्दिष्टः। एष कुशिकगोत्रीयो द्विजः सामान्यतः सौराष्ट्रप्रान्ते संजातः[२]। परमवन्तिसुन्दरीकथायाः प्रस्तावनायां मूलपाठानुसारेणायं पञ्चनदप्रान्तार्गतानन्दपुरवासी

---

१ मनोरथाह्वयस्तेषां मध्यमो वंशवर्द्धनः।
ततस्तनूजाश्चत्वारः स्रष्टुर्वेदा इवाभवन्॥
श्रीवीरदत्त इत्येषां मध्यमो वंशवर्द्धनः।
यवीयानस्य च श्लाघ्या गौरी नामाभवत्प्रिया॥
ततः कथंचित्सा गौरी द्विजाधिपशिरोमणेः।
कुमारं दण्डिनामानं व्यक्तशक्तिमजीजनत्॥
इण्डियन् ऐंटीक्वेरी-५-६७-७१

२ 'सोसाइटी एंड कल्चर इन दि टाईम ऑफ दण्डिन्' धर्मेन्द्र कुमार गुप्त पृ. १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिध्यति। तत्र हि यः पाठः समुपलभ्यते तेन तस्य वास्तविकः परिचयो ज्ञास्यते। स हि ग्रन्थोऽनेनैव लिखितः। तत्रत्यः पाठः एवं निर्दिष्टः[१]।

अचलपुरे नारायणस्वामिनो गृहे दण्डिनः प्रपितामहो दामोदरस्वामी जन्म लेभे। पूर्वप्रदत्तघटनाक्रमानुसारेण दामोदरस्वामी स्वकवित्वस्याश्रयदातारमन्विच्छन् भ्रमन्नितस्ततोऽन्ततः काञ्चीपुरं समाश्रितः। ततो दामोदरस्वामिनः मनोरथः सूनुः सञ्जातः, मनोरथाद् वीरदत्तः। वीरदत्तस्य भार्या गौरी दण्डिनामानं सुतमसूत।

दण्डिनो जन्म ६६५ खिस्ताब्दस्य निकटे मन्यते। सप्तवर्षीये सत्येवास्मिन् जननी स्वर्गमगात्। उपनयनसंस्कारानन्तरं दण्डी वेदाध्ययनमारभत। काले विद्याध्ययनयुक्तेऽस्य जनकोऽपि भुवं त्यक्त्वा देवेषु परिगणितः। काञ्च्यां चालुक्य-वंशीयः विक्रमादित्यः प्रथमः पल्लवराज्य आचक्रमे। दण्डी च काञ्चीं त्यक्तुं विवशतां गतः। इतस्ततो भ्रमन् गुरुकुलेषु विद्यामधीत्य पुनः काञ्चीं सम्प्राप्तः। अधुना काञ्च्यां परमेश्वरवर्मणः प्रथमस्य राज्यकालः, तत्पुत्रस्य नरसिंहवर्मद्वितीयस्य वा शासनकालोऽविद्यत।

काञ्च्यां पल्लवराजस्य राजसभायां दण्डी यदा राजकविरभूत् तदैवानेन शास्त्रग्रन्थः काव्यादर्शः, गद्यकाव्यं दशकुमारचरितम्, अवन्तिसुन्दरीकथा च लिखिता। वस्तुतः स्वजीवनकाल एव दण्डी विमलं यशः सम्मानं च लेभे। एष कवित्वे काव्यशास्त्रित्वेन च विख्यातः कलासमीक्षको विद्वान् मित्रमण्डलीमेकां स्थापितवान्। यस्यां केरलस्याचार्यकविर्मातृदत्तः, देवशर्मा, जयन्तो, नारायणो, भजनानन्दो, विमतः चोलदेशीयो रामशर्मा च सम्मिलितः[२]।

---

१ अस्ति दिशि पश्चिमोत्तरस्यामार्यदेशशिखामणिरानन्दपुरं नाम ब्राह्मणानां महानावासः। ततो हि निःसृता सरस्वतीव ब्रह्मलोकाद् दक्षिणां दिशमनुगृह्णती— अचलपुरं नाम—नासिक्यभूमौ नगरम् अधिवसति कुशिकवंशवर्धनी सर्वातिथिरप्रतिग्रहीत्री महत्युदाररूपा ब्रह्मराशिर्ब्रह्मसंततिः। अवन्तिसुन्दरी कथा-पृ.९

२ अवन्तिसुन्दरीकथा पृ.१२-७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दण्डी ब्राह्मणधर्मानुयायी विष्णोरूपासको बभूव[१]। शैवमतेऽपि स आदरभावमधारयत्।[२] अस्याश्रदयदाता राजसिंहः शैवोऽस्य हेतुरासीत्। परं जैनबौद्धसम्प्रदायौ प्रत्येष कथमपि स्वरुचिं न व्याजहार लिलेख वा।

व्यावहारिकजीवनमस्य कुतूहूलचित्तवृत्तिपूर्णं साहसिकवृत्तिसंयुक्तमासीत्। एष वाग्विदग्धः सहृदयो नागरिकः सम्पूर्णभारतस्य परिभ्रमणं कुर्वन् लोकरीतिनिष्णातः, कल्पनामर्मज्ञः, स्वरचनासु स्वविशालानुभवस्य चित्रणं विविध-वर्णवर्णितकलाभिर्व्यधात्।

इदमत्रावधेयं यद् भोजप्रबन्धे लिखितस्य दण्डिनः चरितस्य (जीवनस्यवा) ऐतिह्यं महत्त्वं नास्ति। यत्र हि लिखितं यद् दण्डी अपि भोजस्य राजसभायां स्थानं लेभे। प्रो.विल्सन महोदयोऽस्य पुष्टिं व्यधात्। अत्रेदं चित्रितं यत् समस्यापुराणे भवभूतिदण्डिकालिदासाः प्रथमं पंक्तिमरचयन् ततश्च भोजः तस्यान्तिमं चरणं पूरयामास—यथा

अरुणकिरणजालैरन्तरिक्षे गतर्क्षे (भवभूतिः)
चलति शिशिरवाते मन्दमन्दं प्रभाते। (दण्डी)
युवतिजनकदम्बे चन्द्रबिम्बं ललम्बे ॥ (भोजः)

एतादृश एव घटनाक्रमोऽन्यत्र चित्र्यते। एकदा दण्डिकालिदासयोः प्रतिस्पर्धा स्पर्धिता। तदैव सरस्वती तयोः श्रेयसः प्रकटनार्थमूचे—

कविर्दण्डी, कविर्दण्डी, कविर्दण्डी न संशयः

तदा क्रुद्धः कालिदासः तामुवाच—"कासि त्वम् ?" तदा सरस्वत्युवाच "तवैवात्माऽहम्"। कालिदासः पुनः पृष्टवान्-"कोऽहं ब्रूहि तदा मूढे ?" सरस्वती उदतीतरत् "त्वमेवाहं न संशयः"।

एतादृश्यो घटनाः केवलं पण्डितैः कृता कवीनां स्तुतयः। नैतासां किमपप्यैतिहासिकं महत्त्वम्। एतादृश्येव कल्पना दण्डिनो नामविषयेऽपि

---

१ हरिपादः शिरो लग्नजह्नुकन्याजलांशुकः।
जयत्यसुनिश्शङ्कसुरानन्दोत्सवध्वजः।
काव्यादर्शः—२-८१

पातु वो भगवान् विष्णुः सदा नवघनद्युतिः।
स दानवकुलध्वंसी सदानवरदन्तिहा॥
तत्रैव-३-२८

२ सोमः सूर्यो मरुद् भूमिर्व्योम होतानलो जलम्।
इति मूर्त्तीरतिक्रम्य त्वां द्रष्टुं देव ! के वयम्॥ पृ. २-२७८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृता। दण्डिनोऽर्थः संन्यासी भवति। केचित्कथयन्ति यौवनविलासान् भुक्त्वैष यदा विरक्ततामभजत् तदाऽयं दण्डिनाम्ना ख्यातिमगात्। वास्तविकं नामास्य किमासीत् ? न तेन कोऽपि परिचितः। प्रो.विल्सनमहोदयोऽपि विचारमेनमनुवर्तते। परं सत्यतां नैवार्हति एष प्रसङ्गः। यतो हि दन्तकथानामेवानुकरणेन कदापि न निर्णीयतेऽपि त्वन्तः साक्ष्यस्याधारेणैव धारणा निर्धार्यन्ते।[१]

संस्कृतकाव्यशास्त्रपरम्परायां दण्डिनः स्थानम्

संस्कृतकाव्यशास्त्रपरम्परायां प्रसिद्धिरूपेण तु भरतमुनिरेवाद्य आचार्यः। परं भरतेनापि स्वनाट्यशास्त्रे तण्डु-शाण्डिल्य-वात्स्य-कोहल-दन्तिल-बादरायण-काश्यप-नन्दिस्वामि-वररूचीनामुल्लेखः कृतः। एषु काश्यप-नन्दिस्वामि वररूचीनामुल्लेखोऽन्यत्रापि प्राप्यते। एतेषु कस्य क्षेत्रं नाट्यशास्त्रं कस्य च काव्यशास्त्रमिति स्पष्टं न कथ्यते।

भारतीयकाव्यशास्त्रपरम्परायां प्रथमे ग्रन्थे नाट्यशास्त्रे सप्तदशाध्याये काव्यशास्त्रीयसिद्धान्तानां निरूपणं विद्यते। अत्रैव दशानां काव्यगुणानां, दशानां काव्यदोषाणां, षट्त्रिंशत्काव्यलक्षणानां चतुर्णामलङ्काराणां च निरूपणं कृतम्। अत्र निरूपितानां दशानां काव्यगुणानां नामानि तान्येव सन्ति यानि दण्डिना काव्यादर्शे वर्णितानि।

भरतेन ये चत्वारोऽलङ्कारा निर्दिष्टाः ते सन्ति उपमा, रूपकं, दीपकं यमकश्च। उपमायाः पुनः पञ्च भेदाः। तेषु निन्दोपमा, प्रशंसोपमा च दण्डिना स्वीकृतौ। यथा—

पद्मं बहुरजश्चन्द्रः क्षयी ताभ्यां तवाननम्।
समानमपि सोत्सेकमिति निन्दोपमा स्मृता॥

काव्यादर्शः—२-३०

ब्रह्मणोऽप्युद्भवः पद्मं चन्द्रः शम्भुशिरो धृतः।
तौ तुल्यौ त्वन्मुखमेति सा प्रशंसोपमेष्यते॥

तत्रैव, २-३१

यमकालंकारस्य दशभेदेषु दण्डिना नामतः केचित्स्वीकृताः। भरतस्य काव्यतत्त्वनिरूपणं हि नाटकस्य रसनिष्पत्तौ साहाय्यत्वेनैव विहितम्।

---

१ ऐम.आर.काले, दशकुमारचरितभूमिका पृ.१३,१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दण्डिनो भरतकालादनन्तरं प्रादुर्भावः बहुकालानन्तरं सञ्जातः। भरतदण्डिनोर्मध्ये के विद्वांस आचार्या वा काव्य-शास्त्रीयसिद्धान्तानां प्रतिपादनं कुर्वाणा आसन् तेषामुल्लेखः कुत्रापि न प्राप्यते। येषां ग्रन्थानामुल्लेखोऽस्ति तेषु प्रथमो विष्णुधर्मोत्तरपुराणम् अस्ति। अस्य तृतीयकाण्डस्य त्रिषु अध्यायेषु यदि काव्यशास्त्रीयसिद्धान्तप्रतिपादनं तर्हि चतुर्दशेऽध्याये सप्तदशालंकाराणां लक्षणानि लक्षितानि। एतेषु सप्तदशसु अलङ्कारेषु व्याजोक्तिप्रकारमुपन्यासनामकमलङ्कारं विहाय सर्वेऽलङ्काराः दण्डिना काव्यादर्शे निरूपिताः।

पञ्चमशताब्द्या अन्तिमे चरणे भट्टिकविना रावण-वधस्य दशमे सर्गेऽष्टत्रिंशानामलङ्काराणां निरूपणं विद्यते। एतेषु निपुणं वार्त्तालङ्कारं च विहाय सर्वेऽलङ्कारा दण्डिना निरूपिताः। दण्डी तु वार्त्तालङ्कारस्य स्थाने स्वभावोक्त्यलङ्कारं विवृणोति। भट्टिर्हि सर्ग एकादशे माधुर्यगुणस्य, द्वादशे च भाविकालङ्कारस्य परिभाषां परिभाषितवान्, दण्डिना तयोरपि ग्रहणं कृतम्। एक ईदृश आचार्यो यस्य रचना नोपलभ्यते, स मेधावी, मेधाविरुद्रो वाऽस्ति। भामहः काव्यालङ्कारे उपमादोषप्रसङ्गे[१], यथासंख्यालङ्कारे[२] च मेधाविनः परिचयं ददाति। एवं च काव्यादर्शटीकायां रत्नश्रीज्ञानः[३], नमिसाधुः च रुद्रटस्य काव्यालङ्कारस्य टीकायां[४], राजशेखरस्य काव्य[५]मीमांसायां मेधाविनो, मेधाविरुद्रस्य वा कविरूपेणोल्लेखो लभ्यते।

अवन्तिसुन्दरीकथायां दण्डिनो मित्रेषु रामशर्मणो वर्णनं वर्ण्यते। भामह एनम् अच्युतोत्त[६]रनामकस्य प्रहेलिकाग्रन्थस्यालेखकरूपे रत्नश्रीज्ञानः काव्यादर्शटीकायां[७], संघरक्षितश्च पाल्यलंकारग्रन्थे सुबोधालङ्कारनाम्ना निर्दिशति।

काव्यादर्शस्य टीकाकारो वादिजङ्घालो दशमशताब्द्या उत्तरार्धे दण्डिपूर्ववर्तिलेखकं कमपि ब्रह्मदत्तनामानं वर्णयति। उपर्युक्तवर्णनेन सुस्पष्टमिदं जायते यत्सर्वेषामेषां भरत-प्रभृतिब्रह्मदत्तान्तानां काव्यशास्त्रसिद्धान्तप्रतिपाद-

---

१ काव्यालङ्कारः, भामहः २-४०

२ तत्रैव २-८८

३ काव्यादर्शः-दण्डी २-२

४ काव्यालङ्कारः, रुद्रटः १-२,२-२

५ काव्यमीमांसा

६ काव्यालङ्कारः, भामहः—२-१९

७ काव्यालङ्कारः, भामहः—२-७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कानामाचार्याणां प्रभावो दण्ड्युपरि लक्ष्यते। इदमपि वक्तुं शक्यते यदाचार्यो दण्डी सर्वेषामेषामाचार्याणां परम्परामनुवर्धयन् स्वकीयं काव्यादर्शनामकं ग्रन्थं विरचयामास।

संस्कृतकाव्यशास्त्रपरम्परायां काव्यादर्शस्य स्थानम्

काव्यादर्शस्य प्रकाशनं भारते पाश्चात्त्यदेशेषु चानेकवारं सञ्जातम्।

१. रत्नश्रीज्ञानस्य रत्नश्रीटीकया सह दशमशताब्द्यां ९३१ तमेऽब्दे प्रकाशितः। एष सिंहलस्य बौद्धभिक्षुः गौड़मगधप्रान्तयोः राज्ञो राज्यपालस्य राज्यारम्भात्त्रयोविंशतितमे वर्षे भारतेऽस्य टीकामकरोत्। एष स्वटीकायां भरत-अश्वघोष-गुणाढ्य-वात्स्यायन-कालिदास-प्रवरसेन-मातृचेट-आर्यशूर-काहल-रामशर्म-मेधाविरुद्र-श्यामवादि-कम्बल-हरिवृद्ध-धर्मकीर्ति-भारवि-बाण-भामह-भर्तृमेण्ठानां नाम्नोल्लेखमकुरुत। अस्यां टीकायां ध्वन्यालोकस्यैकस्याः[१] कारिकायाः काव्यादर्शे[२] प्रसंगतो व्याख्यानं कृतम्।

काव्यादर्शस्य रत्नश्री टीकायाः स्वरूपम्

काव्यादर्शस्य टीकासु रत्नश्रीनाम्नी टीकाऽतीव प्राचीना। मिथिला विद्यापीठप्रधानेनेयं १८७९ तमे शकाब्दे प्रकाशिता। सम्पादकेन विषयेऽस्याः लिख्यते-वर्तते भोटदेशे दण्डिग्रन्थस्य भूयान् प्रचारः। कलिकाताविश्वविद्यालयत भोटभाषानुवादसहितः संस्कृतपाठः प्रकाशितः। रत्नश्रीज्ञानस्य टीकायां गौड़मगधप्रचलितः पाठः प्रधानतया स्वीकृतः।

दण्डिकृतस्थालंकारग्रन्थस्य काव्यादर्श इति नामधेयमर्वाचीनमातृकासु टीकासु, मुद्रितग्रन्थेषु प्रचलितम्, परं रत्नश्रीज्ञानस्तु नामधेयमस्य काव्यलक्षणमेव स्वीकरोति यतो हि दण्डी स्वयं लिखति।[३]। लक्षणकारः कुन्तकश्चापि नामैतदेव निर्दिशति।

---

१ ध्वन्यालोकः—आनन्दवर्धनः १-१३

२ काव्यादर्शः—दण्डी २-२०५

३ **पूर्वशास्त्राणि संहृत्य प्रयोगानुपलक्ष्य च।**
यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणम्॥
काव्यादर्शः—१-२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्नश्रीज्ञानः सिंहलदेशाभिजनः सिंहलद्वीपं दक्षिणसागरं समन्तकूटं च निर्दिशति। कस्यापि स्वमित्रस्य यशः कीर्तेरपि नाम समुल्लिखति। ऐतिहासिकानां मतेन पालमहीपतीनां राज्ये विक्रमशीलादिषु महाविहारेषु सैन्धवाःभिक्षवः प्रबलाः आसन्। तेषां श्रीज्ञानरूपणे ख्यातिरासीत्।

रत्नश्रीज्ञानोऽपि सिंहलदेशाद् भारत सम्प्राप्तः सन् केनचित् विविधगुणविभूषितेन सामन्तचूडामणिना तुङ्गेन सम्मानितः। ग्रन्थस्यास्य रचना च पालमहीपतेः त्रयोविंशतितमे राज्यसंवत्सरे कृता। रत्नश्रीज्ञानो बौद्धशास्त्रेषु तदितरशास्त्रेषु च प्रवीणः।

संभाव्यते यत् सिंहलदेशे दण्डिकृतस्य ग्रन्थस्य प्रचार आसीत्। सिंहलभाषानिबद्धः कश्चित् स्वभाषालङ्कारग्रन्थो दण्डिकृतं काव्यलक्षणमाश्रित्य लिखितः। सुबोधालङ्कारकारकेण दण्डिनः सम्बन्धः सूचितः, अतः रत्नश्रीज्ञानः सिंहलदेशे काव्यलक्षणमधीत्य मगधेषु विविधशास्त्रपरिशीलनपूर्वकं तस्य टीकामलिखत्।

अत्रत्या श्लोकव्याख्या सरला, पाण्डित्यपूर्णा च। व्याकरण-तर्क-अलङ्कार-कामशास्त्रादीनां यत्र तत्र प्रयोगः कृतः। महापण्डितो रत्नश्रीज्ञानः स्वकीयानि नवीनानि उदाहरणानि रचयामास। किं बहुना दण्डिकृतेषु श्लोकेषु दोषप्रदर्शनपूर्वकं पादपारिवर्तनमपि कृतवान्। अलङ्काराणां परस्परं भेददर्शनेऽस्य सूक्ष्मे[1]क्षिका समादरणीया मुख्यतः रत्नश्रीज्ञानो मार्गविभागाख्यं प्रथमं परिच्छेदं व्याख्यातवान्।

रत्नश्रियः काव्यपप्रीतिर्विशिष्टा। बहुभ्यो ग्रन्थान्तरेभ्योऽयमुदाहरणानि समकलयत्। अत्र मुख्यतो येषां काव्यशास्त्राणामाश्रयो गृहीतः, तेषु प्रधानानि सन्ति-कोहलकृतं भारतीयनाट्यशास्त्रं, रामशर्मणोऽलङ्कारग्रन्थः, भामहस्य काव्यालङ्कारः, आनन्दवर्धनस्य च ध्वन्यालोकः। बौद्धकविषु अश्वघोष-

---

१ एवं लक्षणम् अलङ्कारत्रयम् आवृत्तिविशेषात्मकमिष्टं दीपकस्य स्थाने विषये एव नान्यत्र। दीपकेनापि तादृशार्थप्रतीतिसम्भवात् नार्थतः तयोः भेद इति दीपकस्थान एवेष्टमित्युक्तम्। अन्ये त्वेकेत्र दीपकस्थान इति विशेषेण व्याचक्षते तदसारम्। एवं हि अर्थावृत्तिरेव दीपकस्थाने स्यात्, न शेषमावृत्तिद्वयम्। आवृत्तित्रयमपि च दीपकस्थान इत्युक्तं शास्त्रकृता दीपकस्थान एवेष्टमलङ्कारत्रयमिति साक्षादभिधानात्। ततः शास्त्रविरुद्धमेव व्याख्यानम्—उभयमपीष्टं शिष्टैरित्यलमतिविमर्देन। काव्यलक्षणम्-दरभङ्गातः १९५७ तमे खिष्टाब्दे प्रकाशितम्-पृ.१०२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आर्यशूर-मातृचेटकम्बलाचार्याणामुल्लेखः। कालिदास-भारवि-मेण्ठ-माघादिभिः कविभिरयं भूयान् परिचितः। लीलावतीकथादमयन्तीचम्प्वोरपि नाम्नी समुद्धृतेऽनेन।

व्याकरणसूत्ररूपेण यत्रावश्यकता भवति तत्र चान्द्रसूत्राणि समुल्लिखति। परं चान्द्रव्याकरणानुरक्तोऽपि सादरं पाणिनिमपि समुद्दिशति। कामशास्त्रकाररूपेण मल्लनागनाम्ना वात्स्यायनः सूचितः। रत्नश्रीज्ञानः बौद्धन्यायशास्त्राद् धर्मकीर्तिकृतान् प्रमाणवार्त्तिकश्लोकान् न्यायसूत्रवैशेषिकसूत्राणि चानूद्योद्धरति।

१. एवं रत्नश्रीटीका बहुगुणाकारा न सम्पूर्णतोऽस्या मातृका केनापि सम्प्राप्ता। परं परवर्तिटीकाभ्योऽस्या टीकाया बहूपयोग इति तु सुनिश्चितमेव।

२. वादिजङ्घालः, वादिजङ्घलः, वादिजङ्घालभट्टो वा ९६३ तमेऽब्दे काव्यादर्शटीकामरचयत्[१]। एष टीकाकारः काश्यप-ब्रह्मदत्त-नन्दिस्वामि-भामहान् दण्डिपूर्ववर्त्याचार्यान् वर्णयति।

३. अज्ञातकर्तृकस्य हृदयङ्गमा टीका। अस्यां काश्यप-वररुचि-भामहानामेवोल्लेखः। एष टीकाकारः भोजस्य श्रृङ्गारप्रकाशात् सरस्वतीकण्ठाभरणाच्चांशान् गृहीत्वा स्वग्रन्थमरचयत्। अतः समयोऽस्य भोजकालादुत्तरकालीनः एकादशशताब्द्यन्तर्गतो विचार्यते।

४. तरुणवाचस्पतेः टीका। वाचस्पतिपुत्रः केशवभट्टारकः होयसलनरेशरामनाथस्य राज्यगुरुः आसीत्। अस्य राज्यारम्भः १२५५ ख्रिस्ताब्दः। द्वादशशताब्द्या अन्ते, त्रयोदशशताब्द्या आरम्भे वा प्रकाशितायामस्यां टीकायां सरस्वतीकण्ठाभरणाद्दशरूपकाच्च उद्धरणानि संकलितानि।

५. तरुणवाचस्पतिपुत्रः केशवभट्टारकोऽपि काव्यादर्शे टीकामलिखत् परमद्यावधि साऽप्रकाशिता।

---

१ 'भण्डारकर ओरियण्टल इन्स्टीट्यूट पूना' अत्र पाण्डुलिपिः। गङ्गवंशीयमारसिंहस्य ताम्रलेखे ९६३ ईस्वीये उल्लेखः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६. हरिनाथस्य मार्जना टीकाऽप्यप्रकाशिता। पाण्डुलिपिरस्या भाण्डारकरप्राच्यविद्यानुसन्धानकेन्द्रे सुरक्षिता। अस्यां टीकायां षोडशशताब्द्याः केशवमिश्रस्योल्लेखः। अयमेव हरिनाथो भोजसरस्वतीकण्ठाभरणस्यापि मार्जनानाम्नीं टीकामलिखत्।

७. मल्लिनाथस्य वैमल्यविधायिनीटीकापि नैवप्रकाशिता। अस्योल्लेखो विश्वेश्वरभट्टस्यालङ्कारकौस्तुभे काव्यादर्शस्यटीकाकार रूपेणोल्लेखः। समयोऽस्य शतब्द्यष्टादशकालः।

८. त्रिभुवनचन्द्रवादिसिंहस्य नाम्नो जैनकवेरपूर्णाऽप्रकाशिता टीका।

९. त्रिशरणतटभोमस्याप्रकाशिता चन्द्रिका टीका।

१०. गदाधरपुत्रस्य कृष्णशर्मणः च पौत्रस्य नरसिंहसूरेरप्रकाशिता दण्ड्यर्थमुक्तावली टीका।

११. विश्वनाथस्याप्रकाशिता टीका।

१२. भगीरथस्याप्रकाशिता टीका।

१३. विजयानन्दस्यापूर्णाऽप्रकाशिता च टीका, लिपिकालः १६२६ ख्रिस्ताब्दः। भाण्डारकप्राच्यविद्यानुसन्धानकेन्द्रे ग्रन्थसंख्या १२, सं. १२३ नाम्नी पाण्डुलिपिः सुरक्षिता।

१४. यामुनस्य यामुनेयस्य वा टीका। काव्यादर्शस्य चतुर्षु परिच्छेदेषु विभाजनम्। पाण्डुलिपिः उपर्युक्तसंख्यायां भा.प्रा.वि.अनुसन्धान केन्द्रे सुरक्षिता।

१५. कृष्णकिंकरतर्कवागीशस्य विवृतिनाम्नी, काव्यतत्त्वविवेकनाम्नी वाऽप्रकाशिता टीका। अस्याः पाण्डुलिपिः इण्डिया आफिस लाईब्रेरी लण्डननगरे सुरक्षिता।

१६. वाचस्पतेः, धर्मवाचस्पतेर्वा टीका। एषा तरुणवाचस्पतेरेव टीका।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१७. वरमादेशे बौद्धविद्वद्भिर्लिखितं टीकात्रयम्। अस्मिन् रत्नश्री-टीकैका सम्भवति।

एताः सर्वाः टीकाः प्राचीनटीकानाम्ना प्रख्याताः। नवीनानां टीकानां निर्देश इत्थं कर्तुं शक्यते।

१. प्रेमचन्द्रतर्कवागीशस्य मालिन्यप्रोञ्छनी टीका कलिकातानगरे १८९३ तमे खिस्ताब्दे प्रकाशिता।

२. जीवानन्दविद्यासागरस्य विवृतिः। १८८२ तमे खिस्ताब्दे कलिकातानगरे प्रकाशिता।

३. नृसिंहदेवशास्त्रिणः कुसुमप्रतिमानाम्नी टीका लवपुर—(लाहौर) नगरे १९२५ तमेऽब्दे प्रकाशिता।

४. रङ्गाचार्यशास्त्रिणः प्रभानाम्नी टीका १९३८ तमेऽब्दे पूना नगरे प्रकाशिता।

५. रामचन्द्रमिश्रस्य प्रकाशनाम्नी टीका। १९५८ तमेऽब्दे वाराणस्यां प्रकाशिता।

६. प्रो.धर्मेन्द्र कुमार गुप्तस्य सुदर्शननाम्नी टीका, १९७३ तमेऽब्दे दिल्ली नगरे प्रकाशिता।

एताभ्यः टीकाभ्यो भिन्ना तिब्बती-जर्मनी-अंग्रेज़ी-हिन्दीभाषासु लिखिता काश्चनान्या अपि टीकाःसंभवन्ति। परं तासामप्रकाशित्वात्तासां महत्त्वं नैव। परं एतासां बह्वीनां टीकानां कारणेन सर्वेभ्यः साहित्यशास्त्रपाठकेभ्यः समालोचकेभ्यो वा काव्यादर्श एको महत्त्वपूर्ण उपयोगिग्रन्थो विद्यते। काव्यादर्शे त्रयः परिच्छेदाः सन्ति। रङ्गाचार्यसंस्करणे चत्वारः परिच्छेदाः। यः तृतीयपरिच्छेदोऽन्यसंस्करणेष्वेकः स एव रङ्गाचार्येण द्विभागयोर्विभक्तः। मद्रासससंस्करणस्य चतुर्थः परिच्छेदो दोषचर्चया प्रारभ्यते। कलिकातासंस्करणे रंगाचार्य-संस्करणे च ६६० श्लोकाः सन्ति। मद्राससंस्करणे च ६६३ श्लोकाः सन्ति।

काव्यादर्शस्य त्रयाणां परिच्छेदानां विषया एते सन्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमे परिच्छेदे—काव्यलक्षणम्, तस्य गद्यपद्यमिश्रेषु त्रिषु भागेषु विभागः महाकाव्यलक्षणम्, गद्यभेदयोः कथाख्यायिकयोर्निरूपणमस्ति। दण्डिमते च कथाख्यायिकयोर्भेदाभावः। साहित्य-भेदरूपेण संस्कृतप्राकृतापभ्रंशमिश्रभेदानां वर्णनम्, वैदर्भिगौड़ीमार्गनिरूपणम्, दशगुणवर्णनम्, अनुप्रासलक्षणोदाहरणवर्णनम् तथा कवित्वस्यानिवार्याणां गुणानां प्रतिभाश्रुत्यभियोगानां स्वरूपमपि निर्दिष्टम्।

द्वितीयपरिच्छेदे— अलङ्कारलक्षणम्, तस्य पंचत्रिशंद् भेदाश्च निरूपिताः। दण्डिसम्मता अलङ्कारा इमे सन्ति—

स्वभावोक्तिः, उपमा, रूपकम्, दीपकम्, आवृत्तिः, आक्षेपः, अर्थान्तरन्यासः, व्यतिरेकः, विभावना, समासोक्तिः, अतिशयोक्तिः, उत्प्रेक्षा, हेतुः, सूक्ष्मः, लेशः (लवः), यथासंख्यः (क्रमः), प्रेयः, रसवत्, ऊर्जस्वि, पर्यायोक्तम्, समाहितम्, अपह्नुतिः, श्लेषः, विशेषोक्तिः, तुल्ययोगिता, विरोधः, अप्रस्तुतप्रशंसा, व्याजोक्तिः, निदर्शना, सहोक्तिः, परिवृत्तिः, आशीः, सङ्कीर्णम्, भाविकञ्च।

तृतीयपरिच्छेदे — षट्त्रिंशत्तमस्य यमकस्य विस्तृतं वर्णनं विद्यते। अत्रैव गोमूत्रिका-अर्धभ्रम-सर्वतोभद्र-स्वरस्थान-वर्णनियमादीनां चित्रबन्धानां लक्षणोदाहरणानिप्रदत्तानि।

अत्रैव प्रहेलिकायाः षोडशप्रकारा, दशविधा दोषाश्च। क्रमेण लक्षिताः। दण्डिनः कलापरिच्छेदलेखनस्यापि निर्देशः कृतः।[१]

आचार्यदण्डिनः काव्यादर्शः खण्डशो रीतिसम्प्रदायस्य आरम्भिको ग्रन्थः। यतो हि रीति (मार्गाद्) भिन्नाः अलङ्कारा दोषाश्चात्र वर्णिताः। अनेनैव कारणेन काव्यादर्शः साहित्य-सम्प्रदायेषु कस्याप्यन्यतमस्य समर्थको नास्ति। ग्रन्थकर्त्रा ग्रन्थोऽयं कस्यापि सुखार्थिनो राजपुत्रस्य कृते कृतः।

ग्रन्थस्य शैली सरला सारपूर्णा च। कवित्वदृष्ट्या दण्डी भामहादुत्कृष्टतरः। दण्डिनः सर्वाणि काव्योदाहरणानि मौलिकानि।

---

१ **इत्थं कलाचतुष्षष्टिविरोधः साधु नीयताम्।**
तस्याः कलापरिच्छेदे रूपमाविर्भविष्यति॥

काव्यादर्शः, ३-१७१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काव्यादर्शे उद्धृता ग्रन्था एते सन्ति—

छन्दोविचितिः[१](१-१२) बृहत्कथा[२](१.३८) सेतुबन्धः।[३]

एतेषु छन्दोविचितिसम्बन्धे केचित्समालोचका अचिन्तयन्-एष दण्डिनः स्वकीयो ग्रन्थः। परं एष वैदिकच्छन्दनिरूपको ग्रन्थः। पिङ्गलनागः तस्य कर्त्ता। जैमिनिसूत्रस्य शाबरभाष्येऽपि एष चर्चितः।[४]। कौटिल्यार्थशास्त्रम्[५], आपस्तम्ब[६]धर्मसूत्रमपि एतन्नाम सूचयतः।

परमद्यावधि छन्दोविचितेः मूलस्वरूपं पाण्डुलिपिर्वा नैवोपलभ्यते। सुबन्धुरपि छन्दोविचितिं पृथग्ग्रंथरूपेण न स्वीकरोति। छन्दोविचितिमिव भ्राजमानाम् इत्यत्र छन्दोविचितेर्व्याख्यां स छन्दःशास्त्ररूपेणैव विदधाति।

दण्डिनः काव्यशास्त्रग्रन्थस्य काव्यादर्शस्याविर्भावो युगे एतादृशेऽभवत् यस्मिन् विकासपरम्परा गतिशीला नासीत्। भरतमुनेरन्तरं काव्याशास्त्रविकासः कथं कीदृक् च प्रावर्तत। अस्य प्रमाणं किमपि नोपलभ्यते। वस्तुतः दण्डी तु काव्यशास्त्रम्, अलङ्कारशास्त्रं वा गतिशीलं विधाय कतिपयान् काव्यसिद्धान्तान् प्रौढान् व्यधत्त। दण्डिनः कालः काव्यस्यात्मस्वरूपं प्रति जागरूको नासीत्।

दण्डिनः किंवा भामहोद्भटरुद्रटानां लक्ष्यं काव्यशरीरवर्णनमेवासीत्। तथापि दण्डी दशगुणान् वैदर्भमार्गस्य प्राणान् निरूप्य काव्यशास्त्रस्य क्षेत्रे कथमप्यात्मतत्त्वस्य विवेचनं कृतवान् तथापि केवलं परोक्षरूपेणात्मतत्त्वनिरूपणमभवत् न तु प्रत्यक्षरूपेण। परं दण्डिनः काव्य मार्गस्य निरूपणम् (आत्मतत्त्वस्य निरूपणम् वा) उत्तरवर्त्तिनः काव्याचार्यस्य वामनस्य कृते

---

१ **छन्दोविचित्यां सकलस्तत्प्रपञ्चो निदर्शितः।**
सा विद्या नौस्तितीर्षूणां गम्भीरं काव्यसागरम्॥ तत्रैव

२ भूतभाषामयीं प्राहुरद्भुतार्थां बृहत्कथाम्। तत्रैव।

३ **महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः।**
सागरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम्॥ तत्रैवः—१-३४

४ शाबरभाष्यम् १.१.५. पृ.५४ आन्दाश्रमसीरीज़।

५ कौटिल्यार्थशास्त्रम्, १-३-१

६ आपस्तम्बधर्म.—२.४८.११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमं सोपानं सञ्जातम्, यस्य बलेन वामनः रीतिं काव्यात्मानं निरूपयामास।

शरीरं व्याख्यता दण्डिना काव्यलक्षणेऽपि पदा[1]वली विशिष्टं निरूपिता। एवं च बाह्यतत्त्वस्यैव परिभाषा दत्ता। अनुपदमेव चेष्टार्थव्यवच्छिन्नतां कथयता तेन शब्दैः सह अर्थस्यापि महत्त्वं सूचयामास। वस्तुतः आत्मतत्त्वप्रदर्शनाभावेऽपि दण्डिनः काव्यलक्षणमुत्तरवर्त्तिनामाचार्याणां विशेषतः पण्डितराजजगन्नाथस्य कृते मार्गप्रदर्शकं सञ्जातम्। पण्डितराजो जगन्नाथः काव्यलक्षणमेवं करोति[2]। परं द्वयोर्लक्षणयोर्महदन्तरं दृश्यते। दण्डिनो लक्षणं काव्यशरीरपरं, जगन्नाथस्य लक्षणं काव्यसौन्दर्यपरम्[3]।

दण्डिप्रभृतयः प्राचीनाचार्याः शरीरं सुन्दरं कर्तुमलङ्करणं प्रत्युन्मुखाः सन्तोऽलङ्काराणां लक्षणोदाहरणयोर्व्याख्याने विशेषतः संलग्नाः। एवं संस्कृतकाव्यशास्त्रस्यारंभः अलङ्कारशास्त्रस्यैवाविर्भावः। अत एव प्राचीना बहव आचार्याः स्वग्रन्थस्याभिधानं काव्यालङ्कारमेव कृतवन्तः। एते प्राचीनाचार्या अलङ्कारमात्मतत्त्वं स्वीकर्तुं प्रयतमाना अपि स्वलक्ष्यमधिगन्तुमसमर्थाः[4]। अत एवोत्तरकालीना अलङ्कारवादिनः आचार्या अपि प्राणतत्त्वरूपेणालङ्कारस्य स्थापनां कर्तुं नालम्।

आचार्यो दण्डी काव्यमार्गमलङ्कारं च साम्येनैव निरूपितवान्। अतः द्वौ सिद्धान्तावेवैष काव्यमूलसिद्धान्तरूपेण प्रतिपादितवान्। डा.सुशीलकुमारडे महोदयानां मतेन दण्डो रीतिवादी आचार्यः। तस्य काव्यमार्गसिद्धान्तेऽलङ्काराणां प्रमुखं स्थानम्। तस्य गुणा अलङ्कारेष्वन्तर्भुक्ता न तु गुणेष्वलङ्काराः। काव्यादर्शाभिधाने दण्डी काव्यालङ्काराद्भिन्नः सन्नपि मुख्यतोऽलङ्कारवादी एव। दण्डिनः भामहस्य विवादोऽलङ्कारसिद्धान्तविषयेऽलङ्कारस्थापनायां वा नैव वर्तते। तयोर्मतभेदस्तु—

हेतुसूक्ष्मादयोऽलङ्कारा अथवा न ?

---

१ शरीरं तावादिष्टार्थव्यवच्छिन्ना पदावली। काव्यादर्शः—१.१०

२ रमणीयार्थप्रतिपादकः शब्दः काव्यम्। रसगंगाधरः

३ रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता। तत्रैव

४ तदेवमलंकारा एव काव्ये प्रधानमिति प्राच्यानां मतम्।
रुय्यकः, अलंकारसर्वस्वम् पृ. ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निन्दोपमादय उपमा भेदा न वा ?

काव्ये नायकोत्कर्षं प्रदर्शयितुं प्रतिनायकस्य वंश-

वीर्यादिवर्णनं क्रियते नैव वा ?

कथाख्यायिकयोरन्तरं मन्येत न वा ?

प्रादेशिको मार्गविभागः स्वीकर्तव्यो न वा ?

गुणाः त्रयः स्युदर्श वा ?

ओजसि गुणे समासभूयत्वं स्यान्न वा ?

प्रतिज्ञाहेतुदृष्टान्तहानिदोषोऽस्ति न वा ?

ईदृक्प्रकारोऽस्ति ।

अलङ्कारनिरूपणे तयोर्मतैक्यमेवमस्ति ।

भामहस्यालङ्कारनिरूपणं यथा—

कवितासुन्दर्या वदनं कमनीयं सदपि विनालङ्कारं न [१]शोभते ॥

अत्र विषये दण्डी—

काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते ।
ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यति ॥[२]

अलङ्कारसिद्धान्तनिरूपणे द्वयोर्मुख्यमन्तरमस्ति दण्डी वक्रोक्तिनिरूपणेऽनेन सह स्वभावोक्तितत्त्वं गृह्णाति तत्र भामहः केवलं वक्रोक्तितत्त्वं मुख्यं मन्यते[३] । एतस्यैव प्रभावेण भामहो वक्रोक्तिवादी आचार्यो मन्यते । एवं दण्डिभामहौ द्वावेवालङ्कारवादिनौ ।

---

१ काव्यालङ्कारः—१-१४

२ काव्यादर्शः, दण्डी, २-१

३ वक्रोभिधेयशब्दोक्तिरिष्टा वाचामलाङ्कृतिः । काव्यालङ्कारः—१-३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दण्डिनः काव्यमार्गे वैदर्भगौड़ीयौ प्रस्फुटान्तरौ सन्तावपि ईक्षुदुग्धगुड़-माधुर्यवददृश्यान्तरौ। अत एव तयोः पृथग्विवेचनं सुतरां कठिनम्। अत एव दण्डी—

> इति मार्गद्वयं भिन्नं तत्स्वरूपनिरूपणात्।
> तद्भेदास्तु न शक्यन्ते वक्तुं प्रतिकवि स्थिताः॥[1]
> इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत्।
> तथापि न तदाख्यातुं सरस्वत्यपि शक्यते॥[2]

एष काव्यमार्गसिद्धान्त आधुनिकं शैलीसिद्धान्तमनुसरन्निव प्रतीयते।[3]

अस्यैव काव्यमार्गस्याङ्गभूतान् गुणान् दण्डी सशक्तरूपेण न चित्रयामास। स हि मार्गसदृशगुणान् न परिभाषते। अलांरवादित्वात् सोऽलङ्कारपरिभाषामेव गुणसमाहितामकरोत्।

एतस्यैतां न्यूनतां परिसमाप्य वामनः परिभाषामलङ्कारस्य गुणानुवर्तिनीं विधाय, अलङ्कारं नवीनरूपेण चित्रितवान्[4]।

गुणपरिभाषासु भरतादग्रे सङ्गच्छमानोऽपि दण्डी पूर्णस्फुटतां नाभिव्यनक्ति। उदारताकान्त्योर्लक्षणे—नातिस्फुटे। माधुर्यपरिभाषाऽपि न स्पष्टा। शब्दमाधुर्येऽर्थमाधुर्ये परस्परं समन्वयो नास्ति। अर्थमाधुर्यस्य भावात्मकत्वमप्यस्फुटम्। भावात्मकधर्माणां श्लेष-सुकुमारताऽर्थव्यक्तीनां भावात्मकविरोधो वर्णितः। माधुर्यसुकुमारतयोः प्रसादार्थव्यक्त्योः परस्परमन्तरमप्यस्फुटम्। उदारत्वकान्तिसमाधयोऽलङ्काररूपतां भजन्ते। गुणानां शब्दार्थाभ्यां सम्बन्धे सत्यपि तेषां शब्दगुणरूपेणार्थगुणरूपेण विभागो नैव कृतः।

गुणानामेतादृशे निरूपणे दोषयुक्ते स्फुटतारहिते सत्यपि दण्डिनो गुणनिरूपणं काव्यमार्गनिरूपणं चोत्तरवर्त्तिनां काव्यशास्त्रिणां कृते मार्गाधायक एव।

---

१ काव्यादर्शः, दण्डी—१-१०१

२ तत्रैव—१.१०२

३ सम कन्सेप्ट्स आँफ अलङ्कारशास्त्र, वे राघवन्, पृ. १४०

४ काव्यालङ्कासूत्रम्, वामनः ३-१-२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दण्डिनो दोषनिरूपणं सर्वथा वैज्ञानिकम्। कामं तेन दोषपरिभाषापि स्पष्टं न वर्णिता तथापि तस्य मतेन दोषाः परिस्फुटधर्माः सन्तो भावात्मका एव। दोषस्वरूपविषये दण्डी कथयति—

प्रसङ्गविशेषेऽवस्थाविशेषेवाऽनौचित्यहेतुर्यदि सहृदयहृदयमुद्वेजयति, स दोषरूपतामर्हति[१]। आचार्य म[२]म्मटविश्वना[३]थादिभिः काव्यात्मनिरूपणे दोषस्य यः स्वरूपः स एव दण्डिना प्राक्तने युगे प्रतिष्ठापितः। दण्डी दोषाननित्यान् स्वीकरोति। ते हि प्रसङ्गसापेक्षा अवस्थासापेक्षाः सन्तो दोषत्वमपि परिहरन्ति। गुणरूपतां च प्राप्नुवन्ति। एषा धारणाप्युत्तरवर्त्तिनामाचार्याणां कृते साहाय्यकारिणी एव।[४]

एवं दण्डिनो दोषनिरूपणं वस्तुतः सार्थकं विकासोन्मूलकं च।

दण्डिनोऽलङ्कारस्वरूपम्

दण्डी काव्यशास्त्रेऽलङ्कारवादित्वेनैव विख्यातः। स्वग्रन्थस्य प्रारम्भे स काव्यलक्षणं परिभाष्य, तस्मिन् के के साहाय्यं विधास्यन्ति, काव्यशरीरं वा के ह्युपकरिष्यन्ति ? प्रश्नस्यास्य समाधाने लेखको यं विचारं प्रस्तौति तत्र दृश्यतेऽलङ्कारप्राधान्यम्।[५] एतदलङ्कारप्राधान्यं च पुनः स एवालङ्कार-परिभाषायां प्रतिपादयति।[६] अतः काव्यशरीरं किं वा काव्यगतंशब्दं काव्यगतमर्थं चालङ्कारा एवालङ्कुर्वन्ति।

दण्डिनोऽलङ्कारसंख्या

दण्डिनोऽलङ्कारसंख्यायां स्फुटतया शब्दालङ्काराणामार्थालङ्काराणां च पृथक् परिगणनं न दृश्यते तथापि तस्यालङ्कारवर्गीकरणस्य समालोचनेन

---

१ काव्ये दोषा गुणाश्चैव विज्ञातव्या विचक्षणैः।
दोषा विपत्तये तत्र गुणाः संपत्तये तथा॥
काव्यादर्शः—३-१२४

२ मुख्यार्थहतिर्दोषः - काव्यप्रकाशः - ७-४९

३ रसापकर्षका दोषाः साहित्यदर्पणम् - ७.१

४ अस्ति काचिदवस्था सा साभिषङ्गस्य चेतसः।
यस्यां भवेदभिमता विरुद्धार्थापि भारती॥
काव्यादर्शः-३-१३३

५ तैः शरीरं च काव्यानामलङ्कारश्च दर्शितः। कव्यादर्शः—१.१०

६ काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते। तत्रैव-२.१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दालङ्काराणामर्थालङ्काराणां च भिन्ना भिन्ना संख्या ज्ञायत एव। काव्यादर्शेऽलङ्काराणां संख्या अष्टाचत्वारिंशद् वर्तते। तत्रार्थालङ्कारा एकोनचत्वारिंशत्, शब्दालङ्काराः च नव सन्ति,येषु प्रथमपरिच्छेदे प्रसङ्गतो वर्णितोऽनुप्रासोऽप्यस्ति।

अर्थालङ्कारेषु पञ्चत्रिंशदलङ्काराः स्वतन्त्र-सत्ताकाः, अनन्वयः-सन्देहौ [१]उपमाभेदेषु, उपमारूपको रूपकभेदेषु, उत्प्रेक्षाव[२]यवश्चत्प्रेक्षाभेदे निरूपितः, एवमेव उपमेयोपमाऽलङ्कारः उपमाभेदेषु अनन्योपमानाम्ना सन्दर्शितः।

शब्दालङ्कारा इमे सन्ति—

अनुप्रासः, यमकः, गोमूत्रिका, अर्धभ्रमः, सर्वतोभद्रः, स्वरनियमः, स्थाननियमः, वर्णनियमः, प्रहेलिका च। वस्तुतः एतेषु द्वावेव शब्दालङ्कारौ—अनुप्रासः, यमकः च। शिष्टाः सप्तालङ्काराश्चित्रमार्गरूपा एव।

प्राचीनालङ्कारिकेषु भामहोद्भटवामनरुद्रटप्रभृतिषु दण्डिसदृशी अलङ्कारविश्लेषणदक्षता नैव दृश्यते। स्वपूर्ववर्त्तिभरतप्रभृत्याचार्यान् अनाक्षिप्यैव, अलङ्काराणां च कात्स्न्येंन निरूपणं विधातुमशक्यत्वाद्दण्डी सनम्रं स्वालङ्कारनिरूपणसन्दर्भे कथयति[३]।

ततश्च परम्परागतान् सर्वानलङ्कारान् संगृह्यैकत्र निरूपयति। दण्डिवर्णिताऽलङ्कारभेदाः (सामान्येनैव निर्दिष्टा अपि) उत्तरैराचार्यैः स्वतन्त्ररूपेण स्वीकृताः। ते सन्ति—

अत्युक्तिः, अधिकम्, अनुमानम्, असङ्गतिः, कारकदीपकम्, निश्चयः, परिसंख्या, प्रतीपः, भ्रान्तिमान्, मीलितम्, विषमम्, समम्, समाधिश्च। एतेनाऽलङ्कारनिरूपणेनाऽलङ्कारभेदनिरूपणेन वा सम्यग् ज्ञायते—काव्यादर्शः शास्त्र-ग्रन्थः, आकरग्रन्थो वा, मार्गदर्शकशास्त्रं वा।

---

१ अनन्वयससन्देहावुपमास्वेव दर्शितौ।
उपमारूपकं चापि रूपकेष्वेव दर्शितम्॥ तत्रैव २-३५८

२ उत्प्रेक्षाभेद एवासावुत्प्रेक्षावयवोऽपि यः।
नानालङ्कारसंसृष्टिः संसृष्टिस्तु निगद्यते॥ तत्रैव २-३५९

३ किन्तु बीजं विकल्पानां पूर्वाचार्यैः प्रदर्शितम्।
तदेव परिसंस्कर्तुमयमस्मत्परिश्रमः॥ काव्यादर्शः - २.२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अलङ्काराणां भेदाः

दण्डिकृताः स्वतन्त्रता पंचत्रिंशदलङ्कारा भेदोपभेदरूपेण नवत्यधिकशत-रूपतां प्राप्नुवन्ति। तत्र—

उपमायाः—द्वात्रिंशत्।
आक्षेपस्य—चतुर्विंशतिः।
रूपकस्य—विंशतिः।
हेतोः—षोडश।
दीपकस्य—द्वादश।
व्यतिरेकस्य—दश। भेदाः सन्ति।

एवमेव

श्लेषस्य—नव।
अर्थान्तरन्यासस्य—अष्टौ।
रसवतः—अष्टौ।
विरोधस्य—षट्।
विशेषोक्तेः—पंच।
स्वभावोक्तेः—चत्वारः।
समासोक्तेः—चत्वारः।
लेशस्य—चत्वारः। भेदाः सन्ति।
आवृत्तेः—त्रयः।
अपह्नुतेः—त्रयः।

विभावना-अतिशयोक्ति-उत्प्रेक्षा-सूक्ष्म-श्रेयः-उदात्त-तुल्ययोगिता-व्याजस्तुति-निदर्शना-सहोक्ति-संसृष्टीनां द्वौ द्वौ भेदा॥

एकमेव भेदं धारयन्ति—
यथासंख्य-उर्जस्वि-पर्यायोक्त-समाहित-अप्रस्तुतप्रशंसा-परिवृत्तिः-आशीः-भाविकाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दालङ्कारेषु यमकस्यानेके भेदाः। एते संख्यारूपेण पञ्चदशाधिकत्रिंशतम्। परं केवलं पञ्चाशद्भेदानामेव स्वरचितोदाहरणानि प्रदत्तानि। एतादृशं यमकभेदप्रदर्शनं काव्याकारेषु दण्डिनं सर्वोत्तमपदे स्थापयति।

अन्येषु शब्दालङ्कारेषु स्वर-स्थान-वर्ण-नियमानां प्रत्येकं चत्वारो भेदाः प्रहेलिकायाश्च षोडश भेदाः प्रदर्शिताः। एतस्यालङ्कारभेदेषु गुण-रस-लक्षण-सन्धि-सन्ध्यङ्ग-वृत्ति-वृत्त्यङ्गानि स्वत एवान्तः स्यूतानि जायन्ते। तानि लेखकः काव्यशोभाकराण्येव निश्चिनोति।[1]

दण्डिनोऽलङ्कारनिरूपणे सर्वाधिकं गौरवास्पदमस्ति स्वभावोक्त्यलङ्कार-निदर्शनम्। एतस्यालङ्कारस्य माध्यमेन दण्डी यां कविस्वाभाविकतां निर्दिशति, सैव भामहस्य वक्रोक्तिस्थापनायां, किं चाचार्यकुन्तकस्य 'वक्रोक्तिः काव्यजीवितम्' एवं काव्यसम्प्रदायेषु अन्यतमस्य सम्प्रदायस्योद्भाविका सञ्जाता।

भाविकालङ्कारस्य लक्षणे दण्डी यं भावविशेषं स्थापयति, यो गुणालङ्कारयोः समन्वयकारकः सन् कवेः काव्यस्य सौन्दर्यतत्त्वमुद्भावयति, स एव भावः काव्यस्य प्रयोजकः सन् आद्यन्तं यावद्विद्यमानो नीरसेऽपि शब्द-समूहे प्राण-सञ्चारं करोति।[2]

एतस्यैव भावस्य विषये विश्वनाथः स्वविचारान् प्रश्नोत्तररूपेणैव सङ्केतयति—

काव्ये, नाटकादिषु वा यानि पद्यानि सौन्दर्यतत्त्वरहितानि, तेषु रसत्वं कथं स्वीकरिष्यते। स्वयं च उत्तरति-रसयुक्तेषु पद्येषु यो रसरूपः स एव नीरसपद्येषु रसिकतामापादयति।[3] अनेन दण्डिनः काव्यक्षेत्रे कौशलत्वं परिचीयते, यस्य भावः एव विश्वनाथेन रसरूपे स्वीकृतः।

---

१ यच्च सन्ध्यङ्गवृत्त्यङ्ग लक्षणाद्यागमान्तरे। व्यावर्णितमिदं चेष्टमलङ्कारतयैव नः॥ काव्यादर्शः—२-३६७

२ भाविकत्वमिति प्राहुः प्रबन्धविषयं गुणम्। भावः कवेरभिप्रायः काव्येष्वासिद्धि संस्थितः॥ तत्रैव २.३६४ व्यक्तिरुक्तिक्रमबलाद् गम्भीरस्यापि वस्तुनः। भावायत्तमिदं सर्वमिति तद्भाविकं विदुः॥ तत्रैव-२-३६६

३ ननु तर्हि प्रबन्धान्तर्वर्तिनां केषाञ्चिन्नीरसानां पद्यानां काव्यत्वं न स्यादिति चेन्न? रसवत्पद्यान्तर्गतनीरसपदानामिवपद्यरसेन प्रबन्धरसेनैव तेषां रसवत्ताङ्गीकारात्। साहित्यदर्पणम्, विश्वनाथः, पृ.१९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दण्डिनोऽलङ्कारपरिभाषया विशेषरूपेण विरोधमूलकानामलङ्काराणां परिभाषाः सुस्पष्टं नैव व्याख्याताः। एतस्यालङ्कारभेदानामैतिहासिकमहत्त्वे सत्यपि स्वरूपनिर्धारणं न तथाभिव्यक्तम्। दण्डिनो वैदुष्यं दक्षत्वं चानेनैव परिचीयते यदेतत्प्रदत्तानि सर्वाण्युदाहरणनि तेन स्वयमेव रचितानि। एतस्य बहूनि काव्योदाहरणानि परवर्त्तिभिराचार्यैर्यथातथमेव स्वीकृतानि। कानिचिदुदाहरणनि च सुभाषितरूपेणापि प्रख्यातानि।

उपर्युक्तविश्लेषणेन दण्डिनः काव्यशास्त्रस्य प्रत्येकं क्षेत्रेऽमूल्यं कृतित्वं द्योतते। पूर्वविद्यमानानां संकल्पनानां न केवलं नूतनव्याख्या प्रस्तुता। परं तासु समाशोधनमपि कृतम्। वस्तुतो दण्डिनः प्रतिभा नवनवोन्मेषशालिनी, शक्तिश्च विशदविवेचनपूर्णा, सूक्ष्मेक्षिकासंयुक्तं वैदुष्यं च सर्वैः काव्यसमालोचकैः संस्तूयते। अतः दण्डिनः काव्यादर्शः संस्कृतकाव्यशास्त्रपरम्परायां पुरातनसिद्धान्त-प्रतिपादने नूतनसिद्धान्तानां च प्रस्तुतीकरणे सर्वेषां काव्यशास्त्राध्येतॄणां कृते मार्गदर्शकः।

उत्तरवर्त्तिषु काव्याचार्येषु दण्डिनः प्रभावः

दण्डिनः काव्यादर्शपरिचये पूर्वं तावद्भामहोपरि तस्य प्रभावोऽनयोः साम्ये पार्थक्ये च यद्यन्मतं तत्सर्वं प्रदर्शितम्। दण्डिभामहयोः पौर्वापर्ये च यानि मतानि सन्ति तेषां सर्वेषां व्याख्यानेन निर्धारितं यद्भामहो दण्डयुत्तरवर्त्ती एव।

काश्मीरसाहित्यशास्त्रिणामाचार्याणां परम्परा दण्ड्यपेक्षया भामहं प्रति समाकृष्टा यतो हि भामहः काश्मीरप्रान्तीयः। तेषु जयापीडस्य राजसभायां (७७९-८१३ ख्रिस्ताब्दे) उद्भट आचार्यो द्वादशालङ्करणां लक्षणानि भामहादेव यथातथं गृहीतानि।

आचार्ये वामने उद्भटसमकालीने काश्मीरप्रदेशीये सत्यपि दण्डिनः प्रभावः स्फुटं लक्ष्यते। दण्डिनो दश गुणान् शब्दगुणार्थगुणरूपेण विभज्य विंशतिसंख्याकान् अकरोत्। दण्डिनः द्वौ काव्यमार्गौ पाञ्चाल्या नवीनया रीत्या संयोज्यैष सर्वप्रथमं काव्यात्मपदे रीतिं संस्थापयामास। वामनस्य काव्यासिद्धान्तेषु यत्र तत्र दण्डिप्रभावो विद्यते।

काश्मीरपरम्पराया एवाचार्यो रुद्रटः (८५० ख्रिस्ताब्दः) दण्डिपरम्परां पोषयन् काव्यस्य तिसृषु रीतिषु चतुर्थी लाटीं रीतिं संयुयोज। रुद्रटस्य नवीनेष्वलङ्कार-विकल्पेषु दण्डिनोऽलङ्कारविकल्पप्रभावो दृश्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अग्निपुराणस्य येषु (३३७-४७) अध्यायेषु काव्यक्षेत्राणां निरूपणं, तत्र काव्यलक्षणं, काव्यभेदाः, रीतिः, अलंकाराः, गुणा दोषाश्च लक्षिताः। अत्र कतिपयेषां गुणानामलङ्काराणां च लक्षणानि दण्डिनो लक्षणैः पूर्णसमानि विद्यन्ते।

अग्निपुराणानन्तरं पूर्वप्रचलिताऽलङ्काररीतियुगपरम्परा परिसमाप्ता। इतः प्रभृति काव्यात्मविषये यो विचारः प्रारब्धः, तत्र प्रथमो ग्रन्थो ध्वन्यालोकः।अस्य टीकाकारोऽभिनवगुप्ताो गुणालङ्कारभेदनिरूपणे, रसनिष्पत्तिप्रसङ्गे, चम्पूकाव्यप्रसङ्गे चाचार्यं दण्डिनं सादरं निर्दिशति।

राजशेखरः स्वकाव्यमीमांसायां बहूनां काव्यशास्त्राचार्याणां परिचयेषु, कविसमयस्थापनाप्रसङ्गे काव्यादर्शस्यैकं पद्यमुद्धरति[१]

काश्मीरप्रदेशीय आचार्यः कुन्तको वक्रोक्तिजीविते नाम्नि स्वग्रन्थे वक्रोक्तिनिरूपणं काव्यात्मरूपे करोति। वस्तुतो वक्रोक्तिराधुनिकं शैलीविज्ञानम्। अत्र भावपक्षापेक्षया कलापक्ष उत्कृष्टतरः साध्यते। रसोऽप्यत्र वाक्यवक्रतायाः प्रबन्धवक्रताया एवैकं रूपम्। वक्रोक्तिव्याख्याने रीतिसिद्धान्तस्य परम्पराऽनिवार्या। कुन्तकः सुकुमारविचित्रमध्यमान् काव्यमार्गान् व्याचष्टे। त एते मार्गा वैदर्भीगौड़ीपाञ्चालीरूपा एव। कुन्तको हि स्वग्रन्थे दण्डिनं लक्षणकारनाम्नोल्लिखति।

दशमशताब्द्यां एकादशशताब्द्याः प्रारम्भे वा भोजदेवक्षेमेन्द्र-महिमभट्ट-मम्मटेषु सरस्वतीकण्ठाभरणश्रृङ्गारप्रकाशयोर्लेखकः भोजदेवः एकचत्वारिंशत् कारिकाः चतुष्षष्ट्यधिकैकशतं च श्लोका दण्डिना यथातथं गृहीताः।

आचार्यः क्षेमेन्द्र औचित्यविचारचर्चायामौचित्यसिद्धान्तं व्याचष्टे। औचित्यं गुणदोषालङ्कारेष्वनिवार्यमेव। अतः दण्डिनो गुणदोषालङ्कारपरिभाषासु औचित्यबीजानि लक्षितुं पार्यन्ते। काममीदृशमालोचनं प्रशस्तं न मन्यते परं उत्तरवर्त्तिषु लेखकेषु पूर्ववर्त्तिनः प्रभावं निर्णेतुमेतादृशमनुसन्धानं लक्ष्यपरमेव भवति।

आचार्य क्षेमेन्द्रानन्तरं व्यंजना, ध्वनिविषयका ग्रन्था लिखिताः, महिमभट्ट-मम्भट-वाग्भटादय एत आचार्या यत्र तत्र प्रसंगेषु रीतिशब्दं तु प्रयुञ्जते,

---

१ मण्डलीकृत्य बर्हाणि कण्ठैर्मधुरगीतिभिः। कलापिनः प्रनृत्यन्ति काले जीमूतमालिनि॥ काव्यादर्शः—१-७०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परं स्पष्टतया निर्देशं न विदधते। एतेषु वाग्भटस्य गुणाविवेचनं दण्डिना स्फुटं साम्यं विदधाति। द्वादशशताब्द्या अन्ते त्रयोदशशताब्द्याः प्रारम्भे वा शोभाकरमित्रोऽलङ्काररत्नाकरनामकं ग्रन्थं विरचितवान्। नाम्नैव काव्यालङ्कारपरम्पराप्रतिपादक एष ग्रन्थः। अस्योपपरि दण्डिभामहरुद्रटानां प्रभावः सुस्पष्टः।

चन्द्रालोककर्ता जयदेवः त्रयोदशशताब्द्यां प्रायशः सर्वेषां काव्यशास्त्र-विषयाणां विवेचनं करोति। अस्यालङ्कारविचारः सर्वथा पूर्ववर्त्तिभिराचार्यैः सह साम्यधारकः। तेषु तेषु चाचार्येषु दण्डी विशिष्टं स्थानं लभते। यतो ह्येष एव प्रथम अलङ्कारसंस्थापक आचार्यः।

चतुर्दशशताब्द्या लेखको वाग्भटद्वितीयः स्वकीये काव्यानुशासने लक्ष-णग्रन्थे गुणविवेचनं सम्यग् विदधति। अत एषोऽपि वामनवाग्भटप्रथमाभ्यां सह दण्डिनं प्रति कृतोपकारित्वं ज्ञापयति।

काव्यलक्षणकारेषु प्रायशोऽन्तिम आचार्यः पण्डितराजो जगन्नाथः काव्यलक्षणे रमणीयार्थं विशदं व्याख्याति। रमणीयतायाः काव्यसौन्दर्यं द्वितीयार्थः। काव्यसौन्दर्याय च गुणालङ्काररीतीनां सम्यक् सन्नि-वेशोऽनिवार्यः। दण्डी च काव्यादर्शे गुणालङ्कारविवेचनं प्राथम्येन विहित-वान्। अतः पण्डितराजोऽपि दण्डिनं प्रति कृतज्ञतामर्हति।

काव्यादर्श एवं भारतीयकाव्यशास्त्रपरम्परायां महत्त्वपूर्णं स्थानमाकल-यति। कामं दण्डिपूर्ववर्त्तिन आचार्याः तेनापरिचिताः तथापि सर्वे पूर्वाचार्याः तेन परिचिता एवासन्। आचार्यो दण्डी लिखति—

इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीव्यते॥[1]

अनेन कथनेनाचार्यः सर्वानेव काव्यपथि वर्तमानान् आचार्यान् शब्द-ज्योतिः प्रति समुत्सुकान् स्वीकरोति। महर्षि-पतञ्जलेः कथनमस्ति-लक्ष्यल-क्षणे व्याकरणम्।[2] यस्य तात्पर्यमस्ति लक्ष्ये पूर्वं विद्यमाने सति तस्य लक्षणं क्रियते। अतः स्पष्टमिदं यदाचार्यो दण्डी यदा काव्यादर्शं

---

१ काव्यदर्शः—१-४
२ महाभाष्यम्, पतञ्जलिः, पस्पशाह्निकम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विरचितवान् तस्य सम्मुखे कतिपयानि लक्ष्याणि विद्यमानान्येवासन्। तानि बाल्मीकिरामायणसदृशानि वा स्युः, रघुवंशसदृशानि वा स्युः, सेतुबन्धसदृशानि वा स्युः। तेषां तेषां स्वकाले वर्तमानानां लक्ष्याणां रूपं दर्शं दर्शं दण्डी स्वकाव्यक्षेत्रपरम्पराः, धारणा लक्षणानि वा विनिर्ममे।

आचार्यदण्डिनः प्रयासः सर्वथा श्लाध्यो येन सर्वेषामुत्तरवर्त्तिनामाचार्याणां कृते प्रकाशस्तम्भरूपो ग्रन्थो निर्मितः। तैः तैः सर्वैरुत्तरवर्त्तिभिराचार्यैः स्व-स्व-जिज्ञासां शमयितुं, स्वविचारान् वा समेधयितुं दण्डिनः तत् तत् सर्वं गृहीतं यत्तेषां कृते स्वीकार्यमभवत्। यद्यच्च त्याज्यं तत्सर्वथा परित्यक्तम्। एवमाचार्यो दण्डी काव्यक्षेत्रे युगान्तरं यावद् देदीप्यमाननक्षत्रमिव राराजमानो भविष्यति।

राष्ट्रियसंस्कृतसंस्थानस्य निदेशकमहोदयानामाभारप्रदर्शनं क्रियते मैः प्रकाशनव्ययं स्वीकृतम् शास्त्रप्रकाशनयोजनायाम्। **दिल्लीस्थनागप्रकाशकेन** सर्वविधसुन्दरं प्रकाशनं कृतमतोहि ते धन्यवादार्हा। अन्ते च क्षमायाचनां करोमि संस्करणेऽस्मिन् असावधानतया यापि त्रुटयः स्युस्ताः क्षन्तव्याः।

विदुषां वशंवदः
डा. योगेश्वरदत्तशर्मा
हिन्दूमहाविद्यालये,
दिल्ली विश्वविद्यालयस्थे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयानुक्रमणिका

प्रथम खण्ड

विषयः	पत्राङ्कः
भूमिका	i-xxxviii
प्रथमे परिच्छेदे	
मङ्गलाचरणम्	१
काव्यलक्षणप्रणयने प्रतिज्ञा	७
वाक्प्रशंसा	१०
काव्ये दोषः तत्परिहारश्च शास्त्राधीनः	२८
काव्यशरीरम्	४२
काव्यभेदः	५४
छन्दोविचितिप्रशंसा	५८
पद्यकाव्यभेदाः	६१
महाकाव्यलक्षणम्	६६
अङ्गहीनस्यापि महाकाव्यस्योपादेयता	९०
नायकप्रतिनायकवर्णने पौर्वापर्यम्	९३
गद्यकाव्यभेदचर्चा	९९
मिश्रकाव्योद्देशः	१३०
भाषाभेदेन वाङ्मयभेदः	१३४
विनियोगभेदेन तद्भेदः	१५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयः **पत्राङ्कः**

मार्गभेदचर्चा	१६५
गुणोद्देशः	१७४
श्लेषः	१७६
प्रसादः	१९२
समता	२०३
माधुर्यम्	२२४
अंनुप्रासः	२४२
यमकम्	२६२
ग्राम्यत्वदोषः	२७१
सुकुमारता	२८९
अर्थव्यक्तिः	३०९
नेयत्वदोषः	३१७
उदारत्वम्	३२४
ओजः	३३८
कान्तिः	३५६
समाधिः	३७८
काव्यसंपत्कारणम्	४०१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमः परिच्छेदः।

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती॥१॥

हृदयङ्गमा

प्रणम्य कमलाकान्तं भक्ताभीष्टफलप्रदम्।
काव्यादर्शस्य विवृतिं वितनोमि मतां मुदे॥

किंवदन्तीयं यत् महामहोपाध्यायः श्रीमान् दण्डीनाम कविः ग्रन्थमिमं स्वयं विरच्य कमपि राजपुत्रम् अध्यापयामास इति।

ग्रन्थारम्भे निर्विघ्नेन प्रारिप्सितपरिसमाप्तिकामनया कविर्ग्रन्थाधिष्ठात्रीतया वाग्देवतायाः स्मरणरूपमङ्गलमाचरन्नाह,– चतुर्मुखेति।–चतुर्मुखस्य ब्रह्मणः, मुखान्येव अम्भोजवनानि पद्मवृन्दानि, तेषु हंसबधूः हंसीस्वरूपा, (एतेन विशेषणपदेन चतुर्मुखमुखविहारिणौ श्रुतिरूपा सरस्वती यथा परिशुद्धा तादृशी सरस्वती मम मानसगता भवतु, न तु नीचजनमुखवसतिरिति प्रतीयते)। अत एव विशेषणान्तरमाह, सर्वशुक्लेति।–सर्वशुक्ला सर्वतः सर्वप्रकारेण, स्वरूपतः अर्थतश्च इत्यर्थः, शुक्ला दोषरहितत्वेन निर्म्मला, काव्यापकर्षकदोषहीनेति यावत्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वावयवेन श्वेतवर्णा च, सरस्वती वागधिष्ठात्री देवी, भगवतो विष्णोर्मूर्त्तिरिति यावत्, (एतेनास्याः काव्यरूपता प्रतीयते, काव्यरूपायाश्च विष्णुमूर्त्तित्वं विष्णुपुराणेऽभिहितं यथा,– ''काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च। शब्दमूर्त्तिधरस्यैते विष्णोरंशा महात्मनः।।'' इति), नित्यं सततं, मम मानसे चेतसि, तदाख्यसरसि च, रमतां विहरतु। मानसे सरसि पद्मवनेषु हंसीव या ब्रह्मणो मुखकमलेषु श्रुतिरूपेण सततं विहरति, सा सर्वशुद्धा वाग्देवी मम हृदये सततं वसतु इति निष्कर्षः। ''नित्यम्'' इत्यत्र ''दीर्घम्'' इति पाठे–दीर्घं सुचिरमित्यर्थः। (अत्र मुखे पद्मवनत्वारोपः सरस्वत्यां हंसवधूत्वारोपे हेतुः, अतः परम्परितरूपकालङ्कारः)।।१।।

प्रभा

कदम्बतरुमण्डिते विहगवृन्दसंसेविते
कलिन्दतनयाश्रिते मुरलिकारवान्दोलिते।
कदम्बितगवादृते बुधनुते च वृन्दावने
लसन्तमतुलद्युतिं सुरवरं मुकुन्दं नुमः।।१।।

श्रुतिगम्यां भावहृद्यां निरवद्यां रसात्मिकाम्।
शुद्धानन्दां चित्स्वरूपां ब्राह्मीं देवीं स्तुमः सदा।।२।।

बिम्बग्राहितया स्तुवन्ति विबुधा आदर्शरत्नं यथा
काव्यादर्शममुं तथा सहृदयाः काव्यार्थसंग्राहतः।
तत्राद्यस्य हिताय कापि विमला वर्वर्ति भानोः प्रभा
तद्वच्चास्य विकासनाय भवताट्टीका ममेयं प्रभा।।३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इह खलु विविधशास्त्रप्रवीणः सहृदयधुरीणः कविप्रवर आचार्यो दण्डी काव्यलक्षणात्मकमिमं प्रबन्धमारभमाणः –मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च मङ्गलयुक्ता यथा स्युः –[म० भा० १. १. ३] इति शिष्टानुशिष्टं सदाचारमनुसंदधानो ग्रन्थारम्भे समुचितेष्टदेवतां सरस्वतीं प्रार्थयते–**चतुर्मुखेति**। सरस्वती सरः सर्वविषयेषु प्रसरणं गतिरस्या अस्तीति व्युत्पत्त्या सरस्वती वागधिष्ठात्री देवता। मम मानसे अन्तःकरणे सरोविशेषे च। नित्यं सर्वदा। रमतां विहरताम्। सर्वदा मम चेतसि आविर्भूय विलसत्वित्यर्थः। सरस्वत्या माहात्म्योद्भावनाय तां विशिनष्टि–**चतुर्मुखेति**। चत्वारि मुखानि यस्य स चतुर्मुखो ब्रह्मा तस्य मुखान्येवाम्भोजानि तेषां वनं समूहः तत्र हंसवधूर्हंसीव। हंसी यथा कमलवने विहरति तथा चतुर्मुखमुखाम्भोजेषु सानन्दं विहरणशीला। अनेन सरस्वत्या वेदस्वरूपत्वं तेन च पावित्र्यं सर्वार्थज्ञातृत्वं च सूचितम्। तस्याः स्वरूपावगमायाह–सर्वेति। सर्वतः स्वरूपतोर्थतश्च शुक्ला श्वेतवर्णा निर्दोषा च। पदपदांशवाक्यार्थरसगतदोषरहितेत्यर्थः। तथा चास्याः श्वेतस्वरूपवर्णनं ब्रह्मवैवर्ते–

आविर्बभूव तत्पश्चान्मुखतः परमात्मनः।
एका देवी शुक्लवर्णा वीणापुस्तकधारिणी॥

कोटिपूर्णेन्दुशोभाढ्या शरत्पङ्कजलोचना। इति।

केचित्तु सरस्वती मानसे रमतामित्यस्य वाक्यस्य मम सरस्वती शिष्याणां मानसे रमतामित्यध्यहारपूर्वकमर्थं निराहुः। परं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तादृशाध्याहारस्यानुचितत्वात् तन्न रुचिरम्। सर्वशुक्लेत्यत्र सति बाधके संकोचस्यादरणीयत्वेन सर्वशब्दस्य करचरणतलाधर-नयनादिभिन्नाङ्गत्वपरत्वमुन्नेयमिति प्रेमचन्द्रतर्कवागीशाः। हंसी मानससरसि कमलवने च रमत इति प्रथितमेव काव्यलक्षण-प्रपञ्चात्मकेऽस्मिन् ग्रन्थ आदावेव काव्यजीवातुभूतायाः सरस्वत्या आवाहनमतीव समुचितं मनोहरं चेति ज्ञेयम्। अत्र सरस्वत्यां हंसवधूत्वारोपं प्रति चतुर्मुखेऽम्भोजवनत्वारोपो हेतुरिति परंपरितरूपकमिदम्। मुखमुखेति छेकानुप्रासश्च।—नीलोत्पल-दलश्यामां विज्जिकां मामजानता। वृथैव दण्डिना प्रोक्तं सर्वशुक्ला सरस्वती।।—एतद्विज्जिकापद्यममुं श्लोकं विचिन्त्यैवेति स्पष्टम्।।१।।

विवृति

मुरारिनाभिकमलाज्जातो यश्चतुराननः।
ज्ञानं मे तत्प्रिया देयाद्विश्वशुभ्रा तु भारती।।

लक्ष्मीवल्लभमनिशं वन्दे वसुदेवनन्दनं कृष्णम्।
नीता वराहवपुषा समुन्नतिं येन वसुधेयम्।।

अविघ्नेन शास्त्रसमाप्तिमभिवाञ्छन् चतुर्मुखेत्यादिना आशीर्द्वारेण वाग्देवतामभिष्टौति। चतुर्मुखो ब्रह्मा। तस्य मुखान्यम्भोजानीव मुखाम्भोजानि 'उपमितं व्याघ्रादिभिः' इत्यादिना समासः। तेषां वनमिव वनं समूहः पद्मषण्डः। हंसस्य वधूः हंसी। सा, मानसं सरः चित्तं चोच्यते तत्र मम मानसे मम चेतसि रमताम्। नित्यं दीर्घकालमिति 'कालभावाध्वगन्तव्याः कर्मसंज्ञा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्यकर्मणाम्' इति कर्मसंज्ञा। ततः कर्मणि द्वितीया। रमतामित्याशिषि लोट्। सर्वं शुक्लमनवद्यं वाङ्मनः शरीरं यस्याः सा सर्वशुक्ला सर्वानवद्या। शुक्लशब्दोऽयमनवद्यवाची। सरस्वती वाग्देवता भारती। तेन सर्वशुक्ला श्वित्रिणीति न कुचोद्यस्यावकाशः। वर्णपदवाक्यात्मकरूपत्वाद्वाचो न शुक्लादिरूपशङ्काऽप्यस्ति, वाचामाकाशगुणत्वेन निर्गुणत्वाच्च। शब्दे माधुर्यादिकमपीहोक्त-मुपचरितं पृथिव्युदकयोः समवेतं कविभिरभिष्टूयमानं न वास्तवमिति प्रत्येतव्यम्। ये च भक्तिभरनम्रमानसाः शिरोग्रीवाद्यवयवसन्निवेशवर्ती स्त्रियं सरस्वतीं परिकल्पयन्ति, तेषामपि मते सर्वशुक्लेति श्वित्रिदोषापादनं न दुष्परिहरम्। सर्वशुक्लेति प्रकारकात्स्न्र्ये वर्तमानस्येह सर्वशब्दस्योपादानम्; यथा 'सर्वदीनो भिक्षुः'। तेन करचरणतलजिह्वाक्षिपक्ष्मभ्रूरोमशिरोरुहादिवर्जं सर्वं शुक्लमङ्गं लभ्यत इत्यनवद्यम्।।१।।

काव्यलक्षणात्मकं प्रबन्धमारभमाणः तस्य निष्प्रत्यूहपरिसमाप्त्यर्थं शब्दाधिदेवतां सरस्वतीं स्वचित्ते सन्निधिं प्रार्थयते–**चतुर्मुखेति**। चतुर्मुखस्य मुखाम्भोजवने हंसवधूः हंसीभवन्ती। सर्वशुक्ला सर्वस्माच्छुक्लतरा सर्वस्मात् स्वेतरस्मात् शुक्लपदार्थादतिशयेन शुक्ला; वृत्तौ तरपो लोप इति वचनात् समासे तरपो लोपे सति, सर्वशुक्लेति रूपसिद्धिः। यद्वा सर्वः सकलः शुक्लः शुक्लगुणो यस्यां सा सर्वशुक्ल, अतिशयितशुक्लगुणेति यावत्। एवंरूपो ध्यानविशेषः कवित्वप्रकर्षावह इत्यभियुक्ताः। सा सरस्वती मम मानसे मनोरूपे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सरसि नित्यं रमतां यावत्प्रबन्धपरिसमाप्ति सन्निधत्ताम्। मुखानां पङ्कजवनत्वेन तत्र सरस्वत्याः हंसीत्वेन च श्लेषेण रूपणात् श्लेषानुविद्धं परम्परितरूपकमत्रालङ्कारः।।१।।

शास्त्रमारभमाणानां विदुषाम् आशीर्नमस्क्रिया-वस्तुनिर्देशेष्वन्यतमस्य करणीयत्वात् असावपि काव्यादर्शकारः सकलकलाकलापालोकनविनिश्चितबुद्धिराचार्यः स्वशास्त्र-स्याविघ्नसमाप्तये वाग्देवतां मनसि प्रतिष्ठापयितुकामः आशीर्वादमुखेन सरस्वतीं स्तौति–**चतुर्मुखेति।** कमलासनस्य मुखकमलवने हंसवधूरिव रममाणा सर्वशुक्ला सरस्वती, मानसाख्ये सरसि कमलवनसञ्चारिणी हंसी यथा रमते, तथा मम चेतसि दीर्घं रमतां इत्याशास्ते।।१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वशास्त्राणि संहृत्य प्रयोगानुपलक्ष्य च।
यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणम्।।२।।

हृदयङ्गमा

सम्प्रति "ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते। ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः।।" इति शास्त्रमनुस्मरन् ग्रन्थस्यास्य अभिधेयं निर्दिशन् प्रतिजानीते, पूर्वशास्त्राणीति।– पूर्वेषां कवीनां भरतादीनां, शास्त्राणि काव्यग्रन्थान्, संहृत्य सङ्क्षेपेण तेभ्यः सारमाकृष्य, प्रयोगान् महाकाव्यादिषु प्रयुक्तान् विषयान्, उपलभ्य समालोच्य च, (एतेन महाकविप्रयोगविरुद्धं प्राचीनशास्त्रमपि परिहृत्य प्रयोगानुसारि- पूर्वशास्त्रानुसारेणा स्माभिरेतत् क्रियते इति सूचितम्)। अस्माभिः यथासामर्थ्यं यथाशक्ति, यथाज्ञानमिति यावत्, काव्यस्य लक्षणं स्वरूपं, लक्ष्यते ज्ञायते अनेनेति व्युत्पत्त्या लक्षणम् इतरव्यवच्छेदकः असामान्यधर्म इति यावत्, क्रियते "इष्टार्थव्यवच्छिन्ना पदावली" इति वक्ष्यमाणवाक्येन निर्णीयते। (एतेन काव्यमेव ग्रन्थस्य अभिधेयं दर्शितं, प्रयोजनञ्चातः परं वक्ष्यते। सम्बन्धश्च यथायथं स्वधिया निरूपणीयः)।।२।।

प्रभा

प्रतिपाद्यविषयं विवक्षुराह–**पूर्वशास्त्राणीति।** पूर्वेषां शिलालि–भरतप्रभृतीनां शास्त्राणि नाटयसूत्रादीनि। संहृत्य समुच्चित्य संक्षिप्येति यावत्। तानि सर्वाणि संगृह्येति भावः। तथा प्रयोगान् व्यासवाल्मीकिप्रभृतिमहाकविप्रबन्धेषु स्थितान्। उपलक्ष्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूक्ष्मेक्षिकया निरूप्य। अनेन न केवलोयं प्रबन्धः शास्त्रनियमानुसारी अपि तु तत्प्रयोजनीभूतकविप्रयोगानुसारीति सूचितम्। यथासामर्थ्यं स्वसामर्थ्यानुरूपम्। विनयोक्तिरेषा। अस्माभिर्मया दण्डिना। अस्मदो द्वयोश्च (पा० १.२.५९) इति बहुवचनम्। काव्यलक्षणम् काव्यस्य लक्षणम्। लक्ष्यते ज्ञायते स्वरूपमनेनेति लक्षणम्। इतरव्यवच्छेदकः काव्यपर्याप्तवृत्तिरसामान्यो धर्मविशेष इत्यर्थः। क्रियते–इष्टार्थव्यवच्छिन्ना पदावलिः– [१.१०] इत्यादिना प्रतिपाद्यते। अनेनास्य ग्रन्थस्य प्रतिपाद्यं दर्शितम्। प्रयोजनं चाग्रे [१.९] स्फुटीभविष्यति। प्रतिपाद्यप्रतिपादकयोः संबन्धस्तु ज्ञाप्यज्ञापकभावः। अधिकारी व्युत्पन्नः सहृदयः। एतेषां हि विषयादिचतुर्णां ग्रन्थारम्भे कथनमवश्यमपेक्ष्यते। यतः–

ज्ञातार्थं ज्ञातसंबन्धं श्रोतुं श्रोता प्रवर्तते।
ग्रन्थादौ तेन वक्तव्यः संबन्धः सप्रयोजनः।।इति।।

अग्रे निरूप्यमाणानां गुणदोषादीनां तु प्रसङ्गानुरोधेनाङ्गतया संग्रहान्न तदर्थं प्रतिज्ञापेक्ष्यते।।२।।

विवृति

पूर्वशास्त्राणि मेधाविरुद्रभामहादिप्रोक्तानि काव्यलक्षणानि संहृत्य संक्षिप्य तथा प्रयोगान् काव्यनाटकादीनुपलक्ष्य च यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणमिति सुबोधम्।।२।।

ग्रन्थकारः स्वप्रवृत्तेर्विषयं दर्शयति–**पूर्वशास्त्राणीति**। पूर्वाचार्यकृतानि लक्षणानि संहृत्य समुच्चित्य संक्षिप्य प्रयोगान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाकविप्रयोगांश्च उपलक्ष्य तत्तदुपात्तविशेषसहितं यथासामर्थ्यं यथौचित्यं अस्माभिर्लक्षणं क्रियते।।२।।

एवमाशास्य शास्त्रमारिप्सुराचार्यः शास्त्रारम्भे सम्बन्धाभिधेयप्रयोजनानि प्रथमं सूचयन् श्लोकेनैकेनाह- **पूर्वशास्त्राणीति।** सम्बन्धस्तावत्प्रतिपाद्यप्रतिपादकलक्षणः। प्रतिपाद्यस्तावत् सर्वेषु लक्षणशास्त्रेषु विप्रकीर्णस्य काव्यलक्षणस्य समुच्चयरूपः ; तस्य प्रतिपादकोऽयं ग्रन्थः ; तयोरयं प्रतिपाद्यप्रतिपादकलक्षणतया सम्बन्धो दृश्यते। अभिधेयस्तावद्यानि लक्षणान्यत्र प्रतिपाद्यन्ते तान्येवाभिधेयानि भवन्ति। अभिधानं च प्रतिपादकरूपोऽयं ग्रन्थः। अनेकेषु शास्त्रेषु विप्रकीर्णलक्षणरूपस्य एकेनैवाल्पीयसा ग्रन्थेनावगतिः प्रयोजनत्वेन अभिहिता। पूर्वेषां काश्यपवररुचिप्रभृतीनां आचार्याणां लक्षणशास्त्राणि संहृत्य पर्यालोच्य कालिदासप्रभृतीनां प्रयोगानुपलक्ष्य च यथासामर्थ्यं बुद्ध्यनुरूपं अस्माभिः काव्यलक्षणं क्रियते।।२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

**इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते॥३॥**

रत्नश्री

[4a]दोष विभागतो यथावद..........मल्लनागो.......... वस्थितिलक्षणत्वाच्च लोकयात्राया[1] इति। विशिष्टा लोकयात्रा [अ]भिप्रेता न तु या काचित्। सा [वाक्शास्त्ररूपे]ति तदभावे यथोक्तलोकयात्रानुपपत्तेश्च अन्यत्रापि यथासम्भवं सामान्यशब्दात् विशेषः प्रसत्तव्यः। प्रसादेन प्रभावान्न..........। अतएव चतुर्वर्गशासनात् शास्त्रा[णां] चतुर्वर्गविद्याश्रयत्वात् विद्याश्रयस्थानानीति च निरुच्यते। तानि च [श्रुति]स्मृत्यादीनि संस्कृतमयानीत्याह [शिष्टानुशिष्टानामिति। शिष्टाः] [शब्दा]नुशासनकृतः पाणिनिप्रभृतयः। तैरनुशिष्टाः संस्कृताः प्रकृतिप्रत्ययादिविभागकल्पनयाऽन्वा[ख्याताः] तासां वाचां, श्रुतिस्मृत्यादीनि हि चतु[र्वर्गसाधनानि] [सं]स्कृतमयानि दृश्यन्ते।

ननु भाषान्तरैरपि चतुर्वर्गप्रतीतिलक्षणा लोकयात्रा प्रवर्तमाना दृ[श्यमाना]स्ति। तदपि श्रुत्यादिमूलमित्यतिदिशन्नाह-शिष्टा[नाम]पीति। शिष्टानुशिष्टेभ्यो बाह्याः शिष्टाः परिशिष्टाः। उपयुक्तादन्यः शेष इति। तासां [परिशिष्टानां शास्त्रव्यवहार]स्थित्या अपभ्रंशसंगृहीतानाम्। यद् वक्ष्यति-

शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितम्। इति। [1.36]

एवं मन्यते.....[इ]दमत्र तावत् तात्प[र्यम्].......... [लो]कयात्रा शास्त्रप्रभावादेवेति। तत्तु शास्त्रं संस्कृतमयं वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाषान्तरस्वभावं वा। प्रायस्तु संस्कृतमयं दृश्यत इति। अत एवाह- शि[ष्टानुशिष्टानां..........एवं शास्त्रादेव सा। संस्कृतेतरलक्षणस्तु तद्विकल्प एव। अतः सर्वथा सर्वप्रकारेण एकान्तेन संस्कृतादवशिष्टाद् वा शास्त्रादेव लोक[यात्रा प्रवर्तते।] काव्यं चेदं चतुर्वर्गलक्षणम्। अत्रापि गुणदोषविवेचने शास्त्रं शरणमित्याकूतम्। वक्ष्यति च-

गुणदोषानशास्त्रज्ञः [1.8]

इत्यादिना। यत् पुनर[त्र..........का]रणमन्यद् वा यथा कथञ्चिद् घुणाक्षरप्रख्यं दृश्यते तत्रापि शास्त्रमस्तीति तद्विदां प्रयोगपथानुसारात् स्यात्। जन्मान्तरे वा कृतशास्त्राभ्या[सप्रति (4b) बु]द्धसंस्काराणां परिनिष्ठितमपि स्यात्। यान् सारस्वताननधीतपण्डितान् वा व्यवहरति लोकः। यदपि सरस्वतीप्रसादात् काव्यकरणादिकमिष्टम्, तदपि शास्त्रप्रभ[ाव]:. ....प्रभावितत्वात्। किं बहुना? सर्वलोकयात्रा चतुर्वर्गव्युत्पत्तिलक्षणा शास्त्रादेव। तस्मादिदमपि काव्यगुणदोषव्युत्पत्त्यर्थं करणीयमेव, यतः परिनि[ष्ठितं काव्यं जाय]त इति भावः।।

एवमन्वयेन लोकयात्रां शास्त्रमूलां प्रतिपाद्यैतदेव व्यतिरेकेण द्रढयन्नाह-

हृदयङ्गमा

इदानीं ग्रन्थस्य प्रयोजनकथनाय वाचां व्यवहारोपयोगित्वम् अन्वयव्यतिरेकाभ्यामाह, इहेति इदमिति च।-इह संसारे, शिष्टैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धीरैः महेश्वरादिभिः, (तदुक्तं महाभारते,–"न पाणिपादचपलो न नेत्रचपलो मुनिः। न च वागङ्गचपल इति शिष्टस्य लक्षणम्।।" इति), अनुशिष्टानां साधितानां, प्रकृतिप्रत्ययादिविभागेन व्युत्पादितानां संस्कृतानां, तथा शिष्टानां जातिदेशादिविभागेन सिद्धानां प्रचलितानां प्राकृतदेशीयानां, वाचामेव प्रसादेन अनुकम्पया, साहाय्येनेति यावत्, सर्वथा सर्वैः प्रकारैः, लोकानाम् उत्तममध्यमाधमभेदेन त्रिविधानां, यात्रा व्यवहारः, प्रवर्त्तते प्रचलति, तत्रोत्तमाः संस्कृतयैव वाचा व्यवहरन्ति, मध्यमास्ततो निकृष्टया साधुभाषया, अधमा नीचभाषया, देशजातिभेदेन एवमेव भाषाव्यवहार इति फलितार्थः।।३।।

प्रभा

ग्रन्थस्य प्रतिपाद्यमुक्त्वा संप्रति व्यवहारसिद्धिरूपं तत्प्रयोजनमन्वयव्यतिरेकाभ्यां दर्शयति–**इह शिष्टेति।** इह विचित्रमनोहरेस्मिन् संसारे। शिष्टाः शब्दशास्त्रप्रवीणास्तैः पाणिनिवररुचिपतञ्जलिप्रभृतिभिरनुशिष्टाः प्रकृतिप्रत्ययविभागादिभिर्व्युत्पादिताः साध्वसाधुज्ञापनेन शासिता वा तासां संस्कृतप्राकृतानाम्। तथा शिष्टानाम् एतद्द्वयावशिष्टानां प्राकृतजनव्यवहारास्पदानां देशीनामित्यर्थः। इत्थं संस्कृतप्रकृतदेशीभेदेन त्रिविधानां वाचामेव प्रसादेनानुग्रहेण। सर्वथा सर्वप्रकारेण। लोकयात्रा लोकानां देवादिपामरान्तानां प्राणिनां यात्रा व्यवहारः प्रवर्तते प्रकर्षेण चलति।

तदुक्तं हरिणा–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न सोस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।

तत्रोत्तमानां संस्कृतभाषया मध्यमानां प्राकृतभाषया अवराणां च देशीभाषयेति ज्ञेयम्।।३।।

विवृति

इदानीं 'वाचामेव प्रसादेन लोकयात्रा प्रवर्तते' इत्यनेन वाचां लोकयात्राप्रवर्तनं प्रयोजनमभिदधानः काकदन्तपरीक्षावत् निष्प्रयोजनत्वादनारम्भणीयतालक्षणं दोषं परिहरति। केषां लोकयात्रा प्रवर्तत इत्याह—

शिष्टाश्चानुशिष्टाश्च शिष्टानुशिष्टाः। शिष्टाश्च शब्दार्थसम्बन्धेष्वपरतन्त्राः सूत्रवार्तिकभाष्यकाराः। अनुशिष्टाः सुबन्धुदिङ्नागभर्तृहरिप्रभृतयः। तथा न केवलं तेषामेव किं तु शिष्टानामपि परिशिष्टानां बालगोपालादीनाम्, वाचामेव प्रसादेन लोकव्यवहारः प्रवर्तते। यद्वा शिष्टानुशिष्टानामिति वाचां विशेषणमेतत्। शिष्टैरनुशिष्टाः शिष्टानुशिष्टाः वैयाकरणप्रयुक्ता वाचः। तथा शिष्टानामपि परिशिष्टानां च प्राकृतापभ्रंशादीनां बालादिप्रयुक्तानां वाचामेव प्रसादेन लोकयात्रा प्रवर्तते। सर्वथेत्यनेन वाचां व्यवहारोपयुक्ततां दर्शयति। शब्दमन्तेरण संचिदभावात् स्मरणाभावात् ततोऽभिलाषानुत्पत्तेः प्रवृत्तिनिवृत्त्योरभावः। तदुक्तम्—

'..... संवित्सामर्थ्यभाविनः।
स्मरणादभिलाषेण व्यवहारः प्रवर्तते।।'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा–

'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिवाभाति सर्वं शब्दे प्रतिष्ठितम् (?)।।'

तथा च धर्मकीर्तिनाऽप्युक्तम्–'नायमशब्दमर्थं व्यवस्यति निर्णयात्' इति अलमतिविस्तरेण।।३।।

काव्यलक्षणारम्भप्रतिक्षेपिणः क्रमेणानुकूलयिष्यन् सामान्येन शब्दलक्षणावताराय व्यवहाराङ्गतया शब्दस्य तावदवश्यंभावं दर्शयति–इहेति। इह लोके शिष्टानुशिष्टानां शिष्टैः पाणिन्यादिभिः अनुशिष्टानां साध्वसाधुविभागेन दर्शितानां, शिष्टानां अपभ्रष्टानामपि, वाचां शब्दानामेव महिम्ना सर्वथा सर्वप्रकारेण लोकयात्रा लोकव्यवहारः–इदं कुरु, इदं मा कुरु, इयमस्य संज्ञा, इदमस्याः संज्ञायाः संज्ञि–इत्यादिरूपः प्रवर्तते।।३।।

तस्य लक्षणस्य शब्दमन्तरणे अनुपाद्यमानत्वात् लोकयात्रा च शब्देनैवोपपाद्यते इति तदाह–**इहेति**। इह अस्मिन् लोके शिष्टैराचारवद्भिराचार्यैः कृतानुशासनानां वाचां, शिष्टानामपि व्यतिरिक्तानां वैखरीणामपि। तेषां शब्दानां प्रसादेनैव लोकयात्रा प्रवर्तते; इतरथा लोकयात्राप्रसिद्धिश्च न भवति।।३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदमन्धं तमः कृत्स्नं जायते भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरा संसारान्न दीप्यते।।४।।

रत्नश्री

यदनन्तरमुक्तं लोकया[त्रा].........ज्योतिरालोकः शब्दाह्वयं शास्त्रसंज्ञकं चतुर्वर्गप्रकाशकत्वात्। शब्द इत्याह्वयो यस्येति विग्रहे, यदि न दीप्यते न प्रकाशते न स्यादित्यर्थः। के.........रोऽत्र सत्त्वलोकः। यश्चतुर्वर्गमनुतिष्ठति तत् मर्यादं[?] ये तु मुक्तास्तेषां न संसारात्मकत्वम्, नापि चतुर्वर्गानुष्ठानम्। सर्व....... [स्व]र्गमर्त्यपाताललक्षणं जगत्त्रयं सत्त्वलोकः यस्य चतुर्वर्गप्रतिपत्तिः सम्भवति। इदमिति। अत्य.........तेन वा तमोऽन्ध[कारः].........[ल]क्षणलोकयात्राविगमात्। अप्रतिपत्ति-कसं[सारा]त्मकं स्यादित्यर्थः। किमेकदेशेन, नेत्याह-कृत्स्नमिति। निरवशेषं नांशेन तथाप्य[ल्पम्, नेत्या]ह-अन्धमिति। अन्धं निरन्तरम[ज्ञानतमोयोगात्] चतुर्वर्गप्रतिपत्तेः कथञ्चिदप्यभावात् सर्वथा निवृत्तचतुर्वर्गज्ञानात्मकं जगत् स्यात्। न क[थञ्चिद् वस्तुप्रति]पत्तिर्भवेदित्यर्थः। यद् वा, अन्धंतमः......... [पृ]षोदरादिदर्शनात् सिद्धम्। अर्थस्तु स एव। समाधिश्चैष सर्वथाऽज्ञाने निवृत्ते सर्वमत्र गृह्यते [अन्व]यव्यतिरेकाभ्याम्। शास्त्राभ्यासः काव्यगुणदोषविवेकार्थं क्रियत इति पूर्ववदाकूतम्। अत एवोच्यते-

शास्त्रादेव हि सर्वत्र गुणदोष[विचार]णम्।
विना शास्त्रेण यत्.........................।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

..........घटकं शास्त्रविशेष एष वस्तुतः। तत्रापि चतुर्वर्गप्रतिपत्तेः। यद् वक्ष्यतिचतुर्वर्गफलायत्तमि[त्यादि] [1.15]

..........[5a] काव्यमिति व्यवति[ष्ठते]..........इत्यलं विस्तरेण।।

शास्त्रमेव प्रकारान्तरेणानुसंहरन्नाह-

हृदयङ्गमा

इदमिति।–यदि शब्दः आह्वयः अभिधानं यस्य तत् शब्दनामकं, वाङ्मयमित्यर्थः, ज्योतिः तेजः, प्रकाशकस्वरूपधर्मबलेन वाङ्मये तथात्वारोपः ; (एतेन शब्दस्य ब्रह्मत्वञ्च सूचितम्। शब्दब्रह्मणश्च सूक्ष्मा पश्यन्ती मध्यमा वैखरी चेति चत्वारो भेदाः, तत्राविकारदशा सूक्ष्मा, सा हि सर्वस्य प्राणापानान्तरालवर्त्तिनी विगतप्रादुर्भावतिरोभावा सम्यक्प्रयोगपरिशीलनात्मना कर्मयोगेन, मननादिना ज्ञानयोगेन च सम्यगधिगम्यते। तस्य ब्रह्मणः अनाद्यविद्यावशादाद्यः परिणामः पश्यन्ती, सा हि वर्णाविभागादक्रमः स्वयंप्रकाशश्च। पूर्वापर स्वावस्थे पश्यतीति पश्यन्तीत्युच्यते। ततः परमविद्योपादानादन्तः सङ्कल्परूपक्रमवान् श्रोत्रग्राह्यवर्णाभिव्यक्तिरहितस्तृतीयः परिणामः मध्यमा। द्वयोः परिणामयोर्मध्ये तिष्ठतीति मध्यमा इत्युच्यते। अनन्तरं दूरप्रसृतायामविद्यायां स्थानकरणप्रयत्नव्यज्यमानश्रोत्रसंवादिवीणादुन्दुभिनादपरिचयगद्गदाव्यक्ताकारादिवर्णसमुदयात्मकस्तुरीयः परिणामः वैखरी। आद्यास्तिस्रः नित्या अतीन्द्रियाः, चरमा लोकव्यवहाररूपा इति, तदुक्तं,–"स्थानेषु विवृते वायौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतवर्णपरिग्रहा। वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धना।। प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्त्तते। अविभागात्तु पश्यन्ती सर्वतः संहृतक्रमा।। स्वरूपज्योतिरेवान्तः सूक्ष्मा सा चानपायिनी।।'' इति। श्रुतिरप्याह,-''चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति'' इति। ततश्च तत् शब्दब्रह्मरूपं ज्योतिः, आसंसारं जगत् अभिव्याप्य, न दीप्यते न विराजते, तदा इदं कृत्स्नं सर्वं, भुवनानां स्वर्गमर्त्त्यरसातलानां, त्रयम् अन्धंतमः गाढान्धकारव्याप्तमिति यावत्, (''ध्वान्ते गाढेऽन्धतमसम्'' इत्यमरः), जायेत। यद्वा,-तमः मोहान्धकारमयं, सत्, अन्धं नेत्रहीनमिव ज्ञानशून्यं भवेत्। सूर्य्योदयाभावे इव वागभावे जगत् अन्धकारमयमेव स्यात्, वाग्भिरेव सर्वेषां ज्ञानलाभादिति भावः। (एतेन अस्य प्रयोजनं वाग्व्यवहाररूपमेव कथितम्। अभिधेयप्रयोजनयोश्च परस्परं ज्ञाप्यज्ञापकत्वादिरूपः सम्बन्धः यथायथमवगन्तव्यः। एषाञ्च ग्रन्थादौ अवश्यवक्तव्यतोक्ता इति)।।४।।

प्रभा

वाग्व्यवहारस्यान्वयमुखेन लोकयात्रासाधनतामुपपाद्येदानीं व्यतिरेकमुखेन तामेव द्रढयति-**इदमन्धमिति**। शब्द आह्वयोभिधानं यस्य तच्छब्दाख्यं ज्योतिः। अर्थप्रकाशकत्वाज्ज्योतीरूपम्। -वाचेवायं ज्योतिषा आस्ते-इति श्रुतिः। (बृ. ६-३), आसंसारात् संसरत्यनेनेति संसारः सृष्टिः। सृष्टिकालमारभ्य तदन्तपर्यन्तमित्यर्थः। अभिव्यापकार्थकेनाङाव्ययीभावः। यदि न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीप्यते न प्रकाशेत तर्हि इदं भुवनत्रयं स्वर्गमृत्युपातालरूपं विश्वं लक्षणया तदन्तर्गतप्राणिजातम् कृत्स्नं निरवशेषम् अन्धंतमो गाढान्धकारव्याप्तमिव जायेत। ध्वान्ते गाढेन्धतमसम् इत्यमरः। यथा हि सूर्यादिज्योतिषामभावे तमसावस्कन्दिता पदार्था विलुप्ता इव भवन्ति तथा वाचामभावे सर्वेप्यैहिकपारलौकिका व्यवहारा विलुप्ता भवेयुरित्यर्थः। तदुक्तं सुबन्धुनाः–

करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः।
पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी।। (वासवदत्ता १)।।इति।।४।।

विवृति

अमुमेवार्थं व्यतिरेकद्वारेण दर्शयति–

तम इव तमो गुरुत्वादावारकत्वादज्ञानमुच्यते। तदुक्तम्–'गुरु अपवारकमेव तमः। पञ्च विपर्ययभेदाः–तमो मोहो महामोहस्तामिस्रमन्धतामिस्रं' इति तत् तमः कृत्स्नमस्मिन्निति तमः कृत्स्नमिति बहुव्रीहिः। कामचारतो विशेषणविशेष्यभाव इति तमः शब्दस्य विशेषणत्वात् पूर्वनिपातः। तेनायमर्थः–तमःकृत्स्नं तमोजालमयमिदं भुवनत्रयमन्धं जायेत इति विधेयमेतत्। अन्धविमान्धं हेयोपादेयविवेकशून्यं जायेत स्यात्। यद्वा इदं भुवनत्रयं कृत्स्नमन्धं तमो जायेत। अन्धं कृत्स्नमिति च तमसो विशेषणम्। अन्धं तमो घोरमन्धकारं निरालोकं भवेत्। किं यदि स्यादित्याह–शब्दो ज्ञानमालोकश्च त्रीणि ज्योतींषि। तेषु मन्ये यदि शब्दसंज्ञकं ज्योतिर्न दीप्यते न प्रकाशते। आ(?) कुत इत्याह–आ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारात् संसरणं संसारः सृष्टिः, तस्मादा संसारात् आ सृष्टेः। यद्वा षडिन्द्रियाणि षड् विषयाः षड् बुद्धयः सुखं दुःखं शरीरमित्येकविंशतिभेदं दुःखं संसारः। तद्योगात् तदाधाराः प्राणिनः। आ संसारात् आ भूतग्रामात्। आङ् चायमभिविधौ द्रष्टव्यः।।४।।

एवमर्थं (?) दर्शयन् व्यतिरेकं दर्शयति–इदमिति। भुवनत्रयशब्देन प्राणिनो लक्ष्यन्ते। सर्वे प्राणिनः शब्दप्रमाणाभावे अन्धं तमो गाढमज्ञानं भजेरन्; गाढाज्ञानेन व्याप्ता भवेयुः इत्यर्थः। यदि शब्दाह्वयं ज्योतिः शब्दाख्यप्रदीपः आ संसारात् संसारोपक्रममारभ्य न दीप्यते न प्रकाशते। शब्दाभावे सर्वव्यवहारोच्छित्तिरिति भावः।।४।।

उक्तमेवार्थं विवृणोति–इदमिति। इदं भुवनत्रयं सकलमन्धं तमो भवति शब्दाभिधानं ज्योतिः संसारावधेः यदि न दीप्यते न प्रकाशीभवति।।४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदिराजयशोबिम्बमादर्शं प्राप्य वाङ्मयम्।
तेषामसन्निधानेऽपि न स्वयं पश्य नश्यति॥५॥

रत्नश्री

आदयः आद्याः पूर्वे राजानः मन्वा[द्याः] तेषामादिराजानां [गुणख्यापकं कर्म] यशस्करत्वाद् यश इत्युक्तम्। गुणा हि साक्षात् तेषां शास्त्रे काव्ये वा वर्ण्यन्ते। गुणानां तु प्रसिद्धिः सर्वलोककीर्त्तनं यशः। तदेव [श]रीरं सत्पुरुषाणां........., शरीरप्र[तिमत्वात्। त]दुक्तम्–

अपि स्वदेहात् किमुतेन्द्रियार्थाद्

यशोधनानां हि यशो गरीयः। इति। [रघुवंशे 14.35]

तदेतत्। वागिह इतिहासकथादिलक्षणा, आदिरा-[जयशः]कीर्त्तनात्। तत्स्वभावमादर्शं दर्पणम् वैमल्यात्, प्राप्य तत्र प्रतिभाय तत्प्रत्ययारूढं स्वयमात्मना न नश्यति नापगच्छति यस्येति विस्मापयन्नभिमुखयति परम्। कोऽत्र विस्मय इ[ति चेत्?] तेषामसन्निधानेऽपीति तेषामादिराजानां येषां तद्बिम्बम्। असन्निधानेऽपि अभावेऽपि। इदमत्र चित्रं यत् तद्वतोऽपगमेऽपि बिम्बं नापैति। दर्पणे हि तावद् बिम्बं दृश्यते [यावद् वस्तुस]न्निधानम्। अपगते तु तद्वति शरीरेऽपैति। सोऽयं प्रसिद्धादर्शविलक्षणोऽपूर्व एव कश्चिदादर्शः, यत्रादिराजलक्षणस्य तद्वतोऽसन्निधावपि इदानीम् [अपि] बिम्बं दृश्यते, न केवलं सन्निधान इत्यपिशब्दार्थः। अतिशये वाऽपिशब्दो वर्तते। असन्निधानेऽप्यहो दृश्यत इत्यतिशयः। अत एव सर्वा[तिशायी]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सनातनः कोऽप्ययमालोको लोकयात्राप्रवृत्तये। कुतोऽप्ययमाभाति यदुत शास्त्रं नामेति।।

शास्त्राद् गुणदोषविवेके सति को गुणस्तद्.........आह–

हृदयङ्गमा

वाचामुपादेयत्वं व्यवहारत्वेन प्राक् प्रदर्श्य तासामेव गुणालङ्कारादिसद्भावेन काव्यस्वरूपतामुपगतानामिदानीमुपादेयत्वं दर्शयति, आदिराजेति। –आदिराजानां मन्विक्ष्वाकुप्रभृतीनां, यशोविम्बं कीर्त्तिरूपं प्रतिविम्बं कर्त्तृ, वाङ्मयं कविगणनिबद्धं काव्यप्रबन्धरूपम्, आदर्शं दर्पणं, प्राप्य तेषाम् आदिराजानाम्, असन्निधानेऽपि असत्तायामपि, न नश्यति न विलीयते, इति स्वयं पश्य अवलोकय इति राजपुत्रं प्रत्युक्तिः। (दर्पणे विम्बपतनं सन्निहितानामेव, इह तु वाङ्मयरूपे दर्पणे असन्निहितानामपीति उपमेयाधिक्यवर्णनव्यतिरेकालङ्कारः। ततश्च पुरावृत्तवर्णितानां यशः कीर्त्तनं तथा काव्यप्रणेतुः यशः–प्राप्तिप्रभृतीन्यपि प्रयोजनान्तराण्यवगन्तव्यानि; तच्चोक्तं प्रकाशकृता यथा, –"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।" इति)।।५।।

प्रभा

इत्थं वाचां सामान्यतो व्यवहारोपयोगित्वं प्रदर्श्य तद्विशेषीभूतस्य गुणालंकारादिपरिष्कृतस्य काव्यसंज्ञकस्य वाङ्मयस्य माहात्म्यमिदानीं दर्शयति-**आदिराजेति।** आदिभूता ये राजानो मनुपृथुप्रभृतयः। अथवा आदिराजाः प्राक्कालीना राजान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इक्ष्वाकुमान्धातृदिलीपप्रभृतयः तेषां यशोरूपं बिम्बं कर्तृ। वाङ्मयं सत्कविप्रतिभासूतं काव्यम्। तद्रूपमादर्शं दर्पणं प्राप्य तत्र प्रतिबिम्बितं भूत्वा तेषामादिनृपाणाम् असंनिधानेपि असंनिहितेष्वपि तेषु राजसु स्वयं न नश्यति न विच्छिद्यते। पश्य आलोकयेति शिष्यं प्रति साश्चर्योक्तिः। अयं भावः। राज्ञां यशस्तेषां स्थितिकाले वक्तृश्रोत्रादिपरंपरया तत्प्रजासु बहुलीभवदपि तच्छासनकालादूर्ध्वं न केनापि प्रायशो गीयते। अत एव च यथा ते राजानस्तथा तद्यशोपि विस्मृतिपथं प्रयाति। यदि पुनस्तदेव यशः कविप्रतिभोपगृहीतं सत् काव्यविशेषे प्रतिंबिम्बितं भवति तदा दिवं यातेष्वपि तेषु राजसु आश्रयविनाशान्नष्टुं योग्यमपि बिम्बस्थानीयं तद्यशोविनश्यद् वाङ्मयादर्शे प्रतिबिम्बरूपेण चिरस्थायि भवति। लौकिकादर्शे बिम्बाभावे प्रतिबिम्बस्य स्थितिर्न दृश्यते। अत्र तु दृश्यत इति वाङ्मयादर्शस्य ततो विस्मापको विशेषः। एतेनातीतनृपाणां यशःख्यापनं काव्यस्य प्रयोजनमित्युक्तं भवति। तेन चात्मनश्च च्छात्राणां च तच्चरितज्ञानमित्यपि फलान्तरं ज्ञेयम्। इदमुपलक्षणम्। काव्यनिर्मातुरन्यान्यपि फलानि सन्ति। यथोक्तं प्रकाशकृता–

काव्यं यशसेर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे।।(१.२)

किं बहुना–

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति प्रीतिं कीर्तिं च साधुकाव्यनिबन्धनम्।।(१.२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति भामहोक्तदिशा सर्वेपि पुरुषार्थाः सत्काव्यस्य निबन्धनात् संभवन्ति। अत्रोपमानभूतलौकिकादर्शादुपमेयभूतवाङ्मयादर्शस्याधिक्यवर्णनाद् व्यतिरेकालंकारः।।५।।

विवृति

नृगनहुषादिचिरतरातीतभूपालकीर्तिबिम्बं यशः शरीरं तेषां स्वात्मनो बहुकालव्यवहितत्वेऽपि न नश्यति। पश्य उपलभस्व अवेहि।

भामहेनाप्युक्तम्–

'उपेयुषामपि दिवं सन्निबन्धविधायिनाम्।
आस्त एव निरातङ्कं कान्तं काव्यमयं वपुः।।'

एतेन चेतरदर्पणात् वाङ्मयदर्पणस्य वैलक्षण्यं दर्शयति।।५।।

अन्यमपि शब्दप्रभावातिशयं दर्शयति–**आदिराजेति।** आदिराजानां भरतभगीरथादीनां दीर्घकालातीतानां यशोबिम्बं यशोरूपं प्रतिबिम्बम्। बिम्बशब्दोऽत्र प्रतिबिम्बे वर्तते। वाङ्मयं आदर्शं प्राप्य, तेषां राज्ञां असन्निधानेऽपि दीर्घकालातीतत्वेऽपि न नश्यति, किं तु प्रतिभासत एव। पश्येत्याश्चर्ये। लोके बिम्बसन्निधाने प्रतिबिम्बो दृष्टः ; नात्र तथेत्याश्चर्यम्।।५।।

अस्मिन्नर्थे प्रमाणमाह–**आदिराजेति।** मान्धातृप्रभृतीनां यशश्शरीरं शब्दमयं दर्पणं प्राप्य तत्र स्थिरीभूतं तेषाम् असन्निधानेऽपि न नश्यति। स्वयमपि पश्येति लौकिकी वाचोयुक्तिः।।५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गौर्गौः कामदुधा सम्यक् प्रयुक्ता स्मर्यते बुधैः।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति॥६॥

रत्नश्री

गौर्वाक् काव्यादिस्वभावा। सम्यक् शास्त्रादिप्रभावेण स्वरूपतोऽर्थतश्च परिशुद्धा प्रयुक्ता कृता प्रकाशिता सती पुरुषेणेति गम्यते। काम[दुघा]..........रिति वक्ष्यमाणमत्रापि सम्बन्धनीयम्। गौः सौरभेयी स्मर्यते आम्नायते बुधैराप्तैः। एवमाप्ता उपदिशन्ति, तस्मादवितथमेतत्। आप्तोपदेशस्य प्रमाणत्व[निश्चयात्] [तदनुसरणत]-श्चेष्टसिद्धिदर्शनात्। या वागेवं कामधेनुर्जाता सुप्रयुक्ता सती सैव नान्या। दुष्प्रयुक्ता पुनः शास्त्रविरोधात् स्वभावाश्रयवैगुण्येनोद्भाविता तु सतो गोत्वं [पशुत्वं शं]सति ख्यापयति प्रयोक्तुः पुरुषस्य। ततश्चाशास्त्रज्ञोऽयं पुरुषाकृतिः पशुरिति विदुषां हेयः स्यादित्यनर्थे पतितः। दूर एवार्थसिद्धिः। तदिह म[हद]न्तरं शास्त्र [ज्ञानेन भवति। मनुष्यत्वा][5b] विशेषेऽपि शास्त्रज्ञो देव इव पूज्यते गुणानुरागिभिरितरस्तु पशुरिव दृश्यत इति॥

यत एवं सर्वत्र गुणदोषविवेकः शास्त्रादेव। गुणश्च पुरुषार्थेन योजयति दोषश्च [इतरेण, अतः] शास्त्रानुसारेण गुणवत् [काव्यमेकान्ततः] पुरुषार्थसाधनम्। दोषस्तु स्वल्पोऽपि शास्त्रप्रभावादेवापनेयः। अन्यथा हेयं स्यादिति प्रकृतमनुबन्धन् आह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

काव्यस्योपादेयत्वं सामान्येनोक्त्वा तस्य गुणालङ्कारादिसद्भावत्वे दोषाभावत्वे च यतितव्यमिति कीर्त्तयन्नाह, गौरिति।—सम्यक् प्रयुक्ता गुणालङ्कारादिमत्त्वेन दोषराहित्येन च सुनिबद्धा, गौः वाक्, ("स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले। लक्ष्यदृष्ट्या स्त्रियां पुंसि गौः" इत्यमरः), बुधैः विद्वद्भिः, सहृदयैः सुधीभिरित्यर्थः, कामदुघा कामदोहिनी, यथाऽभिलषितपूरणीति यावत्, गौः धेनुः स्मर्य्यते मन्यते। ["एकः शब्दः सुप्रयुक्तः सम्यक् ज्ञातः स्वर्गे लोके च कामधुक् भवति" इति श्रुतेः। उक्तञ्च वामनेनापि, —"काव्यं सत् दृष्टादृष्टार्थं प्रीति-कीर्त्तिहेतुत्वात्" (का० सू० वृ० १अधि० १अ०) इति। प्रोक्तसूत्रवृतौ च, —"काव्यं सत् चारु दृष्टप्रयोजनं प्रीतिहेतुत्वात् अदृष्टप्रयोजनं कीर्तिहेतुत्वात्। अत्र श्लोकाः,—"प्रतिष्ठां काव्यबन्धस्य प्रतिष्ठां सरणिं विदुः। अकीर्त्तिवर्तनीं त्वेवं कुकवित्वविड़म्बनाम्।। कीर्त्तिं स्वर्गफलामाहुरासंसारं विपश्चितः। अकीर्त्तिञ्च निरालोकनरकोशदूतिकाम्।। तस्मात् कीर्त्तिमुपादातुमकीर्त्तिञ्च वयपोहितुम्। काव्यालङ्कारशास्त्रार्थः प्रसाद्यः कविपुङ्गवैः।।" इति। अपरञ्च,—"धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च। करोति कीर्त्तिं प्रीतिञ्च साधुकाव्यनिषेवणम्"।। इति]। पुनः किन्तु, सा एव गौः, दुष्प्रयुक्ता सदोषत्वेन गुणालङ्कारादिराहित्येन च प्रयुक्ता निबद्धा सती, प्रयोक्तुः प्रयोगं कुर्वतः, कवेरिति यावत्, गोत्वं वृषत्वम्, अज्ञत्वमिति भावः, शंसति सूचयति, (एतेन सदोषस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रसवतः वाक्यस्य काव्यत्वहानिर्न, अपि तु निन्दितत्वमेव प्रतीयते इति बोध्यते)।।६।।

प्रभा

एवं काव्यस्य प्रयोजनमुक्त्वेदानीं तस्य निर्दोषतायां यतनीयमिति कथयति–**गौर्गौरिति।** गौर्वाणी। स्वर्गेषुपशुवाग्वज्रादिङ्नेत्रघृणिभूजले। लक्ष्यदृष्ट्या स्त्रियां पुंसि गौः इत्यमरः (३.२५) सम्यक् प्रयुक्ता दोषशून्यतया गुणालंकारपरिपूर्णतया चोपयुक्ता। बुधैः सूरिभिः। कामदुघा कामान् दुग्धे सा कामदुघा। इगुपधज्ञाप्रीकिरः कः (पा० ३.१.१३५) इति कः। पश्चाट्टाप्। कामपूरिकेत्यर्थः। एतादृशी गौः स्मर्यते कविभिर्ज्ञायते। तथा च श्रुतिः–एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति (कैय्यटप्रदीप १.१०, वार्तिक ६) इति। दुष्प्रयोगे दोषमाह। सैव गौर्दुष्प्रयुक्ता स्वरवर्णमात्रासंनिधिसंदर्भसंकेतादिकमविगणय्योच्चरिता। प्रयोक्तुर्दुष्प्रयोगशीलस्य कवेर्वक्तुर्वा। गोत्वं बलीवर्दत्वं मौर्ख्यमिति भावः। शंसति प्रथयति। उक्तं च पातञ्जलमहाभाष्ये–वाग्योगविद्दुष्यति चापशब्दैः (१.२) इति। अनेन दोषाः परिहरणीया गुणालंकाराश्च समावर्जनीया इति स्पष्टं भवति।।६।।

विवृति

गौर्वाग्भारती कामं दुग्धे कामदुघा धेनुः स्मर्यते। सम्यक् छन्दोऽलङ्कारसाधुशब्दैः प्रयुक्ता सती। सैव वाक् दुष्प्रयुक्ता छन्दोभङ्गापशब्दश्रुतिदुष्टादिशब्दैः पुनः प्रयुक्ता गोत्वं पशुत्वं प्रयोक्तुः शंसति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भामहेनाप्युक्तम्–

'नाकवित्वमधर्माय मृतये दण्डनाय वा।
कुकवित्वं पुनः साक्षान्मृतिमाहुर्मनीषिणः॥६॥'

शब्देन सर्वव्यवहारोऽस्तु, किं तल्लक्षणेनेत्यत आह–**गौर्गौरिति।** सम्यक् प्रयुक्ता सम्यग्ज्ञातरूपा प्रयुक्ता गौर्वाणी कामदुघा गौः स्मर्यते। 'एकः शब्दः सम्यक् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवति।' शब्दलक्षणापरिज्ञानेन अनर्थमाह–दुष्प्रयुक्तेति। सैव वाक् दुष्प्रयुक्ता सम्यगज्ञातविषये प्रयुक्ता प्रयोक्तुर्गोत्वम् अज्ञत्वं प्रकटयति। तेन स इहलोकपरलोकयोः दुष्यति। तथा च स्मर्यते–'यस्तु प्रयुंक्ते कुशलो विशेषे शब्दान् यथावव्द्यवहारकाले। सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः।'–इति॥६॥

तेषामेव शब्दानां प्रयोगवैलक्षण्ये फलाविशेषं दर्शयितुमाह–**गौर्गौरिति।** पशुत्वमज्ञानितां शंसति, न निष्प्रयोजनताम्॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदल्पमपि नोपेक्ष्यं काव्यं दुष्टं कथञ्चन।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्॥७॥

रत्नश्री

[दुष्टं काव्यं नोपे]क्ष्यं कथञ्चनेत्यत्रापि योज्यम्। केनापि प्रकारेण नोपेक्षणीयम्। सर्वथाऽपनेयमेव शास्त्रदृष्ट्या। अन्यथा हेयं स्यात्। तदेव प्रतिवस्तूपमया साधयन्नाह–स्यादित्यादि [वपुः शरीरं सुन्दरम]पि वर्णसंस्थानसम्पन्नमपि प्रागेवासुन्दरम्। एकेन श्वित्रेण कुष्ठदोषेण दुर्भगमस्पृश्यं हेयं स्यात्। सुन्दरमपि शरीरं कुष्ठेन स्वल्पेनाप्युप[पन्नं हेयं यथा] तथा कवेः काव्यमयं शरीरं शाश्वतं सर्वार्थसाधनं स्वल्पेनापि शब्दरूपेणार्थलक्षणेन वा दोषेण श्वित्रकल्पेन परिहरणीयं स्यात्। प्रागेव.........द्धं कार्यं कारणीयम्। दोषस्तु स्वल्पोऽपि परिहरणीयः शास्त्रदृष्ट्येति।

क्रियत एव निर्दोषं काव्यं विनापि शास्त्रेणेत्याशङ्क्य सर्वं शास्त्रादेव गुणदोष[परिज्ञानं कर्तव्यमि]ति पूर्वोक्तक्रमेणार्थं प्रतिवस्तूपमया समर्थयन्नाह–

हृदयङ्गमा

तदिति।–तत् तस्मात् प्रयोजकस्य गोत्वख्यापनात्, काव्ये अल्पमपि पदपदांशमात्रस्थमपि, दुष्टं दोषः, (भावे क्तप्रत्ययः) कथञ्चन केनापि प्रकारेण, न उपेक्ष्यं न क्षन्तव्यं, सर्वथा दोषः काव्यस्यापकर्षक इति परित्याज्य इत्यर्थः। ननु गुणालङ्कारादिसद्भावे सामान्यदोषेण का क्षतिरिति चेत् तत्राह,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यादिति।–वपुः शरीरं, सुन्दरमपि स्वभावतः गुणादिमत्तया वा सुदर्शनमपि, एकेन एकाङ्गवर्त्तिना क्षुद्रेणापि, श्वित्रेण धवलरोगेण, दुर्भगं घृणितं स्यात्। (एतेन दोषः काव्यस्यापकर्षको न तु काव्यंत्वविघातक इत्यायातम्। उक्तञ्चान्यत्र यथा, –"कीटानुविद्धरत्नादिसाधारण्येन काव्यता। दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः॥" इति। एकेन श्वित्ररोगेण यथा सुन्दरशरीरमपि निन्दितं भवति, तथा पदांशादिगताल्पदोषजातमपि काव्यं दूषयति इति विम्बप्रतिविम्बबोधनात् अत्र दृष्टान्तालङ्कारः। तदुक्तं साहित्यदर्पणे,–"दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिविम्बनम्" इति। एतेन न केवलं पदपदांशादिदोषेणैव काव्यस्यासाधुत्वं, किन्तु प्रबन्धुः प्रतिभादौर्बल्यकुल-वैकल्याभ्यामपि भवति। तदुक्तं कविगजाङ्कुशे,–"शुनीदुग्धमिव त्याज्यं पद्यं शूद्रकृतं बुधैः। गवामिव पयो ग्राह्यं काव्यं विप्रेण निर्म्मितम्॥" इति; उत्तमपुरुषकथाकथनन्तु काव्यं ग्राह्यमेव। तदुक्तं भामहेन,–"उपश्लोक्यस्य माहात्म्यादुज्ज्वलाः काव्यसम्पदः" इति। भट्टोद्भवेनापि भणितम्,–"गुणालङ्कारचारुत्वयुक्तमप्यधिकोज्ज्वलम्। काव्यमाश्रयसम्पत्त्या मेरुणेवामरद्रुमः॥" इति)॥७॥

प्रभा

इदानीं काव्ये स्वल्पोपि दोषः परिहरणीय इति दृष्टान्तपूर्वकं निवेदयति-**तदल्पमिति।** तत् तस्माद्दोषस्योपहासजन-कत्वान्निषिद्धत्वाच्च। काव्येल्पमपि पदपदांशगतमपि। दुष्टं दोषं भावे क्तः। कथंचन कथमपि नोपेक्ष्यं न सोढव्यम्। सर्वथा तत्परिहरणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतितव्यमिति भावः। ननु स्वल्पो दोषो गुणसंनिपाते निमज्जतीति न तत्परिहरगमत्यावश्यकमिति चेन्न। सुन्दरमपि निसर्गरमणीयं तथा महार्घाभरणवस्त्रादिना परिष्कृतमपि। वपुः शरीरम्। एकेन केवलेन अथवा एकावयवस्थितेन। श्वित्रेण श्वेतकुष्ठेन। दुर्भगं सौभाग्यहीनं स्यात्। यथा हि सौन्दर्यसमृद्धेपि वपुषि श्वित्रं नेत्रोद्वेगजनकं तथा गुणपरिपूर्णमपि दोषलवयुतं काव्यं सहृदयशिरः संतापकरमेवेत्यर्थः।

तदुक्तं भामहेन—सर्वथा पदमप्येकं न निगाद्यमवद्यवत्।
विलक्ष्मणा हि काव्येन दुःसुतेनेव निन्द्यते।। इति (१.११)

अत्र उपानोपमेयभूतयोः पूर्वोत्तरवाक्ययोर्बिम्बप्रतिबिम्बभावेन भिन्नधर्मनिर्देशाद् दृष्टान्तालंकारः।।७।।

विवृति

यत एवम्, अतः अल्पमपि श्रुतिदुष्टादि दुष्टं काव्ये नोपेक्ष्यं कथञ्चन कथमपि प्रमादादिनापि। 'एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः' इतीदं निदर्शनं काव्यादन्यत्र द्रष्टव्यम्। यथा सुन्दरमपि शरीरमेकेनामचन्दनसदृशेन श्वित्रेण दुर्भगं जुगुप्सनीयम्, एवं काव्यमपि छन्दोभङ्गानलङ्कारापशब्दादिदोषेण दुर्भगं विद्वद्भिरनादरणीयं स्यात्। तदुक्तं भामहेनापि—

'सर्वथा पदमप्येकं न निगाद्यमवद्यवत्।
विलक्षणेन काव्येन दुःसुतेनेव निन्द्यते।।' इति।।७।।

एवमपशब्दकरस्य अनर्थकरत्वात् काव्ये स्वल्पोऽप्यपशब्दो न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रयोक्तव्य इत्याह—**तदल्पमपीति।** काव्ये स्वल्पमपि दुष्टं कथञ्चन नोपेक्ष्यम्; यत्नेन परिहरणीयम्। काव्यशरीरं गुणयुक्तमपि एकेन दोषेण निन्द्यं भवति। तत्र निदर्शनमाह—**स्यादिति।** सुन्दरमपि सौन्दर्यगुणयुक्तमपि युवतिशरीरं एकेन श्वित्रेण निन्द्यं भवति।।७।।

तस्मात्स्वल्पोऽपि दोषो नोपेक्षणीय इत्याह—**तदिति।।७।।**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणदोषानशास्त्रज्ञः कथं विभजते जनः।
किमन्धस्याधिकारोऽस्ति रूपभेदोपलब्धिषु॥८॥

रत्नश्री

गुणा विशेषा उपादेया अर्थाः पुरुषार्थसंगृहीतास्तद्विपरीता दोषाः। ....काव्यापेक्षया तु शब्दार्थालङ्कारस्वभावा गुणाः। दोषास्त्वपार्थत्वादयः। श्लेषविपर्यासादयश्च वैदर्भमार्गापेक्षया वक्ष्यमाणाः। अत एव सामान्येनाह- गुणदोषानशास्त्रज्ञः कथं विभजते जन इति। सर्वमपि सा[मान्यं ए]कस्याप्यर्थस्य प्रकृतापेक्षया विशेषनिष्ठं भविष्यतीति निपुणेयं वाचोयुक्तिः। तान् गुणदोषान् यो न वेत्ति पुरुषः [स] कथं विभजते [विभक्तान्करो]ति एते गुणाः [एते दोषा इ]ति। य[तो गुणानाद]त्ते दोषान् हास्यति कथञ्चित्। किं न विभजते, अशास्त्रज्ञो यतः। शास्त्रादेव हि गुणदोषा विवेच्यन्ते। यश्च शास्त्रं गुणदोषविवेक[विष] [6a]यं न वेत्ति, कथं तस्याप्रतिपन्नोपायस्य गुणदोषविवेकलक्षणमुपेयं सेत्स्यति। यथा त्वस्य रूपव.......... किमन्धस्येत्यादि। अन्धस्य चक्षुर्विकलस्य रूपभेदानां नीलपीतादीनां रूपविशेषाणां उप[ल]ब्धिषु दर्शने[षु नाधिकारः। इ]ह सामान्येन रूपं नाम किञ्चिदस्तीति श्रुतिमात्रकमपश्यतः स्यात्। न तु रूपविशेषसाक्षात्का[रः। विशेषज्ञानाभावे] न च तत् क्वचिदुपयुज्यते। ततो यदाहमनुष्ठाना[?]भावाद् विभागेन तु सर्वात्मना शास्त्र.........[विभ]जत इत्याह। तदेवमियता ग्रन्थेन शास्त्रादेव सर्वगुणदोषविवेकतो नान्यथा काव्येऽपि..........

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

दोषस्य काव्यापकर्षकत्वाभिधानेन गुणानामुत्कर्षजनकत्वमर्थादभिहितं भवति, उत्कर्षापकर्षपरिज्ञानञ्च शास्त्रोपदेशमन्तरेण न सम्भवतीति शास्त्रस्योपयोगितां दर्शयति, गुणदोषानिति।–अशास्त्रज्ञः अविद्वान् जनः, गुणदोषान् काव्यस्य उपादेयत्वव्यञ्जका धर्मा गुणाः तान्, हेयत्वव्यञ्जका धर्मा दोषाः तांश्च, कथं विभजते विशेषेण बुध्यते? नैवेत्यर्थः ; ओजः-प्रसादादिगुणानां श्रुतिकट्वादिदोषाणाञ्च काव्यपाठश्रवणमात्रेण सामान्यतः परिज्ञानेऽपि शास्त्राविज्ञाने विशेषज्ञानासम्भवादिति भावः। तथा हि रूपाणां सौन्दर्य्यादीनां, भेदोपलब्धिषु विशेषज्ञानेषु, अन्धस्य अधिकारः शक्तिः, अस्ति किम्? नैवेत्यर्थः। शास्त्रपर्य्यालोचनेन जना गुणदोषविचारे समर्था भवन्ति, तस्मादेव ममायमुद्यमः इति भावः। (अत्रापि दृष्टान्तालङ्कारः)॥८॥

प्रभा

दोषपरित्यागेन गुणस्वीकारः सूचितो भवति। दोषाणां गुणानां च स्वरूपज्ञानपूर्वकहेयोपादेयताज्ञापनार्थं शास्त्रप्रवृत्तिरित्याह–**गुणदोषानिति।** अशास्त्रज्ञः शास्त्रं जानातीति शास्त्रज्ञस्तद्विपरीतः। साहित्यशास्त्रपरिचयशून्य इत्यर्थः। जनो व्युत्पित्सुः पुरुषः। गुणा उपादेयधर्माः श्लेषः प्रसादः समता [१.४१] इत्यादिनाग्रे प्रोक्ताः। अनुप्रासोपमादयोलंकारा अपि काव्यशोभाजनकत्वादुपादेया एव। अतो गुणशब्देन तेषामपि संग्रहः। दोषाः पुनर्हेयधर्मा अपार्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यर्थमेकार्थं [३.१२५] इत्यादिनाग्रे प्रपञ्चिताः। तान् गुणदोषान्। अशास्त्रज्ञः कथं विभजते इमे गुणा इमे दोषा इति कथं जानीयादिति भावः। काव्यतत्त्वानभिज्ञः काव्यस्य शब्दार्थमात्रं कदाचिज्जानीयान्न तु काव्यमीमांसाकुशलवत् तद्गतगुणदोषरहस्यमवगच्छेदित्यर्थः। अमुमेवार्थं दृष्टान्तेन विशदयति–किमिति। अन्धस्य चक्षुर्विकलस्य। रूपभेदोपलब्धिषु रूपं चक्षुर्मात्रग्राह्यो द्रव्यवर्तिगुणविशेषस्तस्य भेदाः श्वेतरक्तनीलादयस्तेषामुपलब्धयो ज्ञानानि तेषु किमधिकारोस्ति योग्यता वर्तते। नैवेत्यर्थः। एवमेव साहित्यशास्त्रानभिज्ञस्य गुणदोषविभजनेधिकारो नास्तीति भावः। अतस्तदधिकारसिद्धये साहित्यशास्त्रमवश्यमारम्भणीयमिति सिद्धम्। अत्रापि पूर्ववद् दृष्टान्तालंकारः।।८।।

विवृति

गुणदोषस्वरूपपरिज्ञानमन्तरेण काव्यं दोषरहितं गुणवच्च रचयितुं ज्ञातुं च न शक्यते। गुणदोषपरिज्ञानमपि शास्त्रपरिज्ञानमन्तरेणानुपपन्नमित्येतत् दर्शयति–

गुणाः छन्दोऽलङ्कारसाधुशब्दादयः। दोषाः श्रुतिदुष्टार्थदुष्टकल्पनादुष्टश्रुतिकष्टापार्थव्यर्थादयः। तान् अशास्त्रज्ञः व्याकरणतर्कच्छन्दोऽलङ्कारादिशास्त्रानभिज्ञो जनः कथं विभजते, एते गुणाः एते दोषाः इति कथं ज्ञातुं क्षमः। एतदेव दृष्टान्तेन प्रत्याययति–किमन्धस्य दर्शनशक्तिहीनस्य पुरुषस्याधिकारोऽस्ति। किमित्येतदाक्षेपे वर्तते। आक्षेपश्च प्रतिषेधः। 'प्रतिषेधोक्तिराक्षेपः'। क्वेत्याह–रूपभेदोपलब्धिषु। रूपं द्रव्यत्रयवृत्ति। तदुक्तम्–'पृथिव्युदकतेजसां त्रयाणां रूपवत्त्वम्' इति। तस्य भेदा विशेषाः ;

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा हि-पृथिव्यां पञ्चप्रकारं रूपं शुक्लादि, अप्स्वेकमेव रूपम्, तेजसि शुक्लं भास्वरं चेति। तदुपलब्धिषु तद्विशेषपरिज्ञानेषु। यथाऽन्धस्य न रूपविशेषोपलब्धावधिकारः, तथा अनधिगतशास्त्रस्य न गुणदोषपरिज्ञाने। ननु चान्धस्य रूपमात्रोपलब्धावधिकारे सिद्धे सत्येवमुच्येत– 'किमन्धस्याधिकारोऽस्ति रूपभेदोपलब्धिषु' इत्यादि। यावता रूपमात्त्रोपलब्धिरप्यन्धस्य नास्ति। किं च एकनिषेधः शेषाभ्यनुज्ञां कुर्यात्। तथा हि–वामेनाक्ष्णा न पश्यति इत्युक्ते दक्षिणेनाक्ष्णा पश्यति इति प्रतीयते। तद्वदन्धस्य रूपभेदोपलब्धावधिकारे निषिद्धे रूपसामान्योपलब्धावधिकारोऽभ्यनुज्ञातः स्यात्। न चैतदुपपन्नम्, अक्ष्यर्थसन्निकर्षे सति संयुक्तसमवायात् रूपोलब्धेरिति चेन्न; ग्रन्थकाराभिप्रायानभिज्ञानात्। किमन्धस्याधिकारोऽस्ति रूपभेदोपलब्धिषु इति ब्रुवतो ग्रन्थकारस्यायमभिप्रायः– रूपसामान्योपलब्धावप्यन्धस्याधिकारो नास्ति। किमङ्ग! पुना रूपविशेषोपलब्धिषु इति। अन्धस्य रूपविशेषोपलब्धेर-सम्भवातिशयप्रख्यापनपरत्वादस्य। न च विशेषनिषेधः सामान्याभ्याभ्यनुज्ञां करोतीत्यंय न्यायः सर्वत्रानुपत्तव्यः। अन्यथा 'न वेदाध्ययनसम्पन्नोऽयं व्रात्यः' इति विशेषनिषेधः अन्यत्र वेदाध्ययनं सम्पादयेत्। न च सर्वो विप्रो वेदाध्ययनसम्पन्नः। तस्मात् स्वरूपप्रत्यायकोऽपि कश्चिद्विशेषनिषेध इत्यलमतिशिथिलवचः समाधानेन। (?)। कथमन्यथा निबरीसनिशातमस्तिरोहितनयन-पुटकोटरस्य मधुरतररससहकारतरुपरिपक्वफलास्वादाद्रूपानुमानम्? एकसामग्र्यधीनत्वात् रूपरसयोः। तदुक्तम् सकलतार्किक-चक्रवर्तिना–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

**'एकसामग्र्यधीनस्य रूपादे रसतो गतिः।
हेतुधर्मानुमानेन धूमेन्धनविकारवत्॥'**

न च रूपसामान्यवत् रूपविशेषस्याप्यनुमानेनान्धस्योपलब्धिः अनुमानस्य सामान्यविषयत्वात्। विशेषविषयं च प्रत्यक्षम्। अप्रत्यक्षाः स्वरूपविशेषा अन्धस्येत्यलमतिप्रपञ्चेन। ततोऽनवद्यमेतत्–'किमन्धस्याधिकारोऽस्ति रूपभेदोपलब्धिष्वि'ति। बहुवचनं चोपपन्नं भवति, व्यवच्छेद्यबहुत्वसम्भवात्॥८॥

पूर्वकविप्रयुक्तं प्रयुञ्जानैः काव्यदोषः परिह्रियत इति चेत् तत्राह गुणदोषानिति। अशास्त्रज्ञः प्रयोगमात्रपरो जनः कथं गुणदोषान् विभजते विविनक्ति अयं गुणः अयं दोषः इति, प्रयुक्तेष्वपि स्खलनदर्शनात्? अशास्त्रचक्षुषो दोषगुणापरिज्ञाने निदर्शनमाह **किमन्धस्येति।** अन्धस्य इदं शुक्लम्, इदं नीलम् इति भेदपरिज्ञाने न शक्तिरस्ति॥८॥

उक्तस्य लक्षणस्य स्वरूपावगतौ शास्त्रनिश्चयेन अवश्यं भवितव्यमित्याह–गुणेति॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतः प्रजानां व्युत्पत्तिमभिसन्धाय सूरयः।
वाचां विचित्रमार्गाणां निबबन्धुः क्रियाविधिम्॥९॥

रत्नश्री

अतः कारणात् सूरयः पूर्वाचार्याः क्रियाविधिं निबबन्धुरिति संबन्धः। क्रियाव्रिधिं क्रियाकल्पम्.........[मल्ल]नागेन[१] विद्यासमुद्देशे क्रियाकल्प इति काव्यालङ्कार उक्तः। तदनुसारेणानेन क्रियाकल्पः क्रिया.........[विधी]यतेऽनेनेति क्रियाविधिः। क्रियाकल्पोऽपि एवमिति नार्थतः कश्चिद् भेदः। काव्यलक्षणं शास्त्रं कृतवन्तः। [शास्त्रानुसारेण मूर्खो]ऽपि प्रवर्तते। किं पुनर्बुद्धिमान् लोकः। तस्मात् सर्वत्र न्मतमिति। व्युत्पत्तिमभिसन्धाय काव्ये यथावद् गुणदोषपरिज्ञान[हेतुभिः शास्त्र]संगृहीतैर्गुणदोष-विवेको व्युत्पत्तिः तदुपादानहानिफलाऽभिधेया। चतुवर्ग इति च नानाप्रकारः सर्वपुरुषार्थः संगृहीतः। अस्यैव तु [शास्त्रस्य प्रमेयश्च]तुर्वर्गः। तत्प्रतिपादकं शास्त्रं तादर्थ्यात्। एतावानेव च पुरुषार्थः। तत्र सर्वत्र गुणाश्चं दोषाश्च ज्ञातव्याः। तत्र गुणा वस्तुतः पुरुषार्थमया एव। ततस्त उपादेय[ाः] उपादेयतया [च] ज्ञेयास्तथार्थेनाज्ञातानामुपादानासम्भवात्। दोषास्तु तदाभासास्तत्संभविनो हेयाः। तेऽपि हेयतया ज्ञेयास्तथाभावेनाज्ञातानां हानासंभवात्। [6b] [वि]वेकश्च सम्यक् शास्त्रादेव दृष्टार्थाददृष्टार्थाद् वेति सर्वशास्त्रस्थितिरेषा। काव्यमप्येतत् त्रिविधं चतुर्वर्गरूपं चतुर्वर्गस्तदुपायश्चानेन रसान्तरपरिग्रहेण प्रतिपाद्य[प्रतिपा]दकत्वात्। शब्दात्मकमपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काव्यशरीरं चतुर्वर्गस्तादर्थ्यात्। उपायोऽपि तादर्थ्याच्चतुर्वर्गः।

मुख्यस्तावच्चतुर्वर्गः पुमर्थाशेषसंग्रहः।
तदुपायेऽपि तादर्थ्याच्छास्त्रेष्वपि [समादरः]॥

इति संग्रहश्लोकः।

किं च काव्येनेष्टदेवताविषयविचित्रस्तोत्रलक्षणेन सम्यग्विरचितेन धर्मोऽप्रमेयः। तथात्वे च कदाचिद् वरलाभादिकोऽर्थः। सुख[म्]प्येतत्पुरुषार्थ[द्वय]निष्ठमुक्तम्।

बुद्धस्तोत्रग्रन्थनव्यापृतानां भक्तिप्रह्वेष्विन्द्रियेषु द्रवत्सु।

एकैकस्मिन् यः क्षणे पुण्यकोशो नासर्वज्ञस्तं प्रमातुं समर्थः।।इति।

गुणज्ञराजादि[वर्णनातोऽप्यर्थाति]शयप्राप्तिस्तदर्थाच्च धर्मः सुखं च सम्पत्स्येते। किं बहुना, न सोऽस्ति पुरुषार्थः कश्चिद् यः काव्यात् परिगृहीताश्रयविशेषा[न्न जायते। इ]हानुषङ्गे गुणदोषविभागः करणीयः। स च शास्त्रादेव नान्यथेति विस्तरेण पूर्वमेव प्रतिपादितम्। ततः का[व्यक्रिया]विधिमिति प्रकृतम्। कस्य व्युत्पत्तिमभिसन्धायेत्याह-प्रजानामिति। लोकस्य सन्ताने का व्युत्पत्तिः कथं [केषां?] नाम......... [व्युत्पादनक्रि]यामभिसन्धाय क्रियाविधिं निबबन्धुरित्याह-वाचां विचित्रमार्गाणामिति। विचित्रो नानाप्रकारः शब्दालंकार-[ार्थालंकारादियुक्तो मार्गः] काव्यान्येव। ततः काव्यविषयां लोककर्तृकां काव्यगुणदोषविभागविज्ञानलक्षणां व्युत्पत्तिमुद्दिश्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[शास्त्रनिर्माणम]। तत्संक्षेपत्वाद् इदमपि सप्रयोजनमिति कर्त्तव्यमेव। ततश्च सामान्येन काव्यलक्षणशास्त्राज्ज्ञेय इयता विशिष्योच्यते।।

[काव्यल]क्षणमिदानीं कर्तुमारभते–

हृदयङ्गमा

अत इति।–अतः कारणात् गुणदोषाणां विभागादेः शास्त्रगम्यत्वात् हेतोः, सूरयः पूर्वपण्डिताः भरतादयः, प्रजानां लोकानां, व्युत्पत्तिं वाग्वैचित्र्यज्ञानम्, अभिसन्धाय अभिप्रेत्य, उद्दिश्य इत्यर्थः, विचित्रमार्गाणां विचित्रा विविधा मार्गाः पन्थानः रीतयः गौड़ीप्रभृतयः यासां तथाभूतानां, वाचां काव्यप्रबन्धानाम् इत्यर्थः, क्रियाविधिं रचनाविधानं, निबबन्धुः चक्रुः, काव्यग्रन्थान् रचयामासुः इति यावत्, (एतेन यथा भरतादीनां लोकव्युत्पत्त्यर्थं ग्रन्थरचनं ममापि तथा एतद्ग्रन्थविरचने समुद्यमः, न तु यशः ख्यापनार्थमिति सूच्यते)।।९।।

प्रभा

साहित्यशास्त्रारम्भविचारमुपसंहरति–**अत इति।** अतो गुणदोषाकलनपूर्वककाव्यरसास्वादस्य साहित्यशास्त्राधीनत्वात्। सूरयो भरतादयो विपश्चितः। प्रजानां काव्यरसिकानाम् व्युत्पत्ति काव्यरचनाकौशल्यम्। अथवा प्रजानां व्युत्पित्सूनां व्युत्पत्तिं वाग्व्यवहारनैपुण्यं च। अभिसंधायोद्दिश्य। एते वाग्व्यवहारनिपुणा भवेयुरिति तव्द्युत्पत्तिमभिसंधायेत्यर्थः। विचित्रमार्गाणां विचित्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनोहरा विविधा वा मार्गाः शब्दार्थालंकारभेदरूपा वैदर्भीगौडीयादिरीतिरूपा वा रचनाप्रकारा यासां तासाम्। वाचां काव्यवाणीनाम्। क्रियाविधिं क्रियायै काव्यरचनार्थं विधिं विधानं धर्मिधर्मादिविभागेन निरूपणम्। लक्ष्यलक्षणादिना कथनमित्यर्थः। निबबन्धुः शास्त्रपरिभाषया विरचयामासुः। कीदृशं काव्यनिर्माणं कथं च तत्र यतितव्यमिति सर्वं सम्यक् शास्त्रपरिभाषया निरूपयामासुरित्यर्थः। एतेन पूर्वसूरीणामनुसरणशीलस्य मम प्रजाव्युत्पत्त्यर्थमेवायं प्रयत्न इति सूचितं भवति। तथा च ग्रन्थस्यास्येदमेव प्रयोजनम्। काव्यज्ञानस्य प्रयोजनं तु कविबोद्धृगतं यशः प्रभृति पूर्ववर्णितमवगन्तव्यम्।।९।।

विवृति

यत एवम्, अतः प्रजानामविदुषां जनानां व्युत्पत्तिमभिसन्धाय 'अलङ्कारशास्त्रमधिगम्य काव्यलक्षणे व्युत्पन्ना भवन्तु' इति विचिन्त्य सूरयः मेधाविभामहादयः आचार्याः। वाचां किंविशिष्टानामित्याह–विचित्रमार्गाणां विचित्रो नानाप्रकारो मार्गो वैदर्भीगौड्यादिः यासां ता विचित्रमार्गाः, तासाम्। निबबन्धुः विरचितवन्तः। किमित्याह–क्रियाविधिम्, क्रियत इति क्रिया कृतिः काव्यम्; क्रियाया विधिः क्रियाविधिः। विधीयते ज्ञायते अनेनेति विधिः लक्षणम्। काव्यलक्षणं कृतवन्त इत्यर्थः।।९।।

लक्षणारम्भसमर्थनमुपसंहरति–अत इति। यतो दोषगुणविभागज्ञानस्य शास्त्राधीनत्वम्, अतः पूर्वाचार्याः काव्यवाक्यानि व्युत्पित्सूनां जनानां काव्यवाक्यानां व्युत्पत्तिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दोषराहित्येन गुणवत्त्वेन च विशिष्टज्ञानम् अभिसन्धाय उद्दिश्य, गौडीयादिभेदेन विचित्रमार्गाणां वाचां क्रियाविधिं रचनाप्रकारं निबबन्धुः प्रबन्धरूपेण कृतवन्तः।।९।।

इदानीं शास्त्रनिश्चयद्वारेणैव विदुषां प्रवृत्तिरित्याह–अत इति। अभिसन्धाय उद्दिश्य। विचित्रमार्गाणां नानाविधार्थप्रकाशकानाम्; क्रियाविधिं विधानम्।।९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तैः शरीरं च काव्यानामलङ्कारश्च दर्शितः।
शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली॥१०॥

रत्नश्री

इह यानि कानिचित् काव्यानि संभवन्ति तेषां [शरीरमलङ्कारश्च] तैः पूर्वाचार्यैः लोकस्य काव्यव्युत्पत्तये क्रियाकल्पे निबद्धे तयोः कीदृशं शरीरम् [शब्दरूपम्। अर्थे][7a]नाविष्टत्वात्। यथा हि पुरुषशरीरे हारकेयूरादिरलंकारो न्यस्यते येन शोभते, तथा काव्यशरीरे [शब्दमयेऽप्युपमादिरर्प्य]ते, यतः शोभा। [व]क्ष्यते [च]

काव्यशोभाकरान् धर्मानलंकारान् प्रचक्षते।।इति। [2.1]

पश्चादलङ्कारो वक्ष्यते। पदानां सुबन्तति[ङन्तानां अवली श्रेणी, तया] परिपूर्णं काव्यं [तस्य] श्लोकादयोऽवयवा अवान्तरवाक्यानि। कविना वक्तुमिष्टेऽभिप्रेतेऽर्थे कस्मिंश्चिद् रघुवंशादौ। व्यवच्छिन्ना गमकत्वे[न]....स्वीकृता। विशेषे[ण]...... ....[शरी]रं विज्ञेयमितीष्टार्थव्यवच्छिन्ना पदावली प्रसिद्धत्वादनूद्याप्रसिद्धं शरीरं विधीयते। यथा यः..........

[श]रीरं कतिविधमित्याह–

हृदयङ्गमा

इदानीं प्राचीनसंवादनिर्देशपुरःसरं धर्म्मिभूतं काव्यशरीरं निरूपयति, तैरिति।–तैः पूर्वपण्डितैः, काव्यानां शरीरञ्च गुणदोषालङ्काराणामाधारतया रसादिव्यङ्ग्यमात्मनः देहभूतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आश्रयश्च, तथा अलङ्कारश्च अलङ्क्रियते काव्यशरीरमुत्कर्षीक्रियते एभिः इत्यलङ्काराः इति व्युत्पत्त्या श्लेषादिगुणाः अनुप्रासोपमादयः अलङ्कारश्च इत्यर्थः, "उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः" इत्याद्युक्तेरिति भावः ; दर्शिताः लक्षणनिर्देशेन निरूपिताः। अत्र 'च'-द्वयमुभयप्राधान्यद्योतकम्। यद्वा, –शरीरञ्चेति चकारस्तैरित्यनेन सम्बध्यते, तैश्च इत्यर्थः, अलङ्कारश्च इति चकारः अनुक्तसमुच्चयार्थः, अलङ्काराः गुणदोषादयश्च इत्यर्थः। काव्यानामिति बहुत्वं प्रकारभेदविवक्षयोक्तमवगन्तव्यम्। (ननु काव्यं तावत् किमिति प्रश्ने–"कवनीयं काव्यम्" इति लोचनकारः। "कवयति इति कविः तस्य कर्म्म काव्यम्" इति विद्याधरः। "कौति शब्दायते विमृशति रसभावान् इति कविः तस्य कर्म्म काव्यम्" इति भट्टगोपालः। "लोकोत्तरवर्णनानिपुण-कविकर्म्म काव्यम्" इति काव्यप्रकाशकारः। "प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता। तदनुप्राणनाज्जीवेत् वर्णनानिपुणः कविः।। तस्य कर्म्म स्मृतं काव्यम्" इति भामहः। चारुताशालिशब्दार्थयुगलं काव्यमिति रूढोऽर्थः)। किं तत् शरीरमित्याकाङ्क्षायां स्वमतमुद्धाटयति, शरीरमिति।–तावच्छब्दो वाक्यालङ्कारार्थः। [उक्तञ्च वामनेन,–"वाक्यालङ्कारप्रयोजनन्तु नानर्थकम्" (का० सू० वृ० २अधि० १अ०) इति]। इष्टाः हृद्याः, रसाद्यनुगमेन मनोहरा इत्यर्थः, ये वाच्यलक्ष्यव्यङ्ग्यभेदेन विविधा अर्थाः, तैः व्यवच्छिन्ना विभूषिता, पदावली पदसमष्टिः, काव्यस्य शरीरमिति वर्त्तुलार्थः, अत्रेष्टत्वं लोकोत्तराह्लादजनकत्वम्। "रिपुस्ते मृतः, पुत्रस्ते जातः" इत्यादौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आह्लादस्य लोकोत्तरत्वाभावात् न काव्यत्वम्। तादृशार्थाश्च दोषाभावात् गुणालङ्कारसद्भावाच्च जायमानमनोज्ञत्वेन व्यङ्ग्यवैशिष्ट्येन च ज्ञेयम्। (ततश्च ध्वनिगुणीभूतव्यङ्ग्यचित्रभेदेन काव्यस्य त्रैविध्यमन्यैरुक्तमत्रानुसर्त्तव्यम्। तथा हि, यत्र व्यङ्ग्यचमत्कृतिर्वाच्यचमत्कृतेरन्तर्लीना तत्र गुणीभूतव्यङ्ग्यम्। यत्र च व्यङ्ग्यचमत्कृतेरभावः वाच्यचमत्कृतिरेव परं प्रकर्षमुपगता तत्र चित्रमिति। अत्र वाच्यलक्ष्यव्यङ्ग्यभेदेनार्थस्य त्रैविध्यमवगन्तव्यम्। अभिधया प्रतिपाद्यः अर्थः वाच्यः, लक्षणया बोध्यः लक्ष्यः, व्यञ्जनया गम्यः व्यङ्ग्यः इति। अत्र व्यङ्ग्यस्यापि वस्त्वलङ्काररत्यादिभेदात् त्रिविधो भेदः ; स च अन्यत्र विस्तर इति नोक्तः)। पदावलीशब्दोऽत्र वाक्यमात्रार्थकः, निराकाङ्क्षपदसमूहस्य काव्यत्वाव्यवहारात् साकाङ्क्षेति तस्याः विशेषणं देयम्। (ततश्च अर्थवद्वाक्यं काव्यशरीरं, न तु शब्दार्थावित्यायातम्; तेन च 'काव्यं पठ्यते' 'काव्यादर्थोऽवगम्यते' इत्यादिव्यवहारोऽपि सङ्गच्छते। नव्यास्तु–"शब्दार्थौ शरीरं, रसश्चात्मा, दोषाः काणत्वादिवत्, गुणाः शौर्य्यादय इव, अलङ्काराः कटककुण्डलादिवत्" इत्याहुः। इह रसस्याङ्गित्वमपि नाद्रियते, नीरसानामपि गुणालङ्कारसद्भावाद्वस्त्वलङ्कारव्यञ्जकत्वाच्च वैचित्र्यजनकत्वेन काव्यतया सकलालङ्कारिकैरङ्गीकृतत्वात्। शरीरं चात्र "अर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः। वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ।।" इत्युक्तलक्षणः गुणालङ्कारोपस्कृतो वाच्यार्थः वस्त्वलङ्काररसादिरूपो व्यङ्ग्यार्थश्च इत्यवगन्तव्यः)।।१०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

धर्मिणि ज्ञाते धर्माणां युक्तायुक्तताया आकलनं सुकरं भवतीति प्रथमं धर्मिस्वरूपं निर्णयति-तैः **शरीरं च काव्यानामिति।** अत्र चकारो भिन्नक्रमः। तैश्च पूर्वसूरिभिः काव्यानाम् इष्टार्थवाक्यानाम्। गद्यपद्यमिश्रादिभेदेन काव्यानामिति बहुवचनम्। शरीरम् आत्मभूतेष्टार्थाश्रयो देहः। अलंकाराः शरीरशोभावहा अनुप्रासोपमादयः शब्दार्थालंकाराश्च। दर्शिताः विवेचिताः। चकारोनुक्तसमुच्चयार्थः। तेन दोषाणामपि संग्रहः। तेषामपि ग्रन्थान्ते निरूपितत्वात् वैदर्भरीतेः प्राणत्वेनाग्रे [१.४१] ग्रन्थकृतोक्तानां श्लेषप्रसादादीनां गुणानां तु। शरीरशब्देनैव संग्रहः। यतो वैदर्भरीतिर्नाम पदावलीसंस्थानविशेषः। सैव पदावली शरीरम्। अतो गुणा न शरीरतो भिन्ना इति नोद्देशवाक्ये पृथक्त्वेन गणिताः। एतेन गुणदोषयोरग्रे निरूपणात् तेषामुद्देशवाक्ये परिगणनाभावान्न्यूनतेति शङ्का निरस्ता। काव्यशरीरं लक्षयति-**शरीरं तावदिति।** तावदिति वाक्यालंकारे। इष्टार्थव्यवच्छिन्ना इष्टाः सरसमनोहरतया वर्णयितुमभिलषिता ये अर्थाः कविप्रतिभोल्लासविषयीभूताः सुन्दराः पदार्थाः। तैर्व्यवच्छिन्ना विशेषेण अवच्छिन्ना परिपूर्णा चमत्कृतिबहुलेत्यर्थः। पदावली पदसमूहः। शरीरं काव्यशरीरमिति भावः। अत्र पदावली साकाङ्क्षा एव ग्राह्या। तस्या एव इष्टार्थव्यवच्छिन्नतार्हत्वात् इष्टत्वं च साहित्यशास्त्रे चमत्कारपूर्वकवर्णनाभिलाषः। चमत्कारश्च लोकोत्तराह्लादः। आह्लादगतलोकोत्तरत्वं च कविप्रतिभया अलौकिकसामग्रीविशेषेण संपादितः सुखत्वव्याप्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुभवसाक्षिको जातिविशेषः। तेन पुत्रस्ते जातः शत्रवस्ते पराभूता इति वाक्यार्थजन्यज्ञानस्य न काव्यत्म्। तस्य लोकोत्तराह्लादजनकत्वाभावात्। तादृशाह्लादं प्रति शब्दार्थानां कारणता च व्यङ्ग्यविशेषेण दोषाभावविशिष्टगुणालंकारसमुद्भूतेन सौन्दर्येण च संभवति। अत एव च काव्यस्य भेदत्रयं भवति। तथाहि-यत्र वाच्यचमत्कृतेर्व्यङ्ग्यचमत्कृतिः प्रधानतया प्रस्फुरति तत्र ध्वनिकाव्यव्यवहारः। यत्र व्यङ्ग्यचमत्कृतिरङ्गीभूता वाच्यचमत्कृतिकुक्षिनिलीना इव भासते तत्र गुणीभूतव्यङ्ग्यकाव्यमिति व्यवहारः। यत्र च व्यङ्ग्यशून्या केवलं वाच्यचमत्कृतिर्भवति तत्र चित्रकाव्यमिति व्यपदेशः। एवं सामान्यतः काव्यस्य त्रयो भेदा अवगन्तव्याः।।

केचित्तु—सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलंकृतिम्।
तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी।। (भामह १.१४)

इति व्यङ्ग्यचमत्कृतिनिरपेक्षं गुणालंकारोपस्कृतं शब्दमेव काव्यं वदन्ति। तन्मतपरिग्रहाय लक्षणे इष्टेति पदं विभज्य अर्थव्यवच्छिन्ना इति विशेषणविशिष्टेन पदावलीपदेन तद्विशेषणतया योजनीयम्। एवं सति रूपी घटोनित्य इत्यत्र उभयोरूपघटयोरनित्यत्वसंबन्धवदत्र अर्थे पदे च इष्टेति विशेषणस्य संबन्धो भवति। तेन इष्टार्थं तथा इष्टशब्दं च काव्यमिति उभयोरपि संग्रहः।। चित्रकाव्यं पुनः शब्दचित्रमर्थचित्रमिति द्विविधम्। शब्दचित्रमनुप्रासयमक-श्लेषादिकम्। अर्थचित्रं च उपमारूपकादिकम्। तत्र अर्थो वाच्यलक्ष्यव्यङ्ग्यभेदेन त्रिविधः। तत्र अभिधाशक्त्या प्रतीतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाच्यः। लक्षणयोपस्थाप्यो लक्ष्यः। व्यञ्जनया प्रतीतिपदवीमारूढो व्यङ्ग्यः। व्यङ्ग्यार्थोपि वस्त्वलंकाररसादिभेदात् त्रिविधः। वस्त्वलंकाररूपो व्यङ्ग्यः संलक्ष्यक्रमः। रसादिव्यङ्ग्यस्तु असंलक्ष्यक्रमः। विस्तरस्तु ध्वन्यालोकलोचने काव्यप्रकाशचतुर्थोल्लासादौ च द्रष्टव्यः। एवं च आचार्यदण्डिनो मते रमणीयार्थोपस्कृतं सुन्दरं वाक्यमेव काव्यमिति निष्पन्नम्। तत्र वाक्यं पदकदम्बः। पदानि च समासाङ्गसंबन्धशून्यानि सुप्तिङन्तानि।।

अत्रेदमवधेयम्। काव्यशब्दस्य वाच्यं शब्दार्थयुगलं वा रमणीयार्थप्रतिपादकः केवलः शब्दो वा इति पक्षद्वयम्। तत्राद्यः पक्षः शब्दार्थौ सहितं काव्यं गद्यं पद्यं च तद्द्विधा इति भामहेन (१.१६) काव्यशब्दोयं गुणालंकारसंस्कृतयोः शब्दार्थयोर्वर्तते इति वामनेन (का० वृ० १.१) शब्दार्थौ काव्यम् इति रुद्रटेन (२.१) तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि इति मम्मटेन (१. ४) अदोषौ सालंकारौ च शब्दार्थौ काव्यम् इति हेमचन्द्रेण (पृ० १६) शब्दार्थौ निर्दोषौ सगुणौ प्रायः सालंकारौ च काव्यम् इति वाग्भटेन (पृ० १४) गुणालंकारसहितौ शब्दार्थौ दोषवर्जितौ इति प्रतापरुद्रे विद्यानाथेन (पृ० ४२) शब्दार्थौ वपुरस्य तत्र विबुधैरात्माभ्यधायि ध्वनिः इति एकावल्यां विद्याधरेण (१.१३) इत्येवमादिभिः साहित्यकोविदैरङ्गीकृतो वर्तते। एतेषामयमाशयः। काव्ये हृद्याः अर्था रमणीयाः शब्दाश्चापेक्ष्यन्ते। तैरेव शास्त्रविमुखानां मृदुमतीनां राजपुत्रादीनां सन्मार्गोन्मुखीकरणं संभवति। अतः काव्यफलनिष्पत्तावुभयोः शब्दार्थयोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समप्रधान्याच्छब्दार्थयुगलमेव काव्यपदवाच्यं भवितुमर्हतीति। परमेतत् काव्येतिपदस्य वाच्यार्थे शब्दस्य प्रधान्यं वदन्तो जगन्नाथादयो न सहन्ते। ते इमं पक्षमेवं दूषयन्ति। तथाहि–काव्यमुच्चैः पठ्यते काव्यादर्थोवगम्यते काव्यं श्रुतमर्थो न ज्ञातः इत्यादिविश्वजनीनव्यवहाराच्छब्दार्थयुगलं काव्यशब्दवाच्यं भवितुं नार्हति। प्रत्युत वाग्व्यवहारे शब्दस्यैव प्राधान्यादर्थोपस्कृतः शब्द एव काव्यशब्दाभिधेयो भवितुमुर्हति। काव्यमुच्चैः पठ्यते इत्यादिवाक्येषु लक्षणयोपपत्तिस्तु न युक्ता। शब्दार्थयुगले भवदभिप्रेतायाः काव्यपदशक्तेः स्वीकारे मानाभावात्। अर्थनिश्चयं विना लक्षणाया अप्रवृत्तेः। यतो मुख्यार्थहतिर्लक्षणाबीजम्। सा च वाच्यार्थनिश्चयं विना नोद्भवति। अतः काव्यशब्दे पराभिमतवाच्यार्थस्यानिश्चयान्नात्र लक्षणा संभवति। किंच वेदपुराणादिसंज्ञाशब्देषु शब्दस्यैव प्राधान्यं दृश्यते। सैव सरणिरत्रापि अङ्गीकर्तव्या। अन्यच्च काव्यपदप्रवृत्तिनिमित्तं शब्दार्थयोर्व्यासक्तं प्रत्येकं पर्याप्तं वा। नाद्यः। एको न द्वाविति व्यवहारस्येव श्लोकवाक्यं न काव्यमिति व्यवहारस्यापत्तेः। नापि द्वितीयः। एकस्मिन्नेव पद्ये काव्यद्वयव्यवहारापत्तेः। तस्मात् काव्यपदवाच्यं न शब्दार्थयुगलं तर्हि रमणीयार्थप्रतिपादकः शब्द एवेति।। अत्र प्रकाशानुसारिभिरेवं समाधायि। काव्यं पठितं श्रुतं काव्यं बुद्धं काव्यमिति उभयविधव्यवहारदर्शनात् काव्यपदप्रवृत्तिनिमित्तं व्यासज्यवृत्ति (शब्दार्थोभयपर्याप्तवृत्ति) स्वीक्रियते। [काव्यशब्दवाच्यं शब्दार्थयुगलमिति भावः] तत्र प्रयोगानुरोधेन क्वचिच्छब्दविशिष्टोर्थः काव्यं क्वचिदर्थविशिष्टः शब्दः काव्यमिति विवेकः। तथा च रसार्थालंकारप्रधानप्रबन्धस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमपक्षेण काव्यत्वसिद्धिः। शब्दालंकारप्रधानप्रबन्धस्य च द्वितीयपक्षेण तत्त्वसिद्धिः। काव्यमुच्चैः पठ्यते इत्यादिप्रयोगेषु लक्षणया शब्दमात्रे काव्यपदप्रवृत्तिः। काव्यं बुद्धम् इत्यादिषु लक्षणया अर्थमात्रे काव्यशब्दप्रवृत्तिः। एवं लक्षणयान्यतरस्मिन्नपि तत्त्वादेको न द्वौ इतिवत् श्लोकवाक्यं न काव्यमिति व्यवहारस्य नापत्तिरिति।। इदमत्र विमर्शनीयम्। वाग्व्यवहारे सामान्यतः शब्दस्य अर्थापेक्षया अधिकदेशवृत्तित्वादुत्सर्गतः शब्दप्राधान्य एव काव्यशब्दप्रवृर्त्तिर्युक्ता। तत्र समकक्षतया अर्थनिवेशनं शब्दविषयसंकोचकरं न युक्तम्। निवेशे तु वेदपुराणादिसंज्ञास्वपि विनिगमनाभावादर्थनिवेशोपरिहार्यः स्यात्। तेन च अर्थज्ञानं विनापि वेदः पठितः इत्यादिसार्वजनीनव्यवहारस्यानुपपत्तिः। यथा च वेदशब्दवाच्यं न शब्दार्थयुगलं किंतु शब्दविशेष एव तद्वदत्रापि काव्यशब्दवाच्योर्थोपस्कृतशब्दविशेष एव। काव्यं बुद्धम् इत्येवमादयः प्रयोगास्तु मधुरवर्णानुप्रासजन्यश्रुतिचमत्कारनुभवेन सुस्था भवेयुः। को हि नाम रसिकः–

शिञ्जानमञ्जुमञ्जीराश्चारुकाञ्चनकाञ्चयः।
कङ्कणाङ्कभुजा भान्ति जितानङ्ग तवाङ्गनाः।।

अथवा–

मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे।।

इत्येवमादिषु केवलकोमलानुप्रासमहिम्नैव साधारणीभूत-मर्थमविगणय्य इदं काव्यमिति न बुध्येत। अन्यच्च स्त्री ब्रूते। शुष्को

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृक्षस्तिष्ठत्यग्रे। इत्येवमादि न काव्यम्। कामिनी व्याहरति। नीरसतरुरिह विलसति पुरतः। इत्येवमादीनि तदर्थकान्येव वाक्यानि तु काव्यम् इति सर्वसहृदयानुभवसिद्धम्। तेन च काव्येतिपदस्याभिधेये शब्दस्यैव प्राधान्यमिति निष्पद्यते। नार्थशब्दयुगलस्य न वा केवलार्थस्य। अत एव रमणीयार्थप्रतिपादकः शब्द एव काव्यपदवाच्यम्। एतदेव च आचार्यदण्डिनोभिप्रेतं काव्यलक्षणमिति प्राग्लक्षणविचारे दर्शितमेव।।

एतावत्पर्यन्तं प्राचीनार्वाचीनानां काव्यलक्षणस्योद्देश्यविषये विचारः प्रदर्शितः। अतः परं पूर्वोक्तलक्षणस्योद्देश्यविशेषणविषये किंचिद् विमृशामः। तत्र तावदुद्देश्यविशेषणानि निर्दोषौ सगुणौ सालंकारौ चेति त्रीणि सन्ति। तत्र निर्दोषौ इत्यनेन दोषशून्यशब्दार्थयोः काव्यत्वस्वीकारे न्यक्कारो ह्ययमेव इत्यस्य विधेयाविमर्शदोषदुष्टतया काव्यत्वं न स्यात्। परमयं श्लोकः लक्षणे अदोषौ इति विशेषणं निवेशयद्भिः प्रकाश-कारादिभिर्ध्वनित्वेनोत्तमकाव्यतयाङ्गीकृतो वर्तते। अतो निर्दोषौ इति विशेषणनिवेशे अव्याप्तिदोषः। अन्यच्च अदोषौ इति विशेषणत्वे काव्यशब्दो विरलविषयो निर्विषयो वा स्यात्। सर्वथा निर्दोषस्य काव्यस्यात्यन्तासंभवात्। दुष्टं काव्यम् इति व्यवहारस्य चानुपपत्तिः स्यात्।। सगुणौ इत्यपि विशेषणमयुक्तमेव। यतस्तददोषौ शब्दार्थौ इति लक्षणं कुर्वद्भिः प्रकाशकारादिभिर्गुणानामात्मभूतरसैकधर्मत्वस्याङ्गीकारात्। शब्दार्थयोस्तत्सबंन्धस्य वक्तुमशक्यत्वात्। नहि शौर्यादिवदात्मधर्माणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणानां शरीरघटकत्वमुपपद्यते। ननु सगुणौ इति विशेषणं गुणत्वान्यथानुपपत्त्या सरसौ इत्यर्थतात्पर्यकमिति चेत् तन्न समञ्जसम्। नहि प्राणिमन्तो देशा इति वक्तव्ये शौर्यादिमन्तो देशा इति कोपि ब्रूयात्। तथैव सरसौ इति वक्तव्ये सगुणौ इत्युक्तिरसमञ्जसैव। अपरं च उदितं मण्डलं विधोरिति काव्ये गतोस्तमर्क इत्यादौ च गुणशून्यत्वेनाव्याप्तिः स्यात्। काव्यजीवितस्य चमत्कारस्य तु अत्र विद्यमानत्वान्नेदं काव्यमिति वक्तुं न शक्यते। अतः सगुणौ इति विशेषणे अव्याप्तिदोषस्य प्रादुर्भावात् तन्न युक्तम्।। सालंकारौ इतीदमपि विशेषणमनुपपन्नम् यतो हारादिवच्छरीरोपस्काराणामलंकाराणां तद्घटकत्व-स्यायुक्तत्वात्। तथा च शब्दार्थौ इत्यस्य त्रीण्यपि विशेषणान्यनुपपन्नान्ययुक्तानि चेति ज्ञेयम्।। आनन्दवर्धनेन काव्यस्यात्मा ध्वनिरिति ध्वनियुक्तौ शब्दार्थौ काव्यस्वरूपेण वर्णितौ। तत्र ध्वनिशब्देन वस्त्वलंकाररसादिरूपेण त्रिविधो ध्वनिरपेक्ष्यते अथवा केवलं रसस्वरूपोपेक्ष्यते। प्रथमार्थस्वीकारे प्रहेलिकादावतिव्याप्तिः। तत्र ध्वनिनैव वस्तुनोवगमः। केवलरसस्वीकारेप्यापतन्तीमनुपपत्तिमग्रे दर्शयामः।।

एतावत्पर्यन्तं शब्दार्थौ काव्यम् इति लक्षणे शब्दार्थौ इत्यस्य विशेष्यस्य विशेषणविषये विचारः प्रदर्शितः। इदानीं विशिष्टः शब्दः काव्यम् इति पक्षे स्वीकृते शब्दस्य विशेषणविषये विचारं कुर्मः। तत्र काव्यं रसादिमद्वाक्यं श्रुतं सुखविशेषकृद् इति अलंकारशेखरे माणिक्यचन्द्रेण (पृ० २)। वाक्यं रसादिमत् काव्यम् इति साहित्यदर्पणे विश्वनाथेन (१.३) च वाक्यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रसादिमत् इति विशेषणं काव्यरूपावगमाय निवेशितम्। परं तन्न विचारक्षमम्। यतो रसादिमद्वाक्यस्यैव काव्यत्वे वस्त्वलंकारप्रधानानां काव्यानामकाव्यत्वापत्तिः। महाकविभिस्तेषां काव्यत्वेन स्वीकारान्न तानि काव्यानीत्यापादनं नोचितम्। तथा च जलप्रवाहवेगनिपतनोत्पतनभ्रमणानि कविभिर्वर्णितानि कपिबालादिविलसितानि च काव्यरूपाण्येव। तत्र रसात्मकं वाक्यं काव्यम् इति लक्षणे काव्यशब्दस्याप्रवृत्त्याव्याप्तिदोषो दुर्वारः स्यात्। शब्दार्थयोर्ध्वनिकारोक्तदिशा ध्वनिसहितौ इति विशेषणे इयमेवाव्याप्तिर्बोद्धव्या। ननु वस्त्वलंकारप्रधानेपि तत्तत्प्रबन्धे यथा कथंचिदस्त्येव रसस्पर्श इति चेन्न। तादृशरसस्पर्शस्य गौश्चलति मृगो धावति इत्यादौ अतिप्रसक्तत्वेनाप्रयोजकत्वं स्फुटमेव। यतोऽर्थमात्रस्य विभावानुभावव्यभिचार्यन्यतमत्वाद्रसस्पर्शो वर्तत एव तस्माद् रसात्मकमिति विशेषणं न युक्तम्। केवलं रमणीयार्थप्रतिपादकः शब्दः काव्यम् इत्येव लक्षणं निर्दोषं काव्यशब्दवाच्यसकलविषयसंग्राहकं चेति ज्ञेयम्। इदमेव च मतं दण्ड्यनुकूलं स्मृत्यनुगृहीतं च। तदुक्तमाग्नेये–

संक्षेपाद्वाक्यमिष्टार्थव्यवच्छिन्ना पदावली।
काव्यं स्फुरदलंकारगुणवद्दोषवर्जितम्।।इति(३३७.६-७)

अत्र इष्टार्थव्यवच्छिन्ना पदावली काव्यम् इत्येव लक्षणम्। स्फुरदलंकारं गुणवद्दोषवर्जितम् इत्यादि प्राशस्त्यबोधकमिति ज्ञेयम्। विशेषविचारस्तु विश्वनाथजगन्नाथादिभिः स्वस्वग्रन्थे प्रदर्शितस्तत एवावगन्तव्य इत्यलं पल्लवितेन।।१०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

तैः सूरिभिः शरीरं च काव्यानां प्रदर्शितम् अर्थावच्छिन्नवर्णानुपूर्वीरूपम्। तथा न केवलं शरीरमेव, अलङ्कारश्चोपमारूपकादिर्दर्शितः। तयोर्द्वयोः शरीरमिव शरीरम्। अलङ्काराधारत्वात्। तद्व्याचष्टे–

तावच्छब्दः क्रमे वर्तते। अथ किं शरीरमित्याह–इष्टः अभिवांछितोऽभिधातुर्योऽर्थः तेन व्यवच्छिन्ना उपेता पदानां नामाख्यातोपसर्गनिपातानामावली परिपाटी सा शरीरम्।।१०।।

एवं पूर्वेषां काव्यलक्षणारम्भसामर्थ्यतः आदावेव स्वप्रवृत्तेर्विषयो दर्शितः। इदानीं पूर्वाचार्यदर्शितं काव्यशरीरमाह–**तैरिति। शरीरं तावदिति।** धर्मिणि सति धर्माणामभिधानमिति प्रथमं काव्यशरीरमभिधीयते, पश्चादलङ्कार इत्यर्थः। अलङ्कार्यं काव्यशरीरम् इष्टार्थव्यवच्छिन्ना पदावली विवक्षितार्थपरिच्छिन्नः शब्दसन्दर्भः ; यथा रामचरिते विवक्षिते–ब्रह्मादिभिर्देवैरर्थितो लक्ष्मीपतिर्दशरथस्य चतुर्धा पुत्रत्वमवापेति रामावतारनाम्नः प्रबन्धस्य, कैकयीवरदाननिध्नेन दशरथेन वनवासायादिष्टस्य राघवस्य विराधवधादिरावणवधान्तोक्तिः रघुवीरचरितनाम्नः काव्यस्य, शरीरम्। एवं कृष्णस्य चरिते कंसवधरुक्मिणीकल्याणादि।।१०।।

लक्षणविद्भिः पूर्वाचार्यैः काव्यानां स्वरूपं च अलङ्काराश्च दर्शिताः ; तयैव दृशा वयमपि दर्शयाम इत्याह–**तैरिति।** विवक्षितार्थस्य अन्यूनानतिरेकतास्वरूपेण प्रतिपादनसमर्था पदावली काव्यशरीरं भवति।।१०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पद्यं गद्यं च मिश्रं च तत् त्रिधैव व्यवस्थितम्।
पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा॥११॥

रत्नश्री

यदनन्तरं लक्षणतः कथितं तच्छरीरं प्रभेदतः त्रिधैव त्रिप्रकारमेव व्यवस्थितं बोद्धव्यम्। ....[के]वलपद्यात्मकं.........[केवलगद्यात्मकं गद्यपद्योभयात्मकं च]....इत्यनेकेन प्रकारेण त्रिधैव व्यवस्थितमिति प्रकृतम्। तत्र पद्यं न ज्ञायते किंरूपमित्यत आह–पद्यं चतुष्पदीत्यादि। ....अनूद्य पद्यमिति ज्ञ[ापयति चतुष्पदी] तत् पद्यं ज्ञेयमिति। तच्च पद्यं द्विधा द्विप्रभेदमवसेयम्। कथम्–वृत्तं जातिरित्यनेन रूपेण॥

तदपि न ज्ञायते किं वृत्तं जाति[र्वा कीदृशी]ति। तदाह–

हृदयङ्गमा

इदानीं काव्यभेदान् दर्शयति, गद्यमिति।–तत् काव्यं गद्यं पद्यं मिश्रञ्चेति त्रिधैव त्रिप्रकारेणैव, व्यवस्थितं सिद्धान्तितं, प्राचीनैरिति शेषः। गद्यं ['गद व्यक्तायां वाचि' इति धातोः "गदमदचरयमश्चानुपसर्गे" (३।१।१०० पा०) इति कर्मणि यत्प्रत्यये सिद्धं], पादेषु भवं पद्यं, (भवार्थे यत्–प्रत्ययस्य भसंज्ञायां पदादेशे च सिद्धं), पद्यस्य कृच्छ्रसाध्यनिर्वाहतया प्रथमं गद्यनिर्देशः। तत्र पद्यलक्षणमाह, पद्यमिति।–चतुर्णां पदानां समाहारः चतुष्पदो चतुश्चरणनिबद्धं पद्यं स्यात्, द्विपादादिपद्यस्य वेदादौ दर्शनात् लोकेषु पादचतुष्टयात्मकस्यैव प्रसिद्धेश्च प्रायेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाकाव्यादौ तादृशानामेव निवेशनाच्च चतुष्पदो इत्युक्तम्; वस्तुतस्तु छन्दोबद्धं वाक्यमेव पद्यम्। (यदाहुः,–"छन्दोबद्धपदं पद्यम्," तथा, "छन्दोनियमवद्वाक्यं पद्यमित्यभिधीयते" इति च), तदपि वृत्तं जातिरिति द्विविधम्, अक्षरसङ्ख्यया निबद्धं वृत्तं, मात्रया निबद्धा जातिरिति। गद्यमिश्रयोर्लक्षणमनतिप्रयोजनमिति न तदत्र प्रदर्शितं, गद्यं छन्दोरहितं, मिश्रं गद्यपद्योभयात्मकमिति ज्ञेयम्॥११॥

प्रभा

इदानीं पद्यगद्यमिश्रप्रकारेण शरीरस्य त्रैविध्यं दर्शयति–**पद्यमिति।** तत् काव्यशरीरम्। पदं चरणमर्हतीति पद्यं श्लोकबन्धः। छन्दोबद्धपदं पद्यम्। इति साहित्यदर्पणे (६.३१४) तच्च मालिनीहरिणीस्रग्धरादिविविधरूपम्। गद्यते छन्दसा विना केवलशब्दप्रबन्धैरेव विरच्यते तद्गद्यम्। तच्चतुर्विधं यथोक्तं दर्पणे–

वृत्तगन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च।
भवेदुत्कलिकाप्रायं चूर्णकं च चतुर्विधम्॥(६.३३०)

एतेषां लक्षणानि च–

आद्यं समासरहितं वृत्तभागयुतं परम्।
अन्यद्दीर्घसमासाढ्यं तुर्यं चाल्पसमासकम्॥ इति।(६.३३१)

मिश्रम् गद्यपद्योभयमयं चम्पूपञ्चतन्त्रादिकम्। एवं त्रिप्रकारकमेव तद्व्यवस्थितं प्राचीनसूरिभिर्निरूपितम्। एवकारो भेदान्तरव्यंवच्छेदार्थः। तेषु पद्यं निर्वक्ति–पद्यं चतुष्पदीति। चतुर्णां पदानां समाहारश्चतुष्पदी। द्विगोरिति सूत्रेणादन्तत्वात् ङीप्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पादचतुष्टयात्मकं पद्यमित्यर्थः। द्वित्रिपादपरिमितानां छन्दसां वेदेष्वेव दर्शनाच्चतुष्पदीति कथनं लौकिकवृत्तानुरोधेनेति केचित्। अन्ये तु चतुष्पदीत्युपलक्षणमेतत्। तेन पञ्चषट्पादानां वृत्तानामपि संग्रहः। तच्च पद्यं वृत्तं जातिरिति द्विधा द्विप्रकारकम्। तत्र अक्षरसंख्यातं वृत्तं मात्रासंख्याता जातिः। तदुक्तं छन्दोमञ्जर्याम्–

पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्।। इति।

तत्र समार्धसमविषमाणि वृत्तानि क्रमेण स्रग्धरापुष्पिताग्रावैतालीयादीनि। आर्यागीतीत्यादयो जातयश्च।।११।।

विवृति

इदानीं काव्यशरीरभेदाः कति भवन्तीत्याह–

पद्यं गद्यं च मिश्रं च तत् त्रिधैव व्यवस्थितम्।

पद्यं गद्यं च मिश्रं च तत् काव्यशरीरं त्रिधैव व्यवस्थितम्। पद्यस्वरूपं निरूपयति–

पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा।।११।।

चत्वारः पादाः अस्या इति चतुष्पदी। इत्युक्तं यत् तत् वृत्तं समार्धसमविषमभेदेन, तथा जातिर्मात्रानियमेनेत्येवं द्विप्रकारम्। वृत्तं छन्दोभेदात् भिद्यते।।११।।

तत् काव्यशरीरं त्रिविधमित्याह–**पद्यमिति**। पद्यलक्षणमाह पद्यं **चतुष्पदी** इति। अत्र पादपर्यायः पदशब्दः। चतुर्णां पदानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाहारश्चतुष्पदी। चतुष्पदीति पद्यलक्षणं प्रायिकत्वादुक्तम्; द्विपदीपञ्चपदीषट्पदीनामपि दृश्यमानत्वात्। पादश्चतुर्थो भागः इति च लक्षणं प्रायिकत्वात्; आर्यासु अर्धसमविषमेषु च न्यूनाधिकाक्षरदर्शनात्। विपुलाचूलिकादिषु विपुलायां यतिमात्रं निषिद्धं त्रिषु गणेषु; चूलिकार्धमेकोनत्रिंशदित्यर्धस्य लक्षणकथनेऽपि एकाक्षरन्यूनाधिकभावेन पादः कल्पनीयः। पद्यं कतिविधमित्याह–तच्चेति। वर्णसंख्यया गुरुलघुनियमेन च प्रवृत्तं छन्दोवृत्तम्; मात्रागणनेन वृत्तं जातिः।।११।।

उक्तस्य शरीरस्य प्रमाणमाह–**पद्यमिति।** वृत्तानि मन्दाक्रान्तादीनि। जातयो वैतालीयादयः।।११।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छन्दोविचित्यां सकलस्तत्प्रपञ्चो निदर्शितः।
सा विद्या नौर्विविक्षूणां गम्भीरं काव्यसागरम्॥१२॥

रत्नश्री

तयोर्वृत्तजा[त्योः प्रपञ्चो] विचित्रः प्रभेदः वक्त्रादिरूपः, आर्यादिलक्षणश्च सकलः सर्वो निदर्शितः लक्षणतो लक्षितश्च प्रतिपादितः। कुत्र छन्दो[वचित्यां छन्दांसि] विचीयन्ते [संगृह्यन्ते यत्र] यया वा तस्याम्। सा चेयं विद्या पद्यलक्षणस्य काव्यशरीरस्य साधिका। यदन[या] प्रसाध्यते ततः साप्यादरेण द्रष्टव्येति वक्रोक्त्या तदभ्यासे श्रोतृजनं नियोज[यति सा विद्येति] काव्यमे[व सागरः तद्वद्] गम्भीरं यतः, भावार्थगाम्भीर्यात्। न तु शब्दगाम्भीर्येण। अन्यथा प्रमादो न स्यात्। नानारसामृतत्वात्। सूक्तरत्नाकरत्वात्। अकृतधियां च [वैरस्याधायकत्वात्] काव्यसागरं वि[विक्षूणां अवगा]हितुमिच्छतां स्वयं कर्तुं परकीयं वा ज्ञातुमिच्छतामित्यर्थः। सा छन्दोविचितिविद्या नौरूपा। सापि ज्ञातव्येति भावः॥

संधाताद्यपि वृत्तजातिप्रकारोऽस्ति छन्दःशास्त्रोक्तः [7b] [स इ]ह किं न दर्शित इति चेत्, आह–

हृदयङ्गमा

छन्द इति।–छन्दांसि विचीयन्ते विज्ञायन्ते अनयेति तस्यां छन्दोविचित्यां पिङ्गलादिकृतच्छन्दोग्रन्थे छन्दोविचितिनामक-स्वकृतच्छन्दोग्रन्थे वा, सकलः निखिलः, तत्प्रपञ्चः तेषां वृत्तजातिप्रभृतीनां प्रपञ्चः विस्तारः, निदर्शितः निरूपितः, सा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्या छन्दोज्ञानमित्यर्थः, गम्भीरम् अगाधं, दुर्गममित्यर्थः, काव्यसागरं काव्यरूपमर्णवं, तितीर्षूणां तरितुमिच्छूनां, नौः तरणिस्वरूपा इत्यर्थः, अतिगम्भीरं हि महासागरं तितीर्षूणां यथा बहुवस्तुपरिपूर्णा नौरुपयोगाय भवति, तथा बहुलच्छन्दोबद्धवाक्यात्मकं रसभावादिभिरतिगहनं काव्यं रचयितुं परिशीलयितुं वा कृतयत्नानां छन्दोज्ञानमिति भावः।।१२।।

प्रभा

वृत्तभेदानां बाहुल्यान्नेह तन्निरूपणं क्रियते छन्दःशास्त्रादेव तदवगन्तव्यमित्याह–**छन्दोविचित्यामिति।** छन्दांसि विचीयन्ते निरूप्यन्ते यत्र सा छन्दोविचितिः पिङ्गलमुनिकृतं छन्दःशास्त्रम्। छन्दोविचितिर्नाम दण्ड्याचार्यकृतश्च्छन्दोग्रन्थविशेष इति केचित्। तस्यां सकलस्तयोर्वृत्तजात्योः प्रपञ्चः विस्तारो निदर्शितः। उक्ता अत्युक्ता इत्यादिप्रकारेण समार्धसमविषमभेदेन च विविधानि वृत्तानि तथा आर्यागीत्यादयो जातयश्च निरूपिता इत्यर्थः। अतश्च्छन्दोज्ञानार्थं स एव ग्रन्थः परिशीलनीय इति भावः। काव्यानुशीलनवतां छन्दोज्ञानस्यावश्यकतां विशेषतो दर्शयति–**सा विद्येति।** सा विद्या छन्दोविचित्यादिभ्यः संपादितं छन्दोविज्ञानम्। गम्भीरम् दुरवगाह्यम्। तत्तत्प्रसङ्गविशेषेषु तत्तच्छन्दांस्येव रसपरिपोषकाणि नान्यानीति सहृदयैकज्ञेयत्वाद्दुरधिगममिति भावः। काव्यसागरम् काव्यरूपमहोदधिम्। विविक्षूणां प्रवेष्टुमिच्छूनाम्। नौर्नौकास्थानीया भवति। यथा नाना साधनपरिपूर्णा नौः रत्नसमाहरणाय सागरं प्रविविक्षूणां पुरुषाणामिष्टार्थसंपादनाय साधनं भवति तथा शब्दार्थरत्नाहरणाय काव्योदधिं प्रविविक्षूणां छन्दोज्ञानं तल्लाभसौकर्याय भवतीत्यर्थः। साहित्यशास्त्रे धृतरुचीनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छन्दोज्ञानं काव्यनिर्माणे प्रधानं साधनमित्यर्थः। प्रविविक्षूणामिति विशतेः सन्प्रत्ययः। तितीर्षूणामिति पाठे तरितुमिच्छूनां विवक्षूणामिति पाठे बोढुमिच्छूनामिति चार्थः कल्प्यः।।१२।।

विवृति

सर्वोऽप्यक्षरगणनियमो वृत्तं मात्रानियमस्तु जातिरिति छन्दोविचित्यां छन्दांसि उक्तात्युक्तामध्यादिभेदानि विचीयन्ते यस्यां सा छन्दोविचितिः, तस्यां तत्प्रपञ्चः वृत्तजातिलक्षणप्रपञ्चो निदर्शितः। सा विद्या छन्दोविचितिः नौरिव नौः विविक्षूणामवतरितुमिच्छतां गम्भीरं काव्यमेव सागरस्तमिति।।१२।।

वृत्तावान्तरजातिभेदलक्षणानि विस्तीर्णत्वान्नेह प्रपञ्चयन्ते, छन्दोविचित्यां द्रष्टव्यानीत्याह– **छन्दोविचित्यामिति।** सकलस्तत्प्रपञ्चो वृत्तजातिप्रपञ्चः। वर्णच्छन्दांसि षड्विंशतिः, दण्डकाश्च बहवः, यथासमवृत्तानि, गणजातिर्नगणजातिश्चेति छन्दः प्रपञ्चः छन्दोविचित्यां पिङ्गलनागेन दर्शितः पर्यालोचनीयः। सा विद्या कवेरवश्यं शिक्षणीयेत्याह–**सा विद्येति।** गम्भीरं काव्यसागरं विवक्षूणां सा नौर्भवति। विवक्षूणां वहतेः सन्; विवक्षूणां तरितुमिच्छूनामित्यर्थः। काव्यस्य पारगमने विवक्षितं न तु अन्तः प्रवेशः। नौः प्रवहणं पोतपात्रम्; तेन समुत्तीर्यते। विविक्षूणामित्यपपाठः।।१२।।

एषां विशेषः छन्दोविचित्यां वक्ष्यन्त इत्याह–**छन्दोविचित्यामिति**।।१२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुक्तकं कुलकं कोशः संघात इति तादृशः।
सर्गबन्धांशरूपत्वादनुक्तः पद्यविस्तरः॥१३॥

रत्नश्री

एकः श्लोकः समाप्तार्थः स्वतन्त्रः श्लोकान्तरनिरपेक्ष इति मुक्तकम्, न तु निबद्धमिति सर्गबन्धेन [वैषम्यं] बन्धेऽनिबन्धनात्। यद् वक्ष्यति–

सर्गबन्धांशरूपत्वात् [1.13] इति।

एकक्रियाद्वारेण परस्परसापेक्षाः समाप्तार्थाः प्रत्येकमसमाप्तार्थाः श्लोकाः कुलकम्। तद्विशेष एव युगलकम्। नानाभित्तयो भिन्नक्रियाः स्वतन्त्राः श्लोकाः कोशवत् स्था[पिताः कोशः]। एकां भित्तिं प्रावृडादिकां वर्णयितुं समुदायेन प्रवृत्ता भिन्नक्रियाः श्लोकाः संघातः। इति तादृशः। इत्येवंरूपश्चतुर्विधपद्यप्रकारोऽनुक्तो [विशिष्य] पृथगिह ल[क्षणतः अनुक्तः अकथित]स्त्यक्त एव। किं कारणम्। सर्गबन्धांशरूपत्वात् सर्गबन्धस्य अंशरूपा, एकदेशस्वभावास्तेषां भावस्तत्त्वम्। तस्मात् ते हि सं[गृहीताः। न] मुक्तक[ादिव्यति]रेकेण सर्गबन्धः से[त्स्य]ति, तन्तुव्यतिरेकेण पटवत्। स च लक्षणत उच्यत एव। ततस्तेऽपि तदव्यतिरेका[त्] पृथगसर्गब[न्धरूप]तो नोक्ता इत्यर्थः।

नन्वेवं स्तोत्रावदानपरिकथादिपद्यप्रपञ्चो न संगृहीतः स्यात्। संगृहीत एव। [उक्त]लक्षणयोगात्.........[सं]घातः आर्या कोश इति संघातादिसंज्ञाप्रवृत्तिमात्रेण संघातादित्वं सर्गबन्धांशस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संघातादेरत[स्तद्रूपत्वं स्तोत्रादीनां..........। नहि सर्गबन्धस्य शिशुपालवधादिनामान्तरकरणमात्रेण सर्गबन्धत्वं हीयते। तस्मात् स्तोत्रादिरपि लक्षण[तः संघा]तादिसंगृहीतः। ....नहि कर्कादिव्यपदेशान्तरयोगादश्वत्वं हीयते, अश्वविशेषाः कर्कादय इति चेत्–स्तोत्रादयोऽपि यथालक्ष[णं]..........निमित्तं(?) यथे[ह सर्ग]बन्धे च संघातादिः परिस्फुटं लक्ष्यत एव। तत्र हि प्रावृडवर्णनादिः संघातः। मन्त्राद्यवसरे च यथा[मुक्तकादिम्तथो]क्तं प्राक्। मुक्तकं..........[इत्य8a]त्र परिस्फुटमेवेत्यलं विस्तरेण।।

कः पुनः सर्गबन्धो यस्यावयवाः संघातादय इत्याह–

हृदयङ्गमा

इदानीं महाकाव्यं निरूपयिष्यन् तदवान्तरभेदकथनस्य तदन्तः पातित्वादनुपयोगित्वं दर्शयति, मुक्तकमिति।–मुक्तकं श्लोकान्तरनिरपेक्षमेकमेव पद्यम्। (तदुक्तम् अग्निपुराणे,–"मुक्तकं श्लोक एवैकश्चमत्कारक्षमः सताम्" इति)। कुलकं पञ्चश्लोकात्मकं पद्यम्। (तदुक्तं,–"द्वाभ्यान्तु युग्मकं ज्ञेयं त्रिभिः श्लोकैः विशेषकम्। चतुर्भिस्तु कलापं स्यात् पञ्चभिः कुलकं मतम्।।" इति)। कोषः अन्योन्यनिरपेक्षः पद्यसमूहः। (उक्तञ्च,–"कोषः श्लोकसमूहस्तु स्यादन्योन्यानपेक्षकः" इति)। सङ्घातः प्रत्येकपरिसमाप्तार्थकपद्यैः कथासमाप्तिः। (तदुक्तं,–"यत्र कविरेकमर्थं वृत्तेनैकेन वर्णयति काव्ये। सङ्घातः स निगदितो वृन्दावनमेघदूतादिः।।") इति एवम्, अत्र 'इति' पदम् एवमर्थकम्; तादृशः तथाविधः युग्मकादिश्च,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पद्यविस्तरः पद्यानां विस्तरः, सर्गबन्धस्य महाकाव्यस्य, अङ्गरूपत्वात् अवयवस्वरूपत्वात्, निरूपयिष्यमाणमहाकाव्यैकदेशस्वरूपत्वादित्यर्थः, अनुक्तः न प्रदर्शित इत्यर्थः, ग्रन्थान्तरेषु विशेषेणोक्तत्वादिह ग्रन्थविस्तारभिया इति भावः।।१३।।

प्रभा

एवं त्रिविधकाव्येषु पद्यमयकाव्यस्य मुक्तकादयोवान्तरभेदाः प्राचीनैर्वर्णिताः सन्ति। तेषां तु महाकाव्याङ्गरूपत्वान्न पृथक्तया वर्णनमावश्यकम्। अतस्तदुपेक्ष्य प्रधानकाव्यमेवास्माभिर्निरूप्यत इति स्वाभिप्रायं प्रकटयन्नाह–**मुक्तकमिति।** इतिशब्द एवमर्थे। मुक्तकं कुलकं कोषः संघातः तथा तादृशस्तत्सजातीयोन्यश्च पद्यविस्तरः काव्यात्मकपद्यसमूहः। सर्गबन्धांशरूपत्वात् सर्गबन्धो महाकाव्यमित्याद्यनन्तरश्लोकलक्ष्यमाणमहाकाव्यावयव**स्वरूपत्वात्।** अनुक्तस्तस्यानुपयुक्तत्वाद् ग्रन्थविस्तरभयाच्च न प्रदर्शितः। ग्रन्थान्तरेभ्योवगन्तव्य इत्यर्थः। तत्र मुक्तकलक्षणमग्निपुराणे यथा–मुक्तकं श्लोक एकैकश्चमत्कारक्षमः सताम्। [३३७-३६] कुलकलक्षणं साहित्यदर्पणे यथा–

द्वाभ्यां तु युग्मकं संदानितकं त्रिभिरिष्यते।
कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्।।[६.३१४-१५]

कोषस्तु कोषः श्लोकसमूहस्तु स्यादन्योन्यानपेक्षक इति लक्षणलक्षितः। संघातलक्षणं च यथा–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्र कविरेकमर्थं वृत्तेनैकेन वर्णयति काव्ये।
संघातः स निगदितो वृन्दावनमेघदूतादिः।। इति।

टीकान्तरे हरिनाथेन प्रदर्शितानि लक्षणानि यथा–अन्यानपेक्ष एकश्लोकनिबन्धो मुक्तकम्। अनेकपद्यैनैकक्रियान्वितेनैक-वाक्यार्थकथनं कुलकम्। असंहतार्थानामेककवेरनेककवीनां वा निबन्धः कोशः। यथार्यासप्तशत्यादिः। कल्पितवस्तुक एकच्छन्दोनिर्व्यूढः संघातो मेघदूतादिः। एवंविधलक्षणा एते पद्यप्रभेदा महाकाव्यांशभूता एव। तत्राद्यौ साक्षादंशभूतावन्त्यौ तु तत्समावेशतस्तल्लक्षणेनैवोन्नेयस्वरूपावित्यर्थः। इति।।१३।।

विवृति

ननु चेह मुक्तकादीनां लक्षणाद्यनभिधानात् न्यूनं काव्यलक्षणप्रणयनमित्याशङ्कायामाह–

मुक्तकमित्यादि। सर्गबन्धांशरूपत्वात् तादृशो मुक्तकादिः पद्यविस्तरः पृथङ्नोक्तः, तस्य सर्गबन्धमहाकाव्यलक्षणादेव गतार्थत्वात्। तथा हि–मुक्तकमेकं सुभाषितमुच्यते; यथा–'सहसा विदधीत न क्रियाम्' इत्यादि। कुलकं द्विप्रभृतिश्लोकानामेकवाक्यभावेन प्रधानक्रियायामुपसंहारः ; यथा 'मृणालिनीनामनुरञ्जितं त्विषा' इत्यत आरभ्य 'प्रकुर्वते वारिदरोधनिर्गताः परस्परालापमिवामला दिशः' इति। कोशोऽप्यनेकभिन्नार्थकथाग्रथितः कथाकोशः कृष्णसारः तारागण इति। सङ्घातोऽप्यसर्गसन्धोऽभिमतैकवस्तुनिरूपणप्रवणः, यथा द्रविडसङ्घातमेघदूतसूर्यशतकादिः। एतौ कोशसङ्घातावपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्गबन्धांशरूपौ। तथा भारते अनेककथाप्रपञ्चो हिमवत्पर्वतवर्णनं चेति कोशसङ्घातौ।।१३।।

मुक्तकादयो भेदाः सर्गबन्धांशभूतत्वात् न प्रथमं कांक्षिता इत्याह–**मुक्तकमिति।** मुक्तकमितरानपेक्षमेकं सुभाषितम्। कुलकमेकक्रियान्वितानि पञ्चषाणि पद्यानि। कोशो नानाकर्तृकसुभाषितरत्नसमुदयः। सङ्घातः एकार्थविषयः एककर्तृकः पद्यसङ्घातः, शरत्सङ्घातद्रमिडसङ्घातादिवत्।।१३।।

मुक्तकमित्यादि। मुक्तकं वाक्यान्तरनिरपेक्षो यः श्लोकः। कुलकं नाम पद्यस्यैवांशभूतम्। एकस्मिन् प्रबन्धे आदिमध्यान्तगतक्रिया सर्वत्रोपकारकत्वेनाद्रियते चेत् तत् कुलकम्। एकस्मिन्नेव प्रयोजने प्रवृत्ता नानाविधाः श्लोका भवेयुश्चेत् तथाविधानां समूहः सङ्घातः। एवंविधो यो भेदः पद्यविस्तरः स सर्गबन्धस्यांशरूपेणाद्रियमाण इति नोक्तः।।१३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम्।
आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्॥१४॥

रत्नश्री

यदेतत् प्रसिद्धं गुणतः सन्निवेशतश्च महाकाव्यमिति सर्गबन्धः......[स]......विज्ञेय इति महाकाव्यानुवादेन सर्गबन्धो विधीयते। सर्गैः सर्गाख्यैः परिच्छेदविशेषैर्बध्यतेऽसाविति सर्गबन्धः। ततश्चानेकसर्गात्मकः सर्गबन्धो महाकाव्यम्। सर्गाश्च संघातादिचतुष्टयस्वभावा इति द्रष्टव्यम्।

अथवा अन्यथावतार्यते। ननु मुक्तकादयो महाकाव्यस्यांशाः, तत् किमुच्यते–

सर्गबन्धांशरूपत्वात् [1.13]

इत्याह – सर्गबन्धो महाकाव्यमिति। सर्गबन्ध इत्यपि महाकाव्यमुच्यते। ततो ये [म]हाकाव्यस्यांशास्ते सर्गबन्धस्यापीत्यविरोध इत्यर्थः। शेषं समानम्।

सर्गबन्धस्य तर्हि किं लक्षणं यत् तदंशस्य संघातादेरपि स्यादित्याह – उच्यते त्वस्य लक्षणम्। तुशब्दो भिन्नक्रमः। अस्य तु महाकाव्यस्य लक्षणं स्वरूपमुच्यते। तुशब्देनैतदाह – संघातादीनामवयवानां पृथग् लक्षणं नोच्यते। अवयविनस्तु महाकाव्यस्य लक्षणं क्रियते। ततस्तेऽपि तल्लक्षणा एव, वस्तुतस्तदव्यतिरेकादिति। किं पुनस्तदिति तदेव वक्तुमुपक्रमते–आशीरित्यादि। तस्य महाकाव्यस्य मुखमादिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आशीरिष्टाशंसनं वा प्रयुज्यते, नमस्क्रिया प्रणामो वा, प्रबन्धसम्बन्धिनः कस्यचिद् वस्तुनोऽर्थस्य निर्देशः कथनं या क्रियत इति विकल्पेन त्रिविधं मुखं प्रतिपत्तव्यम्। न समुच्चयेन। तत्र श्रीमद्विशुद्धगुणरत्नस[मि]द्धमूर्त्ति-

ब्र्ह्मेन्द्रशेखरस्तिपादसरोजरेणुः। शोद्धोदनिः ,

सकलसत्त्वहितैकदीक्षः

पायादपायबहुलाज्जगदाविमुक्तेः।।

इत्येवंविधा आशीः।

नमस्त्रयाय रत्नानां त्रैलोक्य[महित]ात्मने।

स्थिताय सुरतद्वैरिनरनागेन्द्रमौलिषु।।

इत्येवंविधा नमस्क्रिया। वस्तुनिर्देशस्तु

श्रियः पतिः श्रीमति [शिशुपालवधे 1.1]

इत्यादिः प्रसिद्ध एव।

गद्यमिश्रबन्धयोरप्येतदेव मुखं द्रष्टव्यमिति।।

किमाश्रयं तदित्याह–

हृदयङ्गमा

सर्गबन्धाङ्गरूपत्वान्मुक्तकादयो नोक्ता इति प्रागभिहितत्वात् तदाकाङ्क्षायां सम्प्रति महाकाव्यं निरूपयति, सर्गबन्ध इत्यादि।–सर्गेण अवान्तरार्थवर्णनेन उपलक्षितः, बन्धः श्लोकसङ्घातः महाकाव्यं, तस्य महाकाव्यस्य, लक्षणं स्वरूपम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उच्यते एतदनन्तरं निरूप्यते, आशीः शुभाशंसनं, नमस्क्रिया नमस्कारः, स्वापकर्षबोधकवचनं, कायिक-वाचिक-मानसिकत्वेन नमस्कारस्य त्रैविध्यादिति भावः ; वस्तुनिर्देशो वाऽपि अथवा वसति प्रस्तुतवृत्तान्तोऽस्मिन्निति वस्तु प्रकृतस्य नेता तत्सम्बन्धी वा कश्चिदपरः, तस्य निर्देशः कथनं, तस्य महाकाव्यस्य मुखम् आदि, आशीःप्रभृतीनामन्यतमं प्रथमं वर्णनीयमिति निष्कर्षः। तत्र कीचकबधादावाशीः, रघुवंशादौ नमस्कारः, शिशुपालवधादौ वस्तुनिर्देश इति।।१४।।

प्रभा

मुक्तकादीनां सर्गबन्धांशरूपत्वं कथितम्। तत्र सर्गबन्धः। कीदृश इत्याकाङ्क्षायामाह—**सर्गबन्ध इति।** महाकाव्यं सर्गबन्धः। सर्गैरवान्तरार्थवर्णनप्रबन्धैर्बन्धो रचना यस्य तत् काव्यं सर्गबन्धः। तस्य सर्गबन्धस्येदानीं स्वरूपमुच्यते मया निरूप्यते जायते सदलंकृतीत्यन्तेन [१.१९] ग्रन्थेन। तन्मुखम् तस्य सर्गबन्धस्य मुखम् प्रारम्भः। आशीः इष्टजनस्य शुभाशंसनम्। तथा च शब्दकल्पद्रुमे—

वात्सल्याद्यत्र मान्येन कनिष्ठस्याभिधीयते।
इष्टावधारकं वाक्यमाशीः सा परिकीर्तिता।। इति।

नमस्क्रिया मत्तस्त्वमधिकस्त्वत्तोहं न्यून इति परोत्कर्षसूचनपूर्वकस्यापकर्षबोधनानुकूलो व्यापारविशेषः। स च कायिकवाचिकमानसिकभेदेन त्रिविधोप्यत्र वाचिक एव ग्राह्यः। वस्तुनिर्देशः वसति प्रस्तुतवृत्तान्तोस्मिन्निति वस्तु कथानायकः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्षणयापरोपि तत्संबन्धी प्रधानपुरुषः। तस्य निर्देशः नामोच्चारणपूर्वक उपन्यासः। अथवा वस्तु वर्ण्यकथाभागस्तस्य निर्देशः साक्षाद् व्यञ्जनया वा सूचनम्। एतत्त्रयाणां मध्ये केनाप्येकेन सर्गबन्धस्य प्रारम्भो विधीयत इत्यर्थः। तत्राशीर्यथा चन्द्रप्रभाकाव्ये–

श्रियं क्रियाद्यस्य सुरागमे नट [म?]–
त्सुरेन्द्रनेत्रप्रतिबिम्बलाञ्छिता।
सभा बभौ रत्नमयैर्महोत्पलैः
कृतोपहारेव स वोग्रजो जिनः।।

नमस्कारो यथा रघुवंशे–

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।

वस्तुनिर्देशो यथा शिशुपालवधे–

श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि।
वसन् ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिः।।

एवं सर्गबन्धान्तरेष्वपि द्रष्टव्यम्।।१४।।

विवृति

सर्गबन्धो महाकाव्यम्। उच्यते तस्य महाकाव्यस्य लक्षणं लक्ष्यतेऽनेनेत्यसाधारणो धर्मो लक्षणम्। अथ तस्य कति वा मुखानि भवन्तीत्याह। तत्रेष्टाविद्यमानार्थाशंसनमाशीः। यथा–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रियं जगद्बोधविधौ विहायसि
व्यदीपि नक्षत्रमिवैकमुद्गतम्।
स यस्य वसतीव रथस्य सूनुः (?)
प्रवर्तको नेमिरनश्वरीं क्रियात्॥

इति। नमस्क्रिया यथा–

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥

इति शिवयोर्नमस्कारः। वस्तुनिर्देशोऽपि कथानिर्देशः ; यथा–

श्रियः पतिः श्रीमति शासितुं जग-
ज्जगन्निवासो वसुदेवसद्मनि।
वसन् ददर्शावतरन्तमम्बरा-
द्धिरण्यगर्भाङ्गभुवं मुनिं हरिः॥

इति कथानायकस्य हरेरादावभिधानमिति॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिहासकथोद्भूतमितरद्वः सदाश्रयम्।
चतुर्वर्गफलायत्तं चतुरोदात्तनायकम्॥१५॥

रत्नश्री

इतिहासः पुरावृत्तम्, तत्प्रतिपादिका कथा रामायणादिका इतिहासकथा तत उद्भूतं जातम्, इतिहासकथाश्रयमित्यर्थः। का[व्यमि]ति वक्ष्यति। किमितिहासकथाश्रयमेव महाकाव्यं कर्तव्यम्। नेत्याह-इतरदिति। इतिहासकथाश्रयादपरं वा। नात्र नियमः, विशिष्टाश्रयमेव तु तत् कर्तव्यमिति-सदाश्रयमिति। सन् शोभनः अधिगुणराजचरितादिलक्षण आश्रयो भित्तिर्यस्य तत्तथा। अनेन महाकाव्यस्य द्विधाश्रयसम्पदुक्ता।

चतुर्विषयत्वं प्रतिपादयन्नाह-चतुर्वर्गफलायत्तम् चतुर्णां धर्मार्थकाममोक्षाणां वर्गः समूहः, स एव फलं पुरुषार्थरूपत्वात्। तत्राऽभ्युदयनिःश्रेयसहेतुर्धर्म[1]। विद्याभूम्यादीनां यथान्यायमर्जनमर्जितानां च रक्षणमर्थः। निरपायो विषयोपभोगः कामः। [त्रैकालिक]सांसारिकदुःखनिवृत्तिर्मोक्षः। विस्तरस्तु त[त्त]च्छास्त्रेभ्यो द्रष्टव्यः। तस्मिन्नायत्तं प्रतिबद्धं तद्विषयत्वात्। अत्र न नियमोऽवश्यं चत्वारोऽपि पुरुषार्था निबध्यन्त इति। यथासंभवं क्वचिच्चतुर्वर्गः, [क्वचि]त् त्रिवर्ग इति प्रतिपत्तव्यम्। एतच्च स्वयमेव वक्ष्यति-

न्यूनमप्यत्र यैः कैश्चित् [1.20]

इत्यादौ। चतुरोदात्तनायकम्। चतुरः कुशलः उत्साहशक्त्यादियोगात्। उदात्त उदारस्त्यागाति- शयादिसंबन्धात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नायकः विपक्षः प्रतिपक्षश्च[१]। द्वयोरपि नायकत्वात्, यस्मिन् तत् तथा।।

पुनः किं विशिष्टमित्याह–

हृदयङ्गमा

इतिहासेति।–इतिहासानां रामायणभारतादीनां, कथया रामयुधिष्ठिराद्यन्यतमवृत्तान्तेन, उद्भूतं निबद्धं, वा अथवा सन् सत्यभूतः वृत्तान्तः, आश्रयो वर्णनीयो यत्र तत् तादृशम्, इतरत् रामायणमहाभारतादिव्यतिरिक्तमपि वृत्तं, महाकाव्ये प्रयोज्यमिति शेषः, भारतादिप्रसिद्धं लोकप्रसिद्धं वा सदाश्रयं चरितं महाकाव्ये वर्णनीयमिति भावः। (एतेन असत्यवृत्तं महाकाव्ये न वर्णनीयमिति प्रदर्शितम्)। चतुर्णां धर्मार्थकाममोक्षाणां, वर्गः चतुर्वर्गः, स एव फलं, तेन उपेतं युक्तम्; धर्मादिफलचतुष्टयानामेकत्रासम्भवादपि वर्णनीयाः सर्वे एव, किन्तु फलमन्यतममिति मन्तव्यम्। (यदुक्तं,–"चत्वारस्तत्र वर्गाः स्युस्तेष्वेकञ्च फलं लभेत्" इति)। चतुरः कार्य्यकुशलः, उदात्तः महान्, नायकः प्रधानपुरुषः यस्मिन् तथाभूतम्। (नायकलक्षणमुक्तं दर्पणे यथा,–"त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही। दक्षोऽनुरक्तलोकस्तेजोवैदग्धशीलवान् नेता।।" इति। अत्र चतुरशब्दस्य धीरार्थकत्वं, तेन च धीरोदात्तनायक एव महाकाव्ये अभिप्रेत इति मन्तव्यम्। धीरोदात्तलक्षणमुक्तं यथा,–"अविकत्थनः क्षमावान् अतिगम्भीरो महासत्त्वः। स्थेयान्निगूढमानो धीरोदात्तः दृढव्रतः कथितः।।" इति।।१५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

इतिहासेति। इतिहासो भारतम् उपलक्षणमेतत्। तेन रामायणादिकाव्यानां पुराणानां च संग्रहः। तत्रत्या याः कथास्ताभ्य उद्धृतं निष्पन्नं तदाधारतया निबद्धमित्यर्थः। इतरद्वा इतिहासादिष्वविद्यमानं कथानकमुपजीव्य निबद्धम्। किंतु सदाश्रयम्। सत् सत्यभूतो वृत्तान्त आश्रय आधारो यस्य तत् अनेन कल्पितस्य वस्तुनो महाकाव्ये वर्णनीयतया स्वीकारे निषेधः सूचितः। अथवा सत् सत्पुरुष आश्रयो यस्य। तेन बुद्धचरितादीनामश्वघोषादिभिः प्रणीतानां संग्रह इति केचित्। चतुर्वर्गफलायत्तम्। चतुर्णां धर्मार्थकाममोक्षाणां वर्गः समूहश्चतुर्वर्गः तद्रूपस्य फलस्य आयत्तं स्वाधीनं तत्फलोत्पत्तिमुद्दिश्य प्रणीतम्। तथा चतुरो व्यवहारकुशलो वत्सराजादिवत् उदात्तो धीरोदात्तो रामचन्द्रधर्मराजादिवत् एतादृशो नायकः कथाप्रधानपुरुषो यत्र तत्। नायकलक्षणं च साहित्यदर्पणे यथा–

त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही।
दक्षोनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्।। इति (३.३०)

तथैव च दशरूपके–

नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा।।

बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः।। इति।

(२.१-२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयं च नायको धीरोदात्तधीरोद्धतधीरललितधीर-प्रशान्तादिभेदेन चतुर्विधः। तल्लक्षणप्रविभागादिकं साहित्यग्रन्थेभ्य एवावगन्तव्यम्। प्रकृते तु उदात्तपदेन सर्वेषामप्येतेषां ग्रहणम्। नायकश्च क्वचिदेको देवः क्वचिदेकः सद्वंशजः क्षत्रियः क्वचिदेकवंशजा बहवः क्षत्रियाः। तत्र प्रथमप्रकारः शिशुपालवधे द्वितीयो नैषधे तृतीयो रघुवंशादिष्ववगन्तव्यः॥१५॥

विवृति

कुतः पुनस्तस्योत्पत्तिरिति। आह–

पुरावृत्तमितिहासः, ततः उत्पन्नम्। न केवलं तदेव, तथा इतरद्वा सदाश्रयम् अन्यद्वा शोभनाश्रयम्। चतुर्वर्गफलायत्तं धर्मार्थकाममोक्षफलाधीनम्। चतुरोदात्तनायकं चतुरो विदग्धः उदात्तः शौर्यत्यागादिगुणयुक्तो नायको यत्र तत्॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः।
उद्यानसलिलक्रीडामधुपानरतोत्सवैः॥१६॥

रत्नश्री

चन्द्रश्चार्कश्च तयोरुदयः। नगरं च अर्णवश्च शैलश्च ऋतुश्च चन्द्रार्कोदयश्चेति चार्थं कृत्वा तेषां वर्णनानि गुणोद्भावनानि इति षष्ठीसमासः। तानि च यथासम्भवमादौ मध्येऽन्ते वा। न चानुक्रमनिय[मेन] एतानि निबध्यन्त इति एवंपरमेतत्। तैरलंकृतमिति [1.18] वक्ष्यति। उद्यानं सलिलं च तयोः क्रीडा विहारः। सा च मधुपानकं च रतोत्सवश्चेति चार्थः। रतमेवोत्सवः प्रीतिविशेषः, तेषां तु क्रमो दृश्यते। अनेन सम्भोगात्मकः श्रृङ्गार उक्तः। तैरलंकृतम्॥

पुनर्विशेषयन्नाह—

हृदयङ्गमा

केवलं नायकवर्णनेन कवीनां न चरितार्थता, इतिहासादेरेव तज्ज्ञानस्य सिद्धत्वात्, अतः नायकवर्णनमाश्रित्य तदानुषङ्गिकनगरादिकमपि वर्णनीयं, तथात्वे काव्यशोभाजननात् श्रोतृणामुन्मुखीकरणं स्यादित्याशयेनाह, नगरेत्यादि।—नगरं बहुसमृद्धजनाकीर्णः प्रदेशः, अर्णवः समुद्रः, शैलः पर्वतः, ऋतुः वसन्तादिः, चन्द्रार्कोदयः चन्द्रसूर्य्ययोरुदयः, (उपलक्षणमेतत्, तेन अस्तगमनमपि), एतेषां वर्णनैः, उद्यानसलिलयोः क्रीड़ा मधुपानं रतोत्सवः सम्भोगश्रृङ्गारः तैः, विप्रलम्भैः सम्भोगश्रृङ्गारात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्ववर्त्तिभिः पूर्वरागप्रभृतिभिः चतुर्विधभावैः, ("यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ" ।।१६।।

प्रभा

न केवलमितिहासादिवद्यथावृत्तवर्णनेनैवं काव्यं भवति किंतु तत्रान्तरान्तरा प्रसङ्गानुरोधेन प्ररोचनार्थं तत्पदार्थानामुच्चावचवर्णन-मप्यवश्यमपेक्ष्यत इति वर्ण्यविषयान् कांश्चिद्दर्शयति–*नगरार्णवेति। नगरं पुरम्। तद्वर्णनं यथा शिशुपालवधे तृतीयसर्गे [३३-६४] अर्णवः समुद्रः। तद्वर्णनं यथा रघुवंशस्य त्रयोदशसर्गे [२-१६] माघस्य तृतीये [७०-८०] च। शैलः पर्वतः। तद्वर्णनं यथा कुमारस्य प्रथमसर्गे [१-१६] माघस्य चतुर्थे [२-६८] किरातस्य पञ्चमे [१-१५] च। ऋतवो वसन्तादयः। तद्वर्णनं यथा शिशुपालवधे षष्ठसर्गे किरातार्जुनीयस्य चतुर्थदशमसर्गयोः कुमारसंभवस्य तृतीयसर्गे रघुवंशस्य चतुर्थनवमषोडशसर्गेषु च। चन्द्रार्कौ चन्द्रसूर्यौ तयोरुदयः इदमस्तस्याप्युपलक्षणम्। एतयोर्वर्णनं किराते नवमसर्गे माघे नवमैकादशसर्गयोस्तथान्यत्रापि द्रष्टव्यम्। उद्यानमुपवनम्। सलिलं सलिलाधरः सरित्सरोवरादिः तत्र क्रीडा। तद्वर्णनं माघकिरातयोरष्टमसर्गादिषु। मधुपानं मदिरासेवनम्। तद्वर्णनं किरातार्जुनीये नवमसर्गे शिशुपालवधे च दशमसर्गे तथान्यत्रापि। रतं संभोगशृङ्गारः तस्योत्सवो विलासः। तद्वर्णनं रघुमाघकिरातादिसर्वकाव्येषु। अयं संभोगशृङ्गारो विप्रलम्भशृङ्गारानन्तरमेव वर्णितः शोभातिशयं पुष्णाति। तदुक्तं सरस्वतीकण्ठाभरणे [५-५२]–न विना विप्रलम्भेन संभोगः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुष्टिमश्नुते इति। तृतीयान्तपदानामष्टादशश्लोकगतेन अलंकृतम् इतिपदेन संबन्धः।।१६।।

विवृति

तथा नगरादिवर्णनैः उद्यानसलिलयोः क्रीडया मधुपानरतोत्सवेन च विप्रलम्भेन वञ्चनया विवाहेन च।।१६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः।
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि॥१७॥

रत्नश्री

विप्रलम्भा विरहाः। अयं विप्रलम्भात्मकः श्रृङ्गारः। विवाहाः शास्त्रोक्ता गन्धर्वादयः। कुमाराणामुदया जन्मानि वधनानि च बाल्यादिवयःप्राप्तिलक्षणांनि। तैश्चालंकृतम्। मन्त्रः क्रियारम्भदेशकालविभागपुरुषद्रव्यसम्यग्विनिपातक्रियाकार्यसिद्धिलक्षण-पञ्चाङ्गात्मककार्यनिश्चयः। यदाह माघः–

सर्वकार्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम्।
सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम्॥

[शिशुपालवधे 2.28]

इति। विस्तरस्तु तच्छास्त्रात्। दूतः वाग्मित्वादिगुणयुक्तः सन्धानप्रवृत्तः पुरुषः। दूते सन्धानमायत्तं चरे चर्या प्रति[ि]ष्ठता।

[कामन्दकीयनीतिसारे 12.33]

इति वचनात्। चरविशेषश्चायम्। प्रयाणं संग्रामादिनिमित्तं गमनम्। आजिर्विग्रहः सन्ध्यभावे। अभ्युदयं विपक्षविजयादिलक्षण उत्सवः। नायकस्य प्रतिपक्षस्य। एषामप्य[ा]नुपूर्वी दृश्यते। तैरपि।

हृदयङ्गमा

इति विप्रलम्भलक्षणम्। सम्भोगपूर्ववर्त्तित्वञ्च "न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते" एतल्लक्षणेनैव सिद्धं,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्विधत्वञ्च पूर्वरागमानप्रवासकरुणात्म- कत्वेनेति मन्तव्यम्)। विवाहैः परिणयव्यापारैः, कुमारोदयस्य पुत्रोत्पत्तेर्वर्णनैः, तथा मन्त्रः रिपुपराजयार्थं गुह्यवादः मन्त्रिभिः सह क्रियमाणा मन्त्रणा इत्यर्थः, दूतः राज्ञा कार्य्येषु प्रेष्यः पुरुषः, स च निसृष्टार्थ-मितार्थ सन्देशहारकभेदात् त्रिविधः, प्रयाणं रिपुजयाद्यर्थं युद्धयात्रा, आजिः युद्धं, नायकस्य अभ्युदयः जयलाभः, तैः अलङ्कृतं शोभितमिति वक्ष्यमाण- श्लोकोक्तेनान्वयः, नगरादयो महाकाव्ये वर्णनीया इत्यर्थः। (उक्तञ्च,-"सन्ध्यासूर्य्येन्दुरजनीप्रदोष-ध्वान्तवासराः। प्रातर्मध्याह्न- मृगयाशैलर्त्तुवनसागराः।। सम्भोग-विप्रलम्भौ च मुनिस्वर्गपुराध्वराः। रणप्रयाणोपयम-मन्त्रपुत्रोदयादयः। वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह।।" इति)।।१७।।

प्रभा

विप्रलम्भैरिति। विप्रलम्भो विप्रलम्भशृङ्गारः। तल्लक्षणं सरस्वतीकण्ठाभरणे यथा-

भावो यदा रतिर्नाम प्रकर्षमधिगच्छति। नाधिगच्छति चाभीष्टं विप्रलम्भस्तदोच्यते।।

इति। [५.४५] बहुवचनेन तस्य सरस्वतीकण्ठाभरणादिषु [५.४५] पूर्वानुरागो मानः प्रवासः करुणश्चेति चातुर्विध्यं स्वीकार्यम्। तत्रान्तिमप्रभेदोदाहरणं रघुवंशेजविलापः। विवाहः पाणिग्रहणसंस्कारः। तद्वर्णनं रघुवंशस्य षष्ठसप्तमयोः कुमारसंभवस्य सप्तमे तथान्यत्र द्रष्टव्यम्। विवादैरिति पाठे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवादो मिथः संभाषणम्। यथा रघुवंशे सिंहदिलीपयोः [२. ३४-५८]। कुमारोदयः सुतोत्पत्तिः। तद्वर्णनं यथा रघुवंशे तृतीयसर्गे। मन्त्रः प्रधानपुरुषैः सह रिपुजयार्थं गुप्तसंभाषा कार्याकार्यविचारश्च। स पञ्चाङ्गः। तदुक्तं–

सहायाः साधनोपाया विभागो देशकालयोः।
विपत्तेश्च प्रतीकारः सिद्धिः पञ्चाङ्गमिष्यते।। इति।।

स च किरातप्रथमसर्गे माघद्वितीयसर्गे च द्रष्टव्यः। दूतः प्रेष्यः स च निसृष्टार्थमितार्थसंदेशहारकभेदेन त्रिविधः। तत्र निसृष्टार्थ उद्योगपर्वणि वासुदेवः। मितार्थो रामायणेङ्गदः। संदेशहारकः कादम्बर्यां केयूरकः। प्रयाणं समराय नगराद्बहिर्यानम्। तद्वर्णनं यथा शिशुपालवधे सप्तदशसर्गे रघुवंशे चतुर्थसर्गे च। आजिः समरम्। यथा किरातार्जुनीये (१५-१८) शिशुपालवधे (१९-२०) रघुवंशादिषु च। नायकाभ्युदयस्तस्य युद्धे विजयप्राप्तिर्यथा शिशुपालवधे श्रीकृष्णस्य। इदं मन्त्रादिपञ्चकं क्रमेणैव वर्णनीयम्। तथाहि। आदौ मन्त्रः अनन्तरं दूतप्रेषणम् ततो युद्धाय गमनम् ततः समरः पश्चाद्विजयलाभ इति। अपिना अनुक्तानामपि यज्ञमृगयातपोवनादीनां संग्रहः।।१७।।

विवृति

तथा कुमारोदयवर्णनेन मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि अलंकृतम्। असंक्षिप्तम्।।१७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अलंकृतमसंक्षिप्तरसभावनिरन्तरम्।
सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः॥१८॥

रत्नश्री

अलंकृतं विभूषितम्। असंक्षिप्ताः [9a]भूयांसः। रसाः श्रृङ्गारवीरादयः। भावा रत्युत्सवादयः। विस्तरस्तु तच्छास्त्रात्। तैर्निरन्तरं व्याप्तम्। सर्गैरुपेतमिति [1.19] वक्ष्यति। अनतिविस्तीर्णैर्नातिमहद्भिर्मध्यमैरित्यर्थः। श्रव्यं श्रुति[सु]भंग वृत्तं पद्यमिन्द्रवज्रादिकं येषां तैः। सुसन्धिभिः शोभनः स्पष्टः सन्धिः परस्परसङ्गतत्वम् अन्योऽन्यव्यपेक्षा अर्थतो येषां तैः। परस्परसंबद्धार्थाः सर्गाः कर्तव्याः। नत्वयःशलाकाकल्पा इत्यर्थः॥

हृदयङ्गमा

अलङ्कृतमिति।–असङ्क्षिप्तं न सङ्क्षेपेण वर्णनीयं, सविस्तरमित्यर्थः, तथा सति सहृदयहृदयङ्गमं भवतीति भावः ; रसैः श्रृङ्गारादिभिः, भावैः प्राधान्येनाभिव्यक्तैः व्यभिचारिभिः, उद्बुद्धमात्रैः स्थायिभिः रत्यादिभिः, तथा देवादिविषयकैः अनुरागैश्च, निरन्तरं सङ्कुलं, पूर्णम् इति यावत्; (इह महाकाव्ये श्रृङ्गारवीरशान्तानामन्यतमोऽङ्गित्वेन वर्णनीयः, अन्ये रसा भावाश्चाङ्गत्वेन इत्यन्यैरुक्तमप्यङ्गीकार्य्यम्; यदुक्तं,– "श्रृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते" इति)। अनतिविस्तीर्णैः शास्त्रनियमिताष्टादिभिः अन्यूनैः, सर्गैः अवान्तरवृत्तान्त-समाप्ताख्यैः, उपेतमिति वक्ष्यमाणश्लोकोक्तेनान्वयः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(सर्गाणामष्टान्यूनत्वत्रिंशदनधिकत्वे प्रमाणमुक्तमीशानसंहितायाम्,–"अष्टसर्गान्न तु न्यूनं त्रिंशत्-सर्गाच्च नाधिकम्। महाकाव्यं प्रयोक्तव्यं महापुरुषकीर्त्तियुक्।।" इति। एतच्च प्रायिकं, वैपरीत्यस्यापि दर्शनात्। वस्तुतस्तु सर्गस्यानतिविस्तीर्णत्वञ्च त्रिंशदन्यूनद्विशत्यनधिकपद्यत्वेन योजनीयं, यदुक्तं तत्रैवेशानसंहितायां,–"नात्यन्तविस्तरः सर्गस्त्रिंशतो वा न चोनता। द्विशत्या नाधिकं कार्य्यमेतत् पद्यस्य लक्षणम्।।" इति)। श्रव्यवृत्तैः दोषपरिहारेण गुणालङ्कारसंयोगेन च श्रुतिसुखावहपद्यैरित्यर्थः ; (यदुक्तं,–"यस्मिन् श्रुते च चित्तस्य वैरस्यं न च हृद्यता। तानि वर्ज्यानि पद्यानि प्रसिद्धिप्रच्युतानि च।।" इति)। सुसन्धिभिः परस्परसापेक्षैरित्यर्थः, "सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्" इत्याद्युक्तेरिति भावः। (यच्च कैश्चित् "सन्धयो नाटकलक्षणोक्ता मुखप्रतिमुख-गर्भ-विमर्श-निर्वहणाख्याः पञ्च" इति व्याख्यातं तत्तु न समीचीनं, सर्वत्र लक्षणायोगात्। विश्वनाथस्तु,–"सर्वे नाटकसन्धयः" इति महाकाव्यलक्षणेऽभिहितवान्, तन्मतानुसारिभिरेव तथा व्याख्यातमिति दिक्)।।१८।।

प्रभा

अलंकृतमिति। नगरेत्यारभ्याभ्युदयैरित्यन्तानां सर्वेषां तृतीयान्तानामलंकृतमित्यनेन संबन्धः। असंक्षिप्तम् अतिसंक्षिप्तवर्णनं न रुचिं जनयतीत्यतः असंक्षिप्तम्। संक्षेपरहितम्। संक्षिप्तं तु यथा–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामो दशरथाज्जातः प्राप्तविद्यश्च कौशिकात्।
मिथिलायां धनुर्भङ्क्त्वा मैथिलीं परिणीतवान्।। इत्यादि।

रसाः–

श्रृङ्गारहास्यकरुणा रौद्रवीरभयानकाः।
बीभत्साद्भुतसंज्ञाश्च.............।।

इत्यष्टविधत्वेन नाट्यशास्त्रे [६.१५] वर्णिताः। क्वचिच्च शान्तोपि नवमः स्मृतः इति रसानां नवविधत्वं प्रोक्तम्। भावाः प्राधान्येनाभिव्यक्ता रसबीजभूता विभावादिभिरपरिपुष्टतया रसस्वरूपतामनापद्यमानाः स्थायिनः। यदुक्तम् साहित्यदर्पणटीकायां [३.२६१]–

न भावहीनोस्ति रसो न भावो रसवर्जितः।
परस्परकृता सिद्धिरनयो रसभावयोः।। इति।

देवमुनिगुरुनृपपुत्रादिविषया रतिर्भावः। कान्तादिविषया व्यक्ता रतिः श्रृङ्गारः। इति रसभावयोः स्वरूपविवेकः। विस्तरस्तु द्वितीयपरिच्छेदे रसवदलंकारविवेचने द्रष्टव्यः। रसैश्च भावैश्च निरन्तरं परिपूर्णम्। सर्गः प्रधानवृत्तान्ताङ्गभूतोवान्तरवृत्तान्तनिवेदकः प्रबन्धविशेषः। बहुवचनेन अष्टान्यूनत्रिंशदनधिकत्वं सूचितं भवति। तदुक्तमीशानसंहितायाम्–

अष्टसर्गान्न तु न्यूनं त्रिंशत्सर्गाच्च नाधिकम्।
महाकाव्यं प्रयोक्तव्यं महापुरुषकीर्तियुक्।। इति।

अनतिविस्तीर्णैस्त्रिंशदन्यूनद्विशत्यनधिकपद्यात्मकैरित्यर्थः। वस्तुतस्त्वेतत् सर्वं प्रायिकमेव। वैपरीत्येनापि महाकविसंप्रदायदर्शनात्। श्रव्यवृत्तैः यतिभङ्गहतवृत्तादिदोषराहित्येन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

*सुवृत्ततिलकोक्तरचनाविशेषेण वा माधुर्यादिगुणसद्भावेन वा श्रुतिसुखदैर्वृत्तैरुपेतम्। तदुक्तम्–

यस्मिन् श्रुते च चित्तस्य वैरस्य न च हृद्यता।
तानि वर्ज्यानि पद्यानि प्रसिद्धिप्रच्युतानि च॥ इति।

सुसंधिभिः सुश्लिष्टसंधाने पूर्वसर्गान्तेन उत्तरसर्गोपक्षेपकैरित्यर्थः। यथोक्तं साहित्यदर्पणे (६.३२१) –सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेदिति। अथवा संधिपदेनात्र नाट्यशास्त्रोक्तानां [१९.३५] मुखप्रतिमुखगर्भविमर्शनिर्वहणानां ग्रहणम्। तेषां यथा नाटके तथा काव्येपि विधेयत्वात्। तेषां सुश्लिष्टत्वं च साङ्गानां तेषां यथाक्रमं विनिवेशः। केचित् तु संधिपदमज्झल्संधिपरं व्याख्यान्ति। तेन च–

उर्व्यसावत्र तर्वाली मर्वन्ते चार्ववस्थितिः।
नात्रर्जु युज्यते गन्तुं शिरो नमय तन्मनाक्॥

इत्यादिश्रुतिकटुसंधिपरिहारः क्रियते। सर्गैरित्यादितृतीयान्तानामग्रिमश्लोकस्थितेनोपेतमितिपदेन संबन्धः॥१८॥

विवृति

रसभावनिरन्तरं रसाः श्रृङ्गारादयोऽष्टौ, शान्तश्च नवम इत्यपरे, भावाः हासरतिशोकादयोऽष्टौ स्थायिनः सञ्चारि(?)व्यभिचारिभेदाः चतुस्त्रिंशत्, तैर्निरन्तरम्। **सर्गैरित्यादि।** पूर्वोत्तरघटनयुक्तैः सर्वत्र सर्गेषु भिन्नवृत्तान्तैः नानाच्छन्दोविचित्रान्तैरुपेतम् लोकरञ्जनं काव्यं कल्पान्तरस्थायि जायेत सदलंकृति॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जनम्।
काव्यं कल्पान्तरस्थायि जायते सदलंकृति॥१९॥

रत्नश्री

भिन्नः प्रकृतवृत्तापेक्षया अन्यवृत्तलक्षणः सर्गाणामन्तोऽवसानं येषाम्। किं क्वचिदेव सर्गे नेत्याह-सर्वेषु सर्गेषु। सर्गाः प्रस्तुतपद्यापेक्षया वृत्तान्तरैः समापनीया इत्यर्थः। तैरेवंरूपैः सर्गैरुपेतं युक्तम्। सदलंकृति सत्यः शोभनाः सुप्रयुक्तत्वात्। नत्वलंकृतयः स्वरूपेण शोभना नाम। अलंकृतयः शब्दार्थालंकाराः यस्य यस्मिन् वा तत् तथा। सत्यो वा विद्यमाना अलंकृतयो यस्य तदेवंविधं काव्यं लोकरञ्जनं जायते। लोकं रञ्जयति गुणसंपदा परितोषयति इति लोकरञ्जनम्। ततश्च प्रतिग्राहकभूयस्त्वात् कल्पान्तरं तिष्ठन्तीति कल्पान्तरस्थायि......... .[जा]यते भवति प्रवचनवत् यावज्जगत् प्रवर्तत इत्यर्थः॥

ननु सर्वत्र महाकाव्ये चतुर्वर्गादीन्यङ्गानि यथोक्तानि न दृश्यन्ते। कानिचिदेव क्वचिद् [दृश्यन्ते]। तन्न किञ्चिदिदानीं महाकाव्यं स्यादित्याह-

हृदयङ्गमा

सर्वत्रेति।-सर्वत्र भिन्नाः वृत्तान्ता येषु तैः, सर्वेषु एव सर्गेषु वर्णनीयविषयाणां प्रभेदादिति भावः ; अथवा भिन्नं पृथक्छन्दसा रचितं, वृत्तं पद्यम्, अन्ते येषां तैः, उपेतं युक्तं, प्रत्येकसर्गान्ते प्रायशस्तथा दर्शनात्, "एकवृत्तमयैः पद्यैः अवसानेऽन्यवृत्तकैः"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति वचनाच्च। (एकवृत्तमयसर्गस्य सर्वत्रादर्शनात् अस्य प्रायिकत्वमवधेयम्; यथा शिशुपालबधे चतुर्थः सर्गः नानावृत्तैरुपनिबद्धः। तदुक्तञ्च,–"नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते' इति)। सदलङ्कृति सत्यः विद्यमानाः अथवा शोभनाः, अलङ्कृतयः अनुप्रासोपमादयः यस्मिन् तादृशं, काव्यं लोकानां रञ्जकं सहृदयमनोहरं सत्, कल्पान्तरस्थायि चिरस्थायि, चिरकीर्त्तिकरमिति भावः, जायेत भवेत्।।१९।।

प्रभा

सर्वत्रेति। तथा च सर्वत्र अव्यभिचारेण। भिन्नवृत्तान्तैः भिन्नानि पूर्वक्रमतः पृथग्भूतानि यानि वृत्तानि च्छन्दांसि तैरन्तः समाप्तिर्येषां तैस्तादृशैः सर्गैरुपेतम्। भिन्नसर्गान्तैरिति पाठे भिन्नः भिन्नवृत्तग्रथितः सर्गान्तो येषां तैरिति विग्रहेणायमेवार्थः। यथोक्तं दर्पणे [६.३२०]

एकवृत्तमयैः पद्यैरवसानेन्यवृत्तकैः। इति। एकवृत्तमयत्वं चात्र प्रायिकम्। नानावृत्तमयत्वमपि सर्गस्य दृश्यते। यथा शिशुपालवधे चतुर्थः सर्गः किरातार्जुनीये च पञ्चमः। सदलंकृति सत्यः शब्दार्थरामणीयकत्वेन रसोल्लासिका अलंकृतयः शब्दार्थालंकारा यस्मिंस्तत्। इत्थं महाकाव्यलक्षणमुक्त्वा लोकरञ्जनं कल्पान्तरस्थायि इति विशेषणद्वयेन तत् प्रशंसति। एवंगुणविशिष्टं काव्यं लोकरञ्जनम् सदस्यानां मनोविनोदास्पदं सत् कल्पान्तरस्थायि अन्यकल्पपर्यन्तं स्थितिमत् चिरस्थायीत्यर्थः। जायेत भवेत्। अनेन चिरंतनकीर्तिप्रत्याशया कविभिरत्र प्रयतनीयमिति ध्वनितम्।।१९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

सर्गबन्धलक्षणमाह–**सर्गबन्धो महाकाव्यमिति।** महत्त्वादस्यैव लक्षणं क्रियत इति। तदाह–**आशीरित्यादिसदलंकृतीत्यन्तेन।** अप्राप्तस्य वस्तुनः प्राप्तुमिच्छा आशीः। नमस्क्रिया नमस्कारः ; वन्दे इति, उपास्महे इति, ध्यायामः इति, जयति इति च तत्पर्यायाः। वस्तु निर्देशः इतिवृत्तस्य संक्षेपेणोक्तिः नायकोपन्यासो वा। तेष्वेकतमः काव्यशरीरस्य मुखं आरम्भो भवति। इतिहासो महाभारतादिः, तत्रोद्भूतं; कथा बृहत्कथा, तत्रोद्भूतं वा; इतरद्वा लोकसिद्धं स्वबुद्धिकल्पितं वा। सदाश्रयं चातुर्वर्ण्योद्भूतश्लाघ्यचरित-नायकाश्रयम्। चतुर्वर्गफलायत्तं धर्मार्थकाममोक्षेष्वन्यतमाधीनम्। चतुरोदात्तनायकं विदग्धोदारनायकम्। नगरार्णवादिवर्णनैः ; उद्यानक्रीडादिभिः ; विप्रलम्भैः वियोगचेष्टितैः ; विवाहैः सम्भोगचेष्टितैः ; कुमारोदयवर्णनैः पुत्रार्थतपश्चरणदौहृदवर्णन-बालक्रीडादिभिः–मन्त्रणं मन्त्रः कार्यविचारः, दूतः दूतसंप्रेषणम्, प्रयाणं चतुरङ्गबलेन जयार्थं यात्रा, आजिः समरः, नायकाभ्युदयः नायकविजयः–एभिरङ्गैरलंकृतं शोभितम्। असङ्क्षिप्तं असङ्कोचितम्। रसभावनिरन्तरं रसैः शृङ्गारादिभिः, भावैः व्यभिचार्यादिभिश्च, निरन्तरम्। अनतिविस्तीर्णैः–एकार्थप्रतिपादकः सर्गः ; तस्य अतिविस्तारे अभिनवार्था बहवो लभ्येरन्; अतः अनतिविस्तीर्णैः। श्राव्यवृत्तैः पथ्यावक्त्रेन्द्रवज्रोपेन्द्रवज्रावंशस्थप्रहर्षिणीवसन्ततिलकमालिनीप्रमुखश्रुतिमधुरवृत्तैः। सुसन्धिभिः श्रुतिपरुषसन्धिरहितैः ; अथ वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काव्यप्रयोजनभूतैकपुरुषार्थप्रवृत्तस्य नायकस्य प्रारम्भयत्न-प्राप्त्याशानियताप्तिफलागमसन्धियुक्तैः ; यद्वा मुखप्रतिमुखादि-पञ्चसन्धियुक्तैः। सर्वत्र सर्वेषु सर्गेषु। भिन्नवृत्तान्तैः-तत्तत्सर्गाविहितपूर्वभिन्नानि वृत्तानि येषां ते-तैः सर्गैः ; उपेतम्। सदलंकृति स्वभावाख्यानाद्यलङ्कारवत्। ईदृशं काव्यं लोकरञ्जनं कल्पान्तरस्थायि च जायेत॥१९॥

उक्तस्य सर्गबन्धस्य स्वरूपं लक्षणं च प्रदर्शयितुमाह-**सर्गबन्ध** इति। महाकाव्यम्-नायकगौरवं ग्रन्थस्य महत्त्वं च यस्मिन् अस्ति, तेन सर्गबन्धेन भवितव्यम्। कानि तानि लक्षणानि इति आशङ्कायां आह-आशीरित्यारभ्य सदलंकृतीत्येतदन्तं काव्यसमुदायलक्षणम्। रमताम्, (वि?)जयताम्, इत्यादिः आशीः। वन्दे, नमामि, नमः, इत्यादिः नमस्क्रिया। आसीत्, अभूत्, अस्ति, इत्यादिः वस्तुनिर्देशः। वा-शब्दो विकल्पे; एषां अन्यतमेन काव्यारम्भे भवितव्यम्। इतिहासकथोद्भूतम्-भारतरामायणादिषु एकां कथां आश्रित्य प्रवृत्तम्। सदाश्रयम्-हर्षशूद्रकोदयनादिसत्पुरुषसमाश्रयम्। चतुर्वर्गफलायत्तम्-धर्मार्थकाममोक्षेषु अन्यतमाधीनं कृत्स्नाधीनं वा। चतुरोदात्तनायकम्-चतुरः कुशलः, उदात्तः वंशवीर्यादिभिः प्रथितः ; एवंविधनायकोपेतम्। विप्रलम्भैः वञ्चनादिभिः, विप्रलम्भश्रृङ्गारादिभिः वा। दूतशब्देन दूतस्य कार्यमुच्यते। नायकाभ्युदयैः-नायकस्य जयादिसिद्धिः अभ्युदयः। असङ्क्षिप्तम् इति न सङ्क्षेपमात्रमत्र प्रतिषिद्धम्; अतिविस्तरोऽपि नेष्टः-अतिसङ्क्षेपातिविस्तराभ्यां रहितम्। रसभावनिरन्तरम्-रसाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रृङ्गारादयः, भावाः रत्यादयः ; तैः श्लक्ष्णम्। सर्गैः सर्गाध्यायपरिच्छेदादिभिः; अनतिविस्तीर्णैः सङ्कोचविस्ताराभ्यां रहितैः। सुसन्धिभिः–सन्धयः पञ्च मुखप्रतिमुखगर्भावमर्श–निर्वहणानि इति; एते काव्यस्य नाटकस्य वा सर्वशरीरोपयोगभूताः। रसानुबन्धकरी बीजस्योक्तिः यत्र क्रियते तत् मुखत्वेन अभिहितम्; उक्तमुखस्य यत्र प्रकाशनं क्रियते तत् प्रतिमुखम्; तस्यैव बीजस्य दृष्टनष्टत्वप्राप्तौ सत्यां पुनर्निभृतरूपबीजवापनं तस्य फलभक्तिमार्गे(?)गर्भसंज्ञितम्; गर्भनिर्विण्णबीजस्य विलोपन वा संश्लेषेण वा यत्र उपयोगः क्रियते सः अवमर्शः ; मुखाद्यानां अर्थानां एकत्र समाहारः निर्वहणाय समापनाय यत्र भवति तत् निर्वहणम्–एभिः युक्तम्। भिन्नसर्गान्तम्–पूर्वस्मात् वृत्तात् अन्तवृत्तम् यत्र भिन्नं तत् भिन्नसर्गान्तम्।।१९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यूनमप्यत्र यैः कैश्चिदङ्गैः काव्यं न दुष्यति।
यद्युपात्तेषु सम्पत्तिराराधयति तद्विदः॥२०॥

रत्नश्री

अत्रोक्तेष्वङ्गेषु अवयवेषु यैः कैश्चिद् यथासम्भवं तु मधुपानकुमारोदयपर्वतवर्णनादिभिर्न्यूनं रहित[म]पि, न के[व]लं पूर्णं काव्यं, महाकाव्यं न वर्ज्यते सद्भिरुपादीयत इत्यर्थः। न दुष्यतीत्यपि पाठः। अस्तु स एव। अस्योत्सर्गस्यापवादमाह-यदीत्यादि। उपात्तेषु [गृहीते]षु सम्पत्तिर्विभूतिः शब्दार्थसाद्गुण्यलक्षणा। तद्विदः तां काव्यसम्पत्तिं ये विदन्ति तान् पुरुषान् आराधयति रञ्जयति यदि, तदा न वर्ज्यते। अर्थोपात्तान्यङ्गानि। यद् वि[गतार्थं] तद् हेयमित्यर्थाद् गम्यते।

अत्रेदं चिन्त्यते: कथमत्र क्रमः। किं पूर्ववर्णितेन नायकेन रिपोर्जयात् नायकस्योत्कर्षः। कथ्यते। अथ प्राग्वर्णि[तस्य रि]पोर्नायकेन जयात् तदुत्कर्षः ख्याप्यत इति। अत्र भामहः पूर्वकमेव क्रममिच्छति, द्वितीयं तु द्वेष्टि-

नायकं प्रागुपन्यस्य वंशवीर्यश्रुतादिभिः।
न तस्यैव वधं कुर्यादन्योत्कर्षाभिधित्सया॥

यदि काव्यशरीरस्य न स व्यापितयेष्यते।
न चाभ्युदयभाक् तस्य मुधाऽऽदौ ग्रहणं स्तवे॥

[काव्यालङ्कारे 1.22-23]

इति। दण्डी तु प्रकारद्वयमपि युक्तमिच्छन्नाह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

प्रोक्तमहाकाव्यलक्षणस्य केषाञ्चिद्धर्म्माणां लक्षणघटकत्वे तद्धर्म्मवति खण्डकाव्ये महाकाव्यत्वापत्तिः, समुदायस्य लक्षणत्वाङ्गीकारे च कियल्लक्षणहीने महाकाव्येऽपि महाकाव्यत्वं न स्यात्, तत्र सिद्धान्तयितुमाह, न्यूनमिति।–अत्र महाकाव्ये, उक्तेष्वङ्गेष्विति शेषः, यैः कैश्चित् अङ्गैः न्यूनं हीनमपि, काव्यं न दुष्यति लक्षणहीनतया निन्दितं न भवति, यदि उपात्तेषु वर्णितेषु विषयेषु, सम्पत्तिः रचनामाधुर्य्यं, तद्विदः काव्याभिज्ञान्, आराधयति रसादिसद्भावेन प्रीणयति। (तदुक्तं,–"नावर्णनं नागर्य्यादेर्दोषाय विदुषां मनः। यदि शैलर्त्तुरात्रादेर्वर्णनेनैव तुष्यति।।" इति। "यद्युपात्तार्थसम्पत्तिः" इति पाठे–स एवार्थः। एतेन वैचित्र्यविशेषजनकत्वमेव महाकाव्यत्वमिति फलितं, वैचित्र्यविशेषश्च महाकाव्ये खण्डकाव्याद्भिन्न एव। उद्यानादीनां वर्णनन्तु सरलमतीनामनायासप्रतीत्यर्थमिति दिक्)।।२०।।

प्रभा

महाकाव्यस्य लक्षणतयोक्तानां केषांचिद्धर्माणां खण्डकाव्येपि सत्त्वात् तदतिव्याप्तिवारणाय यथा सर्वेषामपि तेषां समुदितरूपावस्थानत्वेन महाकाव्यलक्षणे निवेशः कृतश्चेत् कुत्रचित् तेषां न्यूनत्व आपतन्तीमव्याप्तिं परिहरन्नाह–**न्यूनमिति।** अथ पूर्वोक्तेष्वङ्गेषु कैश्चिदङ्गैर्न्यूनमपि विकलमपि। काव्यम् महाकाव्यम्। न दुष्यति अङ्गहीनत्वेन दूष्यं न भवति। यदि उपात्तेषु यथासामर्थ्यं वर्णितेषु अङ्गेषु। संपत्तिः शब्दार्थालंकारगुणगरिमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रसपरिपोषो वा। तद्विदः साहित्यशास्त्रकोविदान्। आराधयति प्रमोदयति। यथोक्तं भोजराजेन [५.१३५]

नावर्णनं नगर्यादेर्दोषाय विदुषां मतम्।
यदि शैलर्तुरात्र्यादेर्वर्णनेनैव तुष्यति।। इति।

अयं भावः नगर्यादिवर्णनं रसपरिपोषाय। स चेत् परिपोषः शैलवर्णनेनैव स्यात् तर्हि नगर्यादिवर्णनमकिंचित्करमिति। एतेन वर्णनचमत्कृतिविशेषै रसपरिपोष एव काव्यलक्षणमिति फलितम्। नगरादिवर्णनं तु केवलं तत्परिचायकम्। खण्डकाव्यमहाकाव्ययोश्चमत्कारो भिन्न इति पूर्वोक्ता नाव्याप्त्यतिव्याप्तिशङ्कापीति ज्ञेयम्।।२०।।

विवृति

न्यूनमप्यत्र यैः कैश्चित् नगरादिवर्णनैरङ्गैः काव्यं तदपि न दुष्यति। किं यदि स्यादित्याह–यदि उपात्तेष्वङ्गेषु केषुचित् सम्पत्तिः पूर्णता आराधयति तद्विदः।।२०।।

नगरार्णवाद्यङ्गेषु कानिचिदङ्गानि येषु न दृश्यन्ते तेषां अङ्गवैकल्यात् किं दुष्टत्वम्? नेत्याह–**न्यूनमिति।** उपात्तेषु कविना आहितेषु अङ्गेषु गुणालङ्कारातिशयः काव्यविदां चेतश्चमत्कारं करोति चेत्, अङ्गवैकल्यं न दोषाय।।२०।।

न्यूनमिति। यैः कैश्चिदङ्गैः हीनमपि न दुष्यति, अपि तु स्वीक्रियत एव। कैश्चिदिति उदासीनोक्तिरियम्; लोकानुग्रहतया अप्रमुक्तैः (?) सर्वैरङ्गैर्भवितव्यम् इत्यभिप्रायः। तद्विदः– लक्षणविदः रसविदः पण्डितान्–आराधयति चेत्।।२०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

**गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम्।
निराकरणमित्येष मार्गः प्रकृतिसुन्दरः॥२१॥**

रत्नश्री

ना[यकं प्रति]पक्षं प्राक् प्रथममुपन्यस्याभिधाय गुणतो गुणैः शौर्यादिभिरभिलक्षितं नायकं पूर्वं वर्णयित्वेत्यर्थः। तेन पूर्ववर्णितेन नायकेन विद्विषां विपक्षाणां निराकरणमभिभ[वः पराज]यः कथ्यत इति एष मार्गः क्रमः प्रकृत्या सुन्दरः शोभनः। स्वरूपसिद्ध ऋजुरयं क्रम इति मन्यते॥

द्वितीयं क्रममाह, यो भामहेन द्विष्टः-

हृदयङ्गमा

सम्प्रति काव्ये नायकप्रतिनायकयोर्वर्णने प्रकारद्वयमाह. गुणत इति वंशेति च द्वाभ्याम्।-प्राक् प्रथमं, नायकं गुणतः उपन्यस्य नायकस्य गुणान् वर्णयित्वा, तेन नायकेन, विद्विषां शत्रूणां, प्रतिनायकानामित्यर्थः, निराकरणं पराजयः, इत्येष मार्गः वर्णनरीतिः, प्रकृतिसुन्दरः स्वभावरम्यः, (अत्र नायकस्य गुणाः प्रतिनायकस्य च दोषा एव वर्णनीयाः, नायकस्य त्यागादीन् सामान्यगुणान् प्रदर्श्य विशेषपौरुषगुणानामुक्तत्वात् प्रतिनायकलक्षणे च दोषाणामभिहितत्वात्। तदुक्तं यथा,-"शोभा विलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यतेजसी। ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः॥" इति, "धीरोद्धतः पापकारी व्यसनी प्रतिनायकः" इति च। तथा च रामायणे पितुराज्ञया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीर्घवनवासक्लेशसहनादिसाधुव्रतेन रामेण स्वबलदृप्तस्य सीताहरणादिपापकर्मरतस्य रावणस्य बधवर्णनम्)।।२१।।

प्रभा

काव्यं चतुरोदात्तनायकमिति [१.१५] कथितम्। नायकशब्देन तदुच्छेद्यः प्रतिनायकोप्युपलक्षितः। नायकप्रतिनायकयोरुत्कर्षापकर्षौ काव्ये वर्णनीयौ। तत्र वर्णनप्रकारद्वयं निर्दिशति–**गुणत इति।** प्राक् प्रथमम्। गुणतः नेता विनीत इत्यादिपूर्वोक्त-[१.१५] गुणैः। नायकम् कथाप्रधानपुरुषम्। उपन्यस्य वर्णयित्वा। तेन नायकेन। विद्विषाम् तच्छत्रुभूतोद्धतप्रतिनायकानाम्। बहुवचनं तदनुसारिपुरुषानुरोधेन। निराकरणम् समुच्छेदः। इत्येष मार्गः इयं पद्धतिः। प्रकृतिसुन्दरः स्वभावमनोहरा। तथाहि। काव्यस्य प्रधानोद्देश्यं सदुपदेशः। स च सत्पुरुषाभ्युदयासत्पुरुषविनिपातवर्णनेन भवति। तदर्थं तावुभौ यथाक्रमं वर्णनीयौ। यथा रामायणे श्रीरामभद्रगुणवर्णनपुरः सरं। दशाननदुर्विनयवर्णनम्। एतादृशं काव्यं सकललोकानां शुश्रूषणीयम्। श्रुतं च तच्छ्रोतृन् सन्मार्गप्रवणान् करोति। अतः प्रकृतिसुन्दरोयं मार्ग इति भावः।।२१।।

विवृति

नायकं प्रागुपन्यस्य गुणतः गुणैः 'प्रकृत्यादेरुपसंख्यानम्' इति तृतीया, तस्यास्तसिल्। तेन प्रागुपन्यस्तेन नायकेन विद्विषां निराकरणमित्येष मार्गः प्रकृतिसुन्दरः स्वभावरमणीयः।।२१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि।
तज्जयान्नायकोत्कर्षकथनं च धिनोति नः॥२२॥

रत्नश्री

रिपो[र्नायकवि]पक्षस्यापि न केवलं प्रतिपक्षस्य वंशोऽन्वयः वीर्यं विक्रमः श्रुतं शास्त्रकौशलं आदिर्येषां त्यागसत्यक्षान्त्यादीनां तानि गुणवस्तूनि वर्णयित्वा प्रकाश्य [तस्य] वर्णितवंशादेर्विपक्षस्य जयाद् अभिभवात् कारणात् प्रतिपक्षेण, नायकस्य प्रतिपक्षस्य उत्कर्षो विशेषः तस्य कथनमभिधानं यत्, तच्च नोऽस्मान् धिनोति प्रीणयति। चकारात् पूर्वकं च। अयमपि क्रमोऽस्माकं प्रिय एवेत्यर्थः।

अयमभिप्रायः- काव्यं हि वक्रोक्तिप्रधानम्। अयं च क्रमः वक्रोक्तिस्वभावः, यद्विपक्षवर्णनद्वारेण प्रतिपक्षोत्कर्षकथनम्। एवं नामायमुत्कृष्टः, यदेवंगुणोऽपि विपक्षो[ऽनेन] निर्जित इति। अन्यश्च वर्वितोऽन्यस्योत्कर्षः ख्याप्यत इति चतुरोऽयं [न]यः। तस्मादयमस्मान् धिनोतीति। काव्येषु हि द्वावपि वर्ण्येते केवलं पौर्वापर्ययोर्विवादः। अत्र हि प्रतिपक्षोत्कर्षो विधेयः। स चोभयथाऽपि गम्यत एव। हयग्रीववधादौ चायं [प्र] [10a]कारो दृश्यते ऋजुनैव क्रमेण। प्रतिपक्षोत्कर्षः किं न कथ्यते वक्रोक्त्या किं न ख्याप्यते वक्रोक्तिप्रधानत्वात् काव्यस्येति चेत्। यत्किञ्चिदेतत्। [१]अशोकवनिकाचोद्यमिदम्।

यदुच्यते काव्यशरीराव्यापकत्वात्, अनभ्युदयभानित्वाच्च विपक्षस्य प्रागुपन्यासवर्णने विफल इति। तदसत्। कथं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिपक्षोत्कर्षख्यापनपरं विपक्षवर्णनं प्राक्क्रियमाणं विफलं ना[म]। एवं हि प्राक्प्रतिपक्षनायकवर्णनम्, तेन च विपक्षनायकनिराकरणमितीदमपि प्रतिपक्षोत्कर्षार्थं क्रियमाणं विफलं स्यात्। अथ प्रतिपक्षोत्कर्षकथनार्थत्वात् ननु[२] चैतत् प्रतिप[क्ष]वर्णनमपि प्रतिपक्षोत्कर्षख्यापनार्थत्वात् न मुधेति न कश्चिद् विशेषोऽन्यत्राभिनिवेशात्। तस्मात् काव्यशरीराव्याप्त्यनभ्युदयभागिनोऽपि विपक्षस्य प्राक् ग्रह[ण]स्तवौ न मुधैव, प्रतिपक्षोत्कर्षख्यापनार्थत्वात्, प्रतिपक्षवर्णनादिवदिति द्वयमपि साधु दृश्यतामिति।।

यत् पूर्वं काव्यशरीरं त्रिविधोद्दिष्टं पद्यं गद्यं च मिश्रं चेति [1.11]तत्रैता[वता] पद्यं निर्दिष्टम्। गद्यमधिकृत्याह–

अपादः पदसंतानो गद्यमाख्यायिका कथा।
इति तस्य प्रभेदो द्वौ

न विद्यते पादः पादव्यवस्था यस्मिन्निति न पादो वा अपादः पादस्वभावो न भवतीत्यर्थः। एवलक्षणं गद्यम्। पद्यं तु पादस्वभावः पदसन्तान इत्यसङ्करः। कतिविधं तदित्याह–आख्यायिकेत्यादि। तस्य गद्यस्य भेदौ प्रकारौ द्वौ विज्ञेयौ। कथम्। आख्यायिकाकथेत्येवं[रू]पौ। [न] अनयोर्भेदः। भामहमतेन भेदमाह–

हृदयङ्गमा

वंशेति।–रिपोः शत्रोरपि, वंशः कुलं, वीर्य्यं पराक्रमः, श्रुतं शास्त्रज्ञानम्, आदिना दयादाक्षिण्यादि यथायथमवगन्तव्यम्;

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतानि वर्णयित्वा कीर्त्तयित्वा, तज्जयात् तस्य रिपोः जयात्, नायकस्य उत्कर्षवर्णनं नः अस्मान्, धिनोति तोषयति, (एतेन प्रतिनायकलक्षणान्वितस्य तस्य वंशादिकं वर्णयित्वा ततोऽपि गुणाधिकनायकवर्णनं नाकस्योकर्षमेव जनयति इत्यायातम्। यथा किराते दुर्य्योधनस्य प्रजारञ्जनं वर्णयित्वा ततोऽपि गुणवतो युधिष्ठिरादेरुत्कर्षप्रतिपादनार्थं तेन तज्जयः वर्णितः)।।२२।।

प्रभा

वर्णनस्य प्रकारान्तरं दर्शयति–**वंशवीर्येति।** रिपोः शत्रोः प्रतिनायकस्य। वंशः सत्कुलं वीर्यं पराक्रमः श्रुतं विद्या एते आदयो येषां ते दाननीत्युत्साहादयः तान्। वर्णयित्वा काव्ये सम्यक्तया निबध्य। तान् समीचीनतया प्रतिपाद्येत्यर्थः। तज्जयात् तादृशोत्कर्शशालिनः प्रतिनायकस्य तत्कर्मकाज्जयात्। नायकस्यो-त्कर्षकथनम् विजयवर्णनम्। नः अस्मान्। धिनोति प्रीणाति। यथा किरातार्जुनीये दुर्योधननीतिवर्णनपुरःसरं पाण्डवानामुत्कर्षकथनम्। ननु लुब्धो धीरोद्धतः स्तब्धः पापकृद्व्यसनी रिपुः [द. रू. २.९] धीरोद्धतः पापकारी व्यसनी प्रतिनायकः [सा. द. ३.१३०] अन्यायवांस्तदुच्छेद्य उद्धतः प्रतिनायक इत्यादिना कथितस्य प्रतिनायकलक्षणस्य विरुद्धमेतदिति चेन्न। यद्यपि सद्गुणवतो धार्मिकस्य प्रतिनायकस्य पराजयेन नायकोत्कर्षासंभवः। प्रत्युत तस्य निन्दनीयत्वापत्तिस्तथापि परपीडादिदोषसामान्याधिकरण्येन केषांचित् कुलीनत्वादिदैवागतगुणानां प्रतिनायके वर्णनं तन्निन्दादार्ढ्यार्थमेवेति मन्तव्यम्। धिनोति नः इत्यनेनात्र स्वरुचिः प्रदर्शिता। तद्बीजं त्वस्मिन् मार्गे वास्तवस्यानपलापो भवति। तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिनायकवर्णनपूर्वकनायकोत्कर्षवर्णनेन कविप्रतिभाचमत्कारः सविशेषं परिस्फुटो भवतीति च ज्ञेयम्।।२२।।

विवृति

न केवलं नायकमेव प्रागुपन्यस्य, तथा रिपोरपि वंशवीर्यश्रुतादीनि वर्णयित्वा तज्जयादेवंविधरिपुजयात् नायकोत्कर्षकथनं च नायकाधिक्यप्रतिपादनं च धिनोति नः प्रीणयतीति वदन् भामहमतमाक्षिपति। तदुक्तम्–

'नायकं प्रागुपन्यस्य वंशवीर्यश्रुतादिभिः।
तस्यैव न वधं ब्रूयादन्योत्कर्षाभिधित्सया।।

यदि काव्यशरीरस्य न स व्यापितयेष्यते।
न चाभ्युदयभाक्तस्य मुधादौ ग्रहणं स्तवे।।'

इति।।२२।।

इतिवृत्तभेदेन प्रबन्धद्वैविध्यमाह–**गुणतः इति**।।२१-२२।।

गुणत इति। नायकगुणतः विद्यावीर्यौदार्यदाक्षिण्यादिभिः। प्रकृतिसुन्दरः स्वभावरमरणीयः। पूर्वाचार्यमतमुपन्यस्य आत्मनो मतमाह–वंशेति। धिनोति नः अस्मान् प्रीणयति। अपिना नायकस्येवेति। चशब्देन पूर्वोक्तमपीति यावत्।।२१-२२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपादः पदसन्तानो गद्यमाख्यायिका कथा।
इति तस्य प्रभेदो द्वौ तयोराख्यायिका किल॥२३॥

हृदयङ्गमा

काव्यस्य गद्यपद्यमिश्रत्वेन त्रैविध्यात् कृच्छसाध्यनिर्वाहतया प्रथमं पद्यलक्षणमभिधाय सम्प्रति गद्यकाव्यं निरूपयन्नाह, अपाद इति नायकेनैवेति च द्वाभ्याम्।–अपादः छन्दोबद्धः श्लोकचतुर्थांशः पादः तद्रहितः, पदसन्तानः पदसमूहः, गद्यम्। "चूर्णकमल्पसमासं दीर्घसमासमुत्कलिकाप्रायम्। समासरहितमाविद्धं वृत्तभागान्वितं वृत्तगन्धि॥" तथा "चूर्णकोत्कलिकाप्राये आविद्धं वृत्तगन्धि च" इत्याद्युक्तं गद्यभेदं कथाऽऽख्यायिकयोरन्तर्भावात् पृथगनभिधाय प्रधानभेदद्वयं प्राचीनमतमाश्रयन्नाह, आख्यायिकेति।–तस्य गद्यस्य, द्वौ प्रभेदौ आख्यायिका कथा च। (तदुक्तं,–"कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्। क्वचिदत्र भवेदार्य्या क्वचिद्वक्त्रापवक्त्रके॥ आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्त्तनम्॥" ॥२३॥

प्रभा

उद्देशक्रमप्राप्तं गद्यं निरूपयति–**अपाद इति**। पादो गणमात्रानिबद्धो गद्यतुरीयांशस्तच्छून्यः अपादः। गणमात्रानिर्बन्धशून्य इत्यर्थः। एतादृशः पदसंतानः सुप्तिङन्तपदचयो गद्यम्। अस्य च मुक्तकं वृत्तगन्धि चूर्णकमुत्कलिकाप्रायं चेति चत्वारः प्रभेदाः सन्ति। परं तेषां कथाख्यायिकादावन्तर्भावो भवतीति न तत्र पृथक्तया दर्शिताः। तेषां लक्षणान्युदाहरणानि च साहित्यदर्पणादौ [६.३३१]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रष्टव्यानि। तस्य गद्यप्रबन्धस्य च पुनराख्यायिका कथा चेति द्वौ प्रभेदौ स्तः। तत्र प्राचीनमतानुसारेणानयोर्लक्षणमनूद्य तत्र स्वारुचिं प्रकटयति किं हि न स्यात् कृतात्मनाम् [१.३०] इत्यन्तेन ग्रन्थसंदर्भेण। किलेति पूर्वाचार्याणां मतभेदप्रदर्शनार्थं स्वासंमतिप्रकटनार्थं वा। तत्र प्राचीनमतानुसारिणा भामहेनानयोर्लक्षणमुक्तं यथा–

प्रकृतानाकुलश्रव्यशब्दार्थपदवृत्तिना।
गद्येन युक्तोदात्तार्था सोच्छ्वासाख्यायिका मता॥

वृत्तमाख्यायते तस्यां नायकेन स्वचेष्टितम्।
वक्त्रं चापरवक्त्रं च काले भाव्यर्थशंसि च॥

कवेरभिप्रायकृतैरङ्कनैः कैश्चिदङ्किता।
कन्याहरणसंग्रामविप्रलम्भोदयान्विता॥

न वक्त्रापरवक्त्राभ्यां युक्ता नोच्छ्वासवत्यपि।
संस्कृतासंस्कृता चेष्टा कथापभ्रंशभाक् तथा॥

अन्यैः स्वचरितं तस्यां नायकेन तु नोच्यते।
स्वगुणाविष्कृतिं कुर्यादभिजातः कथं जनः॥

अनिबन्धं पुनर्गाथाश्लोकमात्रादि तत् पुनः।
युक्तं वक्रस्वभावोक्त्या सर्वमेवैतदिष्यते॥[१.२५-३०] इति।

इत्थमेव चानयोर्लक्षणं साहित्यदर्पणकारादिभिः [६.३३० इत्यादिषु] स्वस्वग्रन्थेषु संगृहीतम्॥२३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

तदेवं पद्यात्मकं काव्यशरीरं व्याख्याय गद्यात्मकमाह–

अपादः पदसन्तानो गद्यम्, छन्दोभिरनिबद्धः पदानां सुप्तिङन्तानां सन्तानः समूहो गद्यमुच्यते। तस्य गद्यस्य द्वौ प्रभेदौ। कौ तावित्याह–आख्यायिकेत्येकः, कथेति द्वितीयः। तयोर्मध्ये आख्यायिका किलेत्यक्षमयाऽनुवादः। नायकेनैव वाच्या, नापरेण। अवधारणार्थ एवकारः। तदुक्तं भामहेन–

प्रसृतानाकुलश्रव्यशब्दार्थपदवृत्तिना।
गद्येन युक्तोदात्तार्था सोच्छ्वासाख्यायिका मता।।

वृत्तमाख्यायते तस्यां नायकेन स्वचेष्टितम्।'

कथा नायकादन्येनैव वाच्या, न नायकेन स्वयम्। तदुक्तम्–

'न वक्त्रापरवक्त्राभ्यां युक्ता नोच्छ्वासवत्यपि।
संस्कृता प्राकृता चेति कथाऽपभ्रंशभाक्तथा।।

अन्येन चरितं तस्यां नायकेन तु नोदितम्।
स्वगुणाविष्कृतिं कुर्यादभिजातः कथं जनः।।'

इति नियमं निराकर्तुमिदमाह–अन्या कथा नायकेन इतरेण वा। वाशब्दो वक्तृविषयमनादरं प्रदर्शयति। तत्र नायकः कथं स्वयं गुणख्यापनं कुर्यादित्यत्राह–स्वगुणाविष्क्रियादोषो नात्र। स्वयं स्वकीयगुणकीर्तनं नायकस्य कथायां न दोषः भूतार्थशंसिनः, भूतं सत्यमर्थं शंसति यः तस्य। स्वस्यासतो गुणानध्यारोप्य कथयतो दोषाः, न स्वस्वरूपानुवाद इति।।२३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नायकेनैव वाच्यान्या नायकेनेतरेण वा।
स्वगुणाविष्क्रियादोषो नात्र भूतार्थशंसतः॥२४॥

रत्नश्री

तयोराख्यायिकाकथयोरयं भेदः किलेति परमतसूचने। आख्यायिका नायकेनैव [स्वयम्] [10b] उच्यते, यस्य चरितप्रतिपादनार्थमाख्यायिका प्रवृत्ता। नान्येनेति वक्तृनियमः आख्यायिकायाम्। तदुक्तम्—

वृत्तमाख्यायते यस्यां नायकेन स्वचेष्टितम्। इति।

[काव्यालङ्कारे 1.26]

अन्या कथा उक्ताया आख्यायिकाया अन्यत्वात्। नायकेन वाच्या यच्चरितप्रकाशनाय प्रवृत्ता, इतरेण वा नायकादन्येन वा,, तत्सहायादिना वाच्येति न वक्तृनियमः कथायाम्। अयं तावदनयोर्भेदः।

न[न्विय]माख्यायिका स्वयं नायकेनोच्यते न कथा। एवं हि स्वगुणोद्भावनप्रसङ्गः। तच्चानुचितमभिजातस्य। तदुक्तम्—

स्वगुणाविष्कृतिं कुर्यादभिजातः कथं जनः। इति।

[काव्यालङ्कारे 1.29]

अत्राह—स्वगुणाविष्क्रियेत्यादि। अयं तावददोषः। यतः स्वस्यात्मनः स्वेषां वा गुणानां वंशस्य वीर्यादीनामाविष्क्रिया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रस्तावववशात् कथनं न दोषः न दुष्यति। कस्य—भूतं यथावृत्तमर्थं स्वच[ारित्र्य]लक्षणं शंसतो ब्रुवतो नायकस्य। अत्राख्यायिकायां कथायां वा। तेन हि यथावृत्तं स्वचरितममिधेयं दोषरूपं गुणरूपमन्यद्वा, न विपरीतम्। तत् [अ]विपरीतं यथावृत्तमात्मनः कथयतः प्रस्तावववशप्राप्तं स्वगुणकथनं कथमाभिजात्यं हापयेत्। प्रत्युत विपरीताभिधाने आभिजात्यं हीयेत। आत्मव[ञ्चन]रूपं तु स्वगुणाविष्करणमनुचितमाभिजात्ये।

ननु नात्र दोष इत्येतावदुक्तम्। गुणस्तु न कश्चित्। अयमेव गुणो यो दोषाभावः। तल्लक्षणत्वात्तस्य सर्वत्रेति यत्त्किञ्चिदेतत्। अ[नेन] चैतन्निरस्तं भङ्ग्या यदुक्तं भामहेन, आख्यायिकायां सुखदुःखरूपं स्वचरितं यथावृत्तमाख्यायते नायकेन न तु गुणरूपमिति। वृत्तमाख्यायते यस्यां नायकेन स्वचेष्ट[11a]नादिति।

ननु सामान्यवचनमेतत्। न त्वयं विशेषो दृश्यते दुःखरूपं स्वचरितं वाच्यं न गुणरूपमिति। अर्थादेतदुक्तं तेन। यत्पश्चात् वक्ष्यति—

स्वगुणाविष्कृतिं कुर्यादभिजातः

[काव्यालङ्कारे 1.29]

इति। अन्यथा पूर्वापरविरोधस्तत्र स्यात्।।

किं तर्हि न युक्तमिति स्वमतमाह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

इति; यथा कादम्बर्य्यादिः। "आख्यायिका कथावत् स्यात् कवेर्वंशादिकीर्त्तनम्। अस्यामन्यकवीनाञ्च वृत्तं गद्यं क्वचित् क्वचित्।। कथांशानां व्यवच्छेद आश्वास इति बध्यते। आर्य्यावक्त्रापवक्त्राणां छन्दसा येन केनचित्।। अन्यापदेशेनाश्वास-मुखे भाव्यर्थसूचनम्।।" इति; यथा हर्षचरितादिः)। प्रोक्तलक्षणद्वयघटितपरस्परभेदकधर्म्माणां प्राचीनप्रबन्धेष्वन्यथाभावमाकलय्य लक्षणान्तरमपि दूषयितुमाह, तयोरिति।–तयोर्मध्ये आख्यायिका नायकेनैव वाच्या नायक एव अस्या वक्ता इत्यर्थः एवकारादन्यव्यवच्छेदः। (उक्तञ्च,–"वृत्तमाख्यायते यस्यां नायकेन स्वचेष्टितम्" इति)। अन्या कथा, नायकेन तदितरेण वा वाच्या, यथा कादम्बर्य्यां चन्द्रापीड़स्य नायकस्य महाश्वेतया संलापः। ननु नायकस्य वक्तृत्वे तस्य स्वगुणाविष्करणं दोषायेति शङ्कां वारयन्नाह, स्वगुणेति।–भूतार्थशंसिनः यथार्थवादिनः नायकस्य, अत्र वक्तृत्वे, स्वगुणाविष्क्रिया निजगुणख्यापनं, दोषः न, भवतीति शेषः, असत्यकथनस्यैव दोषत्वात् इति भावः ।।२४।।

प्रभा

तत्र प्राचीनाचार्यैः कृतं कथाख्यायिकयोर्भेदमादौ दर्शयति–**नायकेनैवेति**। तयोः कथाख्यायिकयोर्मध्ये आख्यायिका नायकेनैव स्वमुखेन वाच्या। एवकारोन्ययोगव्यवच्छेदार्थः। अन्या कथा नायकेन इतरेण वा अन्येन केनापि पुरुषेण च वाच्या। अत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाशब्दः समुच्चयार्थो न विकल्पार्थः तथा च कथायां कश्चिदंशो नायकेन स्वमुखेन वाच्यः कश्चिच्चान्येनेति गम्यते। विकल्पार्थकवाशब्दस्वीकारे तु आख्यायिकायामपि कथालक्षणमतिव्याप्तं स्यात्। एतत् कथाया उभयवाच्यत्वम् नायकेन तु नोच्यत इत्यादिभामहमतविरुद्धम्। स च स्वयमेव नायकेन निजवृत्तशंसनं आत्मविकत्थनादोषः स्यादिति 'स्वगुणाविष्कृतिं कुर्यादभिजातः कथं जनः' इत्यादिप्रबन्धेन निर्दिशति। तद्दोषमगणयन्नाह **स्वगुणेति।** भूतार्थशंसिनो यथार्थवादिनो नायकस्य स्वगुणाविष्क्रिया निजगुणप्रथनं दोषो न। न दोषाय भवतीत्यर्थः। अयं भावः। असति प्रसङ्गेतिशयोक्तिपूर्वकं स्वगुणख्यापनं दोषाय न तु सति प्रसङ्गे वास्तवगुणवर्णनम्।।२४।।

विवृति

श्लोकद्वयेन गद्यलक्षणमाह–**अपाद इति।** पादरहितः पदसन्दर्भो गद्यम्। भामहेन गद्यस्य द्वौ भेदौ दर्शितौ, तौ उपन्यस्यति। आख्यायिका कथा इति तस्य प्रभेदौ द्वौ; तयोः आख्यायिका किल नायकेनैव वाच्या। काव्ये खलु नायकस्य स्वगुणवर्णनं दोषाय इत्याशंक्य आह–**स्वगुणेति।** आख्यायिकायां च नायकस्य स्वगुणाविष्क्रियादोषो न भवति। अन्यूनानतिरिक्तस्वचरितकथनेन विकत्थनराहित्यात् नेयमत्र दोषः।।२३-२४।।

पद्यमुपन्यस्य गद्यप्रकारमाह–**अपाद इति।** अपादः पादरहितः पदानां सन्तानः श्रेणी गद्यत्वेन अभिमतः। सा गद्यसन्ततिः आख्यायिका कथा इति द्विप्रकारा। तयोः आख्यायिकाकथयोः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आख्यायिका किल इति आचार्याणा मतभेदं दर्शयितुमाह। किलेति। अपरमार्थे, स्वपक्षे भेदो नास्ति इति। पूर्वाचार्यमतमाह–**नायकेनेति।** आख्यायिका नायकेन, कथानायकेन वा अन्येन वा, वाच्या। आख्यायते अनेन इति आख्यायिका। अत्र आख्यायिकाकथयोः आत्मप्रशंसादोषो न स्यात्। भूतार्थशंसिनः–भूतं अतिक्रान्तं अर्थं शंसितुं शीलं यस्य तस्य; भूतार्थशंसित्वात् दोषो नास्ति।।२३–२४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपि त्वनियमो दृष्टस्तत्राप्यन्यैरुदीरणात्।
अन्यो वक्ता स्वयं वेति कीदृग् वा भेदकारणम्॥२५॥

रत्नश्री

किं त्विदमत्र ब्रूमः। यः परेण नियमः कृतः आख्यायिका नायकेनैव वाच्येति, स नास्ति। यतस्तत्राख्यायिकायामपि न केवलं कथायाम्, अनियमः नायकेनैव वाच्येत्यस्य नियमस्याभावो दृष्टः उपलब्धः कृतः। अन्यैरुदीरणात् नायकादन्यैरपि तदनुचरादिभिराख्यायिकाया उदीरणात् वचनात्। हर्षचरितादिकायामाख्यायिकायामन्यैरपि नायकचरितकथन-दर्शनादिति मन्यते। सर्वथा कविरिह वक्ता, तन्मुखेन नायको वा, स्वातन्त्र्यमत्र कवेः। ननु भामहेन कथायाः परोदीरणमिष्टं, यदाह–

अन्यैः स्वचरितं तस्य नायकेन तु नोदितम्।

[काव्यालङ्कारे 1.29]

इति। तत्र किमुच्यते कथा नायकेनेतरेण वा वाच्येति। अनुक्तोपालम्भोऽयम्। एतदेव सिद्धं कथायामप्यनियमदर्शनात् उक्तेन न्यायेनोभयथाप्यदोषात्। भवतु वायं नियमः आख्यायिका नायकेनोच्यते कथा त्वन्येनेति। तथापि नैतावता आख्यायिकाकथयोर्भिन्नजातीयत्वमिति परमतमभ्युपगम्यापि तयोरभेदमन्यतः कथयन्नाह–अन्यो वक्तेत्यादि। कथायामन्यो वक्ता, आख्यायिकायां स्वयमिति कीदृक् किं नामेदं तयोर्भेदस्य वि[11b]जातीयत्वस्य कारणं निमित्तम्। नैवेदं जातिभेदस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारणमित्यर्थः। अन्यथैवंविधस्य भेदस्य सर्वत्र सुलभत्वात् तावता विजातीयत्वेऽतिप्रसङ्गः स्यादिति भावः। वाच्यं हि द्वयमप्येतत्। तत् केनाप्युच्यतां स्वयं परेण [वा] यथायोगम्। किमेतावता ज़ातेर्भेदः स्यात्। अर्थतस्त्वेकैव जातिरियं नाममात्रात्तु भिद्यते। यद्वक्ष्यति-एका जातिः संज्ञाद्वयाङ्किता [1.28] । एवं तर्हीदमनयोर्भेदकारणम्, यत्र वक्त्रापरवक्त्रयोः पद्ययोर्भविष्यदर्थसूचकयोः प्रवेशः साश्वासा च या सा आख्यायिका। तद्विपरीता कथेति। तदुक्तम्-

वक्त्रं चापरवक्त्रं च कालभाव्यर्थशंसि च।

[काव्यालङ्कारे 1.26]

इति। तथा-

साश्वासाख्यायिका मता।

[काव्यालङ्कारे 1.25]

न वक्त्रापरवक्त्राभ्यां युक्ता नाश्वासवत्यपि।
संस्कृतासंस्कृता चेष्टा कथाऽपभ्रंशता तथा।। इति।।

[काव्यालङ्कारे 1.28]

तदेवं तदुद्भाव्य परिहरन्नाह-

हृदयङ्गमा

पूर्वोक्तं प्राचीनमतं दूषयन्नाह, अपीति।-अपि तु किन्तु, तत्रापि आख्यायिकायामपि, अन्यैः नायकभिन्नैः, उदीरणात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथनात्, नायकादन्येषामपि वक्तृत्वादिति यावत्, अनियमः नायकमात्रवक्तृत्वरूपस्य विरोधः, दृष्टः ; ततश्चाव्याप्तिदोष एव स्यात्, एतादृशभेदस्तु नैव करणीयः इत्यभिप्रायः। कथायाञ्च अन्यः नायकभिन्नः, स्वयं नायको वा, वक्ता इति भेदलक्षणम् आख्यायिकाया भेदकरणं, वा कीदृक्? नैव सङ्गच्छते इत्यर्थः, आख्यायिकायां नायको वक्ता, कथायामपि यदि नायको वक्ता स्यात् तदा स्वरूपगतवैलक्षण्याभावात् भेदकरणमकिञ्चित्करमिति भावः॥२५॥

प्रभा

अत्रार्थे किलशब्दोद्भावितां स्वासंमतिं दर्शयति–**अपि त्वनियम इति।** अपि तु किंतु तत्र आख्यायिकात्वेन प्रसिद्धेषु प्रबन्धेष्वन्यैरुदीरणं नायकभिन्नैरपि वृत्तकथनं क्वचिद्दृश्यते। तस्मान्नायकेनैव वाच्येति नियमस्य व्यभिचरितत्वान्नेदं लक्षणं युक्तमिति भावः। ननु नायकभिन्नेनोदीरणात् तत्र कथात्वमेवास्तु मा भूदाख्यायिकात्वमिति चेत्। अन्यो वक्ता स्वयं वेति एतावदेव भेदकारणम् कथाख्यायिकाभेदकारणम् कीदृक्। सर्वथाकिंचित्करं तत्। स्वरूपगतवैलक्षण्येनैव काव्यस्य भेदो युक्तो न तु वक्तृगतभेदेन। एवंविधाचमत्कृतभेदघटितकाव्यभेदस्वीकारे काव्यप्रभेदानामानन्त्यापत्तेः। तस्माद्वक्तृभेदेन भेदकरणं प्राचां न युक्तमिति भावः॥२५॥

विवृति

अनियमो दृष्टः। आख्यायिका स्वयं नायकेनैव वाच्या नान्येनेत्ययं नियमो न दृष्टः ; यतस्तत्राप्यन्यः। न केवलं कथायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा, आख्यायिकायामपि अन्यैरुदीरणात् नायकादपरैरभिधानात्। अपरं च–अन्यो वक्ता स्वंय वेति कीदृक् भेदकारणम्? कोऽयं कथाऽऽख्यायिकयोर्भेदहेतुः।।२५।।

अपि तु दोषान्तरमस्तीति आह–**अपि त्विति।** नायकेनैव वाच्यतानियमो न दृष्टः। तत्रापि आख्यायिकायामपि, अन्यैः नायकात् अन्यैः, हर्षचरितादौ भट्टबाणादिभिरपि, उदीरणस्य दृष्टत्वात्। दूषणान्तरमाह–**अन्य** इति। वक्तृभेदमात्रस्य प्रबन्धजातिभेदे अहेतुत्वात् नास्त्येव भेदकारणम्।।२५।।

तेषां मतं दूषयति–**अपि त्विति।** तु-शब्दः पक्षान्तरं व्यावर्तयति; अपि शब्दो यद्यर्थे। तत्र कथापक्षेऽपि अन्यैः उदीरणात् नायकेन उदीरणाद्वा अनियमो दृष्टश्चेत्, अन्यो वक्ता स्वयं वेति उभयोः काव्यभेदे कारणत्वं कीदृशम्? नास्तीति अर्थः। उभयोः भेदकारणत्वं संज्ञोपपादकं इति यावत्।।२५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्त्रं चापरवक्त्रं च साश्वासत्वं च भेदकम्।
चिह्नमाख्यायिकायाश्चेत् प्रसङ्गेन कथास्वपि॥२६॥

हृदयङ्गमा

अपरञ्च भेदकरणं दूषयति, वक्त्रमित्यादि द्वाभ्याम्।—वक्त्रम् अपरवक्त्रञ्च छन्दसी, (तदुक्तं,—"वक्त्रं नाद्यान्नासौ स्यातामब्धेर्योऽनुष्टुभि ख्यातम्" इति, "अयुजि ननरला गुरुः समे तदपरवक्त्रमिदं नजौ जरौ" इति, "वैतालीयं पुष्पिताग्राच्चेच्छन्त्यपरवक्त्रकम्" इति च)। उच्छ्वासः कथांऽशव्यवच्छेदस्य संज्ञा आश्वासापरपर्य्यायः, (तदुक्तं,—"कथाऽंशानां व्यवच्छेद आश्वास इति कथ्यते"), तेन सहितत्वञ्च भेदकं, कथाया इति शेषः॥२६॥

प्रभा

इत्थं वक्तृवैलक्षण्येन काव्यभेदकरणं निरस्येदानीमपरमपि कथाख्यायिकयोर्भेदकद्वयं निराकरोति-**वक्त्रं चेति।** वक्त्रलक्षणं वृत्तरत्नाकरे [२.२१] यथा—वक्त्रं नाद्यान्नासौ स्यातामब्धेर्योनुष्टुभि ख्यातम्। इति तदुदाहरणं च—

नवधाराम्बुसंसिक्तं वसुधागन्धिनिःश्वासम्।
किञ्चिदुन्नतघोणाग्रं मही कामयते वक्त्रम्॥ इति।

अपरवक्त्रलक्षणं वृत्तरत्नाकरे [२.९] यथा—अयुजि ननरला गुरुः समेन्जमपरवक्त्रमिदं ततो जरौ। तदुदाहरणं तु—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्फुटसुमधुरवेणुगीतिभिस्तमपरवक्त्रमवेत्य माधवम्।
मृगयुवतिगणैः समं स्थिता व्रजवनिता धृतचित्तविभ्रमाः॥

इति।

एवं वक्त्रापरवक्त्रे वृत्तविशेषौ। तथा सोच्छ्वासत्वम् उच्छ्वासः प्रबन्धांशव्यवच्छेदस्येयं संज्ञा तत्सहितत्वं च। भेदकं चिह्नम्। आख्यायिकायाः कथातो भेदसाधकम्। वक्त्रापरवक्त्रे आख्यायिकास्वेव न कथासु युज्येते तथावासादिपरिगणनमाख्यायिकापरिच्छेदानामेव न पुनः कथापरिच्छेदानां क्रियत इति चेत् तन्न विचारक्षमम्। तत्र तावद्वक्त्रापरवक्त्रकृतं भेदं दूषयति प्रसङ्गेनेत्यादिना श्लोकतुरीयांशेन उत्तरश्लोकस्य पूर्वार्धान्वयिना॥२६॥

विवृति

पुनरपि कथाख्यायिकयोः परोपगतं भेदमाशंक्यापाकरोति–

वक्त्रम् अपरवक्त्रमिति द्वौ वृत्तभेदौ। तदुभयं यस्यामस्ति तथा योच्छ्वासाङ्किता सा आख्यायिका। तदुक्तम्–'वक्त्रं चापरवक्त्रं च काले भाव्यर्थशंसि च'

इति। अत्रोच्यते–

न केवलमाख्यायिकासु कथास्वपि आर्यादिवत् आर्यादिरिव वक्त्रापरवक्त्रयोः प्रवेशः किं न स्यात्। तथा कथायां दृष्टो लम्भादिर्भेदो मन्दारवतीलम्भो रतिलम्भ इति सोऽपि न भेदक इत्याह–उच्छ्वासो वाऽस्तु। कथायामपि न केवलं लम्भः, तथा उच्छ्वासो वा भवतु। किं ततः? ततो नाममात्रेण न भेदो भवेदित्यर्थः॥२६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आर्यादिवत् प्रवेशः किं न वक्त्रापरवक्त्रयोः।
भेदश्च दृष्टो लम्भादिराश्वासो वास्तु किं ततः॥२७॥

रत्नश्री

वक्त्रं चापरवक्त्रं च पद्यद्वयं सहाश्वासेन वर्त्तते तद्भावः तत्त्वम्। तच्चैतत् त्रयम् आख्यायिकायाश्चिह्नं लक्षणं भेदकं कथायाः सकाशाद्विशेषकं चाप्यस्यास्य कथायामभावादितिचेन्मन्यसे, ननु यतः [प्रसङ्गेन] तत्र गद्याधिकारात् प्रस्तावेन भाव्यर्थसूचनादिलक्षणेन हेतुभूतेन नाधिकारितया वक्त्रापरवक्त्रयोः कथास्वपि आख्यायिकावत् किं कस्मान्न प्रवेशः न प्रयोगः स्यादेवेत्यर्थः। किंवत्? आर्यादिवत्। आर्यादेरिव यथाप्रस्तावमन्यस्यापि पद्यस्य न स्तवादेः प्रवेशादिग्रहणम्, त्रयाणामपि पद्यत्वेनाविशेषादयमपि नियमो नास्तीत्यर्थः। तथाहि यदि तादृशः प्रस्तावः स्यात्, तदा कथास्वपि अनयोः प्रभेदो न दुष्यति, यथा आ[12a]र्यादेः। आख्यायिकायामपि हि प्रसङ्गेन तयोः प्रवेशः नाधिकारितया, [तत्र] गद्याधिकारात् तथा कथायामपि इति नेदं भेदकमसाधारणं चि[न्तनीयम्। लम्भ]स्तर्हि भेदकं चिह्नमस्तु कथायां तस्याभावात्। अत्राह-भेदश्चेत्यादि। लम्भादिर्भेदो विशेषः। आदिग्रहणात् यव[?]विश्रामादिव्यवहारः आख्यायिकाविषयः [कथायाम]पि दृष्टः। ततश्चाश्वासोऽपि यदि भवेत् को नामात्र दोषः। लम्भादिर्वा भेदो भवतु, आश्वासो वा व्यवहारः, किं ततः तस्माद् व्यवहारमात्रात्, किंजातीयत्वमनयोर्भवेत्। नैवार्थभेदः, अभेदादित्यर्थः। परिच्छेदा हि तत्र सम्पन्नाः कर्तव्या इतीदमत्र तात्पर्यम्, विपन्नानां हेयत्वात्। ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च लम्भादिव्यपदेश्या वा भवन्तु, आश्वासव्यवहार्या वेति स्वातन्त्र्यमत्र कवेः, विशेषाभावात्।

ननु भामहकृतो निषेधोऽस्ति।

न वक्त्रापरवक्त्राभ्यां युक्तो नाश्वासवत्यपि।

[काव्यालङ्कारे 1.28]

कथेति।

ननु दण्डिकृतो विधिरस्ति, लम्भादिर्वाश्वासो वा भवत्विति। तदप्रमाणमिति चेत्। भामहकृतो निषेधः प्रमाणमिति कोशपानमत्र करणीयं स्यात्। द्वयोरपि शास्त्रकारत्वात् प्रामाण्यम्, न वा कस्यापि। मतभेदस्तत्र भवत्विति चेत्? अस्तु तत्किमस्थानाभिनिवेशः क्रियते। युक्तिपुरस्कृतं तु दण्डिमतं दृश्यत इति।।

हृदयङ्गमा

एतत् त्रयम् आख्यायिकायाः चिह्नं लक्षणं, चेत् कथासु अपि प्रसङ्गेन प्रस्तावक्रमेण, आर्य्यादिवत् वक्त्रापरवक्त्रयोः छन्दसोः, प्रवेशः, किं न? भवेत् इति शेषः ; अपि तु भवेदेव। (उक्तञ्च कथालक्षणे,–"आर्य्यावक्त्रापवक्त्राणां छन्दसा येन केनचित्")। तस्मादुक्तभेदकरणं भ्रमविजृम्भितमेवेति भावः। वक्त्रापरवक्त्रकृतभेददोषं प्रदर्श्य उच्छ्वासकृतभेदं दूषयति, भेद इति :–लम्भः कथापरिच्छेदस्य संज्ञाभेदः, आदिपदेन उल्लासादीनां ग्रहणं, 'वा'-शब्दोऽत्र चार्थे, लम्भादिः उच्छ्वासश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथाऽऽख्यायिकयोः भेदः भिन्नः, पृथक-पृथक्-संज्ञकः परिच्छेदः इति यावत्, कुत्रचित् कथायां लम्भपदेन परिच्छेदः कृतः, आख्यायिकायामुच्छ्वासपदेन उल्लासपदेन वा कृतः इत्यर्थः, दृष्टः, अस्तु, ततः किम्? संज्ञामात्रभेदो न किञ्चित्कर इत्यर्थः, स्वरूपवैलक्षण्यस्यैव भेदकत्वेन कीर्त्तनात्, यथा घटपटयोः स्वरूपभेदात् घटः पटादितर इति भेदप्रतीतिः न तथा घटकलसयोः संज्ञामात्रभिन्नयोः घटाभेदतयेति भावः।।२७।।

प्रभा

आर्यादिवदिति। कथास्वपि प्रसङ्गेन आर्यादिवत् वक्त्रापरवक्त्रयोः प्रवेशः किं न स्यात्। अयं भावः। स्मृतस्यानुपेक्षणं प्रसङ्गः। तेन कदाचिदार्यानिबन्धने प्रसक्तः कविर्वक्त्रापरवक्त्रस्मरणेन तन्निबन्धनं कुर्याच्चेत् तत् किं कथा दोषास्पदं भवेत् तै च कथायाः कथात्वं कथं विघटेत। वक्त्रापरवक्त्रशून्यैव भवतीत्येतद्विषये नार्षं प्रमाणं क्वापि विद्यते न च तथा कविपरिपाटिरपि दृश्यते। अत एव साहित्यदर्पणे प्रोक्तम् [६.३३५] आर्यावक्त्रापरवक्त्राणां छन्दसा येन केनचित्। इति। इदानीं सोच्छ्वासत्वस्य भेदकत्वं दूषयति-**भेदश्चेति।** लम्भः कथापरिच्छेदस्येयं संज्ञा। आदिपदेन लम्बकोल्लासतरङ्गादीनां ग्रहणम्। वाशब्दः समुच्चयार्थे। लम्भादिः उच्छ्वासश्च कथाख्यायिकयोर्भेदो व्यावर्तको विशेषो दृष्ट इति चेदस्तु किं ततः। परिच्छेदसंज्ञामात्रभेदो न काव्यभेदसाधको भवति। अयं भावः। कथायां परिच्छेदस्य लम्भ इति सञ्ज्ञां विहिता आख्यायिकायामुच्छ्वास इति निश्चितेति चेत् भवतु नाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिच्छेदानां लम्भोच्छ्वासादिसंज्ञाभेदः। नहि तावता पदार्थभेदो भवति। नहि घटकलशेति संज्ञाद्वयेन पदार्थभेदो भवति। स्वरूपवैलक्षण्येनैव पदार्थभेदो घटते यथा घटपटयोः। एवं कथाख्यायिकयोरवयवीभूतानां परिच्छेदानां नहि संज्ञामात्रभेदेन स्वरूपभेदः प्रतीयते। तेन च अवयविनोः कथाख्यायिकयोरपि न तावता स्वरूपभेदः वक्तुं पार्यते। केचित्तु श्लोकस्य उत्तरार्धमेवं विवृण्वन्ति—कथायां लम्भादिर्लम्भादिसंज्ञको भेदः कथांशविभागो दृष्टः। स विभाग उच्छ्वाससंज्ञको वा विकल्पेन कथायामस्तु भवतु नाम। किं ततस्तेन का क्षतिः। नहि तावता कथाख्यायिकयोर्भेदो भवितुमर्हति। पदार्थस्याभिन्नत्वादिति। अस्यापि विवरणस्य तात्पर्यं पूर्वोक्तमेव।।२७।।

विवृति

ननु स्वरूपेऽपि भेदोऽस्ति, स्थाने स्थाने भाव्यर्थवाचिनोः वक्त्रापरवक्त्रयोः सत्त्वात्, उच्छ्वासशब्दनिर्देशेन मध्ये मध्ये पर्यवसानाच्च, इत्याह—वक्त्रमिति चेदन्तेन। दूषयति—**प्रसङ्गेनेति।** यथा 'स्तनयुगमश्रुस्नातम्' 'दूरं मुक्तालतया' इत्यार्या, 'पश्योदञ्चदवाञ्चत्' इति शार्दूलविक्रीडितं च दृश्यते; तथा वक्त्रापरवक्त्रयोः प्रवेशोऽप्यस्तु। कथायां तु क्वचित् लम्भ इति क्वचिदाश्वास इति च प्रयुज्जते? तद्वत् उच्छ्वासोऽपि भवत्वस्याम्। एतानि न भेदहेतवः।।२६, २७।।

परस्यैव अभिप्रायप्रदानमुखेन तमेवार्थं दूषयति—**वक्त्रमिति।** सर्वास्वाख्यायिकासु वक्त्रापरवक्त्रे नाम द्वे वृत्ते प्रयुक्ते दृष्टे। आश्वाससमये आश्वास इति कविना प्रयुक्तं च दृष्टम्। एतदेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आख्यायिकाकथयोः आख्यायिकायाः चिह्नमिति वदसि चेत्, नैवेत्याह–कथास्विति। कथास्वपि परिच्छेदस्थाने आश्वास इति कविभिः प्रयुक्तो दृष्टः ; वक्त्रापरवक्त्रे च प्रसङ्गेन भवतः ; तस्मात् एतानि आख्यायिकालक्षणानि न भवन्ति इत्यर्थः। उक्तमेव अर्थं निदर्शनेन साधयति–**आर्यादिवदिति**। कथासु आर्यादीनां प्रयोगो यथा दृश्यते तथा वक्त्रापरवक्त्रयोः प्रयोगे का हानिः स्यात्। एवं दूषिते परवादी आह–**भेदश्च** इत्यादि। लम्भः, पटलः इत्यादि कथायां प्रयुक्तं दृष्टम्; आश्वासः, परिच्छेदः इति च आख्यायिकायां प्रयुक्तो दृष्टः ; तस्मात् भेदोऽस्ति इति। परवादिकथां दूषयन्नाह–**आश्वासो वाऽस्तु किं ततः** इति। तेन किं आयातं इत्यर्थः। परिच्छेदसमये आश्वासः, पटलः, लम्भः काण्डः इति वा प्रयुक्ते कोऽपि अर्थभेदो न दृश्यत इति यावत्।।२६, २७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

**तत्कथाख्यायिकेत्येका जातिः संज्ञाद्वयाङ्किता।
अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः॥२८॥**

रत्नश्री

यत एवं निरूप्यमाणो नानयोः कश्चिज्जातिभेदो लभ्यते अन्यत्र संज्ञाभेदात्, ततस्तावदेका जातिरियं गद्यजातिः। आख्यायिकेयं कथेयमिति अनेन संज्ञाद्वयेन द्वाभ्यां नामभ्याम[12b]ङ्किता लक्षिता व्यवहरणीया। न च नामभेदमात्रकेन जातिभेद एव सर्वथा स्यात्। ब्राह्मणक्षत्रियादिभेदेऽपि मनुष्यत्वात्तेषाम्। क्रियाभेदोऽत्र संज्ञाभेदनिमित्तमिति चेत्–किं वै सर्वा नैमित्तिकी संज्ञा, यादृच्छिक्यपि हि सा दृश्यते, मण्डपादिवत्। निमित्तं वा किंचिन्मृग्यतां यदि तेन विना दौःस्थ्यम्। नन्वपरेऽपि गद्यप्रभेदा दृश्यन्ते, किं ते नोक्ता इति चेदाह– अत्रैवेत्यादि। शेषाः आख्यानपर्याया ये सम्भवन्ति आख्यानजातयः, आख्यानकप्रभेदाः ता अत्रैवानयोरेव कथाख्यायिकयोरन्तर्भविष्यन्ति गद्यजातित्वेनाभेदात् लक्षणतः। चकारः [अन्]उक्तसमुच्चये। तस्मात् पृथक् तासां लक्षणं नोक्तम्। तल्लक्षणेनैव कृतलक्षणत्वादित्यर्थ इति॥

अयं तर्हि विशेष आख्यायिकायाः। सा हि–
कन्याहरणसंग्रामविप्रलम्भोदयान्विता।

[काव्यालङ्कारे 1.27]

आख्यायिका न कथेति भामहः। तत्राह–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

इदानीं स्वमतमाविष्करोति, तदिति।—तत् तस्मात्, कथा आख्यायिका च इति संज्ञाद्वयेन नामभ्याम्, अङ्किता, न तु स्वरूपत इति भावः ; एका अभिन्ना, जातिः, उभयोरपि गद्यमयत्वात् इति भावः। अन्यैरुक्तेषु पञ्चसु गद्यकाव्यभेदेषु प्रधानभेदयोः कथाऽऽख्यायिकयोरभेदं प्रागुक्तरीत्या समर्थ्य इतरेषामपि भेदकधर्ममसङ्गतं विविच्य तान् साधारणतया अन्तर्भावयति, अत्रैवेति।—अत्रैव कथाऽऽख्यायिकयोः इत्यर्थः, शेषाः अवशिष्टाः, आख्यानजातयः आख्यानत्वरूपधर्मविशिष्टाः खण्डकथादयः, अन्तर्भविष्यन्ति, ता हि एतयोरेव प्रकारभेदा इति भावः। (अन्तर्भविष्यन्ति इति भविष्यत्प्रयोगेणैतत् सूचितं, ग्रन्थकृता गद्यकाव्यस्य भेदा एव नाङ्गीकृताः, वस्तुतस्तु तन्मतमिदानीमपि सर्वत्र न खलु प्रमाणतया प्रचलति, प्रामाणिकतमैरन्यैरपि तत्तद्भेदानां निर्द्धारणात् इति। तदुक्तम् आग्नेये,—"आख्यायिका कथा खण्ड-कथा परिकथा तथा। कथालिकेति मन्यन्ते गद्यकाव्यञ्च पञ्चधा।।" इति)।।२८।।

प्रभा

एवं प्राचीनकृतं कथाख्यायिकालक्षणं दूषयित्वा स्वमतं निवेदयति—**तदिति।** तत् तस्मात् स्वरूपवैलक्षण्याभावात् कथा आख्यायिका इति च एका जातिर्गद्यरूपैकधर्मत्वेन एक एव प्रकारः। सा च कथा च आख्यायिका चेति नामद्वयेन घटकलशौ इतिवदङ्किता चिह्निता वर्तते इति भावः। एवं कथाख्यायिकयोः प्रधानं भेदं निरस्य अन्यैरुक्तानन्यानपि भेदान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भेदप्रयोजकधर्ममपश्यन् दूषयति अत्रैवेति। अत्रैव कथाख्यायिकयोरन्यतमायामेव शेषा उक्तादन्या आख्यानजातयः पुंप्रधानवर्णनमाख्यानं तज्जातयः प्रकारा अग्निपुराणादिषु (३३७. १२) वर्णिताः खण्डकथादयोन्तर्भविष्यन्ति अत्रैव तेषां समावेशः स्यादिति न ते पृथङ्निर्देशमर्हन्ति।।२८।।

विवृति

यतोऽयमनन्तरोक्तो न लक्षणभेदः, ततः कथख्यायिकेत्येका जातिः संज्ञाद्वयाङ्किता। अत्रैवास्यामेवैकस्यां जातौ अन्तर्भविष्यन्ति। शेषास्त्वाख्यानजातयः कुसुममञ्जरीप्रभृतयः।।२८।।

भेदनिराकरणं उपसंहरति–तदिति। बहुनायकचरितरूपाः दशकुमारचरितवत् आख्यानशब्दवाच्याः प्रबन्धाः ; तेषामपि कथायामन्तर्भावः।।२८।।

इत्युभयोः भेदाभावं प्रसाध्य, तमेवार्थं निगम(न?)रूपेण उपसंहरति–**तदिति।** यस्मात् उक्तप्रकारेण भेदप्रतिपत्तौ प्रमाणं नास्ति, तस्मात् कथा आख्यायिका इत्येका जातिः–एकजातिरित्यर्थः। संज्ञाभेद एव अस्तीति यावत्। आख्यानजातयः शकुन्तलोपाख्यानादयः अत्रैव कथायामेव अन्तर्भविष्यन्ति।।२८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कन्याहरणसंग्रामविप्रलम्भोदयादयः।
सर्गबन्धसमा एव न ते वैशेषिका गुणाः॥२९॥

रत्नश्री

कन्याया हरणं संग्रामस्तन्निमित्तोऽन्यो वा, विप्रलम्भो वियोगः, उदयोऽभ्युदयः रिपुविजयादिलक्षणः। आदिशब्देन मत्ततासुरतोत्सवादिपरिग्रहः। ननु भामहेन तावदुक्तम्–

कन्याहरणसंग्रामविप्रलम्भोदयान्विता। इति।

[काव्यालङ्कारे 1.27]

तत्किमपि सूच्यते। एवं मन्यते। सोऽपि नियमो न[ापो]ह्यते, अधिकदर्शनात्। उपलक्षणं वा तद्वचनं, तेऽपि गुणाः [अ]थ न वैशेषिकाः, कथायाः सकाशादाख्यायिकां न भेदयन्तीत्यर्थः। विशेषा [भे]दाः [यैः] कथ्यन्ते आख्यायिकायाः, प्रयोजनमेषामिति वैशेषिकास्तथा न भवन्तीत्यर्थः। किं कारणम्। यतः सर्गबन्धेऽपि समानाः। सा[धारणाः, तेषां त]त्रापि दर्शनात्। तद् यदि [कथा] (13a)यामपि यथाप्रस्तावं भवन्ति को निषेद्धा। भामह इति चेत्। उक्तमत्र, किं चर्वितचर्वणेन। दृश्यन्ते च कथायां लीलावतीत्यादिकायामपि तेऽर्थास्तत्कथं भिन्त्स्यते आख्यायिका कथात इति॥

यत्र तर्हि कवेरभिप्रायेण कथनमङ्कनं किञ्चिद् दृश्यते सा आख्यायिका तदन्या कथेति भामहः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कवेरभिप्रायकृतैरङ्कैः कैश्चिदङ्किता इति।

[काव्यालङ्कारे 1.27]

तदेतदुभयं परिहरन्नाह–

हृदयङ्गमा

कथाऽऽख्यायिकयोर्भेदान्तरमपि दूषयति, कन्येति।–कन्याया अजातविवाहसंस्कारायाः, पात्रप्रतिपादनाय कृतसङ्कल्पायाः इत्यर्थः, हरणं युद्धादिना बलात् ग्रहणं, राक्षसोद्वाह इत्यर्थः, (तदुक्तं,–"हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात्। प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते।।" इति); सङ्ग्रामो युद्धं, विप्रलम्भः सम्भोगश्रृङ्गारभेदः, स च पूर्वरागमानप्रवासकरुणात्मकश्चतुर्विध इति दर्पणकारः। उदयः सूर्य्यचन्द्रयोः, अभ्युन्नतिर्वा नायकस्य, आदिना उद्याननगरादयो गृह्यन्ते; एते गुणाः, आख्यायिकाया इति शेषः, आख्यायिकायां कन्याहरणादिवर्णनरूपधर्मा एव कथाया भेदका इत्यन्येषां मतमिति निष्कर्षः। (यथा आख्यायिकामुपक्रम्य भामहेनोक्तं,–"कन्याहरणसङ्ग्रामविप्रलम्भोदयान्विता" इत्यादि); सर्गबन्धसमाः महाकाव्यसामान्या एव, कथायां किमु वक्तव्यमिति भावः, अतः एते वैशेषिकाः गुणाः भेदका धर्मा न, महाकाव्यलक्षणे एतेषां वर्णनविधानेन कथं नैते गद्यकाव्यव्यवच्छेदकधर्माः, आख्यायिकायामेषां नियतत्वं न तु कथायां, महाकाव्ये त्वानुषङ्गिकत्वमिति च न वाच्यम्, असाधारणानामेव भेदकत्वाङ्गीकारात् सामान्यधर्माणान्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथात्वानौचित्यात्; (उक्तञ्च,–"अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः" इति)।।२९।।

प्रभा

कन्याहरणसंग्रामविप्रलम्भोदयान्विता। (भा० १-२७) एवं प्राचीनैः कन्याहरणादीनि आख्यायिकायां वर्णनीयत्वेन निर्दिष्टानि न तु कथायामिति वर्णनीयभेदेनाख्ययिकायाः कथातो भेद इति चेत् तदपि न समञ्जसमिति दर्शयति–कन्याहरणेति। कन्याया अजातविवाहसंस्कारायाः पुरुशविशेषे प्रतिपादनाय कृतिनिश्चयाया हरणं युद्धादिना हठाद्ग्रहणं राक्षसविवाह इत्यर्थः। तदुक्तं भगवता मनुना

हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं हठात्।
प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते।।(३.३३) इति।

संग्रामः समरकर्म। स त्रिधा समः विषमः समविषम इति। तत्र समः द्वन्द्वयुद्धे चतुरङ्गयुद्धे च। द्वन्द्वयुद्धं यथा रामरावणयोः। चतुरङ्गयुद्धं कुरुपाण्डवानाम्। विषमो यथा रामस्य खरदूषणत्रिशिरोभिः सह। समविषमो यथा महेश्वरार्जुनयोः किरातार्जुनीये। रघुमघोनोर्वा रघुवंशे। विप्रलम्भः–

पूर्वानुरागमानात्मप्रवासकरुणात्मकः।
विप्रलम्भश्चतुर्धा स्यात् पूर्वपूर्वो ह्ययं गुरुः।। (५.१७) इति

वाग्भटाकलंकारोक्तश्चतुर्विधः। अयं च संभोगस्यप्युपलक्षकः। तदनन्तरं संभोगवर्णनस्यावश्यकत्वात्। उदयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शशिदिवाकरयोरुदयः। अथवा नायकस्योत्कर्षः। आदिना पुरपर्वतकाननादिवर्णनं ग्राह्यम्। एते गुणाः सर्गबन्धसमा एव महाकाव्यसदृशा एव। अयं भावः। एते गुणा पद्यप्रबन्धविशेषमहाकाव्यसमानाः किमुत तर्हि गद्यप्रबन्धान्तर्गतकथासमाना इति। अत एते गुणाः कथात आख्यायिकाया अवच्छेदका न भवन्तीत्यर्थः॥२९॥

विवृति

यदप्युक्तमाख्यायिकालक्षणम्–

'कवेरभिप्रायकृतैरङ्कनैः कैश्चिदङ्किता।
कन्याहरणसंग्रामविप्रलम्भोदयान्विता॥'

इति, तदपि न युक्तमित्याह–

कन्याहरणादयोऽपि न विशेषकारिणः, किं तु सर्गबन्धसमाः। सर्गबन्धो महाकाव्यम्। तस्मिन्नपि सन्त्येव कन्याहरणादयः। ततो न कन्याहरणादिभिर्गुणैरुपेता आख्यायिका भवेत्, कन्याहरणादीनां साधारणत्वात्। असाधारणश्चान्यतो व्यतिरिक्तो धर्मो लक्षणम्॥२९॥

भामहेन 'कन्याहरणसंग्रामविप्रलम्भोदयान्विता' इति आख्यायिकाविशेषणतया उक्तम्। आख्यायिकाभेद एव अत्र निराकृतः। एतान्यङ्गानि गद्यप्रबन्धस्यैव असाधारणानि न, किं तु सर्गबन्धस्यापि साधारणानि इत्याह–**कन्येति**। नैते वैशेषिका गुणा इत्यत्र गुणशब्दः अप्रधानवाचित्वेन अङ्ग एव लक्षणया प्रयुक्तः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतानि अङ्गानि सर्गबन्धस्यापि साधारणानीति वदन्ति। नगरार्णवाद्यङ्गानि स्वभावाख्यानादयोऽलङ्काराश्च प्रवन्धमात्र-साधारणानि इति दर्शितम्।।२९।।

एवं एकजातित्वं प्रसाध्य, गद्यात्मककाव्यस्य लक्षणमाह—**कन्येति।** कन्याहरणादीनि लक्षणानि सर्गबन्धस्य उक्तानि; तानि तेषामेव वैशेषिका गुणा न भवेयुः ; गद्याकृतीनामपि समानानि इत्यर्थः।।२९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कविभावकृतं चिह्नमन्यत्रापि न दुष्यति।
मुखमिष्टार्थसंसिद्धौ किं हि न स्यात् कृतात्मनाम्॥३०॥

रत्नश्री

कवेः प्रयोक्तुर्भावेनाभिप्रायेण कृतं प्रयुक्तं चिह्नमङ्कनम् अन्यत्रापि कथायामपि सर्गबन्धेऽपि वा, न केवलमाख्यायिकायाम् न दुष्यति न दोषाय कल्पते निषेधाभावात्।

ननु निषिद्धमेव [तद्] भामहेन कथायाम्, आख्यायिकामेव कविभावकृतचिह्नविधानात्। उक्तमत्र। तेनापि च नियमो न कृतः काचिदङ्कितेति वचनात्। तस्मादिदमपि सर्गबन्धादिसाधारणं न समर्थयति कथात आख्यायिकाया भेदम्। किरातादौ च लक्ष्म्या ग्रहणादिकं कविभावकृतं चिह्नं दृश्यते, स्यादेतत् आख्यायिकायामिति। तदसत्। यस्मान्मुखमिष्टार्थसंसिद्धौ किं हि न स्यात् कृतात्मनाम्। कृतः संस्कृतः व्युत्पन्न आत्मा चित्तं येषां, कृतात्मनां सुधियाम्। इष्टस्यार्थस्य स्वनामाङ्कनादेरन्येनापदेशेन विदग्धेन क्रमेण किं नाम मुखमुपायो न स्यात्। सर्वमेव हि तेषामिष्टसिद्धिद्वारीभवति कौशलविशेषात्। तस्माद् यदीच्छन्ति कथायामन्यत्र वा सर्वत्रेदृशं कर्तुमुपायज्ञास्ते [कु]र्वन्त्येव, न चेत् न क्वचिदपीति। नेदमपि भेदकं चिह्नम्। तस्मा[13b]देतदेव स्थितम्–

तत्कथाख्यायिकेत्येका जातिः संज्ञाद्वयाङ्किता इति। [1.28]

स्यादेतत्, आख्यायिका संस्कृतेनैव दृश्यते। आख्यायिकापि भाषान्तरेण दृश्यते, असंस्कृतापेक्षयेति। किं न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथा। अथ संस्कृतापेक्षया भाषान्तरेण [न] दृश्यते आख्यायिका सर्वसंस्कृता कथाप्येवमिति माभूत् कथा। अथ मिश्रापि कथा दृश्यते नाख्यायिका। तथा अमिश्रा सर्वसंस्कृता साख्यायिका स्यात्, कादम्बर्यादिवत्। कथं तर्हि आख्यायिकेति व्यपदिश्यते इति चेत्। अत एवं संज्ञाद्वयाङ्किता ऐका जातिरित्युक्तम्। जातिभेदोऽत्र निषिध्यते, न संज्ञाभेदः। एवं केथाविशेषः आख्यायिका स्यात्, न जातिभेदः। यथा कथाविशेषाणां संज्ञाभेदा यथेष्टम्। न च भाषाभेद-मात्राद्विजातीयत्वम्। कथानामपि परस्परविजातीयत्वप्रसङ्गात् एतावन्तः स्यात्। काचित् कथा संस्कृतमयी। काचित् प्राकृतमयीं। काचित् अपभ्रंशस्वभावा। काचित् भूतभाषामयी। काचित् मिश्रेति। यथा वाचां भाषाभेदेऽपि न कथात्वं हीयते गद्यमयत्वात्, प्रसङ्गे तु पद्यप्रवेशः, तथा संस्कृतमय्या आख्यायिकायाः कथात्वं न विरुद्ध्यते। अत एवोक्तम्। एका जातिः कथाजातिरेव यथेष्टं संज्ञा अनुभवति, यथा मनुष्यजातिरेका क्षत्रियजातिसंज्ञाम्। भाषान्तरमयीनामपि कथानां गद्येनार्थोपक्षेपः लम्भादिपरिच्छेदादौ न दूष्यते निषेधाभावात्। भामहेन निषिद्धमिति चेत्। दण्डिना विहितमिति किं न प्रत्येषि। तस्मात् काचित् कथा [आश्वासादौ] गद्याक्षिप्तार्था, काचिन्न। [न]ह्येतावता आख्यायिका कथात्वं नानुभवति। कथा वाऽऽख्यायिका[14a]संज्ञामित्येकैव जातिः संज्ञाद्वयाङ्कितेति सूक्तमेव॥

तदेवं लक्षणतः [प्रचि]न्वन् कथां, आश्वासादिभेदं च गद्यं निर्दिश्य, तृतीयं मिश्रकाव्ये शरीरमधिकृत्याह–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

कवेरिच्छाप्रयुज्यं किमपि चिह्नमेव कथाऽऽख्यायिकयोर्भेदकमिति मतं निरस्यति, कवीति।–कविभावकृतं कवेः भावकृतम् अभिप्रायरचितं, चिह्नं लक्षणं, कथायां निवेशनीयम् इति भावः ; (उक्तञ्च भामहेन,–"कवेरभिप्रायकृतैरङ्कनेरङ्किता कथा" इति। यथा शिशुपालबधे सर्गशेषश्लोकेषु "श्री" शब्दः, किराते च "लक्ष्मी" शब्दः प्रयुक्तः)। अन्यत्रापि आख्यायिकायामपि प्रयुक्तं तत् न दूष्यं भवति, तथा हि इष्टार्थसंसिद्धैय अभिप्रेतार्थसाधनाय, कृतात्मानां कृतयत्नानां सुधियां, किं हि मुखं प्रारम्भः, न स्यात्? अपि तु सर्वमेव तेषाम् इच्छया प्रारम्भे निवेशनीयमित्यर्थः, "निरङ्कुशाः कवयः" इति भावः। "इष्टार्थसंसिद्धौ" इत्यत्र "संसिद्धौ" इति, "मुखम्" इत्यत्र "सुखम्" इति च पाठान्तरम्।।३०।।

प्रभा

इदानीं कवेरभिप्रायकृतैः कथनैः कैश्चिदङ्किता। (भा. १-७) इति कवेरभिप्रायकृतेन केनचिद्विशेषेण अङ्कनचिह्नेन कथा आख्यायिकातो भिन्ना स्यादिति प्राचां मतमप्यसमञ्जसमित्याह- **कविभावेति।** कविभावकृतम् कवेर्भावोभिप्रायस्तेन कृतं चिह्नम् यथा शिशुपालवधे सर्गान्तश्लोकेषु श्रीशब्दनिवेशात् तच्छ्रयङ्कम् किरातार्जुनीये तथैव लक्ष्मीशब्दनिवेशात् तल्लक्ष्म्यङ्कम्। एवमेव विष्णुजयो विष्णवङ्कः सेतुबन्धो अनुरागाङ्कः सुमध्वविजय आनन्दाङ्क इत्याद्यूहनीयम्। एतदेव अङ्कनं कथाया आख्यायिकातो भेदकारणं भवेत् इति चेन्न। तदेतच्चिह्नम् अन्यत्रापि आख्यायिकादौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतं चेन्न दुष्यति दुष्टं न भवति। तस्य कवेरभिप्रायाधीनत्वात्। कृतात्मनामू सूरिणाम्। इष्टार्थसंसिद्धौ मङ्गलाद्यभिप्रेतार्थसंपादने। मुखम् उपाय आरम्भो वा। किं न स्यात् स्वेच्छया किमपि स्यादिति भावः। सुखमितिपाठे सुखदम् अनायासकरमिति भावः। कवीनां निरङ्कुशत्वेन ते स्वेच्छया अभिलषितं संपादयेयुरिति रहस्यम्।।३०।।

विवृति

कविभावकृतं चिह्नं कवेरभिप्रायकृतं चिह्नमन्यत्रापि कथायामपि न दुष्यति न दोषाय जायते। न च कवेरभिप्रायकृतात् चिह्नादेवाख्यायिकाकथयोर्भेदः, तस्य कविभावकृतस्य चिह्नस्यान्यत्रापि कथायामपि भावात्। मुखं उपायः। इष्टार्थावगमे अभिलषितार्थसंसिद्धौ वा किं न स्यात् .किं न भवेत् कृतात्मनाम्।।३०।।

कवीति। कविबुद्धिकल्पितं अन्यदपि बन्धचिह्नं न दुष्यति; शोभावहमित्यर्थः। यथा—सर्गान्ते माघेन श्रीशब्दः, भारविणा लक्ष्मीशब्दः, प्रवरसेनेन च अंशान्ते अनुरागशब्दः, हस्तिमल्लेन च लम्भान्ते लम्भशब्दः, इत्यादि। तत्र हेतुमाह-कृतात्मनां शिक्षितबुद्धीनां इष्टार्थसंसिद्धौ किं लोकरञ्जकं मुखं उपायो न भवति।।३०।।

उक्तलक्षणादन्यदपि कविभिरलङ्कारारूपेण ऊह्यते; तदपि दोषाय न भवति इत्याह-**कवीति। भावः अभिप्रायः**।।३०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिश्राणि नाटकादीनि तेषामन्यत्र विस्तरः।
गद्यपद्यमयी कापि चम्पूरित्यभिधीयते॥३१॥

रत्नश्री

नाटकमादिर्येषाम् प्रकरणादीनां तानि नाटकादीनि काव्यानीत्यत्र मिश्राणि गद्यपद्यमयानि वेदितव्यानि इति मिश्रविधिः। ननु कथादिकमपि मिश्रं तत्रापि पद्यप्रवेशात्। प्रसङ्गेन तत्र पद्यप्रवेशः, नाधिकारितया। अतएवोक्तं प्रसङ्गेन कथास्वपीति [1.26]। नाटकादिषूभयमपि अधिकृतमिति नाटकान्येव मिश्राणि। किमेषां लक्षणं लक्षणप्रभेदो वेत्यत आह–तेषामित्यादि। तेषां नाटकादीनां मिश्राणां मिश्रप्रबन्धानामन्यत्र भरतकोहलादौ नाट्यशास्त्रे विस्तरः नान्दीप्ररोचनादिस्वरूपनिरूपणादिरूपः प्रपञ्चोऽधिकृतो नेह। ततस्ततोऽसौ द्रष्टव्यः। गद्यपद्यप्रबन्धस्त्विह विस्तरतोऽधिकृतः। स चोक्तः। किं नाटकादिकमेव मिश्रं नेत्याह–गद्यपद्येत्यादि। गद्यपद्ययोविकारः गद्यपद्यमयी मिश्रा चम्पूरित्यपेक्ष्य स्त्रोत्वम्। यदाह चम्पूरिति। चम्पूर्नाम विद्यते। कापि काचिदित्यसाकल्य[म]। अपिशब्दो न केवलं पूर्वकमिति समुञ्चिनोति। अयमपि मिश्रप्रकारोऽस्ति। यद्वच्चम्पूरिति यावत्। सा च जातकमालादमयन्त्यादि॥

तदेवं शरीरभेदकृतं त्रैविध्यं काव्यानां परिसमाप्य भाषाभेदकृतं चातुर्विध्यं दर्शयन्नाह–

हृदयङ्गमा

सम्प्रति मिश्रकाव्यमाह, मिश्राणीति।–नाटकादीनि दृश्यकाव्यानि, मिश्राणि गद्यपद्योभयमिश्रितानि, आदिपदेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकरणादीनां परिग्रहः ; (उक्तञ्च,–"नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः। ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश।।" तथा, "नाटिका त्रोटकं गोष्ठी सट्टकं नाटयरासकम्। प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा। संलापकं श्रीगदितं शिल्पकञ्च विलासिका। दुर्मल्लिका प्रकरणो हल्लीशे भाणिकेत्यपि।। अष्टादश प्राहुरुपरूपकाणि मनीषिणः।।" इति)। तेषां नाटकादीनाम्, अन्यत्र भरतादिग्रन्थे, विस्तरः बाहुल्येन प्रकाशः, तद्विजिज्ञासुभिस्तत्रैव यतितव्यं, ग्रन्थबाहुल्यभिया न ममात्र प्रयास इति भावः। न केवलं दृश्यकाव्यस्य मिश्रत्वं, श्रव्यकाव्यस्यापि कदाचित् मिश्रत्वमस्तीत्याह, गद्येति।–गद्यपद्यमयी काचित्, वाणी इति शेषः, चम्पूरिति अभिधीयते कथ्यते, आख्यायिकादौ गद्यकाव्ये पद्यानामत्यल्पतया न चम्पूत्वम्, अत्र हि गद्यपद्ययोरुभयोरेवाधिक्यमित्यनयोर्भेदः। (काचित् इत्यनेन अस्य असावत्रिकत्वं सूचितम्; तेन राजस्तुतिविषयत्वेनास्य विरुदसंज्ञा परैरुक्ताऽवगन्तव्या; तदुक्तं,–"गद्यपद्यमयो राजस्तुतिर्विरुदमुच्यते" इति)।।३१।।

प्रभा

अथेदानीं क्रमप्राप्तं मिश्रकाव्यं निरूपयति–**मिश्राणीति।** नाटकादीनि दृश्यकाव्यानि मिश्राणि मिश्रसंज्ञकानि। आदिशब्देन प्रकरणादीनां संग्रहः। तदुक्तं दशरूपके–

नाटकं सप्रकरणं भाणः प्रहसनं डिमः।
व्यायोगसमवकारौ वीथ्यङ्केहामृगा दश।।(१.८) इति*।

तेषां दृश्यकाव्यानामन्यत्र नाट्यशास्त्रादौ विस्तरः प्रपञ्चोस्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतस्तत एव तान्यवगन्तव्यानि इति भावः। श्रव्यमिश्राणि कथयति **गद्यपद्येति।** काचिद्गद्यपद्यमयी गद्यपद्यप्रचुरा मिश्ररचना चम्पूरिति अभिधीयते कथ्यते। अत्र पद्यप्राचुर्यं गद्यसमकक्षतया अपेक्ष्यते। अन्यथा आख्यायिकादावपि किंचित्पद्यसद्भावेन तस्या अपि मिश्रसंज्ञात्वं प्रसज्येत। काचिदित्युक्त्या सर्वो गद्यपद्यमयः प्रबन्धश्चम्पूर्भवितुं नार्हति तादृशप्रबन्धस्य राजस्तुतौ विरुदसंज्ञात्वात्। तदुक्तं–गद्यपद्यमयी राजस्तुतिर्बिरुदमुच्यते। इति। (साहित्यदर्पण ६-२७) अत्र मिश्राणीत्येतत् पदं संस्कृतप्राकृतभाषामिश्राणि नाटकादीनि गद्यपद्यमिश्राणि चम्प्वादीनि च मिश्रसंज्ञकानि इति केचिद्योजयन्ति। परं पद्यं गद्यं च मिश्रं च तत् त्रिधैव व्यवस्थितम् (१.११) इति उद्देशवाक्यानुरोधात् तथा प्राकृतविवेचनस्य पूर्वमकृतत्वाच्च एतद्विवेचनं न ग्रन्थकृदभिप्रायानुकूलम्। तदभिप्रायस्तु प्रथमंवर्णित एवेति सुधीभिर्विचार्यम्।।३१।।

विवृति

गद्यात्मकं काव्यशरीरमभिधाय मिश्रमभिधातुमाह–

मिश्राणि नाटकादीनि गद्यपद्यमयानि च नाटकनाटिकाप्रहसनभाणादीनि। तेषामन्यत्र भरतादिनाट्यशास्त्रे दशरूपके च निर्णयः। ततः नाटकादीनि निश्चीयन्ताम्। तथा गद्यपद्याभ्यां निर्वृत्ता चम्पूरित्यपि काचिदस्ति। सा च मिश्रकाव्यशरीरेऽन्तर्भवति, न पृथक् काव्यशरीरमिति। अनेन काव्यशरीरलक्षणं नाव्याप्तिदोषदुष्टमित्युक्तं भवति।।।३१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिश्रं दर्शयति। मिश्राणि गद्यपद्यमिश्राणि नाटकादीनि—'नाटकं सप्रकरणं भाणः प्रहसनं डिमः। व्यायोगसमवाकारौ वीथ्यङ्केहामृगा दश' इति दश रूपकाणि। तेषां अन्यत्र भरते विस्तरः। तल्लक्षणानि तत्रैव द्रष्टव्यानि इत्यर्थः। न केवलं नाटकादीन्येव मिश्रप्रबन्धाः, चम्पूसंज्ञकोऽपि कश्चिदस्तीत्याह— **गद्यपद्यमयीति**।।३१।।

एवं गद्यपद्यलक्षणं प्रसाध्य, तयोः यानि लक्षणानि उक्तानि तान्येव मिश्रकाव्यस्य लक्षणानि भवेयुः इत्यमुमेवार्थं संहृत्य मिश्रस्य स्वरूपं दर्शयितुमाह—**मिश्राणीति**। संस्कृतपैशाचाद्यैः भाषाविशेषैः गद्यपद्यैश्च ग्रथितानि यानि मिश्राणीत्युच्यन्ते तानि नाटकादीनि। तेषां नाटकव्यायोगप्रकरणभाणादीनां विस्तरः शास्त्रान्तरे भरतादिभिः प्रणीते द्रष्टव्यः। इदानीं काव्यलक्षणस्य प्रस्तुतत्वात् नेह तेषां लक्षणमुच्यते। संस्कृतस्यैवापि गद्यपद्यमयताऽस्तीति आह—**गद्यपद्येति**।।३१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदिदं वाङ्मयं भूयः संस्कृतं प्राकृतं तथा।
अपभ्रंशश्च मिश्रं चेत्याहुराप्ताश्चतुर्विधम्॥३२॥

रत्नश्री

यत् काव्यशरीरं त्रिविधमुक्तं तदिदं वाङ्मयं काव्यशरीरं भूयः पुनश्चत्वारो विधाः प्रकारा भाषामया यस्य [14b] तत् प्रत्येकं चतुर्विधमाहुरामनन्ति। आप्ता आचार्याः। कथं-पद्यं काव्यशरीरं संस्कृतं शुद्धम्, प्राकृतं शुद्धम्, अपभ्रंशः शुद्धः, मिश्रं च तैः पैशाचिकेन चाशुद्धयधिका तु पृथगुक्ता। [यथा] पश्चाद्वक्ष्यति, भूतभाषामयीमित्यादिना। एवं गद्यं मिश्रं च काव्यशरीरं योज्यम्। पूर्वं गद्यपद्याभ्यां मिश्रमुक्तमिदानीं संस्कृतप्राकृतापभ्रंशैः प्रत्येकं त्रिविधं शरीरं मिश्रमुक्तमिति मिश्रयोर्भेद इति॥

संस्कृतादीनां स्वरूपं प्रतिपादयन्नाह,

हृदयङ्गमा

"गद्यं पद्यञ्च मिश्रञ्च" इत्यनेन प्राक् काव्यस्य त्रैविध्यं दर्शयित्वा पुनः भाषादिभेदेन चतुर्विधत्वमाह, तदिति।-तत् तस्मात्, एतत् वाङ्मयं वागात्मकं काव्यशास्त्रं, संस्कृतं देवभाषया रचितं, प्राकृतं तदाख्यभाषया रचितम्, अपभ्रंशः वक्ष्यमाणापभ्रंशलक्षणोक्तभाषाविशेषनिबद्धः, तथा मिश्रञ्च नानाभाषामयमित्यर्थः, इति एवंरूपेण, आर्य्याः विद्वांसः, चतुर्विधम् आहः वर्णयन्ति। (मिश्रञ्च इत्यनेनैतत् प्रतीयते यत् भाषाणां नानात्वात् कवीनाञ्च स्वेच्छापरवशत्वात् बह्वीभिरपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाषाभिस्ते काव्यं रचयेयुरिति; ततश्च एकया द्वाभ्यां तिसृभिः ततोऽप्यधिकाभिरपि भाषाभिः कवयः काव्यं कुर्वीरन् इति। उक्तञ्च भोजेन,–"संस्कृतेनैव कोऽप्यर्थः प्राकृतेनैव चापरः। शक्यो वाचयितुं कश्चित् अपभ्रंशेन वा पुनः।। पैशाच्या शौरसेन्या च मागध्याऽन्यो निबध्यते। द्वित्राभिः कोऽपि भाषाभिः सर्वाभिरपि कश्चन"।। इति)।।३२।।

प्रभा

एवं गद्यपद्यमिश्रत्वेन सारस्वतस्य त्रैविध्यमभिधाय पुनरपि भाषाभेदेन तस्य चातुर्विध्यं कथयति–**तदेतदिति।** तदेतत् प्रक्रान्तं वाङ्मयम् काव्यसारस्वतम्। भूयः पुनरपि। संस्कृतभाषामयम्। तथा प्राकृतम् अपभ्रंशः मिश्रम् संस्कृतादिविविधभाषासनाथं च इति चतुर्विधम् चतुष्प्रकारम्। आर्याः काव्यशास्त्रनदीष्णाः। आहुः। यथाह भोजराजः सरस्वतीकण्ठाभरणे–

संस्कृतेनैव कोप्यर्थः प्राकृतेनैव चापरः।
शक्यो योजयितुं कश्चिदपभ्रंशेन वा पुनः।।

पैशाच्या शौरसेन्या च मागध्यान्यो निबध्यते।

द्वित्राभिः कोपि भाषाभिः सर्वाभिरपि कश्चन।।(२.१०११)

इत्यादि।।३२।।

विवृति

तदेतदनन्तरोक्तं वाङ्मयं गद्यं पद्यं मिश्रं च त्रिविधमपि भूयः संस्कृतप्राकृतापभ्रंशमिश्रभेदाच्चतुर्धा चतुर्भिः प्रकारैः भिद्यते।।३२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाषाभेदात् प्रबन्धचातुर्विध्यमाह–**तदिति**।।३२।।

एवं गद्यपद्यमिश्रवशेन काव्यनाटकादीनां त्रैविध्यं प्रसाध्य, इदानीं गद्यपद्यमिश्रात्मकानां काव्यादीनां समानरूपतया उपयुज्यमानेषु भाषाविशेषेषु पूर्वाचार्यैः प्रदर्शितान् विशेषान् विस्तरेण अनुसन्धत्ते–**तदिति**। आप्ताः चतुर्विधमित्याहुः।।३२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतं नाम दैवी वाग्न्वाख्याता महर्षिभिः।
तद्भवं तत्समं देशीत्यनेकः प्राकृतक्रमः॥३३॥

रत्नश्री

देवानामियं देवी वाक् भाषा संस्कृतमिति विज्ञायते। यद्येवं कथमिह संस्कृतं ज्ञातमिति चेदाह–अन्वाख्याता महर्षिभिरिति महद्भिरुदात्तैर्गुणमाहात्म्यात् ऋषिभिर्मुनिभिर्देशभाषावद्भिरन्वाख्याता अनुशिष्टा सतीह संस्कृतमिति ज्ञातेत्यर्थः। ततश्चैकप्रकारं संस्कृतं, प्राकृतं त्वनेकप्रकारम्। यदाह, तद्भवमित्यादि। प्राकृतस्य क्रमः प्रकारः अनेको भिन्नः। कथं तद्भवं तस्मात् संस्कृतात् वर्णान्यत्वेन उत्पत्तिर्यस्य तत्तद्भवं शब्दभवमित्यर्थः। तञ्च महिन्दसिन्धवबहिरादिकं यथोक्तं हरिवृद्धेन। तत्समम् तेन संस्कृतेन समं तत्समम्, प्राकृतशब्दमपीत्यर्थः। तञ्च हरिहरकमलादिकं यथोक्तं तत्रैव। देशी प्राकृतं महाराष्ट्रप्रसिद्धम्। तदुक्तम्–मरहट्ठादेससंकेतएहि सद्देहि भण्णए देसी इति। तञ्च वोक्कणकं केल्लिचिरिहिरहिरसिच्छादिकम्। यथोक्तं तत्रैव। इत्येवमनेन रूपेणानेकः प्राकृतक्रम इति॥

किमत्रोत्कृष्टं प्राकृतमित्याह–

हृदयङ्गमा

संस्कृतादिकं विवृणोति, संस्कृतमिति।–दैवी देवसम्बन्धिनी देवव्यवहार्य्या वा, वाक् वाक्यं, महर्षिभिः प्राक्तनपण्डितैः मुनिभिः, नाम प्रसिद्धं, संस्कृतं संस्काररूपतया तदाख्यमित्यर्थः, अन्वाख्याता संस्कृतेत्याख्यया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्चाद्व्यवहृतेत्यर्थः। (संस्कृतशब्दस्य क्लीवत्वेऽपि उद्देश्यभूतायाः वाचः इत्यस्य स्त्रीत्वात् अन्वाख्याता इत्यस्य उद्देश्याधीनत्वेन स्त्रीत्वम्; उद्देश्यस्य प्राधान्यञ्च नित्यस्थितायाः संस्कृतवाचः पाणिन्यादिभिः महर्षिभिः शिष्याणां प्रतिपत्त्यर्थं संस्कारोपायप्रदर्शनादवगन्तव्यम्; अनुशब्दप्रयोगश्च तत एव युज्यते स्थितायाः एवान्वाख्यानसम्भवादिति)। प्राकृतानां नीचानामिदं प्राकृतं, तस्य क्रमः नियमः, अनेकः बहुविधः, तथा तद्भवः तस्मात् संस्कृतात् भवः उत्पन्नः, तत्समः संस्कृतसदृशः, तथा देशो तत्तदेशप्रचलित इत्यर्थः। तत्र साक्षात् संस्कृतोद्भवा महाराष्ट्रीयभाषा, शौरसेन्यादयः संस्कृततुल्याः, अपराश्च तत्तद्देशविलसिताः इति बोध्यम्। देशोनामपि संस्कृतसादृश्यात् द्वावेव भेदाविति केचित्; (उक्तञ्च,–"आर्षोत्थमार्षतुल्यञ्च द्विविधं प्राकृतं विदुः" इति)।।३३।।

प्रभा

भाषायाः संस्कृतादिविभागान् विशिनष्टि–**संस्कृतमिति**। दैवी देवव्यवहार्या। महर्षिभिर्यास्कपाणिन्यादिभिः। अन्वाख्याता प्रकृतिप्रत्ययादिभिर्व्याख्याता। संस्कृतं नाम संस्कृतनाम्ना व्यवहृता अस्तीति भावः। नामेति प्रसिद्धौ। व्याख्यातेत्यत्रोद्देश्यानुरोधेन स्त्रीत्वम्। प्राकृतं कथयति–**तद्भव इति**। प्राकृता ग्राम्यास्तैर्व्यवहृतम्। तत्संबन्धात् प्राकृतम्। अवयवार्थबलादेव लक्षणलाभः। प्रकृतेः संस्कृतादुत्पन्नं प्राकृतमिति केचित्। तस्य क्रमः अभ्यर्हितत्वानुरूपेणानुक्रमो विस्तारो वा। तद्भवस्तत्समो देशी इति अनेको बहुविधः। तद्भवो नाम संस्कृतोद्भवः। यथा हत्त कण्ण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यादिः। तत्समः संस्कृतसमः। यथा कीरः गौः इत्यादिः। देशी तत्तद्देशरूढः। यथा चर्स्सिस्सी (काञ्चनं) दोग्घट (गजः) इत्यादिः। अन्ये तु संस्कृतोद्भवा महाराष्ट्रीभाषा तत्समा शौरसेन्यादयो भाषा अपराधश्च तत्तेद्देशेषु विलसिता देशीपदाभिधेया इति व्याख्यानं कुर्वन्ति। केचित् पुनः सर्वासामपि प्राकृतभाषाणां संस्कृतोद्भवत्वेन तद्भवत्वं क्रियाकारकादिविभागत्वेन संस्कृतसादृश्यात् तत्समत्वं महाराष्ट्रादितत्तद्देशव्यवहृतत्वाञ्च देशीत्वमपि वर्तत इति कथयन्ति। परं नैतदाचार्यदण्डिनो मतम्। तेन तु तद्भवतत्समदेशीतिविभागेन एकस्यामेव महाराष्ट्र्यादिभाषायां त्रैविध्यं दर्शितम्। अत एव अनेकः प्राकृतक्रम इत्युपपन्नं भवति।।३३।।

विवृति

तदेवं संस्कृतादीनुद्दिश्य स्वयं व्याचष्टे–

संस्कृतं नाम दैवी वाक्; देवा इन्द्रादयः, तेषामिरः दैवी, महर्षिभिः ब्रह्मदिभिरन्वाख्याता। तद्भवं तस्मात् संस्कृतात् उत्पन्नं संस्कृतयोनि प्राकृतमेकम्। यथा–वत्सः वच्छो। राजा राआ। तत्समं संस्कृतेन समम्। यथा–तमालं कुवलयं धम्मिल्लचिकुरभारादि। देशी देशाख्या। यथा–नेसरो सूरो भमिओ विण्ण इत्यनेको भाषाभेदात् प्राकृतक्रमः।।३३।।

तत्र संस्कृतस्य लक्षणमाह–**संस्कृमिति**। दैवी देवैर्व्याहृता, इह लोके महर्षिभिः अन्वाख्याता संस्कृतम् इति। महाराष्ट्रादिदेशभाषा प्राकृतम्; प्रकृतेः संस्कृतात् आगतम् इति। तत्र त्रिविधम्तद्भवम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्समम्, देशी इति। प्राकृतं प्रकृतिप्रत्ययादिव्युत्पत्तिमत् संस्कृतम्; ततः आगतमिति वा प्राकृतशब्दस्य व्युत्पत्तिः। अभ्युद्गमोत्पत्तिमत् देश्यम्; तदपि प्राकृतमिति व्यपदिश्यते। तत्र तद्भवं प्राकृतं यथा–णमह, आवडिआ, इत्यादि। तत्समं संस्कृतसमं यथा–तलुनी, आसुरा, इत्यादि। देशी इति मागधी गृह्यते।।३३।।

संस्कृतमिति। संस्कृतमिति अन्वाख्याता। इति शब्दः प्रकारवाची। तद्भवं संस्कृतभवम्–छेत्तम्, मज्झे, रुक्खो, इत्यादि। तत्समं तेन संस्कृतेन समम्–कीरः, अम्बा, गौः, इत्यादि। देशी–पोव्वल्ली इति क्रमुकनाम, चर्स्सिसी इति काञ्चनस्य नाम, दोग्घट इति गजस्य नाम। इत्यनेकप्रकारः प्राकृतविन्यासः।।३३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः।
सागरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम्॥३४॥

रत्नश्री

महाराष्ट्राः कुन्तलामुरलासकविदर्भमहियाचरत्रवैश्यादि-प्रभेदाः (?) आश्रयः अधिष्ठानं यस्याम्तां महा[15a] राष्ट्राश्रयां भाषां वाचं प्रकृष्टं प्राकृतेषु शोभनतमं प्राकृतं विदुः उपदिशन्ति बहुज्ञाः। तदुक्तम्-

ऊहई अ विविह भासा परिरि (?) हिअअं य मोत्तूणं।
मरहअठिअया अ अत्थि गहिअं कइल्लेहि॥ [?]

इति। कुत्रैतद् दृश्यते इति चेदाह-सागर इत्यादि। सेतुबन्धः प्रवरसेनरचितः। स्कन्धकमर्यः आदिर्यस्य मथनादेस्तत्सेतुबन्धादि काव्यम् यन्मयं यस्य प्राकृतस्य विकारः, तत्प्राकृतं प्रकृष्टमिति प्रकृतम्। तत्काव्यं सदिति प्रशंसयन्नाह-सागरः सूक्तरत्नानामिति। सूक्तानि शब्दार्थोत्कर्षयोगात्। तान्येव प्रीतिकरत्वादिसाधर्म्येण रत्नानि, तेषां सागर आस्पदम्। रत्नानां हि सागर आश्रयः, सूक्तानां च रत्नकल्पानां तत्काव्यमाश्रय इति सागर उक्त इति। ननु प्राकृतान्तरमयमपि सेतुबन्धादि, तत् किमुच्यते महाराष्ट्रप्राकृतमयमिति। न चात्र पठ्यते महाराष्ट्रप्राकृतमयमेवेति। प्राधान्यात्तत् तन्मयमुक्तम्। यथा हयमयमनीकमिति ततेन्नश्यत (?) इत्येवंपरमेतत्॥

ननु सामान्यभाषापि प्राकृतप्रकारोस्ति। यदुक्तं हरिवृद्धेन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अण्णेहि अ एएहि अ सरिसं च अ होइ सामण्णे इति।

अन्योऽस्तीत्याह–

हृदयङ्गमा

प्राकृतलक्षणमभिधाय तस्य प्रकृष्टापकृष्टावाह, महाराष्ट्राश्रयामिति।–महाराष्ट्राश्रयां महाराष्ट्रो नाम दक्षिणापथवर्त्ती जनपदविशेषः, तदाश्रयां तत्सम्बन्धिनीं, तत्रत्यैर्व्यवहृतामित्यर्थः, भाषां प्रकृष्टम् उत्कृष्टं, प्राकृतं विदुः जानन्ति, बुधा इति शेषः। सूक्तिरत्नानां सूक्तयः सुवचनानि एव, रत्नानि सहृदयानन्दजननात् रत्नस्वरूपाणि, तेषां सागरः महादाधारतया रत्नाकररूपः, सेतुबन्धादि सेतुबन्धः तदाख्यप्राकृतकाव्यग्रन्थविशेषः तदादि, सेतुबन्धप्रभृतिप्राकृतकाव्यमित्यर्थः, आदिपदेन दशमुखबधादीनां प्ररिग्रहः, यन्मयं यदात्मकं, यन्महाराष्ट्रीयभाषया रचितम् इत्यर्थः। एतेनानया भाषया प्राक्तनाः कवयः बहूनि काव्यानि निर्ममुरित्यायातम्।।३४।।

प्रभा

प्राकृतभाषासु उत्कृष्टापकृष्टत्वं वर्णयति–**महाराष्ट्रेति।** महाराष्ट्रं नाम दक्षिणापथवर्ती देशविशेषः। लक्षणया तद्वर्तिनो जना ग्राह्याः। ते आश्रया आधारा यस्यास्ताम्। तैः प्रथमं व्यवहृतामित्यर्थः। भाषां महाराष्ट्रीभाषाम्। प्रकृष्टं उत्तमम्। प्राकृतं विदुर्विद्वांसो जानन्ति। सूक्तयश्चमत्कारपरिपूर्णानि वचांसि तान्येव रत्नानि अनर्घमणयस्तेषाम्। सागरः सागरस्वरूपः। सेतुबन्धस्तन्नामकः प्रवरसेनकवेर्ग्रन्थविशेषः स आदिर्यस्मिन् तत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्तसईइत्यादिकं काव्यमिति शेषः। यन्मयम् महाराष्ट्रीभाषामयम्। महाराष्ट्रीभाषया कविप्रवरा मनोहरान् प्रबन्धान् रचयामासुरिति भावः। तथा च मनोरमग्रन्थसंपत्त्या अस्याः प्रकृष्टत्वं ज्ञेयम्।।३४।।

विवृति

तत्रोत्कृष्टं किं प्राकृतमित्याह–

मराटदेशविषयां भाषामुत्तमं प्राकृतमाहुः। सूक्तान्येव रत्नानि, तेषां सागर इव सागरः सेतुबन्धादि सेतुबन्धहरिविजयरावणविजयादि प्रवरसेनादिकृतं काव्यं यन्मयं यया निर्वृत्तम्।।३४।।

तस्य विशेषान् दर्शयन् आह–**महेति।** यन्मयं यया निबद्धं सा महाराष्ट्राश्रया।।३४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शौरसेनी च गौडी च लाटी चान्या च तादृशी।
याति प्राकृतमित्येव व्यवहारेषु सन्निधिम्॥३५॥

रत्नश्री

सूरसेनाश्रया सौरसेनो, गौडाश्रया गौडी, [१]लाटाधिष्ठाना लाटी। अन्या च पाञ्चालीमागधीत्यादिका तादृशी तथाविधा एवंप्रकारा सामान्यभाषा प्राकृतमित्यनेनैव नाम्ना नापभ्रंश इत्यनेन सन्निधिं प्रयोगं याति। कुत्र, व्यवहारेषु नाटकादिषु। व्यवह्रियते [शि]क्षणं व्यवहारः [तत्र] प्रवर्तते एभिरिति सा च मुसुमुरिअ मूअच्छि[15b]अच्छिकेत्यादिका यथोक्तं हरिवृद्धेन। एवं कृत्वा चतस्रः प्राकृ[त]मय्यो भाषा दर्शिताः भवन्ति। तदुक्तम्-

सद्दभवा सद्दसमा देसीत्ति अ तिण्णिया अण्णेहि।
सामण्णया अइ सहि आया अअय इतराणि आउ॥ इति।[?]

विस्तरस्तु तच्छास्त्रात्॥

अपभ्रंशः कतम इत्याह–

हृदयङ्गमा

'देशो' इत्यनेन देशानां बहुत्वात् बहवः प्राकृतभेदाः सम्भवन्ति इत्यपराण्यपि प्राकृतानि दर्शयति, शौरसेनीति।–शूरसेनो नाम मथुरासन्निहितजनपदभेदः, गौडः देश विशेषः लाटः कश्चित् देशभेदः, तत्तद्देशप्रचलिता तथा तादृशी तत्सदृशी, अन्या च देशीया भाषा प्राकृतम् इति, एवं व्यवहारेषु सन्निधिं याति प्राप्नोति, (अन्या च तादृशोत्यनेन देशसंज्ञया निरूपिताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राच्यावन्तीमागधीद्राविड़ीबाह्लिकीप्रभृतयः सर्वा एव भाषाः प्राकृतनाम्ना कविभिर्निबध्यन्ते इत्यपि सूचितम्)।।३५।।

प्रभा

अन्या अपि प्राकृतभाषा दर्शयति–**शौरसेनीति**। शूरसेनो मथुरासंनिहितो देशः। तदुक्तं भागवते–

शूरसेनो यदुपतिर्मथुरामावसन् पुरीम्।
माथुराञ्शूरसेनांश्च विषयान् बुभुजे पुरा।।इति। (१०.१.२७)

गौडी। गौडो वङ्गदेशसमीपवर्ती देशविशेषः। तदुक्तं शब्दकल्पद्रुमे–

वङ्गदेशं समारभ्य भुवनेशान्तकं शिवे।
गौडदेशः समाख्यातः सर्वविद्याविशारदः।। इति।

लाटः कर्णाटकसमीपस्थो देशविशेषः। तथा च कथासरित्सागरे शशाङ्कवतीलम्बके–

ददौ तस्मै सपुत्राय प्रीत्या वीरवराय च।
लाटदेशे ततो राज्यं स कर्णाटयुतो नृपः।। इति। (११.११९)

एतद्देशत्रयव्यवहृतपूर्वा भाषाः। तथा तादृशी तद्वत् तत्तद्देशनाम्नोपलक्षिता अन्या मागधी अवन्तिजा प्राच्या वा। तदुक्तं नाट्यशास्त्रे–

मागध्यवन्तिजा प्राच्या शूरसेनार्धमागधी।
बाह्लीका दाक्षिणात्या च सप्त भाषाः प्रकीर्तिताः।। इति। (१७.४८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एताः सर्वा अपि भाषाः प्राकृतमित्येव प्राकृतमिति नाम्नैव। व्यवहारेषु नाट्यशास्त्रसाहित्यशास्त्रव्यवहारेषु। संनिधिं याति सांनिध्यं प्राप्नुवन्ति। कविभिः प्राकृतमित्येव व्यवह्रियन्ते। देशनामोपलक्षिताः सर्वा भाषाः सामान्यतः प्राकृतसंज्ञयोच्यन्ते इति भावः॥३५॥

विवृति

तत्र किं महाराष्ट्राश्रयैव भाषा प्राकृतमुत्कृष्टत्वादाद्रियते, उत अन्यदपीत्याह–

तादृशी आवन्त्यादिः॥३५॥

शौरसेनीति। अन्याऽपि तादृशी मालवादिदेशाश्रिता॥३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आभीरादिगिरः काव्येष्वपभ्रंश इति स्मृताः।
शास्त्रे तु संस्कृतादन्यदपभ्रंशतयोदितम्॥३६॥

रत्नश्री

आभीरा वाहिकाः। आदिशब्देन ढक्कादिपरिग्रहः। तेषां गिरो भाषा अपभ्रंश इति, अपभ्रंशनाम्ना व्यपदिश्यन्त इति स्थितिर्व्यवस्था। कुत्रेत्याह-काव्येषु गद्यपद्यमिश्रात्मकेषु कविप्रयोगेषु। अपभ्रंशोऽपि प्राकृतवञ्चतुर्धा स्मर्यते। यदुक्तम्-

शब्दभवं शब्दसमं देशीयं सर्वशब्दसामान्यम्।
प्राकृतवदपभ्रंशं जानीहि चतुर्विधमाहितम्।।इति

त्रिधाप्याम्नायते। यथोक्तम् - अपरं त्रिप्रकारत्वं शास्त्रस्थित्या प्राकृतमपभ्रंशः पैशाचिकं चेति।।

संस्कृतं वाङ्मयं कतमदिति सर्वं दर्शयन्नाह-

हृदयङ्गमा

क्रमप्राप्तमपभ्रंशं निरूपयति, आभीरादीति।-काव्येषु, आभीरो गोपजातिविशेषः, आदिपदेन कैवर्त्तचाण्डालादीनां ग्रहणं, तेषां गिरः वाचः, अपभ्रंश इति स्मृताः अपभ्रंशनाम्ना कथिताः, शास्त्रेषु काव्यातिरिक्तेषु वेदादिषु तु, संस्कृतात् अन्यत् संस्कृतातिरिक्तं सर्वं, प्राकृतम् उल्लिखितमाभीरादिवचनञ्च इत्यर्थः, अपभ्रंशतया उदितं कथितम्। (संस्कृतादिभेदेन चतुर्विधानां भाषाणां तिसृणां लक्षणं निरूपितं, मिश्रलक्षणं योगार्थबलादेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लाभात् निरर्थकमिति न कृतं, ततश्च नानाभाषामिश्रितत्वरूपं मिश्रलक्षणमित्यवगन्तव्यम्)।।३६।।

प्रभा

देशनाम्नोपलक्षितानां प्राकृतत्वमभिधायेदानीं जातिनामोपलक्षितानामपभ्रंशत्वेन व्यवहार इति निर्दिशति–**आभीरेति।** आभीराः गोपाः ते आदयो येषु ते शबरशकचाण्डालास्तेषां गिरो भाषा आभीरीशाबरीचाण्डालीप्रभृतयः। काव्येषु काव्यनाटकादिषु। अपभ्रंश इति स्मृता अपभ्रंशशब्देन ता व्यवहृताः सन्तीति भावः। काव्यस्येत्यस्य व्यावर्त्यं दर्शयति–**शास्त्रेषु इति।** शास्त्रेषु शब्दशास्त्रादिषु। संस्कृतादन्यद् भिन्नम्। सर्वो भाषाप्रपञ्चः। अपभ्रंशतया अभ्रंशत्वेन। उदितम् उक्तः। शास्त्रे संस्कृतापभ्रंशौ इत्येव द्वौ प्रभेदौ। सर्वं संस्कृतभिन्नमपभ्रंशशब्देनैव तत्र निर्दिष्टमिति भावः। यथा—ब्राह्मणेन न म्लेच्छितवै नापभाषितवै। म्लेच्छो ह वा यदेष अपशब्दः। म्लेच्छा मा भूम इत्यध्येयं व्याकरणम्। (पातञ्जलमहाभाष्यम् १-१-१)।।३६।।

विवृति

आभीरादिगिरः आभीरगुर्जरादिगिरः सर्वाः अपभ्रंशतयोदिताः। शास्त्रे तु संस्कृतादन्यत् व्याकरणे संस्कृतादन्यत् सर्वं प्राकृतमप्यपभ्रंशत्वेनोक्तम्। संस्कृतादपभ्रष्टत्वात्।।३६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपभ्रंशलक्षणमाह–**आभीरेति**। आभीरदेशो नाम आभीरप्रायः पश्चिमसमुद्रपार्श्ववर्तिजनपदः ; तत्र प्रचुरा गीः आभीरभाषा। आदिशब्देन घूर्जरभाषा गृह्यते।।३६।।

आभीरेति। आभीरो नाम पश्चिमार्णवतीरे वर्तमानो देशविशेषः; अथ वा आभीरादयः गोपालादयः। इति संस्कृतादीनां भेदप्रभेदाः।।३६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतं सर्गबन्धादि प्राकृतं स्कन्धकादि यत्।
ओसरादिरपभ्रंशो नाटकादि तु मिश्रकम्॥३७॥

रत्नश्री

यत् सर्गबन्धादि तत्सर्वं संस्कृतं वाङ्मयं वेदितव्यम्। आदिशब्देन पृथक् संघातादिपरिग्रहः। यत् स्कन्धकादिवाङ्मयं तत्सर्वं प्राकृतं वेदितव्यम्। अत्रापि आदिशब्देन गाव्याद्युपादानं सेतुबन्धादिवद् द्रष्टव्यम्। [१]ओसरादीनि काव्यानि यानि तानि सर्वा[ण्य]पभ्रंशो विज्ञायताम्। तानि वलयकरम्बकादीनि। आदिशब्देन रासकादिपरिग्रहः। नाटकादि तु यत्तत् मिश्रकं संस्कृतादिभिर्वेदितव्यम्। आदिशब्देन भाणकादिपरिग्रहः॥

कथादिकं कथमित्याह–

हृदयङ्गमा

संस्कृतप्राकृतापभ्रंशान् निरूप्य तत्तल्लक्ष्याणि मिश्रलक्ष्यञ्च निरूपयति, संस्कृतमिति।–सर्गबन्धः पूर्वमुक्तः प्रबन्धविशेषः, महाकाव्यमित्यर्थः, आदिपदेन खण्डकाव्यादीनां परिग्रहः, संस्कृतं संस्कृतभाषया रचितम्; (अत्र संस्कृतादिशब्दानां तत्तद्भाषार्थे अभिधानात् संस्कृतमयत्वार्थे लक्षणा। तथा च अग्निपुराणं,–"सर्गबन्धो महाकाव्यमारब्धं संस्कृतेन यत्। तद्भवं न विशेत्तत्र तत्समं नापि किञ्चन॥" इति। एतेन महाकाव्ये मिश्रकाव्यवद्वक्तृविशेषगतत्वनियमाभावात् नीचानामपि संस्कृतभाषयैव प्रयोग इति सूचितम्)। स्कन्धकादिकं स्कन्धकं छन्दोभेदः, आदिपदेन गलितकादीनां ग्रहणम्। (तदुक्तं,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

–"छन्दसा स्कन्धकेनैव तथा गलितकैरपि" इति), स्कन्धकादिच्छन्दोरचितं काव्यं प्राकृतं प्राकृतभाषामयमित्यर्थः। आसारादीनि आसारादिभिः छन्दोभिः निबद्धं काव्यमित्यर्थः, अपभ्रंशः। (अपभ्रंशभाषानिबद्धकाव्येषु सर्गस्य कड़वकसंज्ञा परैरभिहिता ग्रन्थकृता नादृता; यदुक्तम्,–"अपभ्रंशनिबद्धेऽस्मिन् सर्गाः कड़वकाभिधाः। तथाऽपभ्रंशयोग्यानि छन्दांसि विविधानि च।।" इति)। नाटकादि तु नाटकम् आदि यस्य तत्, आदिना प्रकरणादिरूपकाणां नाटिकाद्युपरूपकाणाञ्च परिग्रहः, (तत्र रूपकाणि दश, नाटिकाद्युपरूपकाण्यष्टादश इति ज्ञेयं, तेषां लक्षणानि ग्रन्थान्तरे द्रष्टव्यानि); मिश्रकं नानाभाषामयमित्यर्थः, (नाटकादौ विविधभाषाप्रयोगश्च वक्तृविशेषविषये नियमितविभिन्नभाषाभिरेवावगन्तव्यः। तथा चोक्तं नाटकादिप्रस्तावे,–"पुरुषाणमनीचानां संस्कृतं स्यात् कृतात्मनाम्। शौरसेनी प्रयोक्तव्या तादृशीनाञ्च योषिताम्।। आसामेव तु गाथासु महाराष्ट्रीं प्रयोजयेत्। अत्रोक्ता मागधी भाषा राजान्तःपुरचारिणाम्।। चेटानां राजपुत्राणां श्रेष्ठिनाञ्चार्द्धमागधी। प्राच्या विदूषकादीनां धूर्त्तानां स्यादवन्तिका।। योधनागरिकादीनां दाक्षिणात्या हि दीव्यताम्। शकाराणां शकादीनां शाकारीं सम्प्रयोजयेत्।।" इति)।।३७।।

प्रभा

एवं भाषाविभागं दर्शयित्वा तत्तद्भाषानियमेन पद्यप्रबन्धानां लक्षणानि निरूपयति–**संस्कृतमिति**। सर्गबन्धादि महाकाव्यादिकम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदिशब्देन खण्डकाव्यानां संग्रहः। संस्कृतम् संस्कृतभाषामयमेव भवतीति भावः। तथा चोक्तमग्निपुराणे–

सर्गबन्धो महाकाव्यमारब्धं संस्कृतेन यत्।
तद्भवं न विशेत् तत्र तत्समं नापि किंचन।। इति। (३३७.२४)

यथा रामायणादि। स्कन्धकादि स्कन्धकश्छन्दोविशेषस्तेन रचितं काव्यमपि स्कन्धकम्। तत्तु प्राकृतम्। प्राकृतेनैव प्रणेतव्यमित्यर्थः। अत्र आदिशब्देन गलितकादिच्छन्दसां संग्रहः। तदुक्तं टीकान्तरे–छन्दसा स्कन्धकेनैतत् क्वचिद्गलितकैरपि। इति। अस्योदाहरणं सेतुबन्धादि। एतदुपरूपकान्तर्गतसट्टकस्यापि उपलक्षणम्। तस्य प्राकृतमयत्वात्। तदुक्तं दर्पणे–सट्टकं प्राकृताशेषपाठ्यं स्यादप्रवेशकमिति। (६.२७६) ओसरश्छन्दोविशेष एव तद्ग्रथितं काव्यं अपभ्रंशमयमेव कर्तव्यम्। अस्मिन् काव्ये परिच्छेदस्य कडवकसंज्ञा। तदुक्तं टीकान्तरे–

अपभ्रंशनिबन्धेस्मिन् सर्गाः कडवकाभिधाः।
तथापभ्रंशयोग्यानि च्छन्दांसि विविधानि च।।इति।

एतदुदाहरणं कर्णपराक्रमादि इति प्रेमचन्द्रशर्माणः। नाटकादि तु मिश्रकम् नानाभाषाभिर्मिश्रितं भवति। अत्र तुशब्द एवार्थे। तेन संसकृतभाषया विविधप्राकृतभाषामिश्रया नाटकं विधेयमिति भावः। अत्र आदिशब्देन प्रकरणादिदशरूपकाणां नाटिकाद्यष्टदशोपरूपकाणां च संग्रहः। तत्र नाटकादिरूपकाणां लक्षणानि पूर्वमुक्तानि। इदानीमुपरूपकप्रभेदान् दर्शयामः। तथा हि दर्पणे–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाटिका त्रोटकं गोष्टी सट्टकं नाट्यरासकम्।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा।।

संलापकं श्रीगदितं शिल्पिकं च विलासिका।
दुर्मल्लिका प्रकरणी हल्लीशो भणिकेति च।

अष्टादश प्राहुरुपरूपकाणि मनीषिणः।। इति। (६.४ इत्यादयः)

एषां लक्षणानि उदाहरणानि च दशरूपकसाहित्य-दर्पणादिभ्योवगन्तव्यानि। विस्तरभयात् तानि नात्र कथ्यन्ते। नाटकादिरूपकेषु पात्रविशेषेण भाषानियमो दर्पणे यथा

पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम्।
शौरसेनी च प्रोक्तव्या तादृशीनां च योषिताम्।।

आसामेव तु गाथासु महाराष्ट्रीं प्रयोजयेत्।
अत्रोक्ता मागधी भाषा राजान्तः पुरचारिणाम्।।

चेटानां राजपुत्राणां श्रेष्ठिनां चार्धमागधी।
प्राच्या विदूषकादीनां धूर्तानां स्यादवन्तिका।।

योधनागरिकादीनां दाक्षिणात्या हि दीव्यताम्।
शबराणां शकादीनां शाबरीं संप्रयोजयेत्।।

इत्यादिः (६.१५८) ।।३७।।

विवृति

तत् किंविषयमित्यस्य विषयं निरूपयति—

संस्कृतं वाङ्मयं सर्गबन्धादि महाकाव्यविषयम्। आदिशब्देन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथाऽऽख्यायिकादयो ग्राह्याः। प्राकृतं स्कन्धकादि। आदिशब्दात् गाथाद्विपद्यादि। ओसरादीन्यपभ्रंशः। आदिशब्दात् सट्टिकादि। नाटकादि मिश्रकं नाटकभाणप्रभृति मिश्रकम्।।३७।।

भेदानां स्थानान्याह–**संस्कृतमिति।** सर्गबन्धा मुकुलकादि काव्यं संस्कृतमयम्। स्कन्धकं नाम आर्यागीतिनिर्मितं काव्यम्; आदिशब्देन गीत्युपगीत्यादिनिर्मितं च गृह्यते; एतत् प्राकृतम्। ओसरादिः–ओसर इति अपभ्रष्टभाषारचितः कश्चित् प्रबन्धः। नाटकादि तु रूपकदशकं तत्तत्पात्रानुरूपभाषामयम्।।३७।।

ग्रन्थरचनामुखेनापि तेषां भेदं दर्शयन् आह–**संस्कृतमिति।** सर्गबन्धादयः गद्यपद्यबन्धरूपाः। स्कन्धकं नाम जातिविशेषस्य संज्ञा; तदादि यत् तत् प्राकृतम्। अपभ्रंशभाषया रचितस्य प्रबन्धस्यं परिच्छेदः ओसरः इत्युच्यते; तत् (?) अपभ्रंश एव प्रयोक्तव्यः। नाटकादि तु इत्यत्र तुशब्दो विशेषवाची। अपि च नाटकप्रकरणादयो दश भेदाः ; ते तावत् भाषाभिः सर्वाभिः ग्रथितव्याः इत्यर्थः।।३७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथादिः सर्वभाषाभिः संस्कृतेन च पठ्यते।
भूतभाषामयीं त्वाहुरद्भुतार्थां बृहत्कथाम्॥३८॥

रत्नश्री

कथा आदिर्यस्याख्यानकादेः स कथादिः प्रबन्धः। सर्वाभिर्भाषाभिः संस्कृतप्राकृतापभ्रंशपैशाचिका[दि]भिः। समुच्चयविकल्पाभ्यां यथासम्भवं [16a]पठ्यते विरच्यते। संस्कृतेन चेति गतार्थमपि पृथगुक्तम्। प्राधान्यख्यापनार्थं न तु केवलार्थम्, प्राकृतादेरत्रातिपृथगभिधानप्रसङ्गात्। यथा संस्कृतप्राकृतापभ्रंशाख्यं भाषात्रयं शुद्धमपि प्रयुक्तं दृश्यते, न तथा पैशाचिकम्। भाषानुगतमेव तु दृश्यते चेदाह। भूतभाषामयीत्यादि। भूतभाषा पैशाचिकवाक् तद्विकारस्तमन्यीं शुद्धपैशाचिकाम्। तुशब्दोऽर्थान्तरविवक्षायाम्। बृहत्कथामाहुः कथयन्ति तद्विदः। केवलपैशाचिकी बृहत्कथा दृश्यते इत्यर्थः। किंविशिष्टामित्याह- अद्भुतार्थामिति। अद्भुतः प्रकृष्टो नानाविधः अपूर्वः अर्थोऽभिधेयं यस्यां तामाहुरिति प्रकृतं प्रधानकथनं चैतत्। अतएवाद्भुतार्थामिति। न त्वयमेव, अन्यस्या अपि भूतभाषामय्या रत्नप्रभादिकाया दर्शनात्॥

यदेतत्त्रिविधं काव्यशरीरं भाषाभेदाच्चतुर्विधमुक्तम्, तदेव द्विधाविनियोगभेदाद् दर्शयन्नाह-

हृदयङ्गमा

कथायाः मिश्रकाव्यंत्व प्रतिपादयन् भाषां निरूपयति, कथेति।-हि यतः, कथा पूर्वोक्तः काव्यभेदः, सर्वभाषाभिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतेन च बध्यते विरच्यते, अतः सा मिश्रसंज्ञकमिति शेषः ; कथा द्विविधा, मिश्रभाषामयी संस्कृतमयी च, तत्र मिश्रभाषामय्या मिश्रत्वं केवलसंस्कृतमय्याः कादम्बर्य्यादेर्न तथात्वम् इति भावः। वृहत्कथां तदाख्यकाव्यन्तु, भूतभाषा पैशाची भाषा, तन्मयीं तद्रचिताम्, अद्भुतार्थां विस्मयरसपूर्णां, प्राहुः, विद्वांस इति शेषः, पैशाच्या भाषया निबद्धन्तु वृहत्कथाख्यमपभ्रंश-काव्यमित्यवधेयम्।।३८।।

प्रभा

कथाख्ये गद्यप्रबन्धे भाषाविचारं निर्दिशति–**कथा हीति**। कथा पूर्वोक्तलक्षणा सर्वभाषाभिर्निखिलप्राकृतभाषाभिर्निबध्यते। हिशब्दस्त्वर्थे। चशब्दः समुच्चायकः। तथैव च संस्कृतेन संस्कृतभाषयापि निबध्यते। तेन कथायाः प्रकारद्वयं यया कयापि प्राकृतभाषया रचिता संस्कृतभाषया वा निबद्धा। संस्कृतभाषानिबद्धायाः कथाया उदाहरणं कादम्बर्यादि। प्राकृतभाषया रचितां कथां दर्शयति भूतभाषेति। भूतभाषामयीम् पैशाचीभाषानिबद्धाम्। बृहत्कथां प्राहुः कथयन्ति। तां प्रशंसति–**अद्भुतार्थामिति।** बृहत्कथाया अनुवादा बृहत्कथामञ्जरीकथासरित्सागरादयः सन्तीति प्रथितमेव।।३८।।,

विवृति

कथा हि सर्वभाषाभिः प्राकृतापभ्रंशमिश्राभिः तथा संस्कृतेन च बध्यते। तदुक्तं भामहेन–'संस्कृता प्राकृता चेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथापभ्रंशभाक् तथा।' इति। यतः कथायां भाषानियमो नास्ति, अतो भूतभाषामयीं प्राहुरद्भुतार्थां बृहत्कथाम्।।३८।।

कथेति। ईश्वरेण तया भूतभाषया देव्यै कथितः प्रबन्धो बृहत्कथा।।३८।।

कथेति। भूताः इति प्रमथाः। अद्भुतार्थां विस्मयनीयां नरवाहनदत्तकथाप्रायाम्।।३८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लास्यच्छलिकशम्यादि प्रेक्षार्थमितरत्पुनः।
श्रव्यमेवेति सैषापि द्वयी गतिरुदाहृता॥३९॥

रत्नश्री

लास्यं श्रृङ्गारप्रधानं नृत्तम्। तदुक्तम्–

ताण्डवमशक्नुवत्या नर्त्तितमाविद्धकरणसंकीर्णम्।
प्रियकारिणा प्रियाया हरेण लास्यं पुरा सृष्टम्॥ इति।

छलिनं [छद्म]प्रधानं नृत्तम्। लस्या तालविशेषप्राधान्यम्। सा च दक्षिणपाणिपातलक्षणा। यथोक्तम्–

सव्यहस्तनिपातश्च [ल]स्या तालस्तु वामकः।
करयोरुभयोः पातः सन्निपात इति स्मृतः॥

तत्प्रतिपादकं काव्यं लास्याद्युक्तं तादर्थ्यात्। आदिशब्देन च स्कन्धकादिपरिग्रहः। तदेतत् प्रेक्षार्थम्। प्रेक्षा प्रेक्षणं चक्षुषा ग्रहणम्। तस्यै इदं प्रेक्षैवार्थः प्रयोजनं तदालम्ब्य प्रवृत्तिर्यस्य तत् प्रेक्षार्थम्। प्रेक्षा तदर्थस्याभिनयप्रधानत्वात् प्रेक्षणे विनियुज्यते, तत्श्रव[16b]णं तु सदपि न विवक्षितम्। तस्माल्लास्यादेरितरत् अन्यत् सर्गबन्धादि श्रव्यमेव श्रवण एव विनियुज्यते, अनभिनेयार्थत्वात्, न प्रेक्षणे इति। सैषा एवं रूपा द्वयी द्विविधा गतिर्व्यवस्था विनियोगकृता उदाहृता कथिता। तस्य त्रिविधस्य काव्यस्य न केवलं चतुर्विधेत्यपि शब्दः। यदुक्तम्–

तैः शरीरं च काव्यानामलङ्कारश्च दर्शितः

[1.10]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति। तत्रेयता शरीरं मलङ्कााराधिष्ठानं निर्दिष्टम्॥

इदानीमलङ्कारं तस्य निर्दिदिक्षुः प्रस्थानं रचयन्नाह-

हृदयङ्गमा

सम्प्रति दृश्यश्रव्यत्वभेदेन काव्यस्य द्वैविध्यमाह, लास्येति। —लास्यं श्रृङ्गाररसाविद्धस्त्रीजननृत्यम्; (तदुक्तं,—"लासः स्त्रीपुंसयोर्भावस्तदर्हं तत्र साधु वा। लास्य मनसिजोल्लसकरं मृद्वङ्गहाववत्। देव्यै देवोपदिष्टत्वात् प्रायः स्त्रीभिः प्रयुज्यते॥" इति। अन्यच्च,—"कोमलं मधुरं लास्यं श्रृङ्गाररससंयुतम्। गौरीतोषकरञ्चापि स्त्रीनृत्यन्तु तदुच्यते॥" इति)। छलितं पुरुषनर्त्तनम्; (तदुक्तं,—"पुंनृत्यं छलितं विदुः" इति)। शल्या कपालदेशे करविन्यासपूर्वकं नृत्यम्; (तदाह,—"भाले हस्तं समावेश्य नृत्यं शल्येति कीर्त्तितम्" इति। "शल्यादि" इत्यत्र "साम्यादि" इति क्वचित् पाठः, तथात्वे—साम्यं गीतवादित्रादिसमन्वितं नृत्यं रासापरपर्य्यायमभिहितम्)। आदिपदेन ताण्डवादिपरिग्रहः। (तथोक्तं,—"तल्लास्यं ताण्डवञ्चेति छलितं शल्यया सह। हल्लीशकञ्च रासञ्च षट्प्रकारं विदुर्बुधाः॥" इति। ताण्डवमुद्धतनृत्यं, यथा,—"उद्धतन्तु महेशस्य शासनात् तण्डुनोदितम्। भरताय ततः ख्यातं लोके ताण्डवसंज्ञया॥" इति, "वीररौद्ररसाऽऽधारमुद्धतं शङ्करप्रियम्। पुरुषेण समारब्धं नृत्यं ताण्डवमुच्यते॥" इति च। हल्लीशं स्त्रीणां मण्डलाकारेण नृत्यम्; यदुक्तं,—"मण्डलेन तु यत् स्त्रीणां नृत्यं हल्लीशकं विदुः। तत्र नेता भवेदेको गोपस्त्रीणां यथा हरिः॥") तदेवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लास्यादिसङ्घटितं काव्यं प्रेक्ष्यार्थं प्रेक्ष्यः दृश्यः, अर्थः प्रतिपाद्यं वस्तु यस्मिन् तत्, नटैः रामाद्यवस्थानुकरणस्य दर्शनविषयत्वात्, ततश्च दर्शनविषयत्वं दृश्यलक्षणं, तञ्च नाटकादिकमित्यवधेयम्। इतरत् अन्यत्, दृश्यकाव्यात् भिन्न मुक्तकादि इति यावत्। श्रव्यमेव श्रवणमात्रविषयत्वात्, ततश्च श्रवणमात्रविषयत्वं श्रव्यलक्षणमित्यायातम्। (उक्तञ्च भोजराजेन,–"श्रव्यं तत् काव्यमाहुर्यन्नेक्ष्यते नाभिनीयते। श्रोत्रयोरेव मुखदं भवेत्तदपि षड्विधम्।।" इति)। इति इत्थं, सा प्रसिद्धा, एषा अपि उक्तरूपा अपि, न केवलं प्रागुक्ता एव काव्यानां भेदाः दृश्यश्रव्यत्वभेदेन पुनरपि द्विविधः भेदः इत्यपेरर्थः, द्वयी द्विविधा, गतिः काव्यभेदप्रवर्त्तकः पन्थाः, उदाहृता, प्राचीनैरिति शेषः।।३९।।

प्रभा

दृश्यश्रव्यभेदेन प्रबन्धद्वैविध्यमाह–लास्येति। स्त्रीजनकृतं शृङ्गाररसप्रधानं नृत्यं लास्यम्। तदाह स्वटीकायां प्रेमचन्द्रः–

लासः स्त्रीपुंसयोर्भावस्तदर्हं तत्र साधु वा।
लास्यं मनसिजोल्लासकरं मृद्वङ्गहाववत्।।

देव्यै देवोपदिष्टत्वात् प्रायः स्त्रीभिः प्रयुज्यते।। इति।

अन्यत्रापि–

कोमलं मधुरं लास्यं शृङ्गाररससंयुतम्।
गौरीतोषकरं चापि स्त्रीनृत्यं तु तदुच्यते।। इति।

हृदयंगमाख्याटीकायामपि–लास्यं शृङ्गारभूयिष्ठं नृत्यमीश्वर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाषितम्। इति। तथैव नारदसंहितायाम्-पुंनृत्यं ताण्डवं प्राहुः स्त्रीनृत्यं लास्यमुच्यते। इति। छलितं पुंनृत्यम्। तदाह प्रेमचन्द्रः-पुनृत्यं छलितं प्राहुरिति। केचित्तु छलिकामितिपाठमनुसृत्य-छलिकं छद्मना वृत्तं सूरयस्तद्विदो विदुः। (हृ० टीका) इति तल्लक्षणं निवेदयन्ति। शम्पा पूर्वरङ्गान्तर्गतो वाद्यप्रयोगविशेषः। तदुक्तं नाट्यशास्त्रे-

शम्पा तु द्विकला कार्या तालो द्विकल एव च।

पुनश्चैककला शम्पा संनिपातः कलात्रयम्।। इति। (५.६२)

शल्येतिपाठे शल्या-भाले हस्तं समावेश्य नृत्यं शल्येति कीर्तितम्। इति टीकान्तरे कृतलक्षणा। शम्येतिपाठे

शम्येति सव्ययोः पातः सतालकरपादयोः।
उभयोः करयोः पातः संनिपात इति स्मृतः।। इति टीकान्तरे।

साम्येतिपाठे साम्यं गीतवाद्यसमयनृत्यं अन्यै रासकनाम्ना पठितम्। आदिशब्देन ताण्डवहल्लीसकरासानां ग्रहणम्। उक्तं च

तल्लास्यं ताण्डवं चेति च्छलितं सम्पया सह।
हल्लीसकं च रासं च षट्प्रकारं प्रचक्षते।। इति। (स० कण्ठा० २.१५५)

ताण्डवं उद्धतपुंनृत्यम्। यदुक्तं प्रेमचन्द्रेण-

वीररौद्ररसाधारमद्धुतं शंकरप्रियम्।
पुरुषेण समारब्धं नृत्यं ताण्डवमुच्यते।।

अन्यञ्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उद्धतं तु महेशस्य शासनात् तण्डुनोदितम्।
भरताय ततः ख्यातं लोके ताण्डवसंज्ञया।। इति।

हल्लीशं मण्डलाकारेण स्त्रीसमूहनृत्यम्। यथा

मण्डलेन तु यत् स्त्रीणां नृत्यं हल्लीसकं तु तत्।
तत्र नेता भवेदेको गोपस्त्रीणां यथा हरिः।। इति। (स० कण्ठा० २.१५६)

हल्लीसमेव तालबन्धविशेषयुक्तं रासकमिति प्रेमचन्द्रशर्माणः। प्रेक्षार्थम् प्रेक्षणमेव प्रयोजनं यस्य तथाविधम्। प्रेक्ष्यमित्यर्थः। प्रेक्ष्यार्थमिति पाठं स्वीकृत्य प्रेक्ष्यः सामाजिकैर्दृश्योर्थो नटै रामाद्यवस्थानुकरणेन प्रकाशमानं काव्यप्रतिपाद्यं यस्य तत् इति केचिद् विवृण्वन्ति। परं अग्रेस्थितश्रव्यपदानुरोधात् प्रेक्षार्थमित्येव पाठः समीचीनः। श्रव्यं कथयति–**इतरदिति**। सर्गबन्धाधिकं श्रव्यम् श्रवणमात्रलक्षणम्। उक्तं च भोजराजेन सरस्वतीकण्ठाभरणे–

श्रव्यं तत् काव्यमाहुर्यन्नेक्ष्यते नाभिनीयते।

श्रोत्रयोरेव सुखदं भवेत् तदपि षड्विधम्।। इति।

(२.१५२) नेक्ष्यते नाभिनीयते इत्यनेन नाटकादीनां न श्रव्यत्वप्रसक्तिः। इति एवम् एषापि द्वयी गतिर्द्विप्रकारका पद्धतिः प्राचीनैः कथिता। अपिशब्दः पूर्वभेदसमुच्चयार्थः। केचित्तु श्लोकमिमं नाटकाख्यस्य मिश्रप्रबन्धस्यैव दृश्यश्रव्येति द्विप्रकारताख्यापनपरत्वेन योजयन्ति। यद्यपि मिश्रप्रबन्धस्य वर्णनमत्रावसरप्राप्तमेव वर्तते तथापि व्याख्यानेस्मिन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निखिलवाङ्मयस्य दृश्यश्रव्यात्मकत्वेन प्राचीनैरुपवर्णितस्य द्वैविध्यस्य परित्यागः संकोचो वा स्वीकार्यो भवतीति सुधीभिर्विमर्शनीयम्।।३९।।

विवृति

इदानीं सर्ववाङ्मयस्य प्रेक्षणीयश्रव्यभेदात् द्वैविध्यमाह–

लास्यं श्रृङ्गाररसप्रायं पुरुषनृत्तं, शम्या किन्नरनृत्तं, छलिकं देवस्त्रीनृत्तं, आदिशब्देन नाटकप्रस्तारडोम्बलिकापवटिकादि प्रेक्ष्यार्थं प्रेक्षणप्रबन्धं वाङ्मयम्। सर्वमन्यत् करणाङ्गहारादिरहितं श्रव्यमाकर्णनीयमेव गीतधर्मशास्त्रव्याकरणादीनि सर्वम्। वाङ्मयस्य प्रेक्षणीयश्रोतव्यभेदात् सैषा द्वयी गतिरुक्ता।।३९।।

दृश्यश्रव्यभेदेन प्रबन्धद्वैविध्यमाह–**लास्येति**। लास्यच्छलिकशम्यादि दृश्यम्। तत्र श्रृङ्गारप्रधानं लास्यम्। वीरश्रृङ्गारप्रधानं छलिकम्। एतदेव किन्नरविषयं शम्या। तदादिनृतप्रबन्धः प्रेक्ष्यः ; इतरत् सर्गबन्धादि श्रव्यमेव; इति द्विविधम्। नाटकादि तु दृश्यश्रव्यं इति बोद्धव्यम्।।३९।।

संस्कृतादिरूपेण चतुर्विधा गतिः प्रकारान्तरेण द्विधाऽपि भवेदित्याह–लास्येति। चतुर्विधानां वाङ्मयानां लास्यच्छलिकशम्यादि अभिनयरूपेण प्रवृत्तं यत् तत् प्रेक्षार्थम्; इतरत् सर्गबन्धादि श्रव्यम्। इति पुनः द्वयी गतिः। तत्र प्रेक्षार्थे–

'लास्यं श्रृङ्गारभूयिष्ठं नृत्तमीश्वरभाषितम्।
छलिकं छद्मना वृत्तं सूरयस्तद्विदो विदुः।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शम्या तु सव्ययोः पातः सतालकरपादयोः।
उभयोः करयोः पातः सन्निपात इति स्मृतः॥'

मर्दलच्छलिकादिवाद्यविशेषाणां एकस्मिन् काले विरमणप्रक्रमणं छलिकं इत्युच्यते। अरत्निमात्रप्रायनानावर्णरचित-यष्टिहस्तैः बहुभिः–बह्वीभिर्वा–तैरेव तालहस्तैश्च तालयष्टीनां एकावसरे सन्निपातो वा, तालं विना यष्टिहस्तैरेव यष्टीनां सन्निपातो वा, शम्या इत्युच्यते॥३९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

**अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम्।
तत्र वैदर्भगौडीयौ वर्ण्येते प्रस्फुटान्तरौ।।४०।।**

रत्नश्री

गिरां काव्यानां मार्गो रचनाप्रकारः, अनेको भिन्नो विजातीयः उदीच्यादिदिग्देशभेदेन अस्ति प्रवर्त्तते। किमेकान्तविसदृशोऽसौ, नेत्याह-सूक्ष्मभेदः परस्परमिति। परस्परमन्योःयम् सूक्ष्मः स्वल्पः भेदोऽन्तरं यस्य स तथा। विजातीयत्वेऽपि सदृशोऽस्ति मार्गः, गोगवयादिवदित्युत्सर्गः। तस्यापवादमाह-तत्रेत्यादि। तत्र तस्मिन्ननेकस्मिन् मार्गे वैदर्भगौड़ीयौ प्रस्फुटान्तरौ। विदर्भा दाक्षिणात्याः, एकदेशेन समुदायोपलक्षणत्वात्। तेषामयं वैदर्भः। गौडाः पौरस्त्याः तेषामयं गौडीयः। तौ मार्गौ प्रस्फुटौ। महदन्तरं भेदोऽनयोरिति प्रस्फुटान्तरौ। विजातीयत्वेऽपि शेषो मार्गो वैदर्भेण सदृशः, गवेव गवयः। गौडीयस्तु विसदृशः। गवेव करभः। व्यक्तिभेदस्त्वेकैकस्यामप्यनन्तः प्रतिकविस्थितः स इह न विवक्षितः। तद् वक्ष्यति-

तदभेदास्तु न शक्यन्ते वक्तुं प्रतिकविस्थिताः। इति।

[1.101]

यदि नामैवं ततः किमित्याह-ततश्च तावेव वर्ण्येते विभज्येते। प्रस्फुटान्तरयोः सुविभजत्वात्। शेषस्तु वैदर्भप्रायत्वात् पृथग् नोच्यते।

[17a] एवं च कृत्वा यदुक्तं भामहेन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैदर्भमन्यदस्तीति मन्यन्ते सुधियोऽपरे।
तदेव च किल ज्यायः सदर्थमपि नापरम्॥
गौडीयमिदमेतत्तु वैदर्भमिति किं पृथक्।
गतानुगतिकन्यायान्नानाख्येयममेधसाम्॥

[काव्यालङ्कारे 1.31-32]

इति, तद् भङ्ग्या निरस्तम्। तथाहि-कश्चित्काव्यरचनाप्रकारः शब्दालंकारलक्षणो दाक्षिणात्यानां निजो वैदर्भमार्ग इति व्यवह्रियते, यथा यानविशेषो दक्षिणमार्ग इति। तद्विपरितस्तु पौरस्त्यानां काव्यरचनाप्रकारो गौडीय इति व्यपदिश्यते। यथा दक्षिणमार्गविलक्षणो यानप्रकार उत्तरमार्ग इति। ततश्च वास्तवीयं नानाता कथममेधसाम्। या हि भ्रान्तिकृता सा भवेदमेधसां विपरीतदृशाम्, यथैकस्मिन्न[पि] चन्द्रमसि। इयं तु सुमेधसामपि, विपरीतदृशामेव, वस्तुभेदकृतत्वात् सूय[र्ी]चन्द्रमसोरिव। तस्मात् स्वभावत एंव विलक्षणावेतौ मार्गौ। यद्वक्ष्यति-

इति मार्गद्वयं भिन्नं तत्स्वरूपनिरूपणात्। इति।

[1.101]

अथ मतं कथं तर्हि पौरस्त्येषु वैदर्भो दृश्यते पद्यसाधारणो यथा दाक्षिणान्यानामेव। दाक्षिणात्येषु वा गौडीय इति। तत्किमेतावता तेषामसौ निजः स्यात्। तेष्वमौ दृश्यमानोऽपि न निजः दक्षिणमार्गवत्, यथा दाक्षिणात्यानाम्। नहि चन्दनं देशान्तरे दृश्यत इति तज्जमेव स्यात्। देशान्तरदृष्टमपि हि मलयजमेव तत्। तथा वैदर्भः पौरस्त्येषु कथञ्चित् दृश्यमानोऽपि वैदर्भ एव, यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दाक्षिणात्यानां सहजः। गौडीयोऽपि दाक्षिणात्येषु कथञ्चिद् दृश्यते तथापि पौरस्त्यानामेवासौ निजत्वात्। तदेतो काव्यरचनाप्रकारौ मार्गौ प्रकृतिविलक्षणो दक्षिणात्यैर्गौडैश्च व्यपदिश्ये[17b]ते। निजत्वाद् देशभाषादिवत् वैदर्भगौडीय इति। एतावत्तु स्यात्।

किं लक्षणौ तौ को वाऽनयोः प्रतिविशिष्ट इति नञ्च मार्गद्वयमिदानीं विभज्यते। प्रतिविशेषे तु सन्तः प्रमाणमिति विभजन्नाह–

हृदयङ्गमा

एवं काव्यभेदं निरूप्य तस्य रीतीर्निरूपयति, अस्तीति।–अनेकः विविधः, स च शास्त्रान्तरनिर्दिष्टः, परस्परं सूक्ष्मभेदः स्वल्पमात्रभेदः, गिरां वाचां, मार्गः रचनापद्धतिः, रीतिः इत्यर्थः, सा च श्लेषादिगुणविशिष्टा पदरचनारूपा; [तदुक्तं वामनेन,–"विशिष्टा पदरचना रीतिः" (का० सू० वृ० १अधि० २अ०) इति], रिणन्ति गच्छन्ति अस्यां गुणाः इति व्युत्पत्तेः, (तदुक्तं,–"वैदर्भादिकृतः पन्थाः काव्ये मार्ग इति स्मृतः। रीङ् गताविति धातोः सा व्युत्पत्त्या रीतिरुच्यते।।" इति)। अस्ति शास्त्रान्तरे वर्त्तते, [तथाच,–"सा त्रिधा वैदर्भी गौड़ीया पाञ्चाली च" (का० सू० वृ० १अधि० २अ०) इति वामनः। अतिरिक्ता लाटोति दर्पणकारः। "वेदर्भी चाथ पाञ्चाली गौड़ी चावन्तिका तथा। लाटीया मागधी चेति षोढ़ा रीतिर्निगद्यते।।" इति भोजराजादयः। तासां लक्षणानि च तत्रोक्तानि यथा–"तत्रासमासा निःशेषश्लेषादिगुणगुम्फिता। विपञ्चीस्वरसौभाग्या वैदर्भी-रीतिरिष्यते।। समस्तपञ्चषपदामोजःकान्तिविवर्जिताम्। मधुरां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुकुमाराञ्च पाञ्चालीं कवयो विदुः।। समस्तात्युद्भटपदामोजः कान्तिगुणान्विताम्। गौड़ीयेति विजानन्ति रीतिं रीतिविचक्षणाः।। अन्तराले तु पाञ्चालीवैदर्भ्योर्याऽवतिष्ठते। साऽवन्तिका समस्तैः स्यात् द्वित्रैस्त्रिचतुरैः पदैः।। समस्तरीतिर्व्यामिश्रा लाटीया रीतिरिष्यते। पूर्वरीतेरनिर्वाहात् खण्डरीतिस्तु मागधी।।'' इति। तासु वैदर्भी यथा,–''मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से। क्व च तावकं वपुः?। पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः।।'' इति]। सूक्ष्मभेदतया च तन्निरूपणेन ग्रन्थबाहुल्यकरणं वृथेति स्फुटभेदयोर्वैदर्भीगौड़ीययोर्मतं प्रकटयितुमाह तत्र वैदर्भेत्यादि।–तत्र तेषु मार्गेषु मध्ये, वैदर्भगौड़ीयौ विदर्भादिपदैरुपचारात् विदर्भादिदेशस्थाः कवयो लक्ष्यन्ते, [विदर्भशब्दात् ''शेषे'' (४।२।१२४ पा०) इति अण् प्रत्ययः। गौड़शब्दात् ''वृद्धाच्छः'' (४।३।११४ पा०) इति छप्रत्ययः], ततश्च वैदर्भः विदर्भदेशीयकविप्रियः, गौड़ीयः गौड़देशस्थकविसम्मतः तौ मार्गौ, वर्ण्यते, यतः तौ प्रस्फुटम् अन्तरं ययोः तादृशौ, एकस्य सुकुमारत्वेन अपरस्य उत्कटत्वेन अत्यन्तवैसादृश्यात् इति भावः। [अत्रेदञ्च प्रतिभाति यत्, स्थितास्वपि बह्वीषु रीतिशु प्राधान्येनाच वैदर्भगौड़ीयमार्गयोरुल्लेखः ग्रन्थकृता कृतः, तेन रीत्यन्तरापेक्षया वैदर्भरीतेरुत्कर्षः सूचितः, तदुत्कर्षप्रदर्शनार्थञ्च तद्भेदविशिष्टा गौड़ीयाऽपि रीतिर्दर्शितेति। तथा हि रीतिभेदश्च गुणभेदाद्भवति, वैदर्भीरीतेश्च सर्वगुणोपेतत्वेनोत्कर्षत्वं, वैदर्भीरीतेः सर्वगुणोपेतत्वञ्च वामनेनाप्युक्तं यथा,–''समग्रगुणोपेता वैदर्भी'' (का० सू० वृ० १अधि० २अ० ११सू०) इति; अपरैश्च ''अस्पृष्टा दोषमात्राभिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समग्रगुणगुम्फिता। विपञ्चीस्वरसौभाग्या वैदर्भीरीतिरिष्यते।।'' इति; तथा तत्प्रशंसनञ्च दृश्यते, ''सति वक्तरि सत्यर्थे सति शब्दानुशासने। अस्ति तन्न विना येन परिस्रवति वाङ्मधु।।'' इति; वक्ष्यति च,–''इति वैदर्भभार्गस्य प्राणा दशगुणाः स्मृताः'' इति। अत एव कविकुलशिरोमणिः कालिदासोऽपि तामेव रीतिमवलम्बा प्रायेण काव्यानि निबबन्धुः, उक्तञ्च,–''वैदर्भीरीतिसन्दर्भे कालिदासः प्रगल्भते'' इति। उदाहृतञ्च वामनेन अभिज्ञानशाकुन्तलीयं शकुन्तलाविलोकनोत्कलिकावशंवदहृदयस्य मृगयाविहाराद्विरिरंसतो दुष्मन्तस्योक्तिरूपं ''गाहन्तां महिषाः'' इत्यादिकालिदासरचितपद्यम्। ततो यथा स्फुटभेदत्वेन तथा प्रधानत्वेन च वैदर्भरीतिरनेन दर्शितेति दिक्]।।४०।।

प्रभा

इत्थं सप्रपञ्चं सप्रभेदं च काव्यशरीरं विवृत्य ततस्तत्संपादकगुणविशेषान् निरूपयंस्तदाश्रयभूतां वाचां विचित्रमार्गाणाम् (१.९) इत्युल्लिखितां रीतिं निरूपयति–**अस्तीति।** गिराम् वाचाम्। परस्परं सूक्ष्मभेदः प्रणिधानगम्यो भेदो यस्य एवं मार्गो रचनाप्रकारः। अनेकः बहुविधः। अस्ति। तथा च वामनः–रीतिरात्मा काव्यस्य। विशिष्टपदरचना रीतिः। सा च त्रिधा। वैदर्भी गौडी पाञ्चाली चेति। (१.२.६-७) विश्वनाथो रीतीनां चातुर्विध्यमाह। तथा हि–

पदसंघटना रीतिरङ्गसंस्थाविशेषवत्।
उपकर्त्री रसादीनां सा पुनः स्याञ्चतुर्विधा।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा।
माधुर्यव्यञ्जकैर्वर्णै रचना ललितात्मिका।

अल्पवृत्तिरवृत्तिर्वा वैदर्भी रीतिरिष्यते।
ओजः प्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः।।

समासबहुला गौडी वर्णैः शेषैः पुनर्द्वये।
समस्तपञ्चषपदो बन्धः पाञ्चालिका मता।।

लाटी तु रीतिर्वैदर्भीपाञ्चाल्योरन्तरे स्थिता। इति। [९.१-५]

सरस्वतीकण्ठाभरणे रीतीनां षोढात्वं कथितम्। यथा-

वैदर्भी साथ पाञ्चाली गौडीयावन्तिका तथा।
लाटीया मागधी चेति षोढा रीतिर्निगद्यते।। इति। [२.२९]

तत्र आवन्तिकामागध्योर्लक्षणम्-

अन्तराले तु पाञ्चालीवैदर्भ्योर्यावतिष्ठते।
सावन्तिका समस्तैः स्याद् द्वित्रैस्त्रिचतुरैः पदैः।
पूर्वरीतेरनिर्वाहे खण्डरीतिस्तु मागधी। इति। (२.३२)

आसामुदाहरणानि तत्रैव प्रदर्शितानि। तत्र वैदर्भ्या उदाहणम्-

मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः।।

पाञ्चाली यथा-

गात्राभिघातदलिताङ्गदजर्जराणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गण्डस्थलीलुलितकुण्डलताडितानाम्।
क्षोभस्फुटन्मुकुटकोटिविघट्टितानां
नादोभवज्झणझणामुखरो मणीनाम्।।

गौडीया यथा–

यस्यावस्कन्दलीलावलितबलपरिस्पन्दखर्वीकृतोर्वी-
संरम्भोत्तम्भनायोन्नमितभरनमत्कन्धरासंधिरासीत्।
शेषो विस्फारफुल्लस्फुटपृथुलफणाफूत्कृताग्निस्फुलिङ्ग-
स्फूर्जत्संदोहसंदेहितविकटशिखामण्डलीरत्नखण्डः।।

आवन्तिका यथा–

एतानि निःसहतनोरसमञ्जसानि
शून्यं मनः पिशुनयन्ति पदानि तस्याः।
एते च वर्त्मतरवः प्रथयन्ति ताप-
मालम्बितोज्झितपरिग्लपितैः प्रवालैः।।

लाटीया यथा–

अयमुदयति मुद्राभञ्जनः पद्मिनीना-
मुदयगिरिवनालीबालमन्दारपुष्पम्।
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन्
कुपितकपिकपोलक्रोडताम्रस्तमांसि।।

मागधी यथा–

करिकवलनशिष्टैः शाखिशाखाग्रपत्रै-
ररुणसरणयोमी सर्वतो भीषयन्ते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चलितशबरसेनादत्तगोशृङ्गचण्ड-
ध्वनिचकितवराहव्याकुला विन्ध्यपादाः।

एतासु वैदर्भीगौडीये एव प्रस्फुटान्तरे। अन्यास्तु मिश्रिताः। तत्र पाञ्चाली वैदर्भीगोड्योरन्तरालवर्तिनी। लाटी समस्तरीतिव्यामिश्रा। मागधी तु खण्डरीतिरेव। अतः किंचिद्भेदवतीनां तासां निर्वचनं न विशेषोपयुक्तमिति तद्विहाय प्रकृष्टभेदेन वैदर्भीगौडीये रीति एव विशिनष्मि इत्याह-**तत्रेति।** तत्र विविधमार्गेषु वैदर्भगौडीयौ मार्गौं प्रस्फुटान्तरौ सुकुमारविकटात्मकत्वेन अत्यन्तविसदृशौ वर्ण्येते लक्षणादिना विविच्येते। भेदभूयस्त्वात् तेषां विवेचन युक्तमिति भावः।।४०।।

विवृति

तदेवं द्विधा त्रिधा चतुर्धा च काव्यशरीरमभिधाय वैदर्भगौडीयमार्गविभागं दर्शयति-

सूक्ष्मभेदः दुर्लक्षभेदः परस्परमन्योन्यं यतः तेन सः उदाहर्तुं न शक्यः। तथा च वक्ष्यति-

'इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत्।
तथाऽपि न तदाख्यातुं सरस्वत्याऽपि शक्यते।।'

तत्रानेकस्मिन् गिरां मार्गे वैदर्भगौडीयौ दाक्षिणात्यप्राच्यमार्गौ। वर्ण्येते प्रस्फुटान्तरौ। यतस्तद्वर्णने प्रस्फुटान्तरत्वं विशेषणत्वेऽपि हेतुः। यथा गुरवो राजभाषाः न भक्षणीया इत्यत्र गुरुत्वादिति हेतुः प्रतीयते, यथा वा यत् कृतकं तदनित्यमित्यत्र कृतकमिति विशेषणमपि कृतकत्वादनित्यमिति गम्यते, तथाऽत्रापि प्रस्फुटान्तरत्वात् वर्ण्येते **ताविति।** ततश्च यदुक्तं भामहेन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'वैदर्भमन्यदस्तीति मन्यन्ते सुधियोऽपरे।
तदेव च किल ज्यायः सदर्थमपि नापरम्।।
गौडीयमिदमेतत्तु वैदर्भमिति किं पृथक्।
गतानुगतिकन्यायात् नानाऽऽख्येयममेधसाम्।।'

इति तन्निरस्तं भवति।।४०।।

अथ सन्दर्भकाव्यगुणभेदेन (?) द्वैविध्यं दर्शयितुं उपक्रमते–अस्तीति। 'वैदर्भी साऽथ पाञ्चाली गौडीयावन्तिका तथा। लाटीया मागधी चेति षोढा रीतिर्हि गद्यते'–इति प्रसिद्धा रीतयः षट्। तत्र इतरा रीतयः चतस्त्रः परस्परं स्वल्पभेदाः ; वैदर्भगौडीयौ तु मार्गौ प्रस्फुटभेदौ मतौ। तौ वर्ण्येते लक्ष्यलक्षणैः प्रदर्श्येते।।४०।।

सम्प्रति गद्यपद्यात्मकस्य संस्कृतस्यैव गौडवैदर्भानुसारेण विशेषं दर्शयितुमाह–**अस्तीति**। वैदर्भो नाम मध्यमदेशात् दक्षिणतो देशः ; तत्र भवा हि वैदर्भाः ; तेषां इयं रीतिः वैदर्भी। गौडो नाम मध्यमदेशात् पूर्वो जनपदः ; तस्मिन् जनपदे भवाः गौडीयाः। अत्र वैदर्भगौडीययोः मार्गयोर्द्वयोः भेदः कथ्यते।।४०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्लेषः प्रसादः समता माधुर्यं सुकुमारता।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः॥४१॥

रत्नश्री

शिलष्टिः श्लेषो वार्थगौरवम्। प्रसत्तिः प्रसादः प्रकाशार्थता। समता पद्यापेक्षया [बन्धतुल्यतो]पादानम्। माधुर्यं शब्दे अर्थे च रसवत्ता। सुकुमारता अपरुषाक्षरबाहुल्यम्। अर्थस्याभिधेयस्य व्यक्तिः शब्देन न्यायेन वा ग्रहणम्। अन्यथा दुषप्रापत्वाद् वक्ष्यति–

नहि प्रतीतिः सुभगा शब्दन्यायविलङ्घिनी। इति।

[1.75]

उदारत्वं प्रकृष्टता केनचिदर्थेन सनाथत्वम्। ओजः समासवृत्तिबाहुल्यम्। कान्तिः सर्वलोकमनोहरत्वम्। समाधिर्भगवत्प्रतीत्यनुसारिणी गौणार्थता।

हृदयङ्गमा

वैदर्भीरीतेरात्मभूतान् श्लेषादिदशगुणान् नामतो निर्दिशति, श्लेषः इत्यादि द्वाभ्याम्।–श्लेषादयः दश गुणाः शब्दार्थोत्कर्षविधायित्वेन गुणशब्दवाच्याः, वैदर्भमार्गस्य वैदर्भीयरीत्याः, प्राणाः जीवनभूताः, तान् विना तत्र विदर्भजनानां काव्यत्वानङ्गीकारादिति भावः। एतेन श्लेषादिमत्पदरचनावत्त्वं वैदर्भीत्वमित्युक्तम्; स्मृताः, पण्डितैः इति शेषः। (स्मृताः इत्यनेन प्राचीनसम्प्रदायैः श्लेषादिदशानामेव गुणत्वमङ्गीकृतम्, अन्यैस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयाणामिति सूचितम्। उक्तञ्च काव्यप्रकाशे,–''माधुर्य्यौजः प्रसादाख्यास्त्रयस्ते न पुनर्दश'' इति। ।।४१।।

प्रभा

वैदर्भगौडीयौ वर्ण्येते इति स्वप्रतिज्ञानुरोधेन क्रमेण तल्लक्षणं विधत्ते–**श्लेष इति।** श्लेषः अस्मिन्नेव परिच्छेदे ४३ श्लोकेंन लक्षितः। प्रसादः अत्रैव ४५ श्लोकेन वर्णिताः। समता ४७ श्लोकेन विवेचिता। माधुर्यम् ५१ श्लोकेन निरूपितम्। सुकुमारता ६९ श्लोकेन विशदीकृता। अर्थव्यक्तिः ७३ श्लोकेन व्यक्तीकृता। उदारत्वम् ७६ श्लोकेन स्पष्टीकृतम्। ओजः ८० श्लोकेन विवरितम्। कान्तिः ८५ श्लोकेन अभिहिता। समाधिः ९३ श्लोकेन प्रदर्शिता। एवं दश गुणा उद्दिश्टा इत ज्ञेयम्।।४१।।

विवृति

इदानीं वैदर्भमार्गस्य प्राणाः कति भवन्तीत्याह–

श्लेषादयः समाध्यन्ता दश गुणाः स्मृताः प्राणाः। एषामेव विपर्ययः प्रायो बाहुल्येन न सर्वथा लक्ष्यते गौडवर्त्मनि।।४१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः।
एषां विपर्ययः प्रायो दृश्यते गौड़वर्त्मनि॥४२॥

रत्नश्री

इत्येवंरूपा दश गुणाः शब्दालङ्कारस्वभावाः प्राणाः जीवितं स्मृता दृश्यन्त इति यावत्। कस्य वैदर्भमार्गस्य दाक्षिणात्यकाव्यपद्धतेः सम्बन्धिनः। तर्हि वैदर्भमार्गः काव्यशरीरं प्राणिति। तदभावे त्वसन्नेव। ततश्च शब्दालङ्कारभूतः श्लेषादिदशगुणात्मकः काव्यरचनाविशेषो दाक्षिणात्यानां स्वाभाविको वैदर्भमार्ग इत्यर्थः सम्पद्यते। एवंरूपस्तावद्वैदर्भमार्गः। गौडीयः किंरूपः, तद्विपरीतस्वभाव इति दर्शयन्नाह–एषामित्यादि। एषां श्लेषादीनां विपर्ययो विपक्षोऽश्लेषादिः लक्ष्यते दृश्यते, कुत्र? गौडानां वर्त्मनि काव्ये। अर्थव्यक्त्यादेः कस्यचिद् गुणस्य साधारणत्वात् प्राय इत्याह। बाहुल्येनेत्यर्थः। प्रायोग्रहणसंगृहीतं साधारणगुणं स्वयमेव यथावसरं दर्शयिष्यति। स्वाभाविकस्तेषामेषा रच[18a]नाप्रकारः। वैदर्भस्तु [१]कृत्रिमभावेन भवेदिति भावः॥

इदानीं यथोद्देशमेषां निर्देशं संविपर्ययं सोदाहरणं कुर्वन्नाह–

हृदयङ्गमा

केचित्तु चतुर्विंशतिसङ्ख्यका गुणा इत्यप्याहुः यथा,–''चतुर्विंशतिसङ्ख्यातास्तेषु ये शब्दसंश्रयाः। ते तावदभिधीयन्ते नामलक्षणयोगतः॥ श्लेषः प्रसादः–'' इत्युपक्रम्य ''ओजस्तथान्यदौचित्यं प्रेयानथ सुशब्दता। तद्वत् समाधिः सौक्ष्मायञ्च गाम्भीर्य्यमथ विस्तरः॥ सङ्क्षेपः सम्मितत्वञ्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाविकत्वं गतिस्तथा। रीतिरुक्तिस्तथा प्रौढ़िरथैषां लक्ष्यलक्षणे।।'' इति। तथा शब्दगुणानां वाह्यत्वमर्थगुणानामान्तरत्वं, ये तु दोषत्वेऽपि गुणतां यान्ति तेषां वैशेषिकत्वञ्चाहुः, यथा,–''त्रिविधाश्च गुणाः काव्ये भवन्ति कविसम्मताः। वाह्याश्चाभ्यन्तराश्चैव ये च वैशेषिका इति।। वाह्याः शब्दगुणास्तेषु चान्तरास्त्वर्थसंश्रयाः। वैशेषिकास्तु ते नूनं दोषत्वेऽपि हि ये गुणाः।।'' इति। दर्पणकारादयस्तु आत्मनः शौर्य्यादय इव रसस्य काव्यात्मभूतस्य धर्मा माधुर्य्यौजः प्रसादा एव गुणा इत्याहुः)। गौड़वर्त्मनि गौड़ीयरीत्याम्, एषां श्लेषादिदशगुणानां, प्रायः बाहुल्येन, विपर्य्ययः वैपरीत्यं, दृश्यते; विपर्य्ययश्च क्वचित् सर्वथा, क्वचित् केनचित् अंशेनेति बोध्यम्। अत्र प्राय इत्यनेन कुत्रचित् एतयोः समताऽपि। [वैदर्भीरीतिस्तु स्वल्पप्राणाक्षरवत्त्वादित्वेन गौड़ीरीतिस्तु वैदर्भीविरुद्धधर्मवत्त्वेनेति अनयोर्भेदः समूहनीयः। उक्तञ्च,–''असमस्तैकसमस्ता युक्ता दशभिर्गुणैश्च वैदर्भी। वर्गद्वितीयबहुला स्वल्पप्राणाक्षरा च सुविधेया।।'' इति। ''बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौड़ीया। रीतिरनुप्रासमहिमपरतन्त्राऽस्तोभवाक्या च।।'' इति। वामनस्तु समग्रगुणयुक्तत्वे वैदर्भी ओजःकान्तिगुणवत्त्वे गौड़ीया इत्येवं भेदमाह, यथा,–''ओजःकान्तिमती गौड़ीया (का० सू० वृ० १अधि० २अ० १२सू०) इति। तत्र श्लोकः–समस्तात्युत्कटपदाभोजः कान्तिगुणान्विताम्। गौड़ीयामिति गायन्ति रीतिं रीतिविशारदाः।।'' इति]।।४२।।

प्रभा

इतीति। इति पूर्वं निर्दिष्टाः श्लेषादिसमाध्यन्ता दश गुणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैदर्भमार्गस्य प्राणाः प्राणवत् स्थितिहेतवः। स्मृता भरतादिभिः कथिताः इत्यर्थः। तथा च भरतः–

श्लेषः प्रसादः समता समाधिर्माधुर्यमोजः पदसौकुमार्यम्।
अर्थस्य च व्यक्तिरुदारता च कान्तिश्च काव्यार्थगुणा दशैते।।
इति। (२.९२)

अनेन दशसंख्याकगुणस्वीकारे नाट्यसूत्रकारस्य आनुकूल्यं प्रदर्शितम्। तेन च माधुर्यौजः प्रसादाख्यास्त्रयस्ते न पुनर्दश इति अर्वाचीनानां (का० प्र० ८.६८) उद्घोषः प्रमाणविरुद्ध इति ज्ञेयम्। इत्थं च श्लेषादिगुणवती पदरचना वैदर्भी रीतिरिति लक्षणं निष्पन्नम्। भोजराज आह–

तत्रासमासा निःशेषश्लेषादिगुणगुम्फिता।
विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते।। इति। (२.२९)

नव्यास्तु रसधर्मानेव गुणान् मन्वानास्ते गुणाश्च माधुर्यौजः प्रसादाख्यास्त्रय एव सन्तीति मन्यन्ते, शब्दार्थमात्रवृत्तीनां श्लेषादीनां च पृथग्गुणत्वं नाङ्गीकुर्वन्ति। तांश्च उक्तगुणत्रयेन्तर्भावयन्ति। तदुक्तं प्रकाशे–

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।
उत्कर्षहेतवस्ते स्युरचलस्थितिहेतवः।।
माधुर्यौजः प्रसादाख्यास्त्रयस्ते न पुनर्दश।। इति। (८.६६)

परमेतत् सर्वं भरतवचनविरुद्धत्वाच्चिन्त्यम्। एते गुणा उपरिनिर्दिष्टेषु कस्मिन् गुणे तैरन्तर्भावितास्तत् तत्तद्गुणनिरूपणप्रसङ्गे दर्शयामः। एवं वैदर्भीं निरूप्य गौडीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दर्शयति–**एषामिति।** गौडवर्त्मनि गौडमार्गे एषां गुणानां विपर्ययो व्यत्यासः। स च कुत्रचिदत्यन्ताभावरूपः कुत्रचिदंशतः संबन्धरूपश्च प्रायो दृश्यते। प्रायः इत्यनेन क्वचिदुभयोः साम्यमपि अस्तीति सूच्यते। यथा ग्राम्यत्वानेयत्वादिविषये उभयोरैकमत्यम्–एवमादि न शंसन्ति मार्गयोरुभयोरपि (१.६७) नेदृशं बहु मन्यन्ते मार्गयोरुभयोरपि (१.७५) इत्यादिनोपवर्णितम्। अत एव असमस्तगुणा गौडी इति कैश्चित् प्रतिपादितम्। इत्थं च प्रायो वैदर्भी विरुद्धगुणवती पदरचना गौडी इति लक्षणं निष्पन्नम्। तादृशविरुद्धधर्मत्वं च दीर्घसमासपरुषाक्षरप्राचुर्यौद्धत्यरचना-विशेषालित्वम्। तथा च भोजराजः

समस्तात्युद्भटपदामोजः कान्तिगुणान्विताम्।
गौडीयेति विजानन्ति रीतिं रीतिविचक्षणाः।। इति। (२.३१)

पुरुषोत्तमोपि–

बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौडीया।
रीतिरनुप्रासमहिमपरतन्त्रा स्तोभवाक्या च।। इति।

एषु गुणेषु श्लेषः समता सुकुमारता ओज इति चत्वारः शब्दगुणाः। प्रसादः अर्थव्यक्तिः उदारता कान्तिः समाधिरेते पञ्च अर्थगुणाः। माधुर्यं तु शब्दगुणः अर्थगुणश्चेति ग्रन्थकर्तुर्मतम्। वामनादयस्तु शब्दगुणा अर्थगुणाश्च प्रत्येकं दशसंख्याकाः सन्तीति स्वीकुर्वन्ति। तत्तल्लक्षणानि विधाय च उदाहरणान्यपि दर्शयन्ति। विस्तारभयान्नात्र सर्वो विषयः संग्रहीतुं शक्यते। स तु वामनादिग्रन्थेषु द्रष्टव्यः।।४२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

मार्गभेदकरान् गुणान् उद्दिशति–**श्लेष इति** द्वयेन। प्रायः शब्दः अर्थव्यक्त्यौदार्यसमाध्यादयो गुणा उभयसाधारणा इति दर्शयति।।४२।।

प्रतिज्ञातभेदकरान् गुणान् दर्शयितुमाह–**श्लेष इति।** एषां श्लेषादीनां विपर्ययः अन्यथात्वं गौडप्रस्थाने लक्ष्यते। प्रायोग्रहणं साकल्यनिवृत्त्यर्थम्। तेन अर्थव्यक्त्यौदार्यसमाधिगुणा उभयमार्गतुल्या इति गम्यते।।४२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिलष्टमस्पृष्टशैथिल्यमल्पप्राणाक्षरोत्तरम्।
शिथिलं मालतीमाला लोलालिकलिला यथा॥४३॥

रत्नश्री

शिथिलस्य भाव शैथिल्यं बन्धलाघवम्। अस्पृष्टं त्यक्तम्। अस्पृष्टं शैथिल्यं येन तदस्पृष्टशैथिल्यमित्यत्र शिलष्टं विधीयते। यद् दृढबन्धकाव्यं तत् शिलष्टं श्लेषयोगाद्वेदितव्यमिति। स्वतन्त्रस्य धर्मस्यासम्भवात् धर्मिनिष्ठः श्लेषो दर्शितः प्राक्। तन्मते विवक्षया स्वशब्देनोपात्तः। एवं प्रसादादिष्वप्यनुसर्त्तव्यम्। श्लेषविपर्ययं दर्शयन्नाह- अल्पप्राणेत्यादि। अल्पप्राणानि वर्गप्रथमादीनि अक्षराणि उत्तराणि भूयांसि यस्मिन् तैर्वोत्तरमधिकं तदनूद्य शिथिलं विधीयते। अल्पप्राणावर्णप्रायं तच्छिथिलं शिलष्टविपरीतं काव्यं वेदितव्यम् इति। यथेत्युदाहरति। यथेदं शिथिलं तथान्यदप्येवंजातीयकं द्रष्टव्यमिति यथाशब्दार्थः। एवमुत्तरत्राप्यनुगन्तव्यम्। मालतीमाला जातिपुष्पस्त्रगियं लोलैः कुसुमसौरभलोलुपैरलिभिर्भ्रभरैः कलिला व्याप्ता इत्यर्थः॥

यदि शैथिल्यं दुष्टमेवंविधं गौडैरादृतम्, तदिहापि केनचित् गुणेन भवितव्यम् अन्यथा सर्वथा निर्गुणं कथमाद्रियत इत्याह-

हृदयङ्गमा

इदानीं श्लेषादीनां लक्षणानि निरूपयति, शिलष्टमित्यादि। –अल्पः प्राणः सारः, उच्चारणप्रयासः इत्यर्थः, येषां तानि अक्षराणि उत्तराणि प्रधानानि, प्रचुराणि इति यावत्, यस्मिन् तादृशम्, अल्पप्राणाक्षराश्च ह्रस्वस्वरा वर्गीया विषमवर्णा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यरलवाश्चेति; अस्पृष्टं शैथिल्यं येन तत् विन्यासवशात् शिथिलत्वेन अलक्ष्यमाणं वाक्यं श्लिष्टं श्लेषगुणयुक्तमित्यर्थः, तथा च अल्पप्राणाक्षरघटितबन्धस्याप्यन्तरान्तरा महाप्राणाक्षर-विन्यासेन भिन्नानामपि पदानामेकपदताप्रतिभासहेतुत्वेन सन्दर्भस्याशिथिलत्वप्रतिभासनं श्लेष इति फलितम्। (उक्तञ्च क्रमदीश्वरेणापि,–"अल्पप्राणेषु वर्णेषु विन्यासोऽप्यन्तरान्तरा। महाप्राणस्य च श्लेषो यथाऽयं भ्रमरध्वनिः।।" इति)। श्लेषलक्षणमभिधाय तद्विपर्य्ययभूतं शिथिलमुदाहरणेन दर्शयन् गौड़ीमतमुपन्यस्यति, शिथिलमिति।–शिथिल श्लेषलक्षण-विपर्य्यासरूपमतिकोमलम्। यथा इति उदाहरणप्रदर्शनपरं, मालतीमाला लोलैः चपलैः, अलिभिः भ्रमरैः, कलिला व्याप्ता, अत्र दन्त्यवर्णप्रायत्वेनातिकोमलत्वान्न वैदर्भैः श्लेषत्वमङ्गीक्रियते, गौड़ैस्तु बन्धगाढ़तया अनुप्रासवत्तया च तदिष्यते इति भावः। (भोजस्तु एवंविधमुदाहरणमरीतिमदाख्यदोषदुष्टं मन्यते, यदाह,–"गुणानां दृश्यते यत्र श्लेषादीनां विपर्य्ययः। अरीतिमदिति प्राहुः–।।" तत्र "विपर्य्ययेण श्लेषस्य सन्दर्भः शिथिलो भवेत्" इति लक्षणं विधाय शिथिलमुदाहृतं यथा,–"आलीयं मालतीमाला लोलालिकलिला मनः" इति। एतेन यत् केनचित् "अत एव शिथिलम् इत्यत्र अपिकारोऽध्याहर्त्तव्यः शिथिलमपि अनुद्धतमपि, अस्पृष्टम् अप्रकाशितं, शैथिल्यं यस्य तत्" इत्येवं व्याख्याय मालतीमाला इंत्यादिकमुदाहरणं लक्ष्यत्वेन दर्शितं तदसङ्गतमिव प्रतिभाति, तथात्वे वैदर्भगौडयोरेकोदाहरणतया "वर्ण्येते प्रस्फुटान्तरौ" इत्यस्यासङ्गतिरेव स्यात्। तथा वक्ष्यमाणेऽपि "अनुप्रासधिया गौड़ैः" इत्यादौ 'इति' इत्यस्य इत्यपीत्यर्थं विधाय यत् "मालतीमाला" इत्यादावनुप्राससद्भावे वैदर्भगौडयोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समानविषयत्वं, वक्ष्यमाणे "मालतीदाम" इत्यादौ अनुप्रासासद्भावे तु भिन्नविषयत्वं दर्शितं तदपि न, तादृशमेदकल्पने मानाभावात् गौरवाञ्च। तथा हि दण्डिमतमनुसरता भोजेन विशदीकृत्योक्तं,–"श्लिष्टमस्पृष्टशैथिल्यं शिथिलं तद्विपर्य्ययः। गौड़ीयैरिष्यते तत्तु बन्धप्राशस्त्यगौरवात्।। यथा– लीलाविलोलललनाललितालकलासकाः। विलुप्तमालतीमाला जलकालानिला ववुः।।" इति। किञ्च, "गुणः सुश्लिष्टपदता श्लेष इत्यभिधीयते" इति श्लेषलक्षणं विदधता "उभौ यदि व्योम्नि पृथक् प्रवाहौ" इत्याद्युदाहरणञ्च दर्शयता तेन श्रुत्यनुप्रासवत्सन्दर्भे वैदर्भाणां श्लिष्टत्वं प्रमाणोकृतमेव। गोड़मते तु अनुप्रासमहिम्ना बन्धस्य गाढ़ताऽवभासादत्र श्लेषाख्यगुणो बोद्धव्यः इति सर्वमवदातम्। अन्येऽपि गौड़ीलक्षणश्लेषमुदाहरन्ति यथा,–"उन्मज्जज्जलकुञ्जरेन्द्ररभसास्फालानुबन्धोद्धतः सर्वाः पर्वतकन्दरोदरभुवः कुर्वन् प्रतिध्वानिनीः। उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथाऽयं तथा प्रायः प्रेङ्खदसङ्ख्यशङ्खधवला वेलेयमुद्गच्छति।।" इति। अत्रानुप्राससद्भावात् महाप्राणाक्षर–घटितत्वत् बन्धस्य विकटत्वाञ्च गौडीलक्षणः श्लेषः, अनुप्रासमात्रस्य लक्षणघटकत्वे तद्घटितवक्ष्यमाणमाधुर्य्यादौ अतिव्याप्तेरिति ज्ञेयम्)।।४३।।

प्रभा

तत्रोद्देशक्रमानुरोधेन प्रथमं श्लेषं लक्षयति–श्लिष्टमिति। अस्पृष्टशैथिल्यम् अस्पृष्टं असंबद्धं शैथिल्यं असंयुक्ताल्पप्राणाक्षरबाहुल्येन शिथिलमिव भासमानत्वं यस्मिंस्तत्। तञ्च अन्तरान्तरा निवेशितैर्महाप्राणाक्षरैः संयुक्तवर्णैश्च भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शैथिल्यार्थविबोधाय तल्लक्षयति– अल्पप्राणाक्षरोत्तरमिति। अल्पः प्राणः उच्चारणप्रयत्नो येषामिति अल्पप्राणा असंयुक्ताक्षराणि वर्गाणां प्रथमतृतीयपञ्चमा यरलवाश्च ते उत्तराः प्रधाना बहुला वा यत्र तत् शिथिलम्। एतदेव उदाहरणेन विशदयति–मालतीति। लोलाः सोरभाहरणाय लोलुपा अलपो भ्रमरास्तैः कलिला व्याप्ता। मालतीमाला मालतीस्त्रक् विलसतीति शेषः। अत्र असंयुक्ताल्पप्राणवर्णबाहुल्याच्छैथिल्यम्॥४३॥

विवृति

तत्रोद्दिष्टानां श्लेषादीनां लक्षणमाह–

तत्रास्पृष्टशैथिल्यं यत् तत् श्लिष्टमुच्यते। अथ शिथिलं किमुच्यत इत्याह–अल्पप्राणाक्षरोत्तरम्, अल्पप्राणानि अक्षराणि उत्तराणि बहूनि यत्र तत् शिथिलम्। तस्योदाहरणमाह–मालमीमाला लोलालिकलिला यथा। लोलाश्च ते अलयश्च तैः कलिला व्याप्ता। मालतीमालेति अल्पप्राणलकाराक्षरप्राचुर्यादिदं शिथिलम्। एवंविधेन यत्र स्पृष्टं तत् श्लिष्टमुच्यते। इदं शिथिलमपि अनुप्रासधिया गौडोरिष्टम्। यदुक्तं भामहेन–'सरूपवर्णविन्यासमनुपासं प्रचक्षते' इति। वैदर्भैः पुनः बन्धगौरवमाश्रितम्। अतो नैवंविधमिष्टं शिथिलम्, अश्लिष्टत्वादस्य। ते हि वैदर्भाः अमुमेवार्थमेभिरक्षरैरेवमाहुः–मालतीदाम लंघितं **भ्रमरैरिति**॥४३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुप्रासधिया गौडैस्तदिष्टं बन्धगौरवात्।
वैदर्भैर्मालतीदाम लंघितं भ्रमरैरिति॥४४॥

रत्नश्री

तदिति शिथिलमिष्टमादृतं गौडैरनुप्रासो माधुर्यसंगृहीतः शब्दालङ्कारस्तस्य तस्मिन बुद्ध्याऽनुप्रासः शब्दरसो गुणोऽस्तीति तैरेवंविधमिष्टम्। शैथिल्यं तु दोषो न दृष्टः। अनुप्रासधियेत्यनेन चैतत् कथयति। अनुप्रासोऽपि गौडानामेवंविधो यः शैथिल्यमा[18b]बहति। पारुष्यं चेति। यद्वक्ष्यति-

इत्यादि बन्धपारुष्यं शैथिल्यं च नियच्छति।
अतो नैवमनुप्रासं दाक्षिणात्याः प्रयुञ्जते॥

[1.60]

इति दाक्षिणात्येष्टं पश्चाद् दर्शयिष्यति। श्लेषमुदाहरन्नाह-वैदर्भैः दाक्षिणात्यैर्मालतीदाम लंघितं भ्रमरैरिति ईदृशं श्लिष्ट[मिष्ट]मिति प्रकृतम्। कुतः? बन्धस्य रचनायागौरवात् शैथिल्यात् कारणात्। अर्थस्तु पूर्वक एव। नन्वत्रापि दोषोऽस्ति माधुर्यलक्षणास्यानुप्रासस्याभावात्। अमाधुर्य लक्षणम् (?)॥

प्रसादः कीदृश इत्याह-

हृदयङ्गमा

अनुप्रासधियेति।—गौडैः गौडदेशनिवासिभिः कविभिः, अनुप्रासधिया अनुप्रासो वर्णावृत्तिरूपः शब्दालङ्कारः, तस्य धिया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बोधेन, तथा बन्धगौरवात् अनुप्राससद्भावेन रचनाया गाढ़त्वात्, तत् मालतीमालेत्यादि श्लेषोदाहरणम्, इष्टम् अभिलषितं, ते अनुप्रासबहुलामोजःकान्तिमतीं रचनां प्रायश इच्छन्तीति भावः। (एतेन गौड़ानां सुमहाप्राणाक्षरवर्णघटितत्वाभावेऽपि यत्रानुप्रासबाहुल्यं बन्धगाढ़त्वञ्च भवेत् तदप्यभिमतम्)। ततश्च वैदर्भीगौडयोः को भेद इत्याह, वैदर्भैरिति।—वैदर्भैः विदर्भदेशीर्यैः कविभिः, "मालतीदाम लङ्घितं भ्रमरैः" इति एवंरूपम्, अनुप्रासहीनमपि वाक्यमित्यर्थः, इष्टं श्लिष्टत्वेनाङ्गीकृतं, तेषाम् अनुप्रासासद्भावेऽपि श्लेषत्वकीर्त्तनादिति भावः। [यद्यपि अनुप्रासवच्छ्लेषोदाहरणे वैदर्भीगौडयोः साम्यं दृष्टं, तथाऽपि अनुप्रासहीनोदाहरणे गौड़ीलक्षणाप्रवेशादुभयोर्भिन्नविषयत्वं दर्शितमिति दिक्। अयञ्च श्लेषः शब्दमात्रगुणः। अर्थगुणस्तु अन्यैरुक्तो यथा,—"तेषां श्लेषः इति प्रोक्तः संविधाने सुसूत्रता" इति। वामनेनापि यथोक्तं,—"घटना श्लेषः" (का० सू० वृ० ३अधि० २अ० ४सू०) इति; घटना च क्रमकौटिल्यानुल्वणत्वोपपत्तियोगः। तत्र इदं कृत्वा इदं कर्त्तव्यमिति क्रमः, लोकातिगामिनी वक्रता कौटिल्यम्, अतिमात्रतया प्रतिभासाभावोऽनुल्वणत्वं, कथमेवमर्थः सङ्गच्छते इति अनुपपत्तिसमाधानौपयिकविशेषनिवेशनम् उपपत्तिः; तथा च क्रमेण कौटिल्येन अनुल्वणतया उपपत्त्या योजनमर्थश्लेष इति लक्षणम्। अत एव दर्पणकारेणोक्तं यथा,—"श्लेषः क्रमकौटिल्यानुल्वणत्वोपपत्तियोगरूपघटनात्मा। तत्र क्रमः क्रियासंन्ततिः, विदग्धचेष्टितं कौटिल्यम्, अप्रसिद्धवर्णना-विरहोऽनुल्वणत्वम्, उपपादकयुक्तिविन्यास उपपत्तिः, एषां योगः सम्मेलनं, स एव रूपं यस्याः घटनायाः तद्रूपः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा,–'दृष्ट्वैकासनसंस्थिते प्रियतमे' इत्यादि; अत्र दर्शनादयः क्रिया, उभयसमर्थनरूपं कौटिल्यं, लोकसंव्यवहाररूपमनुल्वणत्वम्, 'एकासनसंस्थिते' 'पश्चादुपेत्य' 'नयनेपिधाय' 'ईषद्वक्रितकन्धरः' इति चोपपादकानि, एषां योगः'' इति]।।४४।।

प्रभा

एवंविशिष्टं शैथिल्यं वैदर्भैर्नाद्रियते चेत् केषां तत्स्वीकरणेभिनिवेशोस्तीति कथयति–**अनुप्रासेति।** गौडैः पौरस्त्यैः। अनुप्रासो वर्णावृत्तिरनुप्रास इत्यचिरादेव लक्षिष्यमाणो वर्णानुप्रासस्तस्मिन् या धीरनुरागबुद्धिस्तया। अथवा अनुप्रासस्य या धी रचनाबुद्धिः तया। तत् शिथिलम् मालतीमालेतिवत् शिथिलं काव्यम्। इष्टम् ईप्सितम्। सर्वथा अनुप्रासप्रिया गौडा इति भावः। अस्पृष्टशैथिल्यात्मकं प्रकृतं श्लेषोदाहरणं दर्शयति–**मालतीदामेति।** भ्रमरैर्मालतीदाम लङ्घितम् व्याप्तम् इति ईदृशमेव श्लेषोदाहरणम् वैदर्भैर्बन्धगौरवात् बन्धस्य रच्यमानकाव्यस्य गौरवं निबिडत्वम् तस्मात्। अनुमतमिति भावः। अत्र संयुक्तमहाप्राणवर्णसद्भावात् शैथिल्यं नास्ति। ततश्चास्पृष्टशैथिल्यत्वादिदं श्लेषोदाहरणं ज्ञेयम्। अपरमिदमुदाहरणम्–

प्रेक्षामृदङ्गनिनदानुपकर्ण्य तूर्ण-
मम्भोदनादरभसा ननृते मयूरैः।
यन्मन्दिरे सरलकण्ठमकुण्ठकूज-
मुन्मण्डलीकृतशिखण्डमकाण्ड एव।। इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र कैश्चित् शिथिलशब्दस्य, पुरतः, अपिशब्दमध्याहृत्य अल्पप्राणाक्षरोत्तरं अतः शिथिलमपि अस्पृष्टशैथिल्यं रचनाविशेषेणास्फुटशैथिल्यं यत् तत् श्लिष्टम्। उदाहरणं च मालतीमालेति एवं व्याख्याय अयं श्लेषगुणोनुप्रासधिया गौडानामपीष्ट इत्युपपाद्य अनन्तरं अनुप्रासरहितोपि वैदर्भसंमतः श्लेषो भवति तस्योदाहरणं मालतीदामेति एवं व्याख्याचि। ततश्च वैदर्भगौडानामत्र ऐकमत्यमेवेति प्रत्यपादि। परं तन्न रुचिरम्। अपिशब्दस्याध्याहारस्तथा अस्पृष्टशब्दस्याप्रकाशितेत्यर्थकरणं च क्लिष्टं भवति। अतस्तद्व्याख्यानं न ग्रन्थकृदभिप्रेतमिति सुधीभिर्विचार्यम्।। अस्य गुणस्य निरूपणे साहित्यशास्त्रविदुषां विविधाः प्रकाराः सन्ति ताँल्लेशतो दर्शयामः। तत्र तावत् स्वभावस्पष्टं विचारगहनं वचः श्लेष इति भरतः। उक्तं च तेन षोडशेध्याये–

विचारगहनं यत् स्यात् स्फुटं चैव स्वभावतः।
स्वतः सुप्रतिबद्धं च श्लिष्टं तत् परिकीर्तितम्।।(१६.९४)

इति।

अस्योदाहरणम्–

क्षणं स्थिताः पक्ष्मसु ताडिताधराः पयोधरोत्सेधनिपात-चूर्णिताः।
वलीषु तस्याः स्खलिताः प्रपेदिरे चिरेण नाभिं प्रथमोदबिन्दवः।। इति।

अयं अभिधानाभिधेयपद्धतिविशेषो नायं संदर्भरचनाविशेष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति असंतुष्टा रचनाविशेषमेव श्लेषगुणं मन्वते वामनीयाः। तदाह वामनः–मसृणत्वं श्लेषः। (३.१.१०) – मसृणत्वं नाम यस्मिन् सति बहूनि पदानि एकवद्भासन्ते। एतदेवोपसंहारकारिकायां स विशदयति–

यत्रैकपदवद्भावः पदानां भूयसामपि।
अनालक्षितसन्धीनां स श्लेषः परमो गुणः।। इति।

एतदुदाहरणम्–अस्त्युत्तरस्यां दिशि देवतात्मा इत्यादिकम्। गुणः सुश्लिष्टपदता श्लेष इत्यभिधीयते। इति भोजः (१.६६) उदाहरति च

उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगङ्गापयसः पतेताम्।
तदोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः।। इति।

अत्र भिन्नानामपि पदानामेकपदताप्रतिभासहेतुत्वेन संदर्भस्य सुश्लिष्टत्वात् श्लेषो नाम गुण इति। प्रकाशकृदाह–बहूनामपि पदानामेकपदवत् भासनात्मा श्लेष इति। (८.७२ वृत्ति) गौडास्तु शिथिलमेव श्लेषत्वेनाद्रियन्ते यथा

लीलाविलासवनितालिलितालकलासकाः।
विलुप्तमालतीमाला जलकालानिला ववुः।। इति। (भोजः १.३१)

कविर्जगन्नाथो ब्रूते–शब्दानां भिन्नानामपि एकत्वप्रतिभान प्रयोजकः संहितयैकजातीयवर्णविन्यासविशेषो गाढत्वापरपर्यायः श्लेषः। यथा–अनवरतविद्वद्द्रुमद्रोहिदारिद्र्यमाद्यद्द्विपोद्दामदर्पौघ-विद्रावणप्रौढपञ्चाननः इति। (५६ पत्रे) अयं श्लेष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ओजस्येवान्तर्भवतीति प्रकाशकारादयोर्वाचीना मन्वते। तदुक्तं दर्पणे–

श्लेषः समाधिरौदार्यं प्रसाद इति ये पुनः।
गुणाश्चिरंतनैरुक्ता ओजस्यन्तर्भवन्ति ते।। इति। (८.९-१०)

परमेतन्मतं पूर्वोक्तभरतवचनविरुद्धत्वादुपेक्ष्यमेव। इमं श्लेषं संविधाने सुसूत्रता (१.७८) इति लक्षणं विधाय भोजोर्थगुणत्वेनापि स्वीकरोति। किंतु न स तथा वैशिष्ट्यावह इत्युपेक्षितोस्माभिः।।४४।।

विवृति

श्लेषं तद्विपर्ययं शैथिल्यं च लक्षयति–**शिलष्टमिति।** शिलष्टं श्लेषगुणयुक्तम्। वाक्यम् इति शेषः। अल्पप्राणाक्षरोत्तरम्–अल्पप्राणाक्षरमयमेव यद्वाक्यं–तत् शिथिलम्। तथा च वक्ष्यति–'बन्धशैथिल्यदोषो हि दर्शितः सर्वकोमले'–इति। तद्विपरीतं शिलष्टम्। शैथिल्यश्लेषयोः उदाहरणे मार्गभेदेन दर्शयति–मालतीमालेति मालतीदामेति च।।

उक्तान् गुणान् अत्र सोदाहरणं क्रमेण अनुसन्धत्ते–**शिलष्टमिति।** श्लेष एव शिलष्टम् इत्युच्यते। अत्र भावे क्तः। अस्पृष्टशैथिल्यम्। वर्णानां गुम्फनसमये यत् शिथिलत्वेन न प्रतिभाति तत् अस्पृष्टशैथिल्यम्। तदपि; महाप्राणवद्भिः अक्षरैः भवितव्यम्; तदन्यत् शिथिलम् अल्पप्राणाक्षरभूयिष्ठम्; अन्तस्थाभिः वर्गाणां प्रथमतृतीयपञ्चमाक्षरैश्च भवितव्यम्। क्रमोल्लङ्घनेन शिथिलस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदाहणं आह–**मालतीमालेति।** यत् शिथिलस्य उदाहरणसूचनं तदेतत् शिथिलमपि अनुप्रासबुद्ध्या गौडैः इह स्वीकृतं इत्याह–**अनुप्रासेति।** शिथिलमपि तत् पूर्वोक्तं अनुप्रासबुद्ध्या गौडैः स्वीकृतम्। वैदर्भैस्तु रचनादाढ्यर्यात् श्लेषः स्वीकृतः–मालतीदाम लङ्घितं भ्रमरैः इति। लङ्घितम् आक्रान्तम्; इतिशब्दः उदाहरणे।।४४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसादवत् प्रसिद्धार्थमिन्दोरिन्दीवरद्युतिः।
लक्ष्म लक्ष्मीं तनोतीति प्रतीतिसुभंग वचः॥४५॥

रत्नश्री

प्रसिद्धं प्रकाशः सुगमोऽर्थोऽभिधेयं शब्दार्थौ यस्य तत्तथा। नतु भावार्थः, तरय स्वभावगम्भीरत्वात्। तदुक्तम्–

कवेरभिप्रायमशब्दगोचरं स्फुरत्प्रकाशेषु पदेषु केवलम्।
विशन्ति भावज्ञतया कृतश्रमाः [प्रकाशयन्त्याशय-मर्थगौरवम्॥]

इति। ततः प्रसिद्धार्थमनूद्य प्रसादवत्प्रसादगुणयुक्तं प्रसन्नं वेदिव्यमिति विधीयते। कथयन्नेव उदाहरति–इन्दोश्चन्द्रस्य लक्ष्म चिह्नम् इन्दीवरद्युति नीलोत्पलशोभं लक्ष्मीं श्रियं तनोति विस्तारयति इन्दावेव। नीलोत्पलरुचिना चिह्नेन चन्द्रः शोभत इत्यर्थः। इत्येवंविधं वचः काव्यम्। प्रतीत्या झटित्यर्थावगमेन सुतरां मनोहरं प्रसन्नमिति यावत्। भावार्थगम्भीरं तु यद् भवेत् तदपि प्रसन्नमेव। शब्दार्थप्रसत्तेः प्रतिविशिष्टमेव च तादृशम्। यदाह भारविः–

प्रवर्त्तते नाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वतीति।

[किरातार्जुनीये 14.3]

पतन्तः पद्मगर्भेषु लोहिताः सूर्यरश्मयः।
चरणेषु वरस्त्रीणां शोभ[न्ते विद्रु]मा इव॥

इत्यपरमुदाहरणम्॥

प्रसादविप[19a]र्ययमितरस्मिन् मार्गे दर्शयन्नाह–,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

प्रसादं निरूपयति, प्रसादवदिति।—प्रसिद्धः अर्थः प्रतिपाद्यवस्त यस्य तत् उभयार्थकशब्दानाम् अप्रसिद्धार्थे प्रयोगो निहतार्थतारूपदोषः तद्रहितमित्यर्थः, प्रतीत्याम् अर्थपरिज्ञाने, सुभगं सरलं, झटित्यर्थबोधकमित्यर्थः, वचः वचनं, प्रसादवत् प्रसादगुणयुक्तं, तत्र उदाहरणम्, इन्दोरिति।—इन्दीवरं नीलोत्पलं, तद्वत् द्युतिर्यस्य तादृशं श्यामवर्णं, लक्ष्म कलङ्कः, इन्दोः चन्द्रस्य, लक्ष्मीं श्रियं, तनोति विस्तारयति। अब इन्द्वादिशब्दाः प्रसिद्ध चन्द्राद्यर्थेषु प्रयुक्ता झटित्यर्थबोधकाश्चेति ज्ञेयम्। [तथा चोक्तं कण्ठाभरणे,—"प्रसिद्धार्थपदत्वं यत् स प्रसादो निगद्यते।" यथा, "गाहन्ता महिषा निपानसलिलम्" इत्यादि, इह प्रसिद्धार्थपदोपादानात् प्रसादाख्यशब्दगुणत्वम्। अर्थगतप्रसादस्तु तत्रैवोक्तः यथा,—"यत्तु प्राकटयमर्थस्य प्रसादः सोऽभिधीयते" इति, अर्थस्य प्राकटयं वैमल्यम्; अत एंव वामनः,—"अर्थवैमल्यं प्रसादः" (का० सू० वृ० ३अधि० २अ० ३सू०) इति लक्षणमाह; यथा,—"अयमुदयति मुद्राभञ्जनः पद्मिनीनामुदयगिरिवनालीबालमन्दारपुष्पम्। विरहविधुरकोकद्वन्द्व-बन्धुर्विभिन्दन् कुपितकपिकपोलक्रोड़ताम्रस्तमांसि।।" इति; अत्र पद्मिनीविकाशकरणे कोकशोकहरणे तमोविदारणे च अनुक्तोऽपि सूर्य्यलक्षणोऽर्थः प्रकटमुपलक्ष्यते इति अर्थप्रसादः, तथा च निर्दोषत्वे मति परिस्फटार्थवत्पदत्वं प्रसाद इति भावः]।।४५।।

प्रभा

इदानीं क्रमप्राप्तं प्रसादं लक्षयति—**प्रसादवदिति।** प्रसिद्धार्थम् झटिति अर्थावबोधकम्। अत एव प्रतीतिसुभगम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतीतिरर्थावगमस्तत्र सुभगम् अनायासकरम्। वचो वाक्यम्। प्रसादवत् प्रसादगुणयुक्तम्। एवं च प्रसिद्धार्थपदप्रयोगेणार्थप्रतीतौ चेतः संतोषापादको गुणः प्रसाद इति लक्षणं निष्पन्नम्। उदाहरणमाह–**इन्दोरिति।** इन्दोश्चन्द्रस्य इन्दीवरं कमलं तद्वद्द्युतिर्यस्य तत् श्यामलम्। **लक्ष्म कलङ्कः।** लक्ष्मीम् शोभाम्। तनोति विस्तारयति। अत्र इन्द्विन्दीवरलक्ष्मादयः शब्दाश्चन्द्रकमलचिह्नादिप्रसिद्धार्थेषु प्रयुक्ताः श्रुतिमात्रेणैव अर्थावबोधकाः सन्तीति एतद्वाक्यं प्रसादगुणवदिति बोध्यम्। अयं च प्रसादः अर्थवैमल्यरूपोर्थगुण ओजोमिश्रितशैथिल्यरूपः शब्दगुणोपि वर्तते। स तु अग्रे स्फुटीभविष्यति। अत्रान्ये साहित्यनदीष्णा एवं वदन्ति। तथा च भरतः–

अथानुक्तो बुधैर्यत्र शब्दादर्थः प्रतीयते।
सुखशब्दार्थसंयोगात् प्रसादः परिकीर्त्यते।। (१६.९५) इति

एतदुदाहरणम्–

यस्याहुरतिगम्भीरजलप्रतिमं गलम्।
स वः करोतु निःसङ्गमुदयं प्रति मङ्गलम्।। इति।

वामनस्तु शैथिल्यं प्रसाद इत्याह। इदं शैथिल्यं च ओजसा संमिश्रं तेन प्रसादगुणत्वेन स्वीकृतम्–

श्लथत्वमोजसा मिश्रं प्रसादं च प्रचक्षते (३.१.६)

इत्यादिः। इति। ननु विरुद्धधर्मयोः श्लथौजसोः कथमेकत्रावस्थानमिति चेत्–

करुणप्रेक्षणीयेषु संप्लवः सुखदुःखयोः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथानुभवतः सिद्धस्तथैवौजः प्रसादयोः।। इति।

बहुविस्तारेण च तेन निरूपितं श्लथौजसोर्मिश्रत्वम्। तत् तद्ग्रन्थतोवबोद्धव्यम्। स तु प्रसादोदाहरणं वदति यथा–

कुसुमशयनं न प्रत्यग्रं न चन्द्रमरीचयो
न च मलयजं सर्वाङ्गीणं न वा मणियष्टयः।। (३.१.९)

इत्यादि। भोजराज आह–

प्रसिद्धार्थपदत्वं यत् स प्रसादो निगद्यते। (१.६६)

इति। उदाहरति च गाहन्तां महिषा इत्यादि।

काव्यप्रकाशकारोपि–श्रुतिमात्रेण शब्दात् तु येनार्थप्रत्ययो भवेत्।

साधारणः समग्राणां स प्रसादो गुणो मतः।। (८.७६) इति। उदाहरति च–

परिम्लानं पीनस्तनजघनसङ्गादुभयत-
स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशाङ्ग्याः संतापं वदति बिसिनीपत्रशयनम्।। इति।

वाग्भटोपि झटित्यर्थापकत्वं यत् प्रसक्तिः सोच्यते बुधैः (३.९)। इति लक्षणं कृत्वा कल्पद्रुम इवाभाति वाञ्छितार्थप्रदो जिनः। इति उदाजहार। काव्यानुशासनकारो वाग्भटोपि झगित्यर्थार्पणेन चेतोविकासजनकः सर्वरसरचनात्मकः प्रसादः (३१ पत्रे) इति लक्षणं विधाय उदाहरति–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पर्याप्तपुष्पस्तबकस्तनीभ्यः
स्फुरत्प्रवालोष्ठमनोहराभ्यः।
लतावधूभ्यस्तरवोप्यवापु-
र्विनम्रशाखाभुजबन्धनानि।। इति।

दर्पणकारः–

चित्तं व्याप्नोति यत् क्षिप्रं शुष्केन्धनमिवानलः।
स प्रसादः समस्तेषु रसेषु रचनासु च।। (८.७.८)

इति व्याख्यायोदाहरति–

सूचीमुखेन सकृदेव कृतव्रणस्त्वं
मुक्ताकलाप लुठसि स्तनयोः प्रियायाः।
बाणैः स्मरस्य शतशो विनिकृत्तवर्मा
स्वप्नेपि तां कथमहं न विलोकयामि।। इति।

जगन्नाथस्तु गाढत्वशैथिल्याभ्यां व्युत्क्रमेण मिश्रणं बन्धस्य प्रसाद इति प्रसादं लक्षयित्वोदाहरति–

किं ब्रूमस्तव वीरतां वयममी यस्मिन् धराखण्डल-
क्रीडाकुण्डलितभ्रुशोणनयने दोर्मण्डलं पश्यति।
माणिक्यावलिकान्तिदन्तुरतरैर्भूषासहस्रोत्करै-
र्विन्ध्यारण्यगुहागृहावनिरुहास्तत्कालमुल्लासिताः।। इति। (५६ पत्रे)

प्रागुपवर्णितः प्रसादाख्यो गुणः शब्दगुणः। अर्थगुणोप्ययम् अर्थवमैल्यलक्षणः कैश्चिदभ्युपगतः। यथाह भोजः –यत् तु प्राकट्यमर्थस्य प्रसादः सोभिधीयते। इति। (१.७९) उदाहरति च–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अयमुदयति मुद्राभञ्जनः पद्मिनीना-
मुदयगिरिवनालीबालमन्दारपुष्पम्।
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन्
कुपितकपिकपोलक्रोडताम्रस्तमांसि।।

अत्र पद्मिनीविकासरकरणे उदयशैलावतरणे कोकशोहरणे तमोविदारणे चानुक्तोपि सूर्यलक्षणोर्थः प्रकटमुपलक्ष्यते। इति।।४५।।

विवृति

श्लेषं व्याख्याय प्रसादलक्षणमाह–

यत् प्रसिद्धार्थं तत् प्रसादवदुच्यते। तदुदाहरति– इन्दोरिन्दीवरद्युति लक्ष्म लक्ष्मीं तनोति इति प्रतीतिसुभगं वचः।।४५।।

प्रसांद लक्ष्यलक्षणाभ्यां दर्शयति–**प्रसादवदिति**।।४५।।

प्रसादस्य उदाहरणमाद–**प्रसादवदिति**।।४५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्युत्पन्नमिति गौडीयैर्नातिरूढमपीमितिष्यते।
यथानत्यर्जुनाब्जन्मसदृक्षाङ्को बलर्क्षगुः॥४६॥

रत्नश्री

गौडीयैः पौरस्त्यैर्नातिरूढमपि अतिरूढमत्यन्तप्रसिद्धार्थम्। तद्विपरीतं नाति रूढमत्यन्ताप्रसिद्धार्थमपि। न केवलमप्रसिद्धमित्यपिशब्दः। अप्रसिद्धार्थमिष्यत एव। यद्यपि अतिशयेनाप्यप्रसिद्धार्थं गूढ़ामिधेयमप्रसन्नतरं तदपीष्यते इत्यर्थः। किं पुनः कारणं प्रसन्नं परित्यज्य अप्रसन्नमिष्यतो निष्कारणमेतन्न सम्भाव्यत इति चेदाहव्युत्पन्नमिति कृत्वा प्रसिद्धं सुकरमेवायत्ने[ना]पूर्वशब्दकल्पनया व्युत्पन्नं संस्कृतं विशिष्टं तद् व्युत्पन्नमन्यै रेतदिष्यते इतीदमत्र कारणम्। यथेत्युदाहरति। वलक्षाः शुक्ल। गावो रश्मयो यस्य स वलक्षगुश्चन्द्रः अत्यर्जुनं [अति]शुक्लं [न] तथाऽनत्यर्जुनं नीलम् अप्सु जन्म यस्य तदब्जन्म 'तञ्च नीलसन्निधानान्नीलोत्पलम्। तेन सदृक्षःसमानः [अङ्कः] चिह्नं यस्य सः। तथा नीलोत्पलसमानचिह्नश्चन्द्र इत्येतावत्यर्थे इयती व्युत्पत्तिः कृतेति व्युत्पन्ना गौड़ा इति॥

समत्वं निर्देशयन्नाह-

हृदयङ्गमा

गौड़ौयानां मतं दर्शयति, व्युत्पन्नमिति।—गौड़ीयैः तद्देशवासिभिः पण्डितैः, न अतिरूढ़मपि अनतिप्रसिद्धमपि, निहतार्थत्वदोषाकलितमपीत्यर्थः, व्युत्पन्नं व्युत्पत्तियुक्तं,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योगार्थघटितमित्यथः, वाक्यम्, इष्यते बन्धगाढ़तावशात् वैचित्राधायकत्वादङ्गीक्रियते, निहतार्थत्वादिदोषास्तु शिथिलबन्धे काव्ये एव गौडैः दोषत्वेन मन्यन्ते, गाढ़बन्धे तु वैचित्रयावहत्वेन न ते दोषा इत्याद्रियन्ते इत्यवधेयम्। उदाहरति, यथेति।–अनत्यर्जुनाजन्मसदृक्षाङ्कः अनत्यर्जुनं नातिधवलं, यत् अजन्म उत्पलं तस्य सदृक्षः सदृशः, अङ्कः कलङ्कः यस्य तथोक्तः, बलक्षः धवलः, गौः किरणो यस्य सः चन्द्र इति। (अत्र अर्जुनशब्दः कार्त्तवीर्य्यार्जुनपाण्डवयोः प्रसिद्धः श्वेतवर्णे अप्रसिद्ध इति निहतार्थत्वदोषदुष्टः, अब्जन्मशब्दश्च उत्पले केनापि न प्रयुक्ततया अप्रयुक्तदोषाकलितः, सदृक्षशब्दश्च उपमागर्भबहुव्रीहिणैवार्थबोधनात् अधिकः प्रयुक्त इति अधिकपदता-दोषयुक्त एव, तथा बलक्षशब्दोऽपि अप्रयुक्तता-दोषकलितः, श्रुतिकटू च सदृक्षबलक्षशब्दौ, तथा वृषादौ प्रसिद्धस्य गोशब्दस्य अप्रसिद्धे किरणे प्रयुक्तत्वात् तत्रापि निहतार्थतादोषः, 'अनत्युर्जनाब्जन्म' इत्यत्र सन्धौ कश्टत्वञ्च; इत्थञ्च बहुदोषमपि काव्यं सानुप्रासप्रबन्धस्य गाढ़त्वात् गौड़ाः काव्यत्वेनाद्रियन्ते। एवञ्च कष्टत्वादिदोषासद्भावेन झटित्यर्थो-पस्थापकत्वं प्रसाद इति वैदर्भाः। गौड़ीयकविभिस्तथाविधप्रसादो नाङ्गीक्रियते इति ततो भेदः। किञ्च सरस्वतीकण्ठाभरणे तु गुणविपर्य्ययादरीतिमदाख्यदोषोहरणत्वेन पद्यार्द्धतया निबद्ध-मिदम्,–"अप्रसन्नं भवेत् वाक्यं प्रसादस्य विपर्य्ययात्। यथा,–अनङ्ककमलं चक्रे मयमाना मरालिका।। यस्यानत्यर्जुनाब्जन्मसदृक्षाङ्को बलक्षगुः।।" इति, तेन च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैदर्भाणामिदं पद्यं दोषतयैव उदाहरणीयमित्यभिप्रायः। अयञ्च प्रसादाख्यगुणः अर्थगत एव, शब्दगतस्तु "ओजोमिश्रितशैथिल्यात्मा" इति दर्पणकारोक्तो वेदितव्यः ; उदाहृतञ्च तेनैव, यथा,–"यो यः शस्त्रं बिभर्त्ति स्वभुजगुरुमदात् पाण्डवीनां चमूनां, यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा। यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः, क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम्॥" इति। ननु विरुद्धयोः ओजः प्रसादयोः कथं मेलनमित्यपि नाशङ्कनीयम्, ओजोमिश्रितशैथिल्यस्य प्रसादगुणत्वेन विशुद्धशैथिल्यस्य तु दोषत्वेन सर्वैरेवाङ्गीकृतत्वात्। तथा हि "गाढबन्धत्वमोजः" (का० सू० वृ० ३अधि० १अ० ५सू०) "शैथिल्यं प्रसादः" (का० सू० वृ० ३अधि० १अ० ६सू०) इति सूत्रयता वामनेन ओजोविपर्य्ययरूपस्य शैथिल्यस्य गुणविपर्य्ययदोषत्वमेव स्यादिति शङ्कां पराकर्त्तुम् ओजसा मिश्रितस्य शैथिल्यस्य गुणत्वमित्युक्तं, यथा,–"गुणः संपलवात्" (का० सू० वृ० ३अधि० १अ० ७सू०) इति "न शुद्धः" (का० सू० वृ० ३अधि० १अ० ८सू०) इति सूत्रेण पुनः तदमिश्रितशैथिल्यस्य गुणत्वं निराकृत्य दोषत्वमेव स्थापितम्। विरुद्धयोरोजः प्रसादयोः कथं संप्लव इत्यतः उक्तं,–"स त्वनुभवसिद्धः" (का० सू० वृ० ३अधि० १अ० ९सू०) इति। अत्र च श्लोकः,–"करुणप्रेक्षणीयेषु संप्लवः सुखदुःखयोः। यथाऽनुभवतः सिद्धस्तथैवौजः प्रसादयोः॥" इति॥४६॥

NEPAL SANSKRIT UNIVERSITY

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

गौडास्तु अस्मिन् प्रसादे नात्यादरं दर्शयन्तीति सोदाहरणं दर्शयति-**व्युत्पन्नमिति।** गौडीयैर्गौडदेशनिवासिभिः। नातिरूढमपि अनतिप्रसिद्धमपि। निहतार्थादिदोषयुतमपीति भावः। व्युत्पन्नम् व्युत्पत्तियुक्तम्। योगार्थघटितमिति हेतोः। इष्यते एतत् प्रसादशून्यमतो न काव्यमिति तैर्न मन्यते अपि तु काव्यत्वेनाङ्गीक्रियते। तेषां प्रबन्धे गाढबन्धवैचित्रस्यैव प्राधान्यादिति भावः। उदाहरति **यथेति।** अर्जुनं धवलं अत्यर्जुनम् अतिधवलं अनत्यर्जुनं नातिधवलं एतादृशं यदब्जन्म अद्भ्यो जन्म यस्य तत् कमलं तस्य सदृक्षः सदृशः अङ्कः कलङ्को यस्य सः। वलक्षगुः वलक्षा धवला गावः किरणानि यस्य सः चन्द्रः। अत्र अर्जुनशब्दः कार्तवीर्यपाण्डवयोर्विशेषप्रसिद्धः श्वेतवर्णे न तादृश इति स निहतार्थदोषदुष्टः। अब्जन्मशब्दश्च कमले अप्रसिद्ध एव। सदृक्षशब्दश्च उपमागर्भबहुव्रीहिणैव तदर्थबोधनाद् अधिक इति अधिकपदतादोषदुष्टस्तथा श्रुतिकटुरपि। वलक्षगुशब्दश्च अप्रयुक्तदोषकलङ्कितः। एंवविधबहुदोषकलुषितापि एषा रचना व्युत्पन्नेयमवयवार्थादिना अर्थावबोधिकेयमिति अनुप्रासप्रिया गौडास्तां काव्यत्वेन स्वीकुर्वन्ति।।४६।।

विवृति

गौडीयैः पुनरिदमतिरूढमिति अतीव प्रसिद्धमिति नेष्यते। अनत्यर्जुनाब्जन्मसदृक्षाङ्को वलक्षगुरितीदमिष्यते व्युत्पन्नमिति यतः। अत्यर्जुनं धवलं तत्प्रतिषेधादनत्यर्जुनमसितं नीलम्। अप्सु जन्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्य तत् अब्जन्म उत्पलम्। अनत्यर्जुनं च तत् अब्जन्म च नीलोत्पलम्। तेन सदृक्षः सदृशः अङ्को लाञ्छनं यस्य स तथा। वलक्षाः शुभ्रा गावः करा यस्य वलक्षगुश्चन्द्रः।।४६।।

प्रसादविपर्ययं गौडेष्टं दर्शयति–**व्युत्पन्नमिति**।।४३।।

अप्रसादस्य उदाहरणं दर्शयन् आह **व्युत्पन्नमिति**। गौडीयैःपौरस्त्यैः नातिरूढमपि अतिप्रगल्भमपि ईहितं दृश्यते। कुतः? व्युत्पन्नं इति। तैः एवं स्वीकृतम् इत्याह– **यथेति**। अनत्यर्जुनाब्जन्म नीलोत्पलम्; वलक्षगुः श्वेतभानुः।।४६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समं बन्धेष्वविषमं ते मृदुस्फुटमध्यमाः।
बन्धा मृदुस्फुटोन्मिश्रवर्णविन्यासयोनयः॥४७॥

रत्नश्री

बन्धेषु रचनासु विषये यदविषमम् समम् आदिमध्यान्तेषु चतुर्णामपि पादानां सजातीयबन्धत्वादित्यनूद्य तत्समं काव्यं ज्ञेयमिति विधीयते। कियन्तस्ते बन्धा येष्वविषमं समं स्यादिति चेदाह-त इत्यादि। ते बन्धा मृदुस्फुटमध्यमाः त्रयः सम्मवन्ति। मृदुरशिथिलः कोमलः। शिथिलकोमलस्य श्लेषविपर्ययत्वात्। यथोक्तं प्राक्। मृदुश्रुतिरिति यावत्। स्फुटोऽधिमात्रश्रुतिः। क्रुद्धोद्यस्य सुकुमारविपर्ययत्वात्। यद् वक्ष्यति- न्यक्षेणेत्यादि[1.72] [19b] उन्मिश्रो मध्यमश्रुतिः। कः पुनरेषां प्रभव इत्याह-मृद्वित्यादि। मृदवो मृदुश्रुतयः ककारादयः यथासम्भवम्। स्फुटा अधिमात्रश्रुतयः घकारादयः। उन्मिश्रा मृदुस्फुटाः संसृष्टा ये वर्णास्तेषां विन्यासो रचना योनिः प्रभवो येषां ते तथा। ते च त्रयः मृदुमध्योऽधिमात्रभेदेन प्रत्येकं त्रिधा सम्भवन्ति। स[मे] तु तेषामेवा[वा]न्तरो भेदः स्यात्। मौलास्त्रय एव बन्धाः। तत्र पद्यं गद्यं द्विधा। यद्येकेन बन्धेन समाप्यते तदा[1] समं काव्यम्, विजातीयबन्धकृतवैषम्याभावात्। अत एवोक्तं बन्धेष्वविषममिति। साम्यं पृथगुदाहृतम्॥

अथ विजातीयबन्धत्वसङ्करस्तदा विषमं काव्यं जायते विजातीयबन्धकृतवैषम्ययोगात्। तदेवमुदाहरन्नाह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

समतां निरूपयति, सममिति।—बन्धेषु रचनासु, अविषमम् अविलक्षणम्, उपक्रमोपसंहारयोः सदृशमित्यर्थः, समं समताख्यगुणयुक्तं, तथा च मृदुस्फुटोन्मिश्रवर्णानामन्यतमेन उपक्रमोपसंहारयोः यदवैषम्येण भणनं सा समता इत्यर्थः ते बन्धाः त्रिविधाः, मृदुः कोमलः, स्वरेषु ह्रस्वान्त्याः व्यञ्जनेषु वर्गान्त्याः दन्त्याश्च मृदुवर्णा इत्यर्थः। स्फुटः तीव्रः, स्वरेषु दीर्घस्वराः व्यञ्जनेषु नकारवर्जटवर्गरेफशषहाः दन्त्यसंयोगाश्च वर्णाः इत्यर्थः, मध्यमः उभयात्मक इति वन्धानां त्रिविधतया समतायास्त्रैविध्यमत्रावगन्तव्यम्। बन्धानां मृदुत्वादेर्हेतुमाह, मृद्विति।—मृदुवर्णानां ह्रस्वस्वरादीनां, स्फुटानां दीर्घस्वरादीनां, तथा उन्मिश्राणाम् उभयात्मकानां वर्णानां, विन्यासः योनिः कारणं येषां तादृशाः। (अत्र मृद्वादिवर्णघटितत्वं यथा त्रिविधभेदहेतुस्तथा असमासदीर्घसमास-मध्मसमासा अपि; यदुक्तम्,—"असमासा समासेन मध्यमेन च भूषिता। तथा दीर्घसमासेति त्रिधा सङ्घटनोदिता।।" इति। अयञ्च गुणः शब्दगत एव, अर्थगुणस्तु समता यादृशेन प्रकृतिप्रत्ययोगेन प्रक्रान्तं तादृशेनैव यत्र समापनं भवेत्, तत्रैवेति बोध्यम्, अत एव "प्रक्रान्तप्रकृतिप्रत्ययाविपर्य्यासेन अर्थस्य विसंवादिताविच्छेदः, स च प्रक्रमभङ्गरूपदोषविरह एव" इति दर्पणकारेणोक्तम्, उदाहृतञ्च यथा,—"उदेति सविता ताम्रस्ताम्र एवास्तमेति च" इत्यादि। विपर्य्ययस्तु यथा,—"प्रसीद चण्डि! त्यज मन्युमञ्जसा, जनस्तवायं पुरतः कृताञ्जलिः। किमर्थमुत्कम्पितपीवरस्तन-द्वयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वया लुप्तविलासमास्यते।।'' इति। अत्र प्रसीद त्यज इति कर्तृवाचितया प्रक्रान्तस्य आस्यते इत्यत्र त्यागान्न समता)।।४७।।

प्रभा

क्रमप्राप्तां समतां लक्षयति–**समं बन्धेष्विति**। बन्धेषु रचनासु। अविषमाम् अविभिन्नां यावत्प्रबन्धमेकरूपामिति भावः। एतादृशी संघटना समम् समताख्यगुणवत्। एवं च येन प्रकारेण कश्चिदर्थो वर्णयितुमुपक्रम्यते तेनैवोपसंहारः समता इति लक्षणं सिध्यति। एते बन्धाः कतिविधाः सन्तीत्याकाङ्क्षायामाह–**ते मृद्विति**। ते बन्धा मृदुः कोमलः, स्फुटः विकटः, मध्यमः अनुभयात्मक एवंरूपास्त्रिविधाः सन्ति। बन्धानां मृदुत्वादिकस्य किं प्रयोजकमित्याह–**बन्धा इति**। मृदुवर्णाः टवर्गरहिताः शिरसि निजपञ्चमाक्रान्ता वर्ग्या ह्रस्वान्तरितौ रणौ च। तदुक्तमग्निपुराणे–

मधुरायाश्च वर्गान्तादधो वर्ग्या रणौ स्वनौ।
ह्रस्वस्वरेणान्तरितौ संयुक्तत्वं नकारयोः।। इति। (३४३.३)

प्रकाशकारोपि–मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू इति। (८.७३) स्फुटा विकटवर्णाः टवर्गीयाः प्रथमतृतीयसंयुक्तौ द्वितीयचतुर्थौ येनकेनापि रेफसंयोगश्च। उक्तं चाग्निपुराणे–

अकारवर्ज्यमावृत्तिः स्वराणामतिभूयसी।
अनुस्वारविसर्गौ च पारुष्याय निरन्तरौ।।

शषसा रेफसंयुक्ताश्चाकाराश्चापि भूयसा।
अन्तस्था भिन्नमाभ्यां च हः पारुष्याय संयुतः।।
इति (३४३.७-८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशेपि–योग आद्यतृतीयाभ्यामन्त्ययो रेण तुल्ययोः। टादिः शषौ इत्यादि। (८.७५) उन्मिश्रा उभयजातीयवर्णमिश्राः। एतेषां विन्यासो निवेशो योनिः कारणं येषां ते तथा। एतादृशा बन्धा मृदुस्फुटमध्यमा भवन्ति। अत्र हि वर्णशब्दोऽसमासमध्य-समासदीर्घसमासादीनामुपलक्षकः तदुक्तं अवृत्तिर्मध्यवृत्तिर्वा वृत्तिदैर्ध्यं इति। अन्यत्रापि।

असमस्तैकसमस्ता युक्ता दशभिर्गुणैश्च वैदर्भी।
वर्गद्वितीयबहुला स्वल्पप्राणाक्षरा च सुविधेया॥

बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौडीया।
रीतिरनुप्रासमहिमपरतन्त्रा स्तोभवाक्या च॥

प्रतापरुद्रटीकायामपि–(६३ पत्रे)

टवर्गवर्जिताः स्पर्शाः स्वस्ववर्ग्यान्तशेखराः।
लघुरेफणकारौ च कोमलाः परिकीर्तिताः॥

रेफेण यस्य कस्यापि योग आद्यतृतीययोः।
स्वोत्तराभ्यां तुल्ययोर्वा परुषाक्षरकौ शषौ॥ इति।

तत्र मृदुप्रबन्धोदाहरणम्–

शिञ्जानमञ्जुमञ्जीरचारुकाञ्चनकाञ्चयः।
कङ्कणाङ्कभुजा भान्ति जितानङ्ग तावाङ्गनाः॥ इति।

दारुणरणे रणन्तं करिदारणकारणं कृपाणं ते।
रमणकृते रणरणकी पश्यति तरुणीजनो दिव्यः॥ इति च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतद्विरुद्धं यथा–

अकुण्ठोत्कण्ठया पूर्णमाकण्ठं कलकण्ठि माम्।
कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर॥ इति।

स्फुटप्रबन्धोदाहरणं यथा–

क्षुद्रः कोयं तपस्वी क्षणवदनवनच्छेदनिष्ठ्यूतमज्ज-
व्याजाज्यस्फारधाराहुतिहुतहुतभुक्पच्यमानः कपालैः।
जातास्थिस्फोटभीतिप्रविघटितवलद्वामपार्श्वप्रवेश-
क्राम्यत्सव्येतरार्धाकुलितहरहठाकृष्टखड्गो दशास्यः॥इति।

अन्यच्च–

दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत-
ष्टङ्कारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः
द्राक्पर्यस्तकपालसंपुटमिलद्ब्रह्माण्डभाण्डोदर-
भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति॥ इति।

इयमेव गौडी रीतिः मिश्रवर्णयुता पाञ्चाली। तदुक्तं दर्पणे–वर्णैः शेषैः पुनर्द्वयोः। समस्तपञ्चषपदो बन्धः पाञ्चालिका मता। इति। (९.४) उदाहरति च–

मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे॥ इति।

अन्यत्रापि–

ललितमङ्गमपाङ्गविलोकितं स्मितसुधालवपल्लविताधरः।
इति मनो जयतः प्रमदाजनं मनसिजस्य जयन्ति शिलीमुखाः॥
इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्थं च वर्णानां समासानां च त्रैविध्येन प्रबन्धत्रैविध्यं मृदुस्फुटमध्यमाभिधम्। तत्र येन यत् काव्यमारब्धं तेनैव परिसमाप्तिः समम्। सोयं समताख्यो गुणो ग्रन्थकृता शब्दगुणत्वेन वर्णितः। अन्यैस्तु अर्थगुणत्वेनापि स्वीक्रियते। लक्ष्यते च–प्रक्रान्तप्रत्ययाविपर्यासेन अर्थस्य विसंवादिताविरह इति। तदुदाहरणं च–उदेति सविता ताम्रस्ताम्र एवास्तमेति च। इति प्रेमचन्द्रशर्माणः। परमयं प्रक्रमभङ्गाख्यदोषाभावरूप एवेति ज्ञेयम्। वामनस्तु–प्रक्रमाभेदरूपमवैषम्यं समता इति अर्थसमतां लक्षयति। (३.२.५) तथैव च भोजः –अवैषम्यं क्रमवतां समत्वमिति कीर्तितम्। इति (१.७०)।।४७।।

विवृति

प्रसादमभिधाय समतालक्षणमाह–

गौडाभ्युपगतं बन्धवैषम्यमुदाहरति–

बन्धेषु यदविषमं तत् सममुच्यते। ते बन्धाः त्रयः मृदुस्फुटमध्यमानिधानाः। किंयोनय इत्याह– मृदुस्फुटोन्मिश्रवर्ण-विन्यासयोनयः, मृदवश्चाल्पप्राणाः, स्फुटाश्च महाप्राणाः, उन्मिश्राश्च तदुभयरूपाः, ते च ते वर्णाश्च, तेषां विन्यासो योनिः येषां ते तथाविधाः।।४७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोकिलालापवाचालो मामेति मलयानिलः।
उच्छलच्छीकराच्छाच्छनिर्झराम्भःकणोक्षितः॥४८॥

रत्नश्री

कोकिलानामालापैः कूजितैर्वाचालो मुखरो मृदुवसन्ते कोकिलालापरय मलयानिलस्य च सम्भवादेवमुक्तम्। उच्छलन्तः शीकरा येषां विकीर्यमाणकणानामच्छाच्छानामत्यन्तप्रसन्नानां निर्झराणां प्रश्रवणानामम्भस उदकस्य कणैः बिन्दुभिरुक्षितः सिक्तः शीतः मलयानिलो दक्षिणमारुतः मामेति [मा]मुपसर्पतीति योज्यम्। एतद्द्वये मृदुस्फुटविजातीयवर्णसङ्कराद् विषमम्। एतदेव च [वि]जातीयबन्धपूरितमर्द्धद्वयं केवलमृदुबन्धं केवलस्फुटबन्धं च श्लोकद्वितयं भवत् समोदाहरणं सम्पद्यते। तद्यथा–

कोकिलालापवाचालो मामेति मलयानिलः।
आज्ञामुद्दामकामस्य कालस्य कथयन्निव॥

बिभर्त्ति भ्रान्तिमुद्भूतो भ्रमराणां प्रभञ्जनः।
उच्छलच्छीकराच्छाच्छनिर्झराम्भःकणोक्षितः॥

[कारणेन]।[ने]नैवार्येण दण्डिना पृथङ् नोदाहृतम्॥

[20a] यत्तर्हि पादे विजातीयवत्त्वं संकीर्णं तदविषममिति कश्चित् मन्यते तन्निषेधार्थं पादमात्रेणापि विषममुदाहरन्नाह–

हृदयङ्गमा

उक्तायाः समतायाः त्रैविध्यं दर्शयति, कोकिलेत्यादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वाभ्याम्।–कोकिलानाम् आलापेन वाचालः मुखरः, मलयानिलः माम् एति, पीड़यितुं सुखयितुं वा इति शेषः। (अत्र मृदुनोपक्रान्तस्य तेनैव समापनमिति मृदुबन्धगा समता)। उच्छलन्तः उद्गच्छन्तः, शीकराः जलकणा यस्य तादृशम्, अच्छाच्छम् अतिस्वच्छ, यत् निर्झराम्भः तस्य कणैः बिन्दुभिः, उक्षितः अभिषिक्तः, सुशीतल इति यावत्, मलयानिलः मामेति। (अत्र स्फुटबन्धेन उपक्रान्तस्य सन्दर्भस्य तेनैव उपसंहार इति स्फुटबन्धगता समता)।।४८।।

प्रभा

त्रिविधसमताया उदाहरणत्रयं दर्शयति सार्धश्लोकेन–**कोकिलेति**। कोकिलाया आलापो मञ्जुलध्वनिस्तेन वाचालः सशब्दो मलयानिलो मलयवायुर्मामेति मामागच्छति शीतलयतीत्यर्थः। अत्र मृदुबन्धेन प्रारब्धस्य संदर्भस्य तेनैव समापनान्मृदुबन्धयुता समता। स्फुटबन्धमुदाहरति–**उच्छलदिति**। उच्छलन्त उत्सर्पन्तः शीकरास्तुषारा यत्र तथा अच्छाच्छमतिनिर्मलं यन्निर्झराम्भो निर्झरोदकं तस्य कणास्तैरुक्षितः सिक्तः। अतिशीतल इत्यर्थः। अत्रापि मलयानिलो मामेति इत्युनषंज्यते। अत्र स्फुटबन्धेनैव उपक्रमोपसंहारौ इति स्फुटबन्धगता समता। अन्यत्रापि–

आहतं कुचतटेन तरुण्याः साधु सोढममुनेति पपात।
त्रुट्यतः प्रियतमोरसि हारात् पुष्पवृष्टिरिव मौक्तिकवृष्टिः।।

(हेमचन्द्र १९७ पत्रे)

इति उदाहृतम्।।४८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

तत्र मृदुबन्धमुदाहरति–**कोकिलेति**। मृदुवर्णविन्यासो-नित्वान्मृदुबन्धः। स्फुटबन्धमुदाहरति– **प्रोञ्चलदिति**। स्फुटवर्णत्वात् स्फुटबन्धः। मध्यममुदाहरति **चन्दनेति**। उन्मिश्रवर्णत्वात् मध्यमबन्ध इति।।

एकस्मिन्नेव श्लोकार्धे पूर्वोत्तरपादयोः सर्वस्फुटसर्वमृदुवर्ण-विन्यासात् विषमोऽयमिति बन्धवैषम्यदोषमनालोच्य पौरस्त्या काव्यपद्धतिः गौडानां काव्यरचना ववृधे। अर्थालङ्कराक्षराटोपावेवापेक्षन्ते गौडाः, न बन्धवैषम्यलक्षणं दोषं मन्यन्ते।।४८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चन्दनप्रणयोद्गन्धिर्मन्दो मलयमारुतः।
स्पर्धते रुद्धमद्धैर्यो वररामामुखानिलैः॥४१॥

रत्नश्री

चन्दनानां तरूणां प्रणयः परिचयः सादेश्यात्। ततस्तेनोद्गन्धिः उद्गतो गन्धोऽस्येति चन्दनगन्धगर्भः सुरभिः शिशिरोऽपि वा। निरस्तं समाधिनिर्विकारत्वं येनोपनीतमन्मथविकारत्वात् स मन्दो मृदुर्मलयमारुतो दक्षिणपवनः। [वररामामुखानिलै]रुत्तमस्त्री-वदनश्वसनैः सह स्पर्द्धते [तान्] निगृह्णाति सुरभितया मृदुत्वेन [रुद्ध]मद्धैर्यतया च सम्यात्। स्पर्द्धायाश्च समानविषयत्वात् तैरुपमीयत इति यावत्। अत्र तृतीयपादेन स्फुटत्वेन विजातीयेन मध्यमबन्धं पादत्रयं संसृष्टमिति विषममेवेदृशम्। एतदेव सजातीयैकपादप्रवेशे समं जायते। तद्यथा–

चन्दनप्रणयोद्गन्धिर्मन्दो मलयमारुतः।
स्पर्धते मन्मथक्षीबवररामामुखानिलैः॥इति।

तदेतद् गौडीयं निगमयन्नाह–

हृदयङ्गमा

चन्दनेति।–चन्दने प्रणयः संसर्गः चन्दनप्रणयः, तेन उद्गन्धिः उद्गतगन्धः, मन्दः मृदुलः, मलयमारुतः मलयानिलः। (अत्र स्फुटमृदुमिश्रवर्णघटितबन्धत्वान्मध्यमो बन्धः, तेनैवोपक्रमोप-संहाराविति मध्यमबन्धगतेयं समता। एवं समतायाः त्रैविध्यमन्यत्रापि दृश्यते, यथोक्तं,– "यन्मृदुप्रस्फुटोन्मिश्रवर्ण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बन्धविधिं प्रति। अवैषम्येण भणनं समता साऽभिधीयते।।'' इति; अयञ्च शब्दगतः समतागुणः, अर्थगतस्तु ''अवैषम्यं क्रमवतां समत्वमिति कीर्त्तितम्'' इत्युक्तलक्षणः। तत्रोदाहरणं यथा,–''अग्रे स्त्रीनखपाटलं कुरवकं श्यामं द्वयोर्भागयोः, बालाशोकमुपीढ़रागसुभगं भेदोन्मुखं तिष्ठति। ईषद्बद्धरजः-कणाग्रकपिशा चूते नवा मञ्जरी, मुग्धत्वस्य च यौवनस्य च सखे! मध्ये मधुश्रीः स्थिता।।'' इति। अत्र मधुश्रियो मौग्ध्यत्यागौ यौवनारम्भकृतानां विशेषणानाम् अवैषम्यात् समता। भोजस्त्वत्र श्लोकार्द्धगतं समतायास्त्रिविधमुदाहरणं रुचिरममन्यमानः ''भवेत् स एव विषमः समताया विपर्य्ययः'' इति लक्षणमभिधाय प्रथमश्लोकं समताविपर्य्ययरूपविषमदोषस्योदाहरणत्वेन लक्षयित्वा च ''अत्र पूर्वार्द्धस्य मृदुबन्धत्वात् उत्तरार्द्धस्य च गाढ़बन्धत्वात् समबन्धेषु विषममिति विषमो नाम शब्दप्रधानः समताविपर्य्ययो दोषः'' इत्याह; तत्र रुचिरं, सर्वत्रोदाहरणदर्शनानन्तरमेव प्रत्युदाहरणदर्शनस्य क्रमदर्शनादित्यवधेयम्)। समतात्रयमित्थं सार्द्धश्लोकेन दर्शयित्वा गौडयामेतद्विपर्य्ययं लक्षयितुं वैषम्यं दर्शयति, स्पर्द्धते इति।–तथा रुद्धं निराकृतं, मम धैर्य्यं येन तथाभूतः, मम धैर्य्यं नाशयन्नित्यर्थः, वररामाणाम् उत्तमाङ्गनानां, मुखानिलैः मुखनिःमृतसुगन्धिमारुतैः, स्पर्द्धते सादृश्यं लभते इति यावत्, सौगन्ध्यसाम्यादिति भावः। (अत्र स्फुटबन्धेन उपक्रमः मृदुबन्धेनोपसंहार इति वैषम्यात् प्रोक्तलक्षणसमताया नावसरः। गौड़ीयास्तु समतामत्रापि स्वीकुर्वन्ति इत्यभिप्रायः)।।४९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

मध्यमसमतां दर्शयति–चन्दनेति चन्दनस्य चन्दनवनस्य प्रणयः संसर्गस्तेनोद्गन्धिरुत्कृष्टगन्धवान्। मन्दो मृदुः। मलयमारुतो मामेति इति योजनीयम्। उदाहरणान्तरं यथा–

ईदृशस्य भवतः कथमेतल्लाघवं मुहुरतीव रतेषु।
क्षिप्तमायतमदर्शयदुर्व्यां काञ्चिदाम जघनस्य महत्त्वम्।।

इति।(हेम० १९७ पत्रे)

एषु बन्धेषु मृदुस्फुटौ न वैदर्भाभिमतौ। तौ हि अनुप्रासप्रियानां गौडानामेंव इष्टौ। केवलस्फुटप्रबन्धे सोकुमार्यं नास्ति मृदुप्रबन्धे च शैथिल्यदोषो भवति। तदुक्तमग्रे बन्धशैथिल्यदोषो हि दर्शितः सर्वकोमले इति। (१.६९) अतो नैवैतौ वैदर्भाभिमतौ। मध्यमस्तु मृदुस्फुटमिश्रतया वैदर्भप्रियो भवति।। केचित्तु कोकिलालापेति समतायाः प्रत्युदाहरणं मन्यन्ते। परं तन्न विचारास्पदम्। उदाहरणमन्तरा प्रत्युदाहरणस्यैव केवलस्य कथनं ग्रन्थकृद्रीतिविरुद्धम्। उदाहणप्रदर्शनाभावेन च न्यूनतापत्तिः। एवं समतां प्रदर्श्य गौडानामत्रानादर इति सोदाहरणं कथयति-**स्पर्धत** इति। रुद्धमद्धैर्यः रुद्धं स्तम्भितं मम धैर्यं धृतिर्येन सः। एतादृशो मलयमारुतः। रामाणां पद्मिनीलक्षणयुतानां कामिनीनाम्। मुखानामाननानामनिलैर्निः श्वासैः। साकं स्पर्धते तत्तुल्यो मृदुसुरभिश्च वर्तते इति भावः।।४९।।

विवृति

समतां लक्षयति–सममिति। बन्धाः शब्दसन्दर्भाः त्रिविधाः–मृदुवर्णजनितो बन्धः, अभृदुस्फुटवर्णनजितो बन्धः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृदुस्फुटमिश्रवर्णजनितो बन्धश्चेति। मिश्रवर्णजनितो बन्धो मध्यमः। तेषु बन्धेषु एकैकस्मिन् अविषमत्वम् एकरूपत्वं समत्वम्।।

त्रयाणां बन्धानां त्रिभिः अर्धैः उदाहरणानि आह **कोकिलेति।** अत्र बन्धेषु मध्यमबन्धसत्त्वं वैदर्भेष्टम्। मृदुबन्धे विशेषाभावात्, स्फुटबन्धे सौकुमार्याभावाच्च, तौ न वैदर्भाभिमतौ इति बोद्धव्यम् समताविपर्ययं वैषम्यं दर्शयति–**स्पर्धत इति।** समताविपर्ययस्य गौडेष्टत्वं दर्शयति **इतीति।** उपमारूपः अर्थालङ्कारः स्फुटवर्णानुप्रासश्च विषमपरिग्रहहेतुः।।४९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यनालोच्य वैषम्यमर्थालङ्कारडम्बरौ।
अवेक्षमाणा ववृते पौरस्त्या काव्यपद्धतिः॥५०॥

रत्नश्री

इतीदृशं वैषम्यसमाम्यं विजातीयबन्धसंकरलक्षणम् अनालोच्य अदृष्ट्वाअस्वीकृत्येति यावत्। काव्यपद्धतिः काव्यरचना ववृते प्रवर्त्तते। कालस्येहानन्तत्वादद्यापि प्रवृत्तेः। कतमा पौरस्त्या। पुरः शब्देन पूर्वस्यां दिशि देशे वा व्यवस्थितो जन उक्तः। तस्मात्तत्र भवा [पौरस्त्या]। गौड़ीयेति यावत्। बन्धविषममेवंविधं काव्यं गौड़ाः कुर्वन्ति। न दाक्षिणात्या इत्यर्थः। कस्तर्हित्वया काव्यपक्षः स्वीकृतो येन काव्यपद्धतिरिति यदुच्यत इति चेदाह–अर्थालङ्कारो जात्यादि[20b]लक्षणः डम्बरोऽक्षरडम्बरः। 'गोडेष्वक्षरडम्बर' इति। तावुभौ [अवेक्ष]माणा स्वीकुर्वती ववृते इति प्रकृतम्। द्वयमेतत् गौड़वर्त्मनि दृश्यते। शब्दालङ्कारस्तु बन्धसाम्यलक्षणो नेक्षत इत्यर्थः। एते च बन्धास्त्रयोऽपि यथावसरं विनियुक्ताः शोभामा[त]न्वन्तीति दाक्षिणात्यैरिष्यत एव।

केचित्तु व्याचक्षते–उन्मिश्र एकैको दाक्षिणात्यैरिष्यते। न तु मृदुः स्फुटश्च शैथिल्यकृच्छ्रोद्यत्वाभ्यां दुष्टत्वादिति। तदसत्, मृदुबन्धस्याप्यशिथिलस्य स्फुटबन्धस्यापि वा कृच्छ्रोद्यस्य रघुवंशजातकमालादौ दाक्षिणात्यमहाकविकाव्येषु दर्शनात् तद्यथा–

ताम्बूलवल्लीपरिणद्धपूगास्वेलालतालि[ङ्गि]तचन्दनासु।
तमालपत्रास्तर[णा]सु रन्तुं कञ्चिन्मनस्ते मलयस्थलीषु॥

[रघुवंशे 6.64]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समीक्ष्यमाणक्षतजः क्षितीशः क्षपाचरैर्हेमवपुश्चकाशे।
सन्ध्याभिताम्रैर्जलभारनम्रैः पयोधरैर्मेरुरिवोपगूढः।।इति।

[जातकमालायाम् 8.41]

एतञ्च दण्डिनाप्यत्यन्तसंराधितमिति श्रूयते। अपि च कियदिह वक्तुं शक्यते। सर्वमेव हि वैदर्भकाव्यं बन्धत्रयात्मकमुपलभ्यते। तदनेन व्याख्यानेन अवैदर्भः प्रसज्येत। नचैवम्। दृष्टंविरोधात्। तदन[व]गाहितग्रन्थकाराभिप्रायस्यैतत् व्याख्या[न]मिति प्रतीमः। तस्मात्त्रयोऽपि बन्धा यथावसरमिष्यन्ते दाक्षिणात्यैः, बन्धवै[ष]म्यमेव तु तैर्बहु मन्यते।

यत्पुनः-

बन्धशैभिल्यदोषस्तु दर्शितः स[र्व]कोमल इति।

[1.69]

यञ्च कृच्छ्रोद्यं न्यक्षेणेत्यादि [1.72] तत्सुकुमारावसरे चिन्तितम्। बन्धशैथिल्यकृरोऽनुप्रासः, दीप्तमिति च कृच्छ्रोद्यं गौडैर्बध्यते, न वैदर्भैरित्यन्यत्र वा तत्रार्थः। नत्वयं मृदुस्फुटबन्धनिषेधः। इति किं केन सं[21a]गतम्। तस्मात् त्रयोऽपि बन्धा दाक्षिणात्यैरिष्यन्ते, बन्धवैषम्यं तु नेष्टमिति।।

माधुर्यं निर्दिशन्नाह-

हृदयङ्गमा

निरुक्तलक्षणसमतायां गौडीयानामनादरं दर्शयति, इतीति।–इति उक्तप्रकारं, "स्पर्द्धते" इत्यादिश्लोकोक्तमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावत्, वैषम्यं समताविपर्य्ययजन्यदोषम्, अनालोच्य अविचार्य्य, अर्थानां काव्यार्थानाम्, अलङ्काराणाम् अनुप्रासोपमादीनाञ्च, डम्बरौ आड़म्बरौ, उत्कर्षौ इत्यर्थः, अपेक्षमाणा अनुसरन्तीत्यर्थः, पौरस्त्या पूर्वदेशीया, गौड़ीया इत्यर्थः, काव्यानां पद्धतिः ववृधे, ते हि अर्थानुसारेण अलङ्कारानुसारेण च कदाचित् बन्धस्य मार्दवं कदाचित् वैकटंय कुत्रचिद्वा मिश्रीभावमाद्रियन्ते, न तु गुणपक्षपातेन पूर्वोक्तरूपां वैदर्भैरादृतां समताम्। अयं भावः,–यत्रार्थस्य मृदुत्वं तत्र मुदुलो बन्धः, यत्र तु अर्थस्य वैकटयं तत्र विकटो बन्धः, यत्र च अर्थस्य मिश्रीभावः तत्र मध्यमो बन्धः, न तु येनैवारम्भस्तेनैव समापनमिति। (युक्तञ्चैतत्, तथा हि,–"सारङ्गाः किमु वल्गितैः किमफलैराड़म्बरैर्जम्बुका, मातङ्गा महिषा मदं व्रजत किं शून्येऽथ शूरा न के?। कोपाटोपसमुद्भटोत्कटसटाकोटेरिभारेः शनैः, सिन्धुध्वानिनि हुङ्कृते स्फुरति यत् तद्गर्जितं गर्जितम्।।" इत्यत्रोत्तरार्द्धे कुपितसिंहवर्णनरूपार्थस्य वैकटयात् उपक्रान्तमृदुबन्धत्यागो गुण एवेति; अत एव पतत्प्रकर्षतादोषस्यापि क्वचिद्गुणत्वं दर्पणकृता दर्शितं, यथा,–"पतत्प्रकर्षता तथा। तथेति क्वचिद्गुणः, यथा,–'चञ्चुद्भुज' इत्यादि। अत्र चतुर्थपादे सुकुमारार्थतया शब्दाड़म्बरत्यागो गुणः" इति। वैदर्भास्तु अर्थवैषम्येऽपि येन बन्धेन उपक्रमः तेनासमापनं दोषत्वेनैव मन्यन्ते इत्यनयोर्भेदः। एवमलङ्कारेऽपि गुणवदलङ्कारा अपि रसस्योत्कर्षकाः न तु रसनिरपेक्षकाः इति वैदर्भमतं, गौड़ानान्तु रसनिरपेक्षा अपीत्यनयोर्भेदः इति)।।५०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

इतीति। इति पूर्वोदाहरणदर्शितं वैषम्यमनालोच्य। तत्र हि स्पर्धते रुद्धमद्धैर्य इत्यत्र स्फुटः, वररामाननानिलैः इत्यत्र च मृदुः, इति उभयोः स्फुटमृदुनोर्वैषम्यं विषमतामनालोच्य अवगणय्य। केवलमर्था अत्युक्तिरूपा अलंकारा वर्णानुप्रासप्रधानास्तेषां डम्बरौ उत्कर्षौ। प्रतियेगिद्वित्वात् द्विवचनम्। अवेक्षमाणा तत्र बद्धादरा इति भावः। पौरस्त्या गौडीया। काव्यपद्धतिः पद्यरचनासरणिः। ववृधे वितस्तार। अयमाशयः। गौडाः केवलमनुप्रासाकुलधियः पूर्वोदाहृतपद्ये यथा मृदुस्फुटरचना विषमगुणा दृश्यते तथाविधरचनायां बद्धादराः सन्तः समतामनालोच्य तं विषमप्रबन्धं काव्यत्वेन स्वीकुर्वन्ति। वैदर्भास्तु वर्णानुप्रासं काव्यस्यासाधारणं लक्षणं न मन्वते यतस्ते व्याकुलीभवन्तमर्थं नापेक्षन्ते। अर्थानुरोधेन रचनाक्रमानुरोधेन च युक्तमनुप्रासमङ्गीकुर्वन्ति। न केवलं शैथिल्ये न वा विकटे न वा विषमे प्रबन्धे ते रुचिं बध्नन्ति। तेषां परुषकोमलवर्णमिश्रः प्रबन्धो मनोहरो भवति। इति गौडवैदर्भयोः काव्यप्रबन्धे विशेषोस्ति।। अत्र प्रेमचन्द्रशर्मभिरेवं व्याख्यायि। गौडानामयमाशयः। अर्थानुसारिणो हि बन्धाः। अर्थाश्च मृदुविकटमध्यमात्मकाः। तत्र यदि प्रथमं मृदुरर्थोवसाने च विकटस्तदा मृदुबन्धेनोपक्रान्तमपि विकटबन्धेन समापनीयम्। बन्धानामर्थानुगतत्वनियमात्। अत एवविधस्थले समतापरित्यागो गुण एव। यथा

मातङ्गाः किमु वल्गितैः किमफलैराडम्बरैर्जम्बुकाः
सारङ्गा महिषा मदं व्रजत किं शून्येषु शूरा न के।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोपाटोपसमुद्धोटोत्कटशटाकोटेरिभारेः शनैः
सिंधुध्वानिनि हुंकृते स्फुरति यत् तद्गर्जितं गर्जितम्।।

(का. प्र. ७.५९)

इत्यादौ उत्तरार्धे कुपितसिंहरूपार्थस्य उद्धतत्वात् सुकुमारतात्यागो गुण एव इति। परं नैतद्ग्रन्थकर्तुराशयानुकूलम्। स्पर्धते रुद्धमद्धैर्यो वररामाननानिलैः। इत्यत्र एकस्मिन्नैव वाक्यार्थे समतायाः परित्यागस्य कवेराभिप्रेतत्वात्। अथ तत्रापि अवान्तरार्थभेदप्रकल्पनेन स्पर्धते रुद्धमद्धैर्य इत्यत्र शृङ्गारिणोपि वक्तुर्धैर्यरोधेन वायुं प्रति कुपितत्वात् कुपितवाक्यस्य च औद्धत्योचितत्वाद्युत्यंजे विकटबन्धः। वररामाननानिलैरित्यत्र तु कोपाभावात् शृङ्गाराङ्गस्य वररामापदवाच्यनायिकार्थस्य मुदुत्वाञ्च युक्तो मृदुबन्धः। इति समतात्यागो गुण एवेति चेत् तदपि न क्षोदक्षमम्। यत एवं कल्पितेपि वररामामुखानिलैरित्यस्मिन् मधुरार्थबोधके वाक्ये स्पर्धते इति विकटप्रयोगस्यानुचितत्वात्। तस्मान्नायं कवेरभिप्रायः। केवलं गौडानां दण्ड्याचार्यकटाक्षितदोषप्रमार्जनप्रयत्न एव। अर्थानुरोधेन समतात्यागस्य वैदर्भाणामपि इष्टत्वात्। तदर्थं च अर्थालंकारडम्बरौ इत्यत्र अर्थशब्दो वक्त्राद्युपलक्षकः। तेन वक्त्राद्यौचित्यवशादपि बन्धवैषम्यं युज्यते। यथा–

चञ्चद्भुजभ्रमितचण्डगदाभिघात–
संचूर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानावनद्धघनशोणितशोणपाणि–
रुत्तंसयिष्यति कचांस्तव देवि भीमः।। इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र प्रथमचरणत्रये विकटप्रबन्धः। चतुर्थे तु द्रौपदीनायिकारूपसुकुमारार्थमुद्दिश्य तत्र शब्दाडम्बरत्यागो वैदर्भानुमत एव। अपरं च वैदर्भाणामस्पृष्टशैथिल्यस्यापेक्षितत्वाद्। तेन च मधुरविकटप्रबन्धस्यैव तेषामिष्टत्वान्नैवंविधमिश्रप्रबन्धे तेषामसूयावसरः। अनुप्रासप्रवणानामगणितान्यसमतादिगुणानां गौडानामेवानुप्रासशून्ये काव्ये असूयायाः संभवात्। एवं स्थिते यत् प्रेमचन्द्रशर्मभिः प्रतिपादितं वैदर्भास्तु गुणपक्षपातितया विसदृशार्थकेपि संदर्भे उपक्रान्तबन्धत्यागो दोष एवेति मन्यन्ते इति तत् तेषां गौडपक्षपतनिवेशेनैव कथनमिति सुधीभिर्विचार्यम्। केचित्तु अर्थालंकारा उपमादयो डम्बरो विकटवर्णता च तौ अपेक्षमाणा इति विवृण्वते। परमर्थालंकारविषये गौडवैदर्भयोः समानरागत्वान्न तदेव विशिष्य गौडानां काव्यस्य लक्षणं भवेत्।। इदानीं समताविषये साहित्यकोविदानामन्येषां लक्षणोदाहरणानि दर्शयामः। परस्परविभूषणो गुणालंकारग्रामः समम् इति भरतः। तदुक्तम्–

नातिचूर्णपदैर्युक्ता न च व्यर्थाभिधायिभिः।
न दुर्बोधा तैश्च कृता समत्वात् समता मता।। (१६.९६)

इति। अस्योदाहरणम्–

स्मरनवनदीपूरेणोढा मुहुर्गुरुसेतुभि–
र्यदपि विधृता दुःखं तिष्ठन्त्यपूर्णमनोरथाः।
तदपि लिखितप्रख्यैरङ्गैः परस्परमुन्मुखा
नयननलिनीनालानीतं पिबन्ति रसं प्रियाः।। इति।

मार्गाभेदः समता इति वामनः (३.१.९१) उदाहरति च अस्त्युत्तरस्याम् इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यन्मृदुप्रस्फुटोन्मिश्रवर्णबन्धविधिं प्रति।
अवैषम्येन भणनं समता साभिधीयते।
इति भोजराजः (१.६७) अस्योदाहरणं च–

यच्चन्द्रकोटिकरकोरकभारभाजि
बभ्राम बभ्रुणि जटापटले हरस्य।
तद्वः पुनातु हिमशैलशिलानिकुञ्ज
झङ्कारडम्बरविरावि सुरापगाम्भः।। इति।

अविषमबन्धत्वं समता इति वाग्भटः (काव्यानुशासन, ३० पत्रे)। तदुदाहरणं च–

मसृणचरणपातं गम्यतां भूः सदर्भा
विरचय सिचयान्तं मूर्ध्नि धर्मः कठोरः।
तदिति जनकपुत्री लोचनैरश्रुपूर्णैः
पथि पथिकवधूभिः शिक्षिता वीक्षिता च।। इति।

जगन्नाथस्तु (५९ पत्रे) प्रक्रमङ्गेन अर्थघाटनात्मकमवैषम्यं समता इति समतां सलक्ष्य–

हरिः पिता हरिर्माता हरिर्भ्राता हरिः सुहृत्।
हरिं सर्वत्र पश्यामि हरेरन्यन्न भाति मे।।

इत्युदाजहार। मम्मटस्तु समतां क्वचिद्दोषरूपां मन्यते। यथा मातङ्गा इत्यादौ (पूर्वस्मिन् ५६ पत्रे) क्वचिञ्च गुणस्वरूपाम्। गुणस्वरूपाया अस्याः प्रबन्धानुरूपेण माधुर्यौजःप्रसादेषु यथायथमन्तर्भावः। दर्पणकारोपि प्रकाशकारमेवानुसरति। तेनोक्तं यथा–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्वचिद्दोषस्तु समता मार्गभेदस्वरूपिणी।

अन्यथोक्तगुणेष्वस्या अन्तःपातो यथायथम्। (८.१३) इति।

हेमचन्द्राचार्योपि समता न सर्वत्र गुणरूपा इति कविसंप्रदायानुमत्या निवेद्य समतोज्झितं काव्यमुदाहरति। यथा–

अज्ञानाद्यदि वाधिपत्यरभसादस्मत्परोक्षे हृता
सीतेयं प्रतिमुच्यतामिति वचो गत्वा दशास्यं वद।
नोचेल्लक्ष्मणमुक्तमार्गणगणाच्छादोच्छलच्छोणित-
च्छत्रच्छन्नदिगन्तमन्तकपुरं पुत्रैर्वृतो यास्यसि। (१९७ पत्रे)

इति। एवमन्यत्रापीति ज्ञेयम्।।५०।।

विवृति

समोदाहरणं सममिति। समं बन्धेषु समत्वेन स्वीकृतम्; अविषमम् इति यावत्। ते हि बन्धाः मृदुस्फुटमिश्रत्वात् त्रिविधा भवन्ति। मृद्वक्षरैः अल्पप्राणाक्षरैः ग्रथिताः मृदवः। नमृदुस्फुटाक्षरैः घोषवद्भिः ग्रथिताः स्फुटाः। मिश्राक्षरैः ग्रथिताः समाः। एषु मृदुस्फुटौ गौडीयैः स्वीकृतौ। मध्यमस्तु अविषमः इति वैदर्भैः स्वीकृतः।।

मृदूदाहरणं **कोकिलेत्यादि**। स्फुटोदाहरणं **उञ्चलदिति**। मिश्रोदाहरणं **चन्दनेत्यादि**। उक्तं निगमयति–इतीति। इति वैषम्यं अनालोच्य, अर्थालङ्कारयोः डम्बरम् अतिसुभगतां आलोक्य च, गौडानां काव्यपद्धतिः ववृधे प्रवृत्ता।।५०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मधुरं रसवद्वाचि वस्तुन्यपि रसः स्थितः।
येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः॥५१॥

रत्नश्री

यत्काव्यं रसवत्सरसमित्यनूद्य मधुरमिति विधीयते। क्व पुनरसौ वर्त्तते येन युक्तं मधुरं स्यात्। शब्देऽर्थे च। प्रकर[ण]सम्भवादिति दर्शयन्नाह-वाचीत्यादि। [वाचि] शब्दे [वस्तुनि अ]र्थे च। रसः स्थितः तिष्ठति। उभयं रसवत् मधुरमित्यर्थः। किं तेनेति चेदाह-येनेत्यादि। येन रसेन येन रसवता काव्येन आस्वादितेन हेतुना माद्यन्ति प्रीतिविशेषं निर्विशन्ति धीमन्तः कवयो रसज्ञाः। कथमित्याह-मधुनेत्यादि। मधुना कुसुमासवेन मधुव्रता भ्रमरा इव। मधु व्रतं भोजनं येषामिति। यथा मधुनात्यन्तं प्रीयन्ते मधुलिहः तथा कवयस्तादृशेन काव्येनेत्यर्थः॥

न ज्ञायते कीदृशोऽसौ इति विशेषेण दर्शयन्नाह-

हृदयङ्गमा

माधुर्य्यं निरूपयति, मधुरमिति।-रसवत् रसाः श्रृङ्गारादयः, तद्गुणयोगात् भाव-तदाभासा अपि रसशब्दवाच्याः, ते विद्यन्ते यत्रेति तत् वाक्यं मधुरं माधुर्य्यगुणयुक्तम्। (केचित्तु श्रृङ्गारकरुणान्यतरप्रकाशानुगुणव्यापारावेशेन शब्दार्थयोः चित्तद्रुतिविधायित्वं माधुर्य्यमित्याहुः, यथा,-"श्रृङ्गार एव मधुरः परः प्रह्लादनो रसः। तन्मयं काव्यमाश्रित्य माधुर्य्यं प्रतितिष्ठति॥ श्रृङ्गारे विप्रलम्भाख्ये करुणे च प्रकर्षवत्। माधुर्य्यमात्रतां याति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतस्तत्राधिकं मनः।।" इति) तर्हि रस एव माधुर्य्यमित्यर्थत एव आयातं, परं गुणानां साक्षात् परम्परया वा रसोपकारकत्वं सर्वैरेव कविभिः अङ्गीकृतं, न तु रसात्मकत्वमित्याशङ्क्याह, वाचीति।—वाचि वाक्प्रतिपादकतादृशवर्णे, वस्तुन्यपि वाक्यप्रतिपाद्यभूते अर्थेऽपि, रसस्थितिः रसानां श्रृङ्गारादीनां, स्थितिः व्यञ्जकत्वसम्बन्धेनावस्थानम्। (रसव्यञ्जकवर्णाश्च श्रृङ्गारकरुणशान्तरसे,—"मूर्द्धि वर्गान्त्यवर्णेन युक्ताष्टठडढान् विना। रणौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः।। अवृत्तिरल्पवृत्तिश्च मधुरा रचना तथा।।" इत्युक्तलक्षणाः। वीरबीभत्सरसेषु च,—"वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ। उपर्य्यधो द्वयोर्वा सरेफष्टठडढैः सह।। शकारश्च षकारश्च तस्य व्यञ्जकतां गताः। तथा समासबहुला—" एतल्लक्षणोक्ताः। हास्याद्भुतभयानकरसेषु च तत्तदवशिष्टा मध्यवर्णा मध्यसमासाश्च विज्ञेयाः, तथा रसव्यञ्जका अर्थाश्च रत्यादिस्थायिभावाः एव; ततश्च रसव्यञ्जकवर्णार्थादिमत् वाक्यं माधुर्य्यम् इति लक्षणम्)। रसवत् इत्यनेन प्राप्तस्य रसस्य लक्षणमज्ञात्वा तद्व्यञ्जकवर्णादीनां परिज्ञानासम्भवात् रसलक्षणमाह, येनेति।—येन धीमन्तः सामाजिकाः, न तु कुधिय इत्यर्थः, मधुव्रताः भ्रमराः, मधुनेव माद्यन्ति मत्ता भवन्ति, तस्य लोकोत्तराह्लादरूपत्वादिति भावः, स रस इति शेषः ; तथा च सुधियां मादहेतुः तादृशकाव्यार्थानुशीलनजन्मा भावविशेष एव रसः। [स च "रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च।।" इत्युक्तलक्षणस्थायिभावरूपः। रत्यादिस्थायिभावश्च ललनादिभि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रालम्बन विभावैः जनितः, उद्यानादिभिरुद्दीपनविभावैरुद्दीपितः, कटाक्षादिभिरनुभावैः प्रतीतियोग्यक्रियमाणः, उत्कण्ठादिभिर्व्यभिचारिभिः परिपोषितः नायकनिष्ठतया अनुमीयमानः वासनासन्निकर्षेण सामाजिकैः साक्षात् क्रियमाणश्च रसः इति संज्ञां लभते। उक्तञ्च,–"व्यक्तः स तैर्विभावाद्यैः स्थायिभावः रसः स्मृतः" इति, "विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा। रसतामेति रत्यादिः स्थायिभावः सचेतसाम्।।" इति च। श्रृङ्गारहास्यकरुणरौद्रवीरभयानकबीभत्साद्भुतरसानां वक्ष्यमाणानां स्थायिभावाश्च क्रमेण रतिहासशोकक्रोधोत्साहभयजुगुप्साविस्मया वेदितव्याः। शान्तरसस्य च शमः। अत्र च रसानामष्टत्वमेव प्रतिपादयिष्यते। तत्तु "अष्टौ नाट्ये रसाः स्मृताः" इत्युक्तेः नाटयाभिप्रायेण, श्रव्यकाव्ये शान्तरसस्यापि सम्भवात्; यदुक्तं,–"न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा। रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु शमप्रधानः।।" इति सुधीभिर्भाव्यम्। केचित्तु,–"बन्धे पृथक्पदत्वञ्च माधुर्य्यमुदितं बुधैः" इत्युक्तलक्षणं पृथक्पदत्वं माधुर्य्यं शब्दगुण इत्याहुः, यथा,–"स्थिताः क्षणं पक्ष्मसु ताडिताधराः पयोधरोत्सेधनिपातचूर्णिताः" इत्यादि। अत्र पदेषु संहिताभावात् पृथक्पदत्वेन माधुर्य्यं, तञ्च वामनेनाप्युक्तं,–"पृथक् पदत्वं माधुर्य्यम्" (का० सू० वृ० ३अधि० १अ० २१सू०) इति। अर्थगुणमाधुर्य्यञ्च "माधुर्य्यमुक्तमाचार्य्यैः क्रोधादावप्यतीव्रता" इत्युक्तलक्षणं ज्ञेयम्; यथा,–"भ्रूभेदे सहसोद्गतेऽपि वदनं नीतं परां नम्रतामीषन्मां प्रति भेदकारि हसितं नोक्तं वचो निष्ठुरम्। अन्तर्वाष्पजड़ीकृतं प्रभुतया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चक्षुर्न विस्फारितं, कोपश्च प्रकटीकृतो दयितया मुक्तश्च नो प्रश्रयः॥" अत्र वासवदत्तालक्षणस्यार्थस्य कोपेऽपि योऽयं विनयावलम्बनेन कोपचिह्ननिह्नवः तन्माधुर्य्यम्। वामनस्तु,–. "उक्तिवैत्रियं माधुर्य्यम्" (का० सू० वृ० ३अधि० २अ० १०सू०) इत्युक्तलक्षणं माधुर्य्यम् अर्थगुण इत्याह, तदुभयमतवैषम्यं परिलक्ष्यते]॥५१॥

प्रभा

माधुर्यं लक्षयति–**मधुरमिति**। रसवत् सरसं वाक्यं मधुरम् माधुर्यगुणवत्। ननु अनेन लक्षणेन माधुर्यमेव रस इति पर्यायेण प्रतिपादितं भवति। माधुर्यं च गुणः। गुणानां हि साक्षादथवा शब्दार्थनिष्ठतया परंपरया रसोपकारकत्वं सर्वैः प्राचीनार्वाचीनैः साहित्यशास्त्रप्रवीणैरङ्गीकृतं वर्तते। न केनापि तस्य रसात्मकत्वमङ्गीकृतमत आह–**वाचि** इति। वाचि वाक्यघटकतद्वर्णसमासनिबद्धरीत्यादिषु। तथा वस्तुनि प्रतिपाद्यतत्तदर्थविशेषेषु च। अर्थाश्चात्र तत्तद्रसीयविभावानुभावादयो ग्राह्याः। एषां रसव्यञ्जकत्वमुक्तं प्रकाशे–व्यक्तः स तैर्विभावाद्यैः स्थायिभावो रसः स्मृतः (४.२८) इति। रसः–

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्साद्भुतसंज्ञाश्च शान्तोपि नवमो रसः॥

इत्येतेष्वन्यतमः। तथा रसनधर्मसंबन्धित्वाद् भावतदाभासादयश्च रसशब्देन ग्राह्याः। तेषां स्थितिर्व्यञ्जकतया संबन्धो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रसस्थितिः। तेन च वाक्यस्य रसव्यञ्जकवर्णविशिष्टरचनात्वं रसव्यञ्जकार्थविशिष्टत्वं वा माधुर्यम् इति लक्षणं सिद्धम्। तत्र शृङ्गारकरुणशान्तानामसमासा अल्पसमासा वा मृदुवर्णा वैदर्भी रीतिर्व्यञ्जिका। वीरबीभत्सरौद्राणां दीर्घसमासा विकटवर्णबहुला च गौडीया रीतिः प्रकाशिका। हास्याद्भुतभयानकानां च मध्यमवर्णा मध्यमसमासा च पाञ्चाली रीतिरुद्बोधिका। तदुक्तं प्रकाशटीकायाम्–

वैदर्भीपाञ्चाल्यौ प्रेयसि करुणे भयानकाद्भुतयोः।
लाटीं गौडीं रौद्रे कुर्याद्यथायथैवोचितं सुकविः।।

इति। (५८७ पत्रे)

सोयं रसः किंस्वरूपस्तत् कथयति–**येनेति**। धीमन्तः सहृदयाः कुशलबुद्धयो वा। येन वस्तुना माद्यन्ति आनन्दातिशयेन हृष्टा भवन्ति स रसः। अस्य हर्षातिशयस्य हेतुस्तावत् काव्यार्थानुशीलनोद्बुद्धचमत्कारापरपर्यायो लोकोत्तराह्लादः। स एव च रसः। आह्लादस्य स्वरूपमुपमया विशदयति–**मधुनेति**। मधुव्रता भ्रमराः। मधुना यथा माद्यन्ति तथेत्यर्थः।। माधुर्यविषये अन्येषां लक्षणोदाहरणानि। तत्र प्रथमं तावद्भरतः–

बहुशो यच्छ्रुतं काव्यमुक्तं वापि पुनः पुनः।
नोद्वेजयति तस्माद्धि तन्माधुर्यमुदाहृतम्।। इति। (१६.९८)

श्रव्यं नातिसमस्तार्थं काव्यं मधुरमिष्यते। (२.३) इति भामहः। ओजः प्रसादयोरपि श्रव्यत्वान्नैतल्लक्षणं निर्दोषमिति प्रकाशकारादयः। वामनस्तु–पृथक्पदत्वं माधुर्यमिति (३.१.२०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्षणं कृत्वा, अस्त्युत्तरस्यामिति उदाहरत्। भोजोपि-या पृथक्पदता वाक्ये तन्माधुर्यमिति स्मृतम्। (१.६८) इति शब्द गतमाधुर्यलक्षणं कृत्वा–स्थिताः क्षणं पक्ष्मसु ताडिताधरा इत्युदाजहार। परं नैतत् क्षोदक्षमम्। समासेपि माधुर्यदर्शनात्। यथा हेमचन्द्रः–

अनवरतनयनजललवनिपतनपरिमुषितपत्रलेखान्तम्।
करतलनिषण्णमबले वदनमिदं किं न तापयति।।
इति। (१६८ पत्रे)

वाग्भटस्तु–(काव्यानुशासन, ३० पत्रे) यत्र आनन्दमन्दं मनो द्रवति तन्माधुर्यम्। तच्च रसभेदेन विविधम्। तत्र शृङ्गारे यथा–

प्रियतमावदनेन्दुविलोकितैरसुहितः कलकण्ठयुवा नवः।
प्रतिमुहुः प्रतिगत्य नभस्तलाद्वलति याति चलत्यथ यात्यथ।।

शान्ते यथा–

यैः शान्तरागरुचिभिः परमाणुभिस्त्वं
निर्मापितस्त्रिभुवनैकललामभूतः।
तावन्त एव खलु तेप्यणवः पृथिव्यां
यत् ते समानमपरं न हि रूपमस्ति।।

करुणे यथा–

गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम्।। इति।

प्रकाशकार आह–

आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम्।
करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्। (८.५८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगन्नाथस्तु (५९ पत्रे) एकस्या एवोक्तेर्भङ्ग्यन्तरेण पुनः कथनात्मकयुक्तिवैचित्र्यं माधुर्यमिति अर्थगतमाधुर्यस्य लक्षणं विधाय उदाहरति–

विधत्तां निःशङ्कं निरवधिसमाधिं विधिरहो
सुखं शेषे शेतां हरिरविरतं नृत्यतु हरः।
कृतं प्रायश्चित्तैरलमथ तपोदनयजनैः
सवित्री कामानां यदि जगति जागर्ति भवती।। इति।

दर्पणकारस्तु–चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते। इति (८.२) लक्षणं विधाय–

अनङ्गमङ्गलभुवस्तदपाङ्गस्य भङ्गयः।
जनयन्ति मुहुर्यूनामन्तः संतापसंततिम्।।

इत्युदाहरत्। एवमेवान्येपि विद्यानाथादयः।।५१।।

विवृति

माधुर्यमुदाहरति–

वाचि यद्रसवत् तन्मधुरम्। मधुरमित्यनेन धर्मिपदेन धर्मोऽभिधीयते माधुर्यम्। क्वचिद्धर्मिणा धर्मनिर्देशः, यथा–ककुद्मान् विषाणी प्रान्तवालधिर्गोत्वे लिङ्गमिति। अत्र विषाणीत्यादिना धर्मिणा धर्मो गोत्वमुच्यते। वाचि रसवदिति विशेषणात् 'रसवद्रसपेशलम्' इत्यर्थालङ्कारगतं न रसवत्त्वमिहोच्यते। तद्धि श्रृङ्गारादिरसयुक्तम्। इदं तु शब्दमाधुर्यमिति ज्ञातव्यम्। न केवलं वाच्येव, वस्तुनि अर्थेऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रसः स्थितः, रसवत्त्वं स्थितम्। येन रसवत्त्वेन माद्यन्ति तुष्यन्ति मधुनेव मधुव्रताः॥५१॥

मधुरं लक्षयति-**मधुरमिति।** शब्दाश्रयं अर्थाश्रयं च विबुधमनोरञ्जनं माधुर्यं द्विविधम्॥५१॥

माधुर्यमाह–**मधुरमिति।** वाचि शब्दे रससमुपेते वस्तुनि अर्थे च रसस्थितिः यस्य तत् मधुरं नाम॥५१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

**यया कयापि श्रुत्या यत् समानमनुभूयते।
तद्रूपादिपदासत्तिः सानुप्रासा रसावहा॥५२॥**

रत्नश्री

यत् पदं समानं सदृशं पदान्तरेणानुभूयते श्रूयते। किं वर्णावृत्या नेत्याहयया कयापि श्रत्येति। येन केनचित् [का]रणेन पदावयवभूतेन यथाकथञ्चित् स्थानमात्रासंयोगादिकृतसाम्येन लक्षितं सत् तद्रूपस्तथाविधः सदृशपदलक्षण आदिरुत्तरोत्तरविजातीयपदापेक्षया येषां पदानां तानि तद्रूपादीनि पदानि तद्वा रूपं शब्दरूपं समानं पदमादिरादिरुत्तरोत्तरापेक्षया पूर्वं येषामिति विग्रहः। तेषामासत्तिरासन्नता यथाकथञ्चित् समानश्रुतीनां पदानामासन्नता रसमावहति श्रुतिसुभगतामातनोतीति रसावहा भवति। यथाकथञ्चित् समानश्रुतीनि पदानि [21b] अदूरवर्त्तीनि काव्ये रसवत्तां संपादयन्ति यतो मधुरं स्यात्। अयं च समानपदासत्तिर्नाम समानश्रुतिर्नाम वा शब्दरसः दाक्षिणात्यैरत्यन्तमिष्यते। अनुप्रासोऽपि शब्दरसोऽस्ति, स किं दाक्षिणात्यैर्नेब्यते। सोऽपीष्यत इत्याह-सानुप्रासेति। अनुप्रासस्य लक्षणं वक्ष्यति। सह तेन वर्त्तते सानुप्रासा, रसावहा [इत्यने]नावधार्यते। समानश्रुतेरेव रसावहेति। अनुप्रासोऽपि च रसमावहति। ततश्चशब्दरसो द्विविधो दर्शितो भवति। समानपदासत्तिरनुप्रासश्च। अनयोश्च न सहभावनियमः। यथासम्भवं क्वचित् काव्ये समानपदासत्तिः। क्वचिदनुप्रासः। क्वचिदुभयम्। द्वयेन तु रहितं विरसं काव्यं न स्वाद्यते कविभिरितीदृशं माधुर्यं द्विविधं प्रतिपत्तव्यम्॥

समानपदासत्तिमुदाहरन्नाह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

श्रुत्यनुप्रासघटितवर्णसंहतेः रसव्यञ्जकतां दर्शयति, ययेति।–यया कयाचित् कण्ठताल्वादिरूपया इत्यर्थः, श्रुत्या श्रवणसाधनीभूतेन उच्चारणेन, समानं सदृशं, प्रागुच्चरितव्यञ्जनतुल्यमित्यर्थः, अनुभूयते प्रतीयते, तद्रूपा तादृशानुभवविषयभूतव्यञ्जनवतौ, पदासत्तिः पदानाम् आसत्तिः अव्यवधानेन अवस्थितिः, सानुप्रासा श्रुत्यनुप्रासवती, अत एव रसम् आवहतीति रसावहा, हिरवधारणार्थः, निश्चितमेव रसपोषिकेत्यर्थः। [अनुप्रासस्य काव्योत्कर्षकरत्वमुक्तञ्च,–"यथा ज्योत्स्ना शरच्चन्द्रं यथा लावण्यमङ्गनाम्। अनुप्रासस्तथा काव्यमलङ्कर्त्तुमिह क्षमः।।" इति, एतेन तालुरदाद्येकस्थानोच्चार्य्यतया व्यञ्जनवर्णानां सादृश्यं श्रुत्यनुप्रास इत्यर्थात् आयातम्। उक्तञ्च दर्पणकारेण यथा,–"उच्चार्य्यत्वात् यदेकत्र स्थाने तालुरदादिके। सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते।।" इति। अस्य च अलङ्कारप्रकरणीयत्वेऽपि इह गुणप्रसङ्गात् लक्षणमुक्तं, वक्ष्यते च,–"काश्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलङ्क्रियाः" (२५० ३श्लोकः) इति]।।५२।।

प्रभा

वाचि रसः स्थित इत्यनेनोक्ताया वाकयरसस्थितेर्व्यञ्जकं विशिष्टवर्णविन्यासरूपं श्रुत्यनुप्रासं वैदर्भानुमतं वर्णयति-**ययेति**। यया कयापि कण्ठतालव्याद्यन्यतरया श्रुत्या श्रूयतेनेनेति श्रुतिरुच्चारणम्। करणे क्तिन्। अथवा श्रुतिः श्रवणम्। भावे क्तिन्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तया श्रुत्या समानम् पूर्वोच्चरितसदृशम्। अथवा पूर्वश्रुतवर्णसदृशम् अर्थादेकस्थानत्वेन। यद् अनुभूयते तद्रूपा तादृशसादृश्यानुभवोत्पादिका। पदासत्तिरव्यवहितपदप्रयोगः। सानुप्रासा अनु समीपे प्रकृष्टो रसानुकूलो न्यासः अनुप्रासस्तया युक्ता। श्रुत्यनुप्रासवतीति बोद्धव्यम्। सा च रसावहा रसपोषिका अस्तीति शेषः। अयमाशयः। कण्ठतालव्याद्यनेकस्थानोच्चार्यत्वेन व्यञ्जनानां सादृश्यं श्रुत्यनुप्रासः। अयं वैदर्भप्रियः। तदुक्तं भोजराजेन–

आवृत्तिर्या तु वर्णानां नातिदूरान्तरस्थिता।
अलंकारः स विद्वद्भिरनुप्रासः प्रदर्श्यते।।
श्रुतिभिर्वृत्तिभिर्वर्णैः पदैर्नामद्भिरुक्तिभिः।
लाटानामुक्तिभिश्चायं षट्प्रकारः प्रकाशते।।

प्रायेण श्रुत्यनुप्रासस्तेष्वनुप्रासनायकः।
सनाथैव हि वैदर्भी भाति तेन विचित्रिता।।
इति। (२.७०-७२)

दर्पणकारोपि–

उच्चार्यत्वाद्यदेकत्र स्थाने तालुरदादिके।
सादृश्यं व्यञ्जनस्यैष श्रुत्यनुप्रास उच्यते।।(१०.५) इति।

अस्यानुप्रासस्य सौन्दर्यं वर्णितं भोजराजेन–

यथा ज्योत्स्ना शरच्चन्द्रं यथा लावण्यमङ्गनाम्।
अनुप्रासस्तथा काव्यमलंकर्तुमिह क्षमः।। (२.७६) इति।

अलंकारस्यास्य अलंकारनिरूपणप्रकरणे निरूपणीयत्वेति अत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैदर्भगौडमार्गभेदकथनप्रसङ्गतो निरूपणं कृतमिति बोद्धव्यम्। अतोग्रे वक्ष्यति-काश्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलंक्रियाः। (२. ३) इति।।५२।।

विवृति

कथं पुना रसवद्भवतीत्याह-

यया कयाचित् श्रुत्या यत् वचः स्थानगुणप्रमाणरूपया कण्ठोष्ठतालुदन्ताद्युदात्तादिह्रस्वदीर्घादिकया समानं सदृशमनुभूयते तस्य रूपं तद्रूपं तदादि(?)यस्य तत् तद्रूपादि तञ्च तत्पदं च तद्रूपादिपदं तस्य तेन वाऽऽसत्तिः अव्यवहितता सा रसावहा रसं रसवत्तामावहति। सानुप्रासा अनुप्रासेन सह वर्तत इति सानुप्रासा।।५२।।

तत्र शब्दमाधुर्यं लक्षयति-**ययेति**। यया कयाऽपि श्रुत्या कण्ठाद्येकस्थानजननप्रयुक्तेन स्पृष्टतादिप्रयत्नजन्येन वा एकेन ध्वनिविशेषेण यञ्च रूपं समानं अनुभूयते, तस्य शब्दरूपस्य, तद्रूपादिपदासक्तिः-तद्रूपेण तच्छ्रुतिमता आदिपदेन पूर्वानुभूतेन पदेन शब्देन सह, या आसक्तिः सा रसाबहा; स्थानादिजन्यैकश्रुतिमतोः पदयोः वर्णयोर्वा स्थितिरपि प्रकृष्टा श्रुतिसाम्यनामरसावहेत्यर्थः। सानुप्रासा-अनुप्रासश्च रसावहः इति यावत्। एवं द्विविधं शब्दमाधुर्यम्।।५२।।

माधुर्यस्वरूपं प्रदर्श्य प्रथमं शब्दे इदं दर्शयितुमाह-**ययेति**। तद्रूपं तथाविधं रूपं आदिः यस्य तस्य आसक्तिः या सा सानुप्रासा। शब्देन रसावहा सा भवति।।५२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एष राजा यथा लक्ष्मीं प्राप्तवान् ब्राह्मणप्रियः।
तदाप्रभृति धर्मस्य लोकेऽस्मिन्नुत्सवोऽभवत्।।५३।।

रत्नश्री

कश्चित् राजानमुद्दिश्चोच्यते। एष राजा अयं नृपः यथा यतः प्रभृति राज्यलक्ष्मीं प्राप्तवान् नराधिपतामधिगतः, तदा प्रभृति तत आरभ्य धर्मस्य श्रुतिस्मृतिविहितस्य सनातनस्य वर्णाश्रमाचारमार्गस्य लोकयात्राया उत्सवोऽभ्युदयो निर्विशङ्का प्रवृत्तिरभवत्। लोकेऽस्मिन् अत्र वर्णाश्रमलक्षणे जगति। कुतः ब्राह्मणप्रियो यतः। ब्राह्मणाः प्रिया अस्येति। ब्राह्मणप्रियो हि तद्वचनानुवर्ती शास्त्रविहितं [धर्मं] प्रवर्त्तयतीत्यर्थः। क्वचिदिह दीर्घकृतं सादृश्यं क्वचित् स्थानकृतं क्वचित् संयोगकृतं क्वचित् कथञ्चिदित्यनुवचनगम्यमेतत्। अत एवाह-यया कयापि श्रुत्या यत्समा[22a]नमनुभूयते [1.52] इति।

नमः सम्पन्नकृत्याय बुद्धाय जगदर्थिने।
कन्दर्पविभ्रमच्छेदवेधसे क्लेशविद्विषे।।

इत्यपरमुदाहरणाम्।।

अस्य समानश्रुतिलक्षणस्य माधुर्यस्य गौड़वर्त्मनि विष्पर्ययं दर्शयन्नाह-

हृदयङ्गमा

उदाहरणं दर्शयति, एष इति।- ब्राह्मणाः प्रिया यस्य अथवा ब्राह्मणानां प्रियः, एष राजा यदा लक्ष्मीं राजश्रियं, प्राप्तवान्, ततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभृति लोके जगति, धर्मस्य उत्सवः अभवत्, असौ धर्मेण प्रजाः पालयामास इत्यर्थः। (इह षकारवकारयोः एकस्मात् मूर्द्धः जकारयकारयोस्तालुतः दकारलकारयोश्च दन्तादुच्चरितत्वेन सादृश्यमित्यतः श्रुत्यनुप्रासाः ; ततश्च तस्य राजविषयकरतिभाव-व्यञ्जकतया माधुर्य्यगुणयोगः, पदेषु सहिताभावात् पृथक्पदत्वेनास्य शब्दगतत्वञ्च इति विभावनीयम्)।।५३।।

प्रभा

श्रुत्यनुप्रासमुदाहरति–**एष इति**। ब्राह्मणप्रियः ब्राह्मणाः प्रिया यस्य सः। अथवा ब्राह्मणानां प्रियो धर्मशीलत्वात्। एतादृश एष राजा यदा लक्ष्मीं संपदं राज्यश्रियं वा प्राप्तवान् लब्धवान्। तदाप्रभृति तत्कालमारभ्य अस्मिल्लोके धर्मस्य सदाचरणस्य उत्सव उत्कर्षोभवत्। दानादिभिर्धर्मकृत्यं विस्तारयामास। अथवा धर्मेण प्रजाः शशासेत्यर्थः। अत्र षकाररेफौ मूर्धन्यौ। जकारयकारौ तालब्यौ। दकारलकारौ दन्त्यौ। इति प्रथमपादे। तकारदकारौ दन्त्यौ। पकारभकारावोष्ठ्यौ। तकारधकारौ दन्त्यौ। इति तृतीयपादे च निरन्तरौ। द्वितयपादे रेफणकारौ मूर्धन्यौ। चतुर्थे च लकारसकारौ दन्त्यौ। सान्तरौ। इति स्थानसाम्याच्छुत्यनुप्रासः। स च धार्मिकराजर्षिविषयकरतिभावस्य पोषक इति अस्ति माधुर्यम्।।५३।।

विवृति

तत्र स्थानश्रुत्या समानं मधुरमुदाहरति–

अत्र षकाररेफयोर्मूर्धन्ययोः, जकारयकारयोस्तालव्ययोः, तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दकारलकारयोर्दन्त्ययोः, मकारपकारयोरौष्ठ्ययोः स्थानगतं श्रुतिसारूप्यमस्तीति मधुरमुक्तम्।।५३।।

तत्र श्रुतिसाम्यस्य उदाहरणमाह—एष इति। षरयोः मूर्धन्यत्वात् श्रुतिसाम्यम्; जायेति तालव्यत्वात्, दालेति दन्त्यत्वात्, पबयोरोष्ठ्यत्वात्, तदेति तिधेति च दन्त्यत्वात्।।५३।।

प्राप्त-ब्राह्मण प्रभृतीनां रेफः पृथक्प्रयुक्तराजेति रेफपदस्य आदिभूतत्वात् समानं अनुभूयते।।५३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीदं नादृतं गौडैरनुप्रासस्तु तत्प्रियः।
अनुप्रासादपि प्रायो वैदर्भैरिदमीप्सितम्॥५४॥

रत्नश्री

इतीदम् एवंविधं समानपदासत्तिलक्षणं माधुर्यं गौडैर्नादृतम्, न बहु मन्यते। तेषामिदमविदितमिति यावत्। नीरसं तर्हि तेषां काव्यमिति चेदाह-अनुप्रासस्तु तत्प्रिय इति। तेषां गोड़ानां प्रियो बहुमान्यः। विदितानुप्रास[स्य] तु अनुप्रास एव शब्दरसः। दाक्षिणात्यानां तु समानपदासत्तिलक्षणः शब्दरसः प्रेयानित्याह-अनुप्रासादपीत्यादि। अनुप्रासादप्यधिकमिदं समानपदासत्तिलक्षणं माधुर्यमीप्सितमिष्टं वैदर्भैर्दाक्षिणात्यैः प्रायो बाहुल्येन तत्प्रयोगात्। ततश्च अनुप्रासोऽपि तैरिष्यत इत्युक्तं भवति। न तु तथासौ प्रियस्तेषां यथा समानपदासत्तिः। तादृशं हि माधुर्यं व्यापकं सर्वत्र सम्भवात्। अनुप्रासस्तु न तथा व्यापकः क्वचिद् दर्शनात्। अत एव प्राय इदमीप्सितमित्युक्तम्। शब्दरसस्तूभयमपि। द्वयेन तु हीनं नीरसं नास्वाद्यते कविभिरिति॥

कः पुनरसावनुप्रासो यो गौड़ानां प्रियः? दाक्षिणात्यानां चेत्यवसरप्राप्तमनुप्रासं लक्षणतो लक्ष्यतश्च दर्शयन्नाह-

हृदयङ्गमा

अत्र वैदर्भीगौडयोर्मतभेदं दर्शयन्नाह, इतीति।-इतिपदं पूर्वोक्तद्योतकम्; इति पूर्वोक्तम्, इदं पद्यं, गौड़ैः गौड़वासिभिः कविभिः, न आदृतं माधुर्य्यगुणवत्त्या वैचित्र्यात्मकत्वन्तु न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वीकृतं, विभिन्नवर्णानामेकस्थानोच्चरितत्वेऽपि रसानुगुण्यस्याननुभवादिति भावः। अनुप्रासस्तु वक्ष्यमाणवर्णावृत्तिरूपः, तत्प्रियः तेषां गौड़ानां, प्रियः रसानुकूल्यतया आदृतः। वैदर्भैस्तु अनुप्रासात् पूर्वोक्तात् श्रुत्यनुप्रासादपि, प्रायः बहुल्येन, इदम् एष राजेत्यादि पद्यम्, इष्यते आद्रियते, (इत्थञ्च वैदर्भाणां श्रुत्यनुप्रासवर्णावृत्तिरूपानुप्रासयोरुभयोरेव प्रियता, गौड़ानान्तु केवलं वर्णावृत्तिरूपे इति अनयोर्मतभेद इति दिक्)।।५४।।

प्रभा

गौडवैदर्भयोरन्तरं स्फुटं वर्णयति-**इतीदमिति**। इति एवं पूर्वदर्शितरचनाप्रकारमिदं श्रुत्यनुप्रासघटितं काव्यं गौडैः पौरस्त्यैर्नादृतम् माधुर्यगुणत्वेन नाङ्गीकृतम्। समानश्रुतिवर्णानां रसोपकारकचमत्कृतिशून्य- त्वान्नायमलंकार इति तेषामभिप्रायः। अनुप्रासो वर्णावृत्तिरनुप्रास इत्यग्रे (१.५५) वर्णितो वर्णानुप्रासः। तेषां गौडानां प्रियः। सदृशवर्णोच्चारणेन अविर्भूता चमत्कृती रसावहा इति तेषां हृदयम्। वैदर्भीयैस्तु अनुप्रासादपि वर्णानुप्रासादपि वर्णानुप्रासमपेक्ष्येत्यर्थः। ल्यब्लोपे पञ्चमी। इदम् श्रुत्यनुप्राससनाथं काव्यमिति शेषः। इष्यते रसोपकारकत्वेन स्वीक्रियते। प्रायःपदेन शैथिल्यपारुष्यदोषवर्जिते वृत्त्यनुप्रासेपि तेषामादरोस्तीति ध्वन्यते। तदुक्तं प्रकाशे-

माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते।
ओजःप्रकाशकैस्तैश्च परुषा कोमला पैरः।। इति। (९.८०)

उपनागरिका वैदर्भी परुषा गौडी कोमला पाञ्चाली इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संज्ञान्तरं ज्ञेयम्। श्रुत्यनुप्रासवृत्त्यनुप्रासयोः चमत्काराचमत्कार-साक्षात्कारे वैदर्भगौडा एव प्रमाणम्। न तत्र काचन युक्तिरित्यलं पल्लवितेन॥५४॥

विवृति

इतीदमेवंविधं स्थानसारूप्यगतं माधुर्यं गौडैर्नादृतं नेष्टम्। यतस्तेषामनुप्रासः प्रियः। वैदर्भैः पुनः अनुप्रासादपि प्रायोऽभिमतमिदमेव। प्रायोग्रहणादनुप्रासोऽप्यभिमतः॥५४॥

श्रुतिसाम्यवर्णानुप्रासौ वैदर्भगौडयोः विभाजितौ इत्याह–इतीति॥५४॥

उक्तः प्रकारो वैदर्भैः स्वीकृतः, न तावत् गौडैः इत्याह–इतीति। इदम् इत्युक्तप्रकारानुप्रासः गौडैः न आदृतम्। तेषां गौडानामन्योऽनुप्रासः अतीव हि प्रियो भवति। वैदर्भैः अनुप्रासादपि इदमेव सुतरां स्वीकृतं भवति इत्यर्थः॥५४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

**वर्णावृत्तिरनुप्रासः पादेषु च पदेषु च।
पूर्वानुभवसंस्कारबोधनी यद्यदूरता॥५५॥**

रत्नश्री

वर्णस्य स्वरव्यञ्जनलक्षणस्य आवृत्तिः पुनःपुनरुच्चारणम् इत्यनूद्यानुप्रासो वेदितव्य इति विधीयते। प्रथमस्तस्य प्रथमप्रयुक्तस्याक्षरस्य [22b] अनु पश्चादास उपक्षेपः प्रयोगः अनुप्रासः। क्वासौ सम्भवीत्याह-पादेष्वित्यादि। पादेषु पर्वापेक्षया पदेषु चेत्येतत्तु गद्यापेक्षया द्रष्टव्यम्। द्वयोरपि काव्यतयाधिकारात्। यद्वक्ष्यति एतद् गद्यस्य जीवितमिति। [1.80]

अनुष्टुबादौ बृहति च वृत्ते गद्ये च सर्वत्र सन्निकर्षतो द्रष्टव्यः यतः प्रत्यासन्नतयाऽनुप्रासो गृह्येत। यदाह-पूर्वानुभवेत्यादि। पूर्वस्य पूर्वप्रयुक्तस्य वर्णस्य अनुभवः श्रोत्रेण ग्रहणं पूर्वो वा पूर्वप्रयुक्तवर्णविषयत्वात् तस्य सम्बन्धी तदन्वितत्त्वात्। पूर्वानुभवेनाहितः संस्कारः पूर्वानुभवसंस्कार इति वा मध्यपदलोपी समास एव। वर्णः तज्जातीय इति वा एकाकारस्मार्त्तविकल्पजननशक्तिलक्षणः। तस्य बोधनी प्रबोधिका स्वानुरूपविकल्पोत्पादनाभिमुख्यकारिणी अदूरता प्रत्यासन्नता पुनस्तद्वर्णानुभवस्वभावा यदि भवति तदा वर्णावृत्तिरनुप्रासः पादेषु पदेषु च सम्पत्स्यते। अन्यथा तथाविधानुभवसंस्कार-प्रबोधाभावात्तादृशविकल्पानुदयात् अनुप्रासो न स्यात्। तस्मात् स एवायं वर्ण आवृत्त इति यावतानुप्रासप्रतीतिः क्रमते तावदन्तरं कर्त्तव्यम्। अतिव्यवधाने त्वनुप्रासो न लभ्यते। यद्वक्ष्यति-न तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामामुखाम्भोज [1.58] इत्यादि। अत्र चानुभव एव प्रमाणम्, यथोक्तं प्राक्।।

यथाकथञ्चित्समानपदासत्तौ एव लक्ष्यतः प्रकाश्यं अनुप्रासमुदाहरन्नाह–

हृदयङ्गमा

अनुप्रासमाह, वर्णावृत्तिरिति।–वर्णानाम् अक्षराणां, व्यञ्जनानाम् इत्याशयः, आवृत्तिः पुनरुच्चारणम्, आवृत्तिगतसादृश्यप्रतीतिरित्यर्थः, अनुप्रासः, सादृश्यस्यैव वैचित्र्यजनकत्वेनालङ्कारत्वाङ्गीकारात्। (आवृत्तिशब्दोऽत्र तद्गतसादृश्यार्थकः, एकस्य् वर्णस्य पुनरुच्चारणेन कथं सादृश्यं तयोरभिन्नत्वादित्यपि न चोद्यम्, एकस्यापि उच्चारणकालभेदेन भेदात् तयोर्बिभिन्नत्वं बोध्यम्। एतेन वर्णस्य वर्णयोर्वर्णानां वा पुनरुच्चारणेन साम्यप्रतीतिरनुप्रास इति लक्षणमायातम्। अत एवोक्तं प्रकाशकारेण,–"वर्णसाम्यमनुप्रासः" इति। वर्णानामिति एकशेषद्वन्द्ववशात् वर्णस्य वर्णयोरपीति बोध्यम्)। स च द्विविधः, पादेषु पदेषु च, पादाः पद्यचतुर्थभागाः तेषु, पदेषु तत्तत्पादस्थसुप्तिङन्तेषु च, पादपदगत इत्यर्थः। [पादेषु चेति बहुवचनेन सर्वपादेषु अनुप्रासस्थितिर्विशेषेण मनोरमेति सूचितम्। तल्लक्षणमुक्तं वामनेन,–"पादानुप्रासः पादयमकवत्". (का० सू० वृ० ४अधि० १अ० १०सू०) इति; उदाहरणं यथा,–"कविराजमविज्ञाय कुतः काव्यक्रियादरः।।" इति। आवृत्तिश्च स्वरवैषम्येऽपि वैचित्र्यमावहति; तथा चोक्तं दर्पणकारेण,–"अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति]। आवृत्तिश्च अव्यवहिता मुख्या, व्यवधानेऽपि प्रथमोञ्चरितवर्णानां सन्निकृष्टत्वेन पूर्वानुभवसंस्कारस्थित्यवधि ग्राह्येति प्रतिपादयितुमाह, पूर्वेति।–पूर्वमुञ्चरितस्य वर्णस्य यः अनुभवः श्रावणज्ञानं, तज्जनितः संस्कारः भावनाविशेषः, तस्य बोधिनी पालनी, अदूरता द्वितीयादिवर्णस्य सान्निध्यं, यदि, वर्त्तते इति शेषः, तदैवानुप्रास इत्यन्वयः ; अयं भावः,–संस्कारस्य प्रथमक्षणे उत्पत्तिः, द्वितीयक्षणे स्थितिः, तृतीयक्षणे निवृत्तिः, इति नियमेन अव्यवधानेन किञ्चिदव्यवधानेन वा वर्णोञ्चारणस्यं मादृश्यप्रतीतिजननात् सादृश्यस्यैव वैचित्राजनकत्वेनालङ्कारत्वात् तादृशवर्णावृत्तिजन्यसादृश्यमनुप्रास इति। (अयञ्च द्विविधः, उल्वणः अनुल्वणश्च, उल्वण उत्कटपदविन्यासात्मकः, अनुल्वणः कोमलपदात्मकः ; तत्रोल्वणो यथा,–"वल्लीबद्धोर्द्धजूटोद्भटमटति रटत्कोटिकोदण्डदण्डः" इति। नव्यास्तु अस्य पञ्चविधत्वमाहुः, छेकानुप्रासः वृत्त्यानुप्रासः श्रुत्यनुप्रासः अन्त्यानुप्रासः लाटानुप्रासश्चेति, तदुक्तं दर्पणकारेण,–"छेको व्यञ्जनसङ्घस्य सकृत् साम्यमनेकधा। अनेकस्यैकधा साम्यमसकृद्वाऽप्यनेकधा। एकस्य सकृदप्येष वृत्त्यनुप्रास उच्यते।। उञ्चार्य्यत्वात् यदेकत्र स्थाने तालुरदादिके। सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते।। व्यञ्जनञ्चेत् यथावस्थं सहाद्येन स्वरेण तु। आवर्त्त्यतेऽन्त्ययोज्यत्वादन्त्यानुग्रास एव तत्।। शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्य्यमात्रतः। लाटानुप्रास इत्युक्तोऽनुप्रासः पञ्चधा ततः।।" इति। तत्र लाटानुप्रासोदाहरणं यथा तत्रैव,–"स्मेरराजीवनयने। नयने किं निमीलिते?। पश्य निर्जितकन्दर्पं कन्दर्पवशगं प्रियम्।।" इति)।।५५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

गौडप्रियमनुप्रासं लक्षयति-**वर्णा** इति। पादेषु श्लोकतुरीयभागेषु पदेषु सुप्तिङन्तरूपेषु। चद्वयमुभयप्रधान्यं सूचयति। तथा च पादगता पदगता वा वर्णावृत्तिर्वर्णस्य वर्णयोर्वर्णानां वा आवृत्तिः पुनः पुनरुञ्चारणं अनुप्रासः। पुनः पुनरुच्चारणेन साम्यप्रतीतिरनुप्रास इत्यर्थः। तदुक्तं प्रकाशे —वर्णसाम्य-मनुप्रासः। (९.७२) इति। अत्र वर्णशब्देन व्यञ्जनं ग्राह्यम्। केवलस्वराणामावृत्तौ चमत्काराभावात्। पादेषु च पदेषु च इति बहुवचनेन नैकपादगतो-नैकपदगतो वा अनुप्रासो वैचित्र्यावह इति सूचितम्। अत एव च पतत्प्रकर्षताया दोषत्वं समताया गुणत्वं च संगच्छते। सादृश्यं भिन्नयोरेव भवति इति उच्चारणकालभेदेन एकस्यापि वर्णस्य भेदोवगन्तव्यः। अथवा वर्णावृत्तिरित्यस्य वर्णनामावृत्तिरावृत्तिजन्या प्रत्यभिज्ञा इत्यर्थः स्वीकर्तव्यः। पुनः पुनः श्रवणजन्यायाः प्रत्यभिज्ञाया अपि चमत्कारजनकत्वं सुकरम्। आवृत्तिश्च स्वरसहितस्येति नाग्रहः। स्वरवैषम्येपि चमत्कारदर्शनात्। उक्तं हि दर्पणे-अनुप्रासः शब्दसाम्यं वैषम्येपि स्वरस्य यत्। (१०, ३.) इति। सा वर्णावृत्तिः कीदृशी अपेक्ष्यते इति विशदयति-**पूर्वेति**। पूर्वोञ्चारितवर्णस्य योनुभवः श्रावणप्रत्यक्षं तज्जनितो यः संस्कारः भावनाविशेषस्तस्य बोधिनी उद्बोधकर्त्री। एतादृशी यदि अदूरता द्वितीयवर्णादीनां निकटस्थितिः स्यात् तदैवानुप्रास इति शेषः। अस्यायमाशयः। सादृश्यप्रतीतेः प्रत्यभिज्ञाया वा चमत्कृतिजनिकाया असंभवे नालंकारः स्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैचित्र्यस्यैव अलंकारत्वेन शिष्टैः स्वीकृतत्वात्। तथा च सादृश्योद्बोधिका वर्णावृत्तिरनुप्रासालंकार इत्यर्थः। तच्च सादृश्योद्बोधनं आवृत्तौ द्वित्रवर्णव्यवधानं कथंचित् सहते न तु बहुवर्णव्यवधानम्। एतदग्रे प्रत्युदाहरणे स्फुटीभविष्यति। अस्यानुप्रासस्य भोजराजप्रभृतिभिर्बहवः प्रकारा दर्शिताः। तान् सर्वान् विस्तारभिया वयमत्र प्रतिपादयितुं नेहामहे। जिज्ञासुभिस्ते सर्वे तत एव ज्ञातव्याः। कांश्चिदतिप्रसिद्धान् वयमत्र विव्रेचयामः। तथा च सोयमनुप्रासश्छेकवृत्तिलाटभेदेन त्रिविधः। तदुक्तं प्रकाशे-वर्णसाम्यमनुप्रासश्छेकवृत्तिगतो द्विधा। (९.७९) इति। तथैव-शाब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः। (९.८१) इति। एतेषां क्रमेणोदाहरणानि-

ततो रणपरिस्पन्दमन्दीकृतवपुः शशी।
दध्रे कामपरिक्षामकामिनीगण्डपाण्डुताम्।। इति।

अत्र नकारदकारातमकस्य तथा णकारडकारात्मकस्य अनेकव्यञ्जनस्य सकृत् साम्यमिति छेकानुप्रासः।

अपसारय घनसारं कुरु हारं दूर एव किं कमलैः।
अलमलमालि मृणालैरिति वदति दिवानिशं बाला।।

अत्र रेफस्य लकारस्य च असकृदावृत्त्या वृत्त्यानुप्रासः।

यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य।
यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य।।

अत्र तात्पर्यभेदेनार्थभेद इति लाटानुप्रासः।।५५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

अथ कोऽनुप्रास इति पृष्टोऽनुप्रासलक्षणमाह–

वर्णावृत्तिरिति लक्षणम्। अनुप्रासो लक्ष्यम्। वर्णानामक्षराणामावृत्तिः, सरूपाणामिति वाक्यशेषः। तदुक्तं भामहेन–'सरूपवर्णविन्यासमनुप्रासं प्रचक्षते' इति। तस्य प्रदेशं निरूपयति–सोऽनुप्रासः पादेषु च वृत्तजात्योः, पदेषु च सुप्तिङन्तेषु च। किं यदि स्यादित्याहपूर्वेति। पूर्वश्चासावनुभवश्च पूर्वानुभवः, तेन यः संस्कारः तस्य बोधिनीत्येवंशीला अदूरता यदि स्यात्, वर्णानामिति वाक्यशेषः। पूर्वानुभूतवर्णविषयं सस्कारं यद्यवबोधयत्यदूरता तदा अनुप्रासो भवति। यदा पुनर्न पूर्वोञ्चारितवर्णविषयज्ञानविषयं भावनाख्यं संस्कारं बोधयति, तदा पूर्वोञ्चारितोत्तरोञ्चारितवर्णविषया अदूरता न स्यात्। यतो यद्विषयोऽनुभवस्तद्विषयः संस्कारः तद्विषया स्मृतिरिति।।५५।।

अनुप्रासं लक्षयति–वर्णेति। पादेषु पादादिषु पदेषु, पदेषु पदादिषु, इत्यर्थः।।५५।।

गौडप्रियस्यानुप्रासस्य लक्षणं दर्शयितुमाह–**वर्णावृत्तिरिति।** पादेषु पदेषु च बहुशो वर्णानामावृत्तिः यदि क्रियते, तदा तत्र अनुप्रासः स्यात्। आवृत्तेः पूर्वमुञ्चारितस्यैव वर्णस्य पुनरुञ्चारणे क्रियमाणे पूर्वानुभूतसंस्कारबोधिनी अदूरता अस्ति चेत्, तदैव तत्र अनुप्रासो भवति।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चन्द्रे शरन्निशोत्तंसे कुन्दस्तबकविभ्रमे।
इन्द्रनीलनिभं लक्ष्म सन्दधात्यलिनः श्रियम्।।५६।।

रत्नश्री

समानपदासत्तौ तु रसावहत्वं प्रसङ्गेनोक्तम् समानपदासत्तिरपितु लक्षण[23a]तो लक्ष्यतश्च प्राधान्येन प्रागुक्ता। इन्द्रनीलनिभम् इन्द्रलीनमणिसदृशं नीलत्वात्। लक्ष्म चिह्नम्। अलिनो भ्रमरस्य श्रियं शोभां संदघाति विभर्त्ति। कुत्र? चन्द्रै शशाङ्के शरदि वर्षात्यये शरदो वा निशाया रात्रेरुत्तंसे शिरश्शेखरे। उत्तंसो मूर्ध्नि शेखर इत्यभिधानात्। कथमुत्तंसश्चन्द्रो रूप्यत इत्याह-कुन्दस्तबकविभ्रमेति। कुन्दस्तबकस्यैव विभ्रमः शोभा शौक्ल्यात्। यतः कुसुमसंदोहसदृशश्चन्द्रस्ततः शरन्निशोत्तंसत्वेन रूप्यते [तदनुपाति] च लक्ष्म नीलमणिनोपनीयते। अत्र चन्द्र कुन्द इन्द्र सन्द इति पादेष्वनुप्रासः।।

हृदयङ्गमा

उदाहरति, चन्द्रे इति।–शरन्निशायाः शारदीयरजन्याः, उत्तंसे शिरोभूषणरूपे, कुन्दस्तवकसन्निभे माघ्यकुसुमगुच्छभदृशे, चन्द्रे, इन्द्रनीलनिभं श्यामलम् इत्यर्थः, लक्ष्म कलङ्कः, अलिनः भ्रमरस्य, श्रियं शोभां, सन्दधाति धारयति। (अत्र प्रथमद्वितीयतृतीयेषु पादेषु शकार–ककार–नकार लकाराणां वर्णनाम् अनतिदूरवर्त्तिनी पुनरावृत्तिरिति साम्यप्रतीतेः वृत्त्यनुप्रासः, चतुर्थे च दकार–धकार–तकार–नकाराणां दन्तरूपैकस्थानोञ्चार्य्यत्वात् वैदर्भप्रियः श्रुत्यनुप्रास इति द्विविधेनानुप्रासालङ्कारेण व्यञ्जितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माधुर्य्यं श्रृङ्गाररसं पद्यनिष्ठं परिपुष्णाति। अत्र रूपकोपमाभ्यामनुप्राणिता निदर्शना नाम अलकृतिः, ततश्च शब्दार्थोभयनिष्ठं माधुर्य्यमिति सुधीभिर्विभावनीयम्)।।५६।।

प्रभा

उद्देशानुरोधेन पादगतं वर्णानुप्रासमुदाहरति–**चन्द्रे इति।** कुन्दानां कुन्दकुसुमानां स्तबको गुच्छस्तद्वद् विभ्रमः शोभा यस्य तस्मिन्। शरन्निशोत्तंसे शारदरात्रिभूषणायमाने चन्द्रे। इन्द्रनीलमणेर्निभं सदृशं। लक्ष्म कलङ्कः। अलिनो भ्रमरस्य। श्रियं शोभां। संदधाति बिभर्ति। अत्र चतुर्षु पादेषु चन्द्र कुन्द इन्द्र सन्द इति क्रमेण नकारदकारौ अनुसृतौ भवतः। अथवा चन्द्र इन्द्र कुन्द संन्द इति नकारदकाररेफाणां नकारदकारयोश्च आवृत्तिरिति वृत्त्यनुप्रासः। एवंविधैरलंकारैरुपस्कृतोयं श्लोकः स्ववर्ण्यशृङ्गारोद्दीपकविभावभूतं रजनीकरमलंकुरुते। तेन च शृङ्गाररसः परिपुष्टो भवतीति शब्दनिष्ठमाधुर्यं रसपरिपोषकं ज्ञेयम्। तथैव च रूपकोपमाद्यर्थालंकारैरुपस्कृतो वाच्यार्थोपि तमेव रसं परिपोषयति इत्यर्थनिष्ठमपि माधुर्यं ज्ञेयम्। केचित्तु अत्र प्रथमपादे शकारयोर्द्वितीये बवयोरभेदात् ककारवकारयोस्तृतीये लकारनकारयोरनतिदूरस्थितयोरावृत्त्या वृत्त्यनुप्रासः। चतुर्थे तु संदघात्यलिन इत्यत्र यकारवर्जिताः सर्वे दन्त्या इति श्रुत्यनुप्रास इति योजयन्ति। परं मूले लक्षणश्लोके पादेषु च पदेषु च इति स्थानद्वयस्य निर्देशः कृतः। तदनुरोधेनैव उदाहरणोपपत्तिः कर्तव्या इति चिनत्यमेतद् व्याख्यानमिति भाति।।५६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

तत्र पादेष्वनुप्रासमाह–

चन्द्रे कुन्द इन्द्र सन्द इति पादानुप्रासः।।५६।।

तत्र पादानुप्रासं दर्शयति–**चन्द्र** इति।।५६।।

पादानुप्रासोदाहरणमाह–**चन्द्र** इति। अत्र चतुर्षु पादेषु चन्द्र कुन्द इन्द्र सन्द इति क्रमेण नकारदकारौ अनुसृतौ भवतः। चन्द्र इन्द्र, कुन्द सन्द, इति केचित् आवृत्तिं पश्यन्ति।।५६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चारु चान्द्रमसं भीरु बिम्बं पश्येदमम्बरे।
मन्मनो मन्मथक्लान्तं निर्दयं कर्तुमुद्यतम्॥५७॥

रत्नश्री

मम मनश्चित्तं मन्मथक्लान्तं कामातुरं निर्दयमत्यर्थं कर्तुम्। करोतिक्रियाविशेषणं निर्दयमिति। उद्यतमुत्थितमम्बरे नभसीदमेतत् चन्द्रमस इदं चान्द्रमसम् ऐन्दवम् बिम्बं मण्डलं पश्य भीरु प्रिये। इति चन्द्रोदयोपनीतां स्वामनङ्ग[पीडां] भङ्ग्या निवेदयति कश्चित् कामी। बकारस्य मकारसहितस्य, मकारस्य नकारेण सह, मकारस्य, रेफस्यान्यस्य वा यथासम्भवमावृत्तिरनुप्रासः पादेषु।

लीलास्मितमितालापकोमलं रमणीमुखम्।
उपात्तपाणि संरक्तलोचनंलोक[रञ्जन]म्।।

इत्यपरमुदाहरणम्।।

इष्टमनुप्रासमुदाहरन्नाह-

हृदयङ्गमा

स्वरवैषम्येण अनुप्रासो दर्शितः, इदानीं तत्सादृश्येन दर्शयति, चार्विति।–हे भीरु! भयशीले! मन्मथाक्रान्तं कामार्त्तं, मन्मनः मम मानसं, निर्दयं यथा तथा हन्तुमुद्यतं चारु मनोज्ञम्, एतत् परिदृश्यमानमित्यर्थः, चान्द्रमसं विम्बं चन्द्रमण्डलम् अम्बरे आकाशे, पश्येत्यन्वयः। (मानिनीं कामिनीं प्रति कस्यचित् नायकस्य उक्तिरियम्। इह प्रथमे पादे चाकाररुकारयोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वरसहितयोः सादृश्यात् वृत्त्यनुप्रासः ; द्वितीयतृतीययोश्च यथाक्रमं म्बकारयोर्मन्ममन्मयोश्च साम्यात् छेकानुप्रासोऽपि; तथा चतुर्थे दकारयोस्तकारयोश्च स्वरवैषम्येण सादृश्यात् अन्यविधो वृत्त्यनुप्रासश्च। माधुर्य्यगुणोऽप्यत्र शब्दार्थोभयनिष्ठत्वेन चमत्कारजननात् विप्रलम्भाख्यं श्रृङ्गारं परिपुष्णाति)।।५७।।

प्रभा

इत्थं पादगतमनुप्रासं प्रदर्श्य संप्रति पदगतमनुप्रासं दर्शयति-**चार्विति**। हे भीरु संशयसंत्रस्ते कोमलाशये। चारु त्वञ्चिन्तनेन मनोहरम्। मन्मथाक्रान्तं मदनाभिभूतम्। मन्मनो मच्चित्तम्। निर्दयं यथा तथा। हन्तुं प्रहर्तुम्। उद्यतं उद्युक्तम्। एतत् चान्द्रमसं इन्दुसंबन्धि। बिम्बं मण्डलम्। अम्बरे वियति। पश्य। कामुकस्य कुपितां नायिकां प्रत्युक्तिरियम्। अत्र प्रथमपादे चाकाररुकारयोरावृत्तेर्वृत्त्यनुप्रासः। द्वितीये मकारबकारयोः संयुक्तयोः सकृदावृत्तेच्छेकानुप्रासः। अत्र पादद्वये भिन्ना अनुप्रासाः केवलं पदेषु वर्तमानाः सन्तीति पदगता ज्ञेयाः। पूर्वत्र तु पादे पादे तेषामावृत्तिरिति पादगतता बोद्धव्या। केचित्तु अनुप्रासे स्वरावृत्तेः प्रयोजनं नास्ति। तथापि स्वरसहितव्यञ्जनावृत्तिः सविशेषां शोभां धत्ते इति प्रदर्शनाय एतदुदाहरणमिति मन्यन्ते। चाकाररुकारयोरावृत्त्या च तत् समर्थयन्ते। परं तत्रारुचिबीजं पूर्वश्लोकव्याख्याने दर्शितमेव। अत्र पूर्ववदेव अनुप्रासालंकारस्य पर्यायोक्तालंकारस्य च विप्रलम्भशृङ्गारपरिपोषकत्वात् शब्दार्थनिष्ठं माधुर्यं ज्ञेयम्। चारु चान्द्रमसमिति वाक्यस्य कोपं विहाय मां भजस्व इत्यर्थतात्पर्यकत्वेन पर्यायोक्त्यलंकारो ज्ञेयः।।५७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

पदेष्वनुप्रासमाह–

अत्र चारु चान्द्रमसं भीरु इति, बिम्बं पश्येदमम्बरे इत्यत्र बिम्बम् अम्बर इति, मन्मनो मन्मथाक्रान्तमित्यत्र मन्मनो मन्मथ इति च सरूपवर्णावृत्तेरनुप्रासः।।५७।।

अथ पदानुप्रासं दर्शयति–**चार्विति**।।५७।।

पदानुप्रासं दर्शयति–**चार्विति**। चकारद्वयं बकारद्वयं मकारद्वयं नकारद्वयं च पदे सन्निकृष्टानुप्रासत्वेन स्वीकृतं भवति। उद्यतम् उदितम्।।५७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यनुप्रासमिच्छन्ति नातिदूरान्तरश्रुतिम्।
न तु रामामुखाम्भोजसदृशश्चन्द्रमा इति।।५८।।

रत्नश्री

इत्येवंरूपमनन्तरोक्तप्रकारं नातिदूरान्तरश्रुतिमनतिविप्रकृष्टव्यवधानश्रवणम्। यावता पूर्वानुभवसंस्कारप्रबोधः प्रभवति तावदन्तरश्रुतिमनुप्रासमिच्छन्ति। सामान्यवचनादुभयेऽपि। [23b] नातिदूरमन्तरं यस्याः सा श्रुतिर्यस्येति ह्यन्यपदार्थः। कीदृशः पुनर्दूरान्तरश्रुतिर्नेष्यत इति तमपि हेयत्वेनोदाहरति-नत्वित्यादि। रामाणां स्त्रीणां मुखं वदनमेवाम्भोजं पद्मं तेन सदृशः समानश्चन्द्रमाः शशाङ्क इति योज्यम्। अत्र रामा इत्ययं मकारः मुखाम्भोजसदृशश्चन्द्रमा इति दूरमागम्यावृत्तः। ततोऽयं दूरान्तरश्रुतिरनुप्रासो व्यपदेशमात्रेण न तु ग्रहणतः। तमीदृशं नेच्छन्त्युभयेऽपि। वैदर्भा एकान्तेन नेच्छन्ति। गौड़ैस्तु तादृशोऽपीष्यत इति वा द्रष्टव्यम्।।

अपरोऽप्यनुप्रासप्रकारोऽस्ति यः श्लेषसौकुमार्यादिशब्दालङ्कारविरोधी। तं गौड़ाः प्रयुञ्जते न वैदर्भा इति दर्शयन्नाह-

हृदयङ्गमा

अदूरतैवानुप्रासस्य प्रयोजकमित्याह, इतीति।—अतिदूरं समधिकम्, अन्तरं व्यवधानं यस्याः सा अतिदूरान्तरा, न अतिदूरान्तरा नातिदूरान्तरा, तादृशी श्रुतिः श्रवणं यस्य तादृशम्, इति प्राक् प्रदर्शितोदाहरणद्वयरूपम्, अनुप्रासम् इच्छन्ति, गौड़ा इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शेषः, रामामुखम्भोजसदृशः चन्द्रमा इति एवंविधं, तृतीयचतुर्थयोः पादयोः माकारयोः साम्येऽपि अतिदूरान्तरश्रुतिम् इत्यर्थः, अनुप्रासमिति शेषः, न तु, इच्छन्तीति च शेषः, 'रामा' 'चन्द्रमा' इति पदस्थयोर्माकारयोरतिदूरस्थतया पूर्ववर्णसंस्कारोद्बोधाभावादिति भावः॥५८॥

प्रभा

अनुप्रासलक्षणे निवेशितस्य अदूरता इति विशेषणस्यान्वयव्यतिरेकेण प्रयोजनं दर्शयति–**इत्येति**। इति पूर्वश्लोकेषु दर्शिताम्। नातिदूरान्तरश्रुतिम् अतिदूरं अत्यन्तं दूरं अन्तरं व्यवधानं यस्याः सा अतिदूरान्तरा। तथाविधा श्रुतिर्यत्र सा अतिदूरान्तरश्रुतिः। तथा न भवतीति नातिदूरान्तरश्रुतिस्ताम्। अत्र वर्णावृत्तिरिति पदमध्याहार्यम्। अथवा नातिदूरान्तरश्रुतिम् इतिपदमनुप्रासं इत्यस्यैव विशेषणम्। इच्छन्ति सहृदया इति शेषः। अदूरतायाः प्रत्युदाहरणं कथयति–**नत्विति**। रामाया मुखमेव अम्भोजं तत्सदृशश्चन्द्रमा इति। एवंविधविदूरावृत्तौ वृत्त्यनुप्रासो न भवति। अत्रं रामा इति माकारस्य चन्द्रमा इत्यत्रावृत्तिः। सा च दूरश्रुतिरिति पूर्वसंस्कारबोधिका न भवतीति नात्र माकारानुप्रासः। विभिन्नस्वरयोर्मकारयोः प्रथमे पादे दकारयोश्च नातिदूरस्थयोर्द्वितीय आवृत्तिर्वर्तते। अतः केवलवर्णावृत्तेः सत्त्वादत्र वृत्त्यनुप्रासो वर्तत एव तथा सदृशश्चद्रमा इत्यत्र श्रुत्यनुप्रासोपि दृश्यते। उदाहृते अस्मिन् वृत्त्यनुप्रासे वैदर्भाणां न प्रतिकूलता इति–अतो नैवमनुप्रासं दाक्षिणात्याः प्रयुञ्जते इति उत्तरश्लोकस्थविधानेन निष्पद्यते इति विचारणीयं विद्वद्भिः॥५८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

इति अनन्तरोक्तमनुप्रासमिच्छन्ति। नातिदूरान्तरश्रुतिम् अतिदूरमन्तरं यस्याः सा अतिदूरान्तरा श्रुतिः यस्य सः अतिदूरान्तरश्रुतिरिति अत्यन्तव्यवहितवर्णविषयज्ञानस्तमनुप्रासं नेच्छन्ति। तमतिदुष्टमुदाहरति- **न त्विति।** रामारमाशब्दयोरत्यन्तव्यवहितत्वेन पूर्वानुभवसंस्कारबोधिन्या अदूरताया अभावात्।।५८।।

'पूर्वानुभूतसंस्कारबोधिनी यद्यदूरता' इत्यस्य व्यावृत्तिं दर्शयति **इतीति**।।५८।।

इतीति। नातिदूरान्तरस्थितिम् इति दूरान्तरस्थितिरहितम् अनुप्रासं इच्छन्ति; रामामुखेत्याद्युदाहरणे दूरान्तरस्थितिमती मा इत्यस्यावृत्तिमनुप्रासत्वेन नाङ्गीकुर्वन्तिः।।५८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मरः खरः खलः कान्तः कायः कोपश्च नः कृशः।
च्युतो मानोऽधिको रागो मोहो जातोऽसवो गताः॥५९॥

रत्नश्री

स्मरः कामः खरो नृशंसः प्रमादित्वात्। कान्तः पतिश्च खलः प्रतिकूलवर्त्ती व्यलीकशीलत्वात्। कायः शरीरम् कृशः क्षीणः विरहदौर्बल्यात्। कोपश्च कान्तविषयः कृशो निवृत्तः। मानश्च तद्विषयः किं तेनेति चेतोवष्टम्भलक्षणश्च्युतो सलितः रागाद्यभिभूतत्वात्। यदाह रागोऽधिक इति। रागोऽभिषङ्गः पतिविषयः अधिकः प्रबलो वर्त्तते। ततश्च मोहो मूर्च्छा जातः प्रवृत्तः रागपक्षत्वात्। तदुक्तम्–

तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम्।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव।।इति।

[कुमारसम्भवे 3.73]

असवः प्राणा गता दशमी दशा जातास्माकमिति काचित् विरहिणी विरौतीत्यर्थो योजनीयः।।

हृदयङ्गमा

अनुप्रासस्य रसावहत्वकीर्त्तनात् यत्र वाक्यस्य सदोषत्वेन रसस्य अपरिपुष्टता तत्र न माधुर्य्यसद्भाव इत्याह, स्मर इति।–स्मरः कामः, खरः अतितीक्ष्णः, कान्तः प्रियः, खलः निष्ठुरः, नः अस्माकं, कायः शरीरं, कोपश्च, कान्तं प्रतीति शेषः, कृशः क्षीणः नष्टश्च, मानः गौरवं, च्युतः विनष्टः, रागः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कान्तप्राप्त्यभिलाषः, अधिकः, मोहः मूर्च्छा, जातः, क्षणे क्षणे इति शेषः, असवः प्राणाः, गताः, प्रायेणेति शेषः। (इदं नायकं निराकृतवत्याः गलितमानायाः कस्याश्चित् कामिन्याः पश्चात्ताप वचनम्। अत्र प्रथमे पादे रेफयोः खकारयोश्च द्वितीये ककाराणां साम्यात् वृत्त्यनुप्रासस्य तथा उत्तरार्द्धे तकारादिदन्त्यवर्णानां साम्यात् श्रुत्यनुप्रासस्य दोषाकुलतया तादृशविप्रलम्भश्रृङ्गारस्य न अतिपरिपोषकता इति न माधुर्य्यं, प्रत्युत ओजोविपर्य्ययाख्यदोषत्वेनेदमुदाहृतं कण्ठाभरणे, यदुक्तं पद्यमिदमुदाहृत्य,–"अत्र सत्यसमस्तपदाभिधाने सत्यपि च अर्थस्य सौकुमार्य्ये श्लेषादिगुणसामग्राभावान्न वैदर्भीरीतिः, नापि यथोक्तलक्षणाभावात् गौड़ीयादयः इति खण्डितरीतित्वादयम् ओजोविपर्य्ययः शब्दार्थप्रधानो गुणविपर्य्ययो दोषो भवति।" तत्रैव ओजोविपर्य्ययस्य लक्षणमुक्तं यथा,–"वाक्ये यः खण्डयन् रीतिं भवत्योजोविपर्य्ययः। असमस्तमिति प्राहुर्दोषं तमिह तद्विदः।।" इति)।।५९।।

प्रभा

वैदर्भाप्रियः सदोषमनुप्रासं दर्शयति–**स्मर इति**। नायकेन उपेक्षिताया विरहिण्या उक्तिरियम्। स्मरः मदनः। खरः निष्ठुरः तीक्ष्णः अतिदुःसहः इत्यर्थः। कान्तः प्रेयान्। खलः निष्ठुरः। नः अस्माकम्। कायः शरीरम्। कोपश्च कान्तविषयकः क्रोधः। कृशः क्षीणः नष्टप्रायः। मानः स्वगौरवम्। च्युतः गलितम्। रागः संभोगाभिलाषः। अधिकः वृद्धिं प्राप्तः। मोहः चित्तवैक्लव्यम्। जातः उत्पन्नम्। असवः प्राणाः। गताः गतप्रायाः। अत्र प्रथमचरणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रेफखकारयोः द्वितीये ककाराणां च आवृत्त्या वृत्त्यनुप्रासः। तृतीयचतुर्थयोर्दन्तस्थानिनां निवेशात् श्रुत्यनुप्रासः। प्रथमार्धे विसर्गबाहुल्यात् पारुष्यम्। उत्तरार्धे संयुक्तवर्णाद्यभावाञ्च शैथिल्यम्। अत्र वृत्त्यनुप्रासश्रुत्यनुप्रासयोः पारुष्यशैथिल्य-दोषग्रस्तत्वान्नेमौ अलंकारौ भवतः। तेन च नैताभ्यां विप्रलम्भशृङ्गारस्य परिपोष इति नास्त्यत्र माधुर्यगुणसद्भावः।।५९।।

विवृति

गौडाभिप्रेतमनुप्रासमुदाहरति–

स्मरः स्वर इत्यादिः सरूपरेफविसर्जनीयस्वकारक-काराक्षरप्रचुरः। च्युतो मान इतयादिरोकारबाहुल्याद्रमणीय इति गौडा मन्यन्ते। स्मरः स्वर इत्यादि बन्धपारुष्यं नैष्ठुर्यं च्युतो मान इत्यादि च शैथिल्यं नियच्छति यतः, अतो नैवंविधं दाक्षिणात्याः प्रयुञ्जत इति।।५९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यादि बन्धपारुष्यं शैथिल्यं च नियच्छति।
अतो नैवमनुप्रासं दाक्षिणात्याः प्रयुञ्जते॥६०॥

रत्नश्री

इत्यादि काव्यम् एवंविधोऽनुप्रासो बन्धस्य रचनायाः पारुष्यं यत्र सौकुमार्यविपर्ययः शैथल्यं च श्लेषविपक्षं चकाराद्वैषम्यं च नियच्छति स्वीकरोति यतः, अतः कारणात, एवमीदृशमनुप्राशं न प्रयुञ्जते दाक्षिणात्या वैदर्भाः। गौड़ास्तु प्र[21a]युञ्जत इत्यर्थादुक्तं भवति। ततश्चानुप्रासेऽपि वैदर्भगौडीययोरस्ति कथञ्चिद्विशेष इति॥

अनुप्रासविशेषत्वात्तत्प्रसङ्गेन यमकं भञ्जयन्नाह–

हृदयङ्गमा

पूर्वोक्ते पद्ये दोषमाह, इत्यादीति।–इत्यादि एवमादिकं सानुप्रासमपि पद्यं, बन्धपारुष्यं बन्धे रचनायां, पारुष्यं दुःश्रवत्वं, शैथिल्यं पतत्प्रकर्षतादिकञ्च, नियच्छति ज्ञापयति। (अत्र पूर्वार्द्धे बहुविसर्गसत्तया पारुष्यम्; तदुक्तम्,–"अनुस्वारविसर्गौ तु पारुष्याय निरन्तरौ" इति। पूर्वार्द्धे यादृशी तीव्ररचना उत्तरार्द्धे तथा नेति पतत्प्रकर्षता)। अतः कारणात्, एवं सदोषमित्यर्थः, अनुप्रासं दाक्षिणात्याः विदर्भदेशीयाः पण्डिताः, न प्रयुञ्जते न व्यवहरन्ति, माधुर्य्यस्य असद्भावादिति भावः। (दाक्षिणात्या इत्युपलक्षणं, तेन गौड़ीया अपि दोषबहुलं सानुप्रासमित्यादिकमुदाहरणं नेच्छन्ति। यत्र तु पारुष्यादिके रसानुकूलतया माधुर्य्यमस्ति, तत्र पारुष्यादिकं न दोषः, प्रत्युत गुण एव; तथा चोक्तं,–"वक्तरि क्रोधसंयुक्ते तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाच्ये समुद्धते। रौद्रादौ तु रसेऽत्यन्तं दुःश्रवत्वं गुणो भवेत्।।"
इति)।।६०।।

प्रभा

. उदाहृतानुप्रासस्य दोषं दर्शयति—**इत्यादीति**। एवमादिकं सानुप्रासमपि काव्यं बन्धपारुष्यम् विसर्गबाहुल्येन पूर्वार्धे। शैथिल्यम् संयुक्तव्यञ्जनविसर्गादीनामभावाच्छिथिलताम् उत्तरार्धे च। नियच्छति अर्पयति। उक्तं हि विसर्गादीनां पारुष्यम्—अनुस्वारविसर्गौ तु पारुष्याय निरन्तरौ। इति। एवं दोषसनाथमनुप्रासं वृत्तिश्रुत्यनुप्रासम्। दाक्षिणात्याः वैदर्भाः। न प्रयुञ्जते न व्यवहरन्ति। अयमाशयः। वैदर्भाः। श्रुत्यनुप्रासे आदरयुक्ता वृत्त्यनुप्रासे च अमत्सरिणः। तथापि केवलमनुप्रासलोभेन न सदोषयोस्तयोः स्वीकारं ते कुर्वन्ति। गौडास्तु सदोषमपि तमनुप्रासलोभेनाङ्गीकुर्वन्ति। अयमेव भावो नैवमनुप्रासं दाक्षिणात्याः प्रयुञ्जते इति वाक्येन कविना स्पष्टीकृतः। अत्र गोडैः प्रेमचन्द्रशर्मभिर्यद् व्याख्यानं कृतं तन्न ग्रन्थकृदाशयानुकूलमिति सुधीभिर्विचारणीयम्।।६०।।

विवृति

बन्धपारुष्यशैथिल्यावहस्य अनुप्रासस्य न वैदर्भेष्टत्वमित्याह—स्मर इति द्वयेन। 'इतीदं नादृतं गौडैरनुप्रासस्तु तत्प्रियः। अनुप्रासादपि प्रायो वैदर्भैरिदमीप्सितम्।।'—इत्यत्र प्रायश्शब्देन उभयोः श्रुतिसाम्यानुप्रासयोः वैदर्भगौडयोरिष्टतरत्वमुक्तम्; न तु अनिष्टत्वम्। बन्धपारुष्यशैथिल्यावहस्य अनुप्रासविशेषस्य वैदर्भानिष्टत्वकथनात्; इत्यवगन्तव्यम्।।६०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आवृत्तिमेव संघातगोचरां यमकं विदुः।
तत्तु नैकान्तमधुरमतः पश्चाद् विधास्यते॥६१॥

रत्नश्री

वर्णावृत्तिमेव नान्यत् यमकं विदुः विदन्ति कथयन्ति तज्ज्ञाः इति परमुखेन। तद्विदग्धोचितेयं वाचोयुक्तिरिति सर्वत्रानुसरत्वेनाम्। कोऽनयोर्भेद इत्याह-संघातगोचरामिति। अयमनयोर्भेदः। एकवर्णविषयावृत्तिरनुप्रासः। अनेकवर्णविषया तु यमकमिति। संघातः वर्णसमुदायो गोचरो विषयो यस्या इति विग्रह[:]। तत् किं नोच्यते इत्याह-तत्त्वित्यादि। तत्तु यमकम्। तुशब्दोऽर्थान्तरविवक्षायाम्। एकान्तेन साकल्येन सर्वेण, मधुरं च सर्वं न भवति, प्रायो गूढ़ार्थत्वेन अप्रसन्नत्वात्। तत्तु मधुरमेव यत्प्रसन्नम्। समानश्रुत्यनुप्रासयोस्त्वेकान्तमधुरता सर्वथा प्रसन्नवात्। एकान्तमधुरं चात्र प्रस्तुतम्। अतः नैकान्तमधुरत्त्वात् पश्चाद् दुष्करे विधास्यतेप्रति पादयिष्यते। प्रभेदतो लक्षणतस्तूक्तमेवेति॥

यदुक्तं वाचि वस्तुन्यपि रसः स्थित [1.51] इति तत्रेयता वाचि वा दर्शितः। सम्प्रति वस्तुनि रसं विवरीतुमुपक्रमते-

हृदयङ्गमा

ननु रसवतो माधुर्य्यगुणत्वात् वर्णावृत्तेश्च रसावहत्वात् प्रसङ्गतो यथा अनुप्रासलक्षणं निरूपितं तथा वर्णावृत्तिरूपं यमकमपि कथमत्र न निरूप्यते इत्याह, आवृत्तिमिति।-वर्णसङ्घातः स्वरव्यञ्जनात्मकवर्णसमूह एव, गोचरः विषयो यस्याः तथोक्ताम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आवृत्तिं पूर्वक्रमेण पुनरुच्चारणं, यमकं विदुः जानन्ति, कवय इति शेषः। (अत्र वर्णसङ्घातपदस्य स्वरव्यञ्जनसमुदायपरत्वं ज्ञेयम्, अन्यथा अनुप्रासलक्षणेन सहैक्यम् आपतितं स्यात्; तथा भिन्नार्थकेति तद्विशेषणं देयम्, अन्यथा 'यामि यामि' इत्यादौ एकार्थस्यापि यमकत्वं प्रसज्येत, निरर्थकयोरपि यमकत्वाङ्गीकारात्, अर्थसम्भवे सति भिन्नार्थत्वं बोध्यम्। आवृत्तिश्चात्र पूर्वक्रमानुसारिणी, तेन च 'दमो मोद' इत्यादेर्भिन्नविषयत्वं सूचितम्; एतेन अर्थसम्भवे सति भिन्नार्थकस्वरव्यञ्जनात्मकवर्णसङ्घातस्य पूर्वक्रमवत्या- वृत्तिर्यमकमिति लक्षणम्। तदुक्तं दर्पणकारेण, यथा,–"सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः। क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते।।" इति। अत्र द्वयोरपि पदयोः क्वचित् सार्थकत्वं क्वचित् निरर्थकत्वं क्वचिदेकस्य सार्थकत्वमपरस्य निरर्थकत्वम्, अत उक्तं,–"सत्यर्थे" इति। उदाहृतञ्च तत्रैव,–"नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्। मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः।।" इति। अन्यैरप्युक्तं यथा,–"तुल्यश्रुतीनां भिन्नानामभिधेयैः परस्परम्। वर्णानां यः पुनर्वादो यमकं तन्निरूप्यते।।" इति)। तत्तु सयमकं पद्यं, न एकान्तमधुरं न अतिशयेन माधुर्य्यवत्, तथा हि तथाविधे वाक्ये प्रथमम् अर्थानुसन्धानव्यग्रतया रसप्रतीतेर्व्यवहितत्वात् इति, अनुप्रासे तु अर्थानुसन्धानव्यग्रताया अभावात् रसप्रतीतेः अव्यवहितत्वमिति सानुप्रासे वाक्ये माधुर्य्यमस्तीति च भावः। (एकान्तेति पदेन यमकेऽपि रसावहं माधुर्य्यमस्त्येव, परम् अनुप्रासवत् सम्यक् न इति वक्तव्यम्, अन्यथा अस्य अनलङ्कारत्वापत्तिरापद्येत, शब्दार्थशोभाजननेन काव्यात्मभूतरसोप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारित्वस्य एव अलङ्कारत्वात् इति ध्येयम्)। अतः पश्चात् अलङ्कारप्रस्तावे इत्यर्थः, विधास्यते वक्ष्यते, यमकमिति शेषः॥६१॥

प्रभा

ननु यदि वर्णावृत्ती रसपोषकमाधुर्यगुणवती तर्हि यमकमपि वर्णसंघातावृत्तिरूपं माधुर्यगुणशालि अस्तीति तस्याप्यत्र निरूपणं कुतो न कृतमिति कथयति-**आवृत्तिमिति**। वर्णसंघातः पूर्वोक्तवर्णसमुदायो गोचरो विषयो यस्यास्तामावृत्तिं पुनरुच्चारणम्। यमकं यमकसंज्ञकशब्दालंकारम्। विदुः जानन्ति। अलंकारिका इति शेषः। अत्र आवृत्तियथानुपूर्वीकाणां स्वरसहितव्यञ्जनानाम्। स्वररहितकेवलव्यञ्जनावृत्तेरनुप्रास- विषयत्वात्। सेयमावृत्तिः सार्थपदस्यास्ति चेत्, द्वितीयपदं भिन्नार्थमपेक्ष्यते। अन्यथा-यातु यातु किमनेन तिष्ठता मुञ्च सखि सादरं वचः। इत्याद्येकार्थपदावृत्तिस्थले यमकालंकारातिप्रसङ्गः स्यात्। परं नैतादृशे स्थले केनापि साहित्यकोविदेन यमकं स्वीक्रियते। ससुरभिं सुरभिं सुमनोभरैः। इत्यादौ रभिंसु इति निरर्थकपदावृत्तौ यमकस्य सद्भावादुक्तं सार्थपदस्यावृत्तौ इति। तथा चोक्तं दर्पणे-

सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते॥ इति। (१०.८)

अनुप्रासे बहूनां क्वचिदेकस्वरसहितस्य व्यजनस्यावृत्तिः संभवति। यमके तु स्वरसहितव्यञ्जनानां पूर्वक्रमेणैवावृत्तिरित्युभयोर्भेदः। स च यमकविषये तृतीयपरिच्छेदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्निरूपणप्रसङ्गे विशेषं कथयामः। तत् तु तद्यमकं तु। नैकान्तमधुरम् न अनुप्रासवच्छब्दमाधुर्यगुणवत्। यतः स्वरसहितवर्णसंघातावृत्त्यपेक्षया वर्णावृत्तौ मध्ये मध्ये विभिन्नवर्णनिवेशात् सा अनुप्रासरचना विशेषशोभाशालिनी भवति। यथा मालायाः सजातीयपुष्पसंघातग्रथनापेक्षया प्रतिकुसुमं परस्तात् भिन्नभिन्नकुसुमसंनिवेशे सति सा माला रमणीया भवति तथेयमनुप्रासरचना मनोहरा भवतीति भावः। अपसारय घनसारं कुरु हारं दूर एव किं कमलैः। इत्यादिवृत्त्यनुप्रासोदाहरणेषु अन्तरान्तरा एकवर्णावृत्त्या यादृशी चारुता न तादृशी–

नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्लतान्तमलोकयत् ससुरभिं सुरभिं सुमनोभरैः।।

इत्यादौ स्वरव्यञ्जनसंघातावृत्तिरूपे यमके। अपरं च वर्णसंघातावृत्तौ अर्थावबोधः क्लेशेन भवति। न तथा अनुप्रासविशिष्टे काव्ये। तथा च यमके अर्थानुसंधानव्यग्रतया रसप्रतीतेर्विलम्बेनोद्भवान्नेयं रचना रसोपकारिका। अनुप्रासस्तु अर्थानुसंधाने व्यग्रतामकुर्वन्नेव श्रुतिमात्रेण शब्दमलंकुर्वन् रसं पुष्णाति इति तत्र माधुर्यमस्तीति भावः। अथ यमकस्य रसानुपकारकत्वे कथमलंकारता स्यात्। रसोपकारकयोरेव शब्दार्थान्यतरशोभाजनकयोरलंकारत्वनियमात् इति चेत् सत्यम्। तदर्थमेव हि नैकान्तमित्युक्तम्। यमके माधुर्यं वर्तत एव। परं तन्नानुप्रासवद् विपुलमस्ति। अतस्तद् यमकनिरूपणं नात्र माधुर्यगुणविवेचने क्रियते। तद्विचारं शब्दालंकारप्रस्तावे करिष्याम इति भावः।।६१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

वर्णावृत्तिमेव सङ्घातगोचरां समुदायविषयां यमकं विदुराचार्याः। अव्यवहितसजातीयबह्वक्षरावृत्तिरनुप्रासविशेष एव यमकम्। तत्तु यमकमेकान्ततो न मधुरं दुर्बोधत्वात्। यद्यपि वाचि सरूपवर्णविन्यासः, तथाऽपि न वस्तुनि रसोऽस्तीति माधुर्यप्राणनिरूपणप्रकरणे यमकं न निरूप्यत इति। पश्चात् तृतीयपरिच्छेदे विधास्यते।।६१।।

आवृत्तिमिति। एकवर्णावृत्तिवत् अनेकवर्णावृत्तिरूपं यत यमकं दर्शयितव्यम्, तत्तु कोमलबुद्धीनामनन्तरावहं (न रसावहं?) विस्तीर्णं च। अतः तृतीये परिच्छेदे दर्शयिष्यते।।६१।।

स्मर इत्यादिना निर्दिष्टवर्णावृत्तिप्रसङ्गेन यमकं प्रस्तुतम्; तत् पश्चात् विधास्यत इत्याह। सङ्घातगोचरां वर्णानां पदानां च समूहविषयभूताम्। तत् यमकं मधुररसेनैव न समुपेतम्, इत्यतो हेतोः पश्चात् विधास्यते वक्ष्यते।।६१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामं सर्वोऽप्यलंकारो रसमर्थे निषिञ्चति।
तथाप्यग्राम्यतैवैनं भारं वहति भूयसा॥६२॥

रत्नश्री

काममित्यभ्युपगमे यदि नामेत्यर्थः। अलङ्कारोऽर्थालङ्कारः जात्यादिप्राय सर्वोऽपि नैक एव कश्चित् अर्थे वस्तुनि रसं माधुर्य निषिञ्चति आवहति तथापि एव मपि इति विशेषविवक्षायां तां दर्शयति-अग्राम्यतेत्यादि। अग्राम्यतै[24b]वासभ्यातैव अर्थस्य भूयसात्यर्थं व्यापकत्वात् एनं रसनिषेकलक्षणं भारं धुरं वहति धत्ते नान्यत्। [1]यद्यग्राम्यतैव रसस्तत् किं भेदो नोच्यते, सामान्यविशेषभावेन भेदसम्भवात्। रसो हि माधुर्यसामान्यम्, समानश्रुत्यनुप्रासाग्राम्यतादिसाधारणत्वेन [तस्य] प्रतीतेः। समानश्रुत्यादेस्तु विशेषाव्यावृत्तितयावगमात्। अन्यदप्येवंजातीयकमुन्नेयम्। जात्याद्यर्थालङ्कारमुक्तमपि काव्यमग्राम्यार्थमेकान्तमधुरमित्यर्थः॥

कीदृशी तावद् ग्राम्यता यद्विपर्ययोऽग्राम्यता वस्तुरसः स्यादिति ग्राम्यताप्रतिपक्षेणा अग्राम्यतां दर्शयितुकामः ग्राम्यतां तावदुदाहरति-

हृदयङ्गमा

माधुर्य्यस्य शब्दगतत्वं लक्षयित्वा तस्य अर्थगतत्वं दर्शयन्नाह, काममिति।-सर्वोऽपि शब्दगतः अर्थगतः उभयगतश्च, अलङ्कारः अनुप्रासशब्दश्लेषपुनरुक्तवदाभासोपमादिः, अर्थे वाच्यलक्ष्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यङ्ग्यरूपे प्रतिपाद्ये, कामं यथेष्टं यथा तथा, रसं निषिञ्चति पुष्णाति, उद्बोधयतीत्यर्थः, ["वस्तुन्यपि रसस्थितिः" (१प० ५१श्लो०) इत्यनेनैव सूचितमर्थगतमाधुर्य्यमत्र दर्शितम्, एतेन सालङ्कारसवदर्थः अर्थगतमाधुर्य्यमिति लक्षणमायातम्]। ग्राम्यतादोषस्य विशेषेणार्थगतमाधुर्य्यप्रतिबन्धकतां दर्शयितुमाह, तथाऽपीति।–तथाऽपि अग्राम्यता ग्राम्यः इतरजनव्यवहृतः शब्दोऽर्थश्च स न भवतीति अग्राम्यः तस्य भावः, भूयसा बाहुल्येन, एनं भारं रसनिषेकरूपं, वहति। (तथा च सालङ्कारस्य रसव्यञ्जकस्य एव अर्थस्य माधुर्य्यमिति प्रतिपादितम्। अत्र अग्राम्यताशब्दः अनश्लीलादीनासुपलक्षकः, ततश्च अन्यदोषाणामपि माधुर्य्यस्य प्रतिबन्धकत्वेऽपि ग्राम्यदोषस्य विशेषप्रतिबन्धकत्वसूचनार्थं ग्राम्यपदोपादानम्। एवञ्चान्यैरुक्तस्य माधुर्य्यविपर्य्ययस्यापि दोषस्यात्र ग्रहणम्; तञ्चोक्तं यथा,–"माधुर्य्यव्यत्ययो यस्तु जायते रीतिखण्डनात्। तदनिर्व्यूढ़मित्युक्तं काव्यसर्वस्ववेदिभिः॥" यथा,–"नखिनाञ्च नदौनाञ्च श्रृङ्गिणां शस्त्रपाणिनाम्। विश्वासो नैव कर्त्तव्यः स्त्रीषु राजकुलेषु च॥" अत्र नखिनां नदीनाञ्चेति षष्ठान्ताञ्चकारेण रीतेरुपक्रमे श्रृङ्गिणां शस्त्रपाणिनामिति चकारानिर्वाहात् स्त्रीषु राजकुलेषु चेति षष्टीपरित्यागात् अमधुरार्थत्वाञ्च माधुर्य्यविपर्य्ययनामायं शब्दार्थप्रधानो गुणविपर्य्ययो दोषः इति, ततश्चात्रापि न माधुर्य्यगुणसद्भावः। भूयसा इति ग्रहणात् इतरजनकथनेषु ग्राम्यता न दोषः, प्रत्युत गुण एव, तदुक्तं,–"ग्राम्यत्वमधमोक्तिषु" गुण इति शेषः इति)॥६२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

उद्देशवाक्ये वस्तुन्यपि रसः स्थित इति अर्थगतमाधुर्यं निर्दिष्टमस्ति। तदिदानीं दर्शयती–**काममिति**। सर्वोपि शब्दगतः, अर्थगतः, उभयगतश्चानुप्रासोपमापुनरुक्ताद्यलंकारः। अर्थे वाच्यलक्ष्यव्यङ्गयस्वरूपे प्रस्तुतेर्थे। कामं पर्याप्तम्। रसं निषिञ्चति। उत्कर्षतया स्वाश्रयीभूतार्थस्थितां रसव्यञ्जकतामुत्कर्षयतीत्यर्थः। तथापि अलंकारस्य रसोत्कर्षाधायकत्वेपि। अग्राम्यता ग्राम्यो हालिकादिप्राकृतजनव्यवहृतस्तद्भिन्नः अग्राम्यः तस्य भावस्तत्ता। विदग्धजनव्यवहार इति भावः। भूयसा अलंकाराद्यपेक्षयापि बाहुल्येन। एनं भारं रसनिषेकरूपम्। वहति। अलंकारा यथाकथंचिद्रसं परिपोषयन्ति। अग्राम्यता तु तदेव बाहुल्येनानुतिष्ठति। दृश्यते हि निरलंकारयोरपि विशुद्धयोः शब्दार्थयो रसपरिपोषकता। तथा च अग्राम्यतासनाथा एव अलंकारा रसोत्कर्षा इति सिद्धम्। ग्राम्यतापदं अश्लीलतादीनामुपलक्षणम्। भूयसा इत्यनेन प्राकृतजनव्यवहारे ग्राम्यता न दोषाय इति ध्वनितम्। तदुक्तं साहित्यदर्पणे विश्वनाथेन–सुरतारम्भगोष्ठ्यादावश्लीलत्वं गुणो भवेत्। इति। (७.१७) तत्र अवैदग्धग्राम्यत्वं यथा–

स्वपिति यावदयं निकटे जनः स्वपिति तावदहं किमपैति ते।
इति निगद्य शनैरनुमेखलं मम करं स्वकरेण रुरोध सा।। इति।

असभ्यार्थनिबन्धनं वा ग्राम्यत्वम्। यथा–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मचर्योपतप्तोहं त्वं च क्षीणा बुभुक्षया।
भद्रे भजस्व मां तूर्णं तव दास्याम्यहं पणम्।। इति।।

व्रीडादिव्यञ्जकमश्लीलम्। यथा–

हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः।

यथास्य जायते पातो न तथा पुनरुन्नतिः।। (भामह १.५१) इत्यलं पल्लवितेन।।६२।।

विवृति

सर्वोऽप्यलङ्कारः रूपकादिः शब्दालङ्कारश्च श्लेषादिरर्थे रसं माधुर्यं निषिञ्चति यद्यपि, तथाऽपि अग्राम्यतैव अग्राम्यशब्दाभिधानमेव एनं भारं रसवत्तां वहति भूयसा बाहुल्येन, न ग्राम्यतोक्तिरिति।।६२।।

अर्थमाधुर्यमग्राम्यतारूपं दर्शयिष्यति प्रशंसति च–**काममिति**। उपमोत्प्रेक्षादिः अलङ्कारः सर्वोऽपि अर्थे रसं निषिञ्चतु। तथाऽपि एनम् अर्थरसातिशयं अग्राम्यतैव भूयसा वहति। सहृदयोद्वेगकरं ग्राम्यं, तद्विपरीतं अग्राम्यम्। तेन सहृदयसन्तोषकरम् अग्राम्यम् इत्यर्थः।।६२।।

पूर्वं मधुरगुणलक्षणारम्भे अर्थेऽपि रसवत्ता अस्तीत्युक्तम्; साऽद्य दर्श्यते–**काममिति**। सर्वोऽपि अलङ्कारः अर्थे रसं कामं निषिञ्चतु ददातु। तथाऽपि इयं अग्राम्यतैव अनश्लीलतैव एनं माधुर्यस्य भारं भूयसा अत्यर्थं वहति। ग्राम्यार्थः प्रतिपाद्यते चेत्, स दुष्ट एव भवति।।६२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कन्ये कामयमानं मां न त्वं कामयसे कथम्।
इति ग्राम्योऽयमर्थात्मा वैरस्यायैव कल्पते॥६३॥

रत्नश्री

कन्ये बाले त्वं कामयमानं सन्तं मां कथं किं न कामयसे नाभिलषसि। एवं नाम त्वं निष्ठुरेति। अयमेवंविधोऽर्थात्मा वस्तुरूपं ग्राम्यः अविदग्धोचितः। ततश्च वैरस्यायैव अमाधुर्यार्थमेव कल्पते सम्पद्यते न कथमपि रसवत्तायै। विरस एव तादृशोऽर्थ इति यावत्। वैरस्यं च न काव्योचितमिति नेदृशं कवयः स्पृ[श]न्तीत्याकूतम्॥

कीदृशं तर्हि वस्तुरूपमग्राम्यम्, यद्रसावहतित्याह-

हृदयङ्गमा

अर्थगतायाः ग्राम्यताया उदाहरणं दर्शयति, कन्ये इति।-(विदग्धजनोक्तिरियम्। "विरहे ते विषीदन्तं निषीदन्तं तवान्तिके"। इत्यस्य पूर्वार्द्धम्), हे कन्ये! त्व ते तव, विरहे विषौदन्तं तवान्तिके निषीदन्तं कामयमानं मां कथं न कामयसे? इत्यत्र कन्ये! इति सम्बोधनं दुहितृस्थानीयानामेव सम्भवति, नायिकासम्बोधनं तु "प्रिये" "सुन्दरि" इत्यादि प्रयोग एव साधुः। (अन्ये तु उक्तेः ग्राम्यतया कान्तिहीनमित्यर्थप्रधानोऽयं कान्तिविपर्य्ययाख्यः दोष इत्याहुः ; तदुक्तं,- "कान्तेर्विपर्य्ययाद्वाक्यं ग्राम्यमित्यपदिश्यते" इति। तस्मादत्र अर्थस्य ग्राम्यता न तु कन्याशब्दस्य, शब्दस्य ग्राम्यत्वे हि विदग्धजना न तद्वावहरन्ति, कन्याशब्दस्तु तेषामपि प्रयोगे दृश्यते,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा,–"कन्येयं कलधौतकोमलरुचिः कीर्त्तिस्तु नातः परा" इत्यादि। प्राचीनैस्तु ग्राम्यजनमात्रव्यवहृतानां कट्यादिशब्दानामेव ग्राम्यत्वमुक्तम्। किञ्च, कामयमानमित्यादौ च कामिनां सुरतेच्छारूपः कामः शब्देनाप्रतिपाद्यमानः कथञ्चित् सूच्यमानः एव शोभां जनयति, अगूढ़स्तु शब्देन स्पष्टतयोक्तः सहृदयानां लज्जाजनकत्वेन वैरस्यमावहतीति स्पष्टशब्दार्थाभिधीयमान-कामत्वात् 'कामयमानम्' इत्यत्रापि अर्थगतः ग्राम्यतादोषः। अत्र च नायककामरूपकारणे सत्यपि नायिकाकामरूपस्य कार्य्यस्याभावात् विशेषोक्तिरलङ्कारः ; तदुक्तं दर्पणकारेण,–"सति हेतौ फलाभावे विशेषोक्तिस्तथा द्विधा" इति। एवमलङ्कारयुक्तः अनुप्रासवानपि शब्दार्थः ग्राम्यत्वेन वैरस्यमेव प्रतिपादयति इति न माधुर्य्यसद्भावः)। तञ्च विवृणोति, इतीति।–इति उक्तरूपः, अयं ग्राम्यः तदाख्यदोषयुक्तः, अर्थात्मा प्रतिपाद्यस्वरूपं, वैरस्याय रसोद्बोधव्याघाताय, प्रकल्पते प्रभवति॥६३॥

प्रभा

अग्राम्यतास्वरूपावबोधाय प्रथमं ग्राम्यं दर्शयति–**कन्ये इति**। कन्ये इति पदं पुत्र्या आह्वाने एव प्रयुज्यते। नायिकायास्तु प्रेयसिसुंदरिविलासिनीत्यादीनि पदानि प्रयुज्यन्ते। अतोत्र कन्ये इतिपदं वैरस्योत्पादकत्वेनानुचितम्। अत एव ग्राम्यता। तदुक्तम्–यद्यत्रानुचितं तद्धि तत्र ग्राम्यं स्मृतं यथा। इति। अत्र वैरस्योत्पादकः कन्याशब्दार्थ एव। न तु अविदग्धजनव्यवहृतगल्लकट्यादिशब्दवत् कन्याशब्दः। स च–कन्येयं कलधौतकोमलरुचिरित्यादौ सभ्यैर्व्यवहृतोस्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सभ्येतरव्यवहृतस्यैव गल्लादिशब्दस्य प्राचीनैर्ग्राम्यत्वमुक्तम्। कामयमानं कामाभिलाषुकम्। मां कथं न कामयसे उपभोक्तुं कथं न वाञ्छसि। सुरताभिलाषरूपो ह्यर्थो निगूहितः सन् भङ्ग्यन्तरेण सूचितः कामिनीकुचकलशवत् रसातिशयं प्राप्नोति। न तथा विस्पष्टमभिधीयमानः सभ्यानां लज्जामुत्पदयन् रसस्वादवैमुख्यजनकः। अत ईदृशो ग्राम्योर्थः सर्वथा परिहरणीय एव। अत्र यद्यपि शृङ्गारानुकूलयोः ककारमकारयोरावृत्त्या वृत्त्यनुप्रासो वर्तत एव तथापि न सोनुप्रासः अन्यो वा यः कोपि शब्दार्थालंकारो वर्ण्यमपि ग्राम्यार्थेन निकृष्टीकृतं पद्यस्थशृङ्गारं उपकर्तुं प्रभवति। अतोत्र ग्राम्यतादोषेण माधुर्यगुणाभावो बोद्धव्यः। एतदेव कथयति। इति एवंप्रकारकः। ग्राम्यः ग्राम्यतादोषकवलितः। अर्थात्मा अर्थस्वरूपम्। वैरस्याय रसानुभवप्रतिबन्धेन अरुचये। प्रकल्पते। प्रभवति।।६३।।

विवृति

तत्र ग्राम्यमुदाहरति–

कश्चित् कामपरवशः कन्यामाह–अहं त्वयि अनुरक्तः त्वामिच्छामि। त्वं किमिति मां नेच्छसि इति ग्राम्यमेतद्भवेत्। यतो नैतन्नायकप्रस्थानोचितम्। तथा हि–

'आकारंसवृतिः कार्या सुरक्तेनापि कामिना।
रक्तः परिभवं याति परिभूतः कथं प्रियः।।'६३।।

अग्राम्यं दर्शयितुं प्रथमं ग्राम्यं दर्शयति-**कन्ये इति**।।६३।।

ग्राम्योदाहरणमाह–**कन्ये इति**।।६३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामं कन्दर्पचण्डालो मयि वामाक्षि निष्ठुरः।
त्वयि निमत्सरो दिष्ट्येत्यग्राम्योऽर्थो रसावहः॥६४॥

रत्नश्री

वामाक्षि मञ्जुलोचने इति प्रियामन्त्रणम्। कन्दर्पः काम एव चण्डालः अकाण्डप्रहारित्वात्। मयि मद्विषये निष्ठुरः क्रूरं प्रहरतीत्यर्थः। कामं यदि नाम तथापि सानुग्रह एवास्माकं यत्त्वयि निर्मत्सरः निर्वैरः सानुक्रोशस्त्वां न बाधते। अत एवाह–दिष्ट्येति आनन्दनिवेदनम्। अयमस्माकमानन्दो महान् यत्त्वयि न [25a] प्रहरति। त्वत्सुखेनैव सुखिता वयम्। किं कन्दर्पचण्डालेन निष्ठुरेणापि कृतमिति वक्रोक्त्या आत्मनस्तद्विषयमनुगत[त्वं] तस्याश्च वैमुख्यमात्मनि दर्शयतीति अयमीदृशोऽर्थः अग्राम्यः सभ्यः काव्योचितः ततश्च रसावहः एकान्तमधुरः। एवंविधो वस्तुन्यग्राम्यतारसः प्रतिपत्तव्यः। अपरमत्रोदाह्रियते–

नन्वहं प्रणत एव, मानिनी सा भवन्तमवधीर्य वर्तते।
मन्मथस्त्वमसि किं न तन्मथः कुत्र वा न तव काम! वामता॥ इति॥

यथार्थो ग्राम्यस्तथा शब्दोऽपि ग्राम्योऽस्ति, सोऽपि वर्जनीय इति दर्शयन्नाह–

हृदयङ्गमा

अग्राम्यतां दर्शयति, काममिति।–हे वामाक्षि! वामे सुन्दरे कुटिले वा, अक्षिणी यस्याः तत्सम्बुद्धौ, कन्दर्पचाण्डालः मयि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामं निर्दयः, दिष्ट्या भाग्येन, त्वयि निर्मत्सरः सदय इत्यर्थः, इति पूर्वश्लोकार्थः एव गूढ़तया उक्तरूप इत्यर्थः, अर्थः अहं त्वां कामये त्वन्तु मां न कामयसे इत्येवंरूपः, अग्राम्यः ग्राम्यदोषरहितः, भङ्ग्या सूच्यमानस्य वैचित्र्याजनकत्वेन रसोद्बोधकत्वादिति भावः ; अत एव रसम् आवहति पुष्णातीति रसावहः रसोपकारकत्वेन माधुर्य्यगुणयुक्त इत्यर्थः। अयं भावः,–वामाक्षीति सम्बोधनपदं नायिकायाः सौन्दर्य्यं नायकस्य च तां प्रति चाटूक्तिं व्यञ्जयति, कन्दर्पो मयि निर्दयः त्वयि तु निर्मत्सर इत्यनेन कामयमानं मां त्वन्तु न कामयसे इति पूर्वोक्तपदार्थ एव भङ्ग्या सूचित इति अग्राम्यता सहृदयहृदयङ्गमतया रसं व्यञ्जयन्ती माधुर्य्यगुणम् आवहति इति।।६४।।

प्रभा

तमेवार्थमग्राम्यस्वरूपं दर्शयति–**काममिति**। वामे मनोहरे अक्षिणी यस्याः सा तत्संबुद्धिः हे वामाक्षि मनोहरलोचने। अनेन नयिकायाः सौन्दर्यप्रशंसया अभिप्रेतसंपादनानुकूलवचोवैदग्धिः चाटुकारस्य सूच्यते अतो नास्ति ग्राम्यता। कन्दर्पचाण्डालः कन्दर्पे चाण्डालारोपेण तस्य प्रखरवेदनाप्रदत्वं तेन च स्वस्य दुःखातिरेकः सूच्यते। कामम् अत्यन्तम्। मयि निर्दयः। तेनाभिहतः कथमपि जीवितं धारयामीत्यर्थः। त्वयि निर्मत्सरो मत्सदृशदुःखाप्रदानेन अपगतमत्सरोस्तीति जानामि। दिष्ट्या एतन्मदीयसौभाग्यमेव। इति अग्राम्यः शिष्टसंप्रदायानुसृतः। अर्थः रसावहः रसव्यञ्जकतया माधुर्यगुणवानित्यर्थः। अयं भावः। कन्दर्पचाण्डालो मयि निर्दयस्त्वयि निर्मत्सरं इति वाक्याभ्यां त्वयि अनुरक्तोहं त्वं च मां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नानुकम्पसे इति पूर्वश्लोकोक्त एवार्थः मनोहरया भङ्ग्या सूचितोस्ति। अतः अग्राम्यः सन् वक्तृवैदग्ध्यसूचनेन चमत्कारभूमिरेषः। अनेन च विप्रलम्भशृङ्गारस्य परिपोषो भवति। अतोयमर्थो माधुर्यं गुणमावहति।।६४।।

विवृति

अयमेवार्थः पुनरग्राम्यशब्दैरुच्यमानो रसावहो भवतीत्याह–

रसावहः माधुर्यमावहति।।६४।।

अग्राम्यं दर्शयति–**काममिति**।।६४।।

अग्राम्यस्य उदाहरणमाह–**काममिति**।।६४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्देपि ग्राम्यतास्त्येव सा सभ्येतरकीर्तनम्।
यथा यकारादिपदं रत्युत्सवनिरूपणे।।६५।।

रत्नश्री

न केवलमर्थे शब्दे वाचकेऽपि ग्राम्यतास्त्येव न नास्ति। कीदृशीत्याहसेत्यादि। सा ग्राम्यता सभ्येतरे असभ्या रथ्यापुरुषास्तेषां कीर्तनं यत् कियदसभ्यसमुदाहृतं वचनं ग्राम्यता। पदगतग्राम्यतेत्युक्तम्। यथेति निदर्शनेन व्यनक्ति-रत्युत्सवस्य निधुवनानन्दस्य निरूपणे प्रकाशने कर्त्तव्ये यकारादिपदं यकारमादिर्यस्य तञ्च तत् पदं चेति विग्रहः। सुसिद्धं खल्वेतदशिष्टवचनम्। तथाविधं सर्वं ग्राम्यं द्रष्टव्यम्। नेदमेवेति यथाशब्दस्यार्थः।।

अन्यः शब्दे ग्राम्यताप्रकारोऽस्ति, सोऽपि वर्जनीय इति व्युत्पादयन्नाह-

हृदयङ्गमा

ग्राम्यतायाः शब्दगतत्वमपि दर्शयति, शब्देऽपीति।-शब्देऽपि ग्राम्यता अस्ति एव, सा शाब्दग्राम्यता, सभ्यं साधु, तदितरत् असभ्यं, ग्रामीणहालिकादिप्रयोज्यं वचनमिति यावत्, तस्य कीर्त्तनात्, विदग्धजनैः इति भावः, भवतीति शेषः। यथा रत्युत्सवस्य निरूपणे यकारादिपदं यकार आदिर्यस्य तत् पदं, ''यभ मैथुने'' इत्यस्मात् निष्पन्नं पदं यन्भनादिकमित्यर्थः, तादृशपदप्रयोक्तुः ग्राम्यतया उपहसनीयत्वं श्रोतुश्च लज्जितत्वमेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जायते, सुतरां रसास्वादस्य तिरोहितत्वात् न अत्र माधुर्य्यगुणप्रसर इति भावः।।६५।।

प्रभा

माधुर्यप्रतिबन्धकमर्थगतं ग्राम्यत्वं निरूप्य शब्दगतं तन्निरूपयति–**शब्देपीति**। सा ग्राम्यता। सभ्येतरकीर्तनात् सभायामुच्चारणयोग्यत्वेन साधुसभ्यम् तस्मादितरदसभ्यम् ग्राम्यजनमात्रव्यवहृतं पदम् तस्य कीर्तनात् प्रयोगात्। शब्देपि भवतीति शेषः। अत्र कीर्तनं विदग्धजनकर्तृकमेव। ग्राम्यकर्तृके तु दोषाभावः। रत्युत्सवस्य संभोगशृङ्गारस्य निरूपणे वर्णनप्रसङ्गे। यकारादिपदं यकार आदिर्यस्य तत् पदम्। यभ् मैथुने इति धातुनिष्पन्नं यभस्वेत्यादिपदम्। तत्पदप्रयोगश्च प्रयोक्तुर्ग्राम्यतां व्यञ्जयन् श्रोतुर्लज्जामुद्बोधयन् रसास्वादमाधुर्यमन्तरयति। अत आस्वादव्यवधायकत्वान्नात्र माधुर्यगुण इति भावः। सुरतनिधुवनादिपदानां शिष्टादृतत्वात् तत्प्रयोगे न शब्दग्राम्यता। यथा माघे–नवनिधुवनलीलाः कौतुकेनाभिवीक्ष्य। इति। (११.१८) उत्तिष्ठन्त्या रतान्ते इति च वेणीसंहारे (१.३)।।६५।।

विवृति

शब्देऽपि ग्राम्यताऽस्त्येव, न केवलमर्थे। सा कुतो भवतीत्याह–**सभ्येतरकीर्तनात्**। सभायां साधु सभ्यम्, तस्मादितरत् असभ्यम्, तस्य कीर्तनात् अभिधानात्। तदुदाहरति–यथा यकारादिपदम्। यकार आदिर्यस्य तत् यकारादि, तञ्च तत्पदं च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यकारादिपदम् रत्युत्सवनिरूपणे। यब्धिर्यभ इत्यादि। आदिशब्दात् भगादि।।६५।।

ग्राम्यता नाम दोषो न केवलम् अर्थ एव दृश्यते, शब्देऽपि अस्तीत्याह–**शब्देऽपीति।** यथा–यकारादिपदं रतिशब्दार्थ-वाचकम्; यभशब्दः स्वरूपेणैव सभ्येतर इत्यर्थः।।६५।।

प्रसङ्गागतां ग्राम्यतां शब्देऽपि दर्शयितुमाह–**शब्देऽपि** इति। यथा इति उदाहरणदर्शने (नम्?)। यकारादिपदं यभ मैथुने इत्यस्मात् यम याभ इत्येवमादि।।६५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

**पदसन्धानवृत्त्या वा वाक्यार्थत्वेन वा पुनः।
दुष्प्रतीतिकरं ग्राम्यं यथा या भवतः प्रिया॥६६॥**

रत्नश्री

पदयोः सन्धानं सङ्गतिरानन्तर्यं तस्य वृत्त्या स्थित्या। वेति समुच्चये। वाक्यस्य पदसमुदायस्यास[त्त्यादियुक्त][25b]स्यार्थः क्रियाकारकविशेषलक्षणममिधेयं तद्भावः। स एव वाक्यार्थत्वं तेन वा तेन च हेतुना पुनरपरमेतत्। न केवलं पूर्वकं नैकैकपदार्थनिरूपणेन किं तु वाक्यार्थस्य विभावनेनेत्यर्थः। दुष्टासमभ्यां शब्दतः न तु वस्तुतः, तस्यैव वस्तुनः शब्दान्तरेणादुष्टत्वात्, प्रतीतिमवगमं करोतीति दुष्प्रतीतिकरं वाक्यं ततश्च ग्राम्यमसभ्यं विद्यते। यथेत्युदाहरणेन स्पष्टयति। या इत्यस्य पदस्य भवत इत्यनेन पदेन सन्धाने सति ग्राम्यं प्रतीयते। या तव प्रियेति पदान्तरसन्धाने निवर्तते। तदीदृशं पदसन्धानं ग्राम्यं बुद्ध्या परिहरणीयमिति॥

वाक्यार्थग्राम्यमुपहरति–

हृदयङ्गमा

अपरैः दोषत्वेन उक्ताया अश्लीलतायाः स्वमते ग्राम्यतायामन्तर्भावयन्नाह, पदेति।–पदानां सन्धानं सम्प्रवेशो यस्मिन् तत् पदसन्धानं वाक्यमित्यर्थः, ("वाक्यसङ्घात" इति पाठे,–स एवार्थः,) तद्वृत्त्या वा तद्गतत्वेन वा, पुनः अथवा, वाक्यार्थत्वेन वा तदर्थगतत्वेन वा इत्यर्थः, दुर्दुष्टा, प्रतीतिः दुष्प्रतीतिः तत्करं लज्जाजुगुप्साऽसाऽमङ्गलादिव्यञ्जकं, वाक्यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाक्यार्थस्य वा लज्जादिजनकत्वरूपम् अश्लीलत्वमित्यर्थः, ग्राम्यं ग्राम्यतायामन्तर्भूतं, तदपि माधुर्य्यव्याघातकमिति भावः। तत्र वाक्यागतमुदाहरति, यथेति।—भवतः तव, या प्रिया प्रणयिनी, इति प्रकृतार्थः, ततश्च या भवत इत्यंशे याभः मैथुनं, ("यभ मैथुने" इत्यस्मात् घञि निष्पन्नः) स विद्यते अस्येति याभवान् तस्येति प्रतीतौ व्रीडाव्यञ्जकत्वात् वाक्यमिदमश्लीलत्वदोषदूषितम्, अतोऽत्र न माधुर्य्यसङ्गतिरिति भावः॥६६॥

प्रभा

पूर्वं विशिष्टपदे ग्राम्यता दर्शिता। इदानीं सा पदानां सान्निध्यविशेषेण वाक्यार्थविशेषेण च आविर्भवन्ती रसास्वादवैमुख्यं जनयतीति न तत्र माधुर्यमिति सोदाहरणं प्रदर्शयति—**पदसंधानेति**। पदानां संधानं संधिः संहितेति यावत्। तद्वृत्त्या तद्वृत्त्वेन। विशिष्टपदसंहिताजन्या इति यावत्। तथा वाक्यार्थत्वेनार्थ्या व्यञ्जनया वाक्यार्थगतत्वेन वा। दुष्प्रतीतिकरं दुः दुष्टा व्रीडाजुगुप्साद्यमङ्गलार्थसूचकत्वेन निन्दिता या प्रतीतिः पदार्थानुभवस्तत्करम्। वाक्यस्य वाक्यार्थस्य वा दुष्प्रतीतिकरत्वरूपाश्लीलत्वमिति भावः। ग्राम्यम् ग्राम्यतादोषवत्। तच्च माधुर्ये परित्याज्यम्। तत्र पदसंधानगतं व्रीडाव्यञ्जकत्वरूपमश्लीलं दर्शयति—**यथेति**। भवतस्तव। प्रिया प्रेयसी। इति असंहितायां प्रस्तुतार्थः। संहितायां तु याभो मैथुनम्। यभ् मैथुने इत्यस्मात् भावे घञ्। पश्चाद्भूमार्थे मतुप्। सततमैथुनानुरक्तस्य तव प्रिया मैथुनसाधनेन प्रीणयित्री इति अश्लीलार्थद्योतनेन सभ्यानां व्रीडाकरमेतद्वाक्यम्। अतो नात्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माधुर्यम्। ननु–यथा यकारादिपदम् इत्यनेनैव यभ्धातुनिष्पन्ने ग्राम्यत्वमुक्तमस्ति। अत्रापि तद्धातुनिष्पन्न एव याभवान् शब्दः। तर्हि तेनैवास्य प्रयोगस्य सदोषत्वे सिद्धे पुनः किमर्थं पदसंधानवृत्त्या दुष्प्रतीतिकरस्य सदोषत्वेन कथनमिति चेन्न। अभिधावृत्त्या असभ्यार्थोपस्थापकस्य स्वतन्त्रपदस्यैव शब्दग्राम्यत्वम्। अत्र तु मुख्यार्थबोधान्तरं संहितोच्चारणकल्पनानुरोधेन व्यञ्जनया अश्लीलार्थभानम्। अतो न द्वयोः स्वरूपैक्यम्। पदसंधानवृत्त्या दुष्प्रतीतिकराणि–चलं डामरचेष्टितम्। तदत्रैव रुचिं कुरु। गौरी नारींग्लण्डदेशे विभाति। इत्यादीनि बहूनि सन्ति। अत्र संहितानिरपेक्षाणि पदानि अभिधावृत्त्या असभ्यार्थं दर्शयितुं लेशतोपि न प्रभवन्ति। संहितायां तु असभ्यच्छाया वरीवर्ति। अतः पदपदसंधानयोर्दोषयोर्भिन्नस्वरूपत्वेन भिन्नं लक्षणं युक्तमेव।।६६।।

विवृति

श्रुतिदुष्टकल्पनादुष्टार्थदुष्टानुदाहरति–

पदस्य सन्धानं संहिता प्रत्यासत्तिः। तथा पदसमुदायो वाक्यम्;

साख्यातं साव्ययं चैव सविशेषं सकारकम्।
वाक्यमित्युच्यते सद्भिः कैश्चिदर्थप्रसाधकम्।।

तस्यार्थो वाक्यार्थः, तस्य भावो वाक्यार्थत्वं तेन। दुष्प्रतीतिकरं विवक्षितार्थविपरीतबुध्द्युत्पादकं ग्राम्यम्। यथा या भवतः प्रियेत्यत्र या इति यच्छब्दस्य टाबन्तस्य सुलोपे रूपम्। तस्य च भवत इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठ्यन्तेन पदेन सम्बन्धः। तेन च दुष्प्रतीतिरुत्पद्यते। यभ मैथुने; यभनं याभः, सोऽस्यास्तीति याभवान् तस्य याभवतः इति।

तदुक्तम्—भामहेन

पदद्वयस्य सन्धाने यदनिष्टं प्रकल्पते।
तदाहुः कल्पनादुष्टं स शौर्याभरणो यथा।। काव्य।

इति कल्पनादुष्टं व्याख्यातम्। परं शत्रुं प्रहृत्य विश्रान्तः पुरुषो नरो बलवानित्यमुमर्थमभिप्रेत्य प्रयुक्तं वाक्यं शिश्नविषयां बुद्धिमुत्पादयति; तथा हि—परं भगं प्रहृत्य विश्रान्तः पतितः पुरुषः कोटः (?) वीर्यवान् वीर्यं रेतः तद्वानित्यर्थदुष्टम्। तदुक्तम्—

अर्थदुष्टं च तज्ज्ञेयं यत्रोक्ते जायते मतिः।
असभ्यवस्तुविषया शब्दैस्तद्वाचिभिर्यथा।।

हन्तुमेवाभियुक्तस्य स्तब्धस्य विवरैषिणः।
पतनं जायतेऽवश्यं क्लेच्छ्रेण पुनरुन्नतिः।।

इत्यर्थदुष्टं व्याख्यातम्। एवमादीत्यादिशब्दात् श्रुतिकष्टं गृह्यते द्रष्ट्टद्रुह्यद्युतिह्लादादिकम्।

तदुक्तं भामहेन—

श्रुतिदुष्टार्थदुष्टे च कल्पनादुष्टमित्यपि।
श्रुतिकष्टं तथा चाहुर्वाचो दुष्टं चतुर्विधम्।।

इति एतञ्च सर्वमसंग्राह्यत्वात् ग्राम्यमेवेति अग्राह्याऽर्थो रसावह इत्यनेनैव संगृहीतत्वात् न पृथगुक्तमिति।।६६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वरं प्रहृत्य विश्रान्तः पुरुषो वीर्यवानिति।
एवमादि न शंसन्ति मार्गयोरुभयोरपि।।६७।।

रत्नश्री

परं शत्रुं प्रहृत्य हत्वा वीर्यवान् शूरः पुरुषो विश्रान्तो व्यवस्थित इत्येकोऽर्थस्तावदग्राम्यः। परम् अत्यर्थं प्रहृत्याभिहत्य वीर्यवानुपचितप्रधानधातुः पुरुषः विश्रान्तो विरतः पतित इत्यपरो ग्राम्यो वाक्यार्थः प्रतीयत इति वाक्यार्थग्राम्यमेतत्। एवमादीदृशमर्थग्राम्यं शब्दग्राम्यं चोभयोरपि वैदर्भगौड़ीययोर्मार्गयोरेकस्मिन्नपि न शंसन्ति नाद्रियन्ते तद्विद एव। तच्च प्रायोग्रहणसंगृहीतम्।

कस्यचित् सहसोत्थानमग्रे विदधतो मदात्।
पराघातप्रवृत्तस्य पतनायैव जायते।।

इति वाक्यार्थग्राम्योदाहरणमपरमिति।।

भगिनीत्यादेः का गतिरित्याह–

हृदयङ्गमा

वाक्यगतामश्लीलतामुक्त्वा तदर्थगतां निर्दिशति, खरमिति।–कश्चित् वीर्य्यवान् पराक्रमशाली, पुरुषः, खरम् अतितीक्ष्णं यथा तथा, प्रहृत्य, शत्रूनिति शेषः, विश्रान्त इति प्रकरणसङ्गतोऽर्थः, परं वीर्य्यवान् शुक्रलः, कश्चित् पुरुषः, खरं गाढ़ं यथा तथा, प्रहृत्य मैथुनं कृत्वा, विश्रान्तः, (इत्यपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असभ्यार्थो वक्रादिवैलक्षण्येन प्रतीयते, तेन च व्रीडाव्यञ्जकतया अर्थगताश्लीलत्वरूपग्राम्यत्वम्; न च अत्र वाक्यगतमश्लीलत्वमिति मन्तव्यं, यत्र तु शाब्दया व्यञ्जनया द्वितीयार्थस्य बोधस्तत्र एव वाक्यगतत्वं, यत्राार्थ्या व्यञ्जनया वक्रादिवैशिष्ट्यादपरोऽर्थः प्रतीयते; तथा चोक्तं दर्पणकारेण यथा,–"अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रितै। एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाश्रया।।" इति। अत्र तु 'खरम्' इत्यादिवाक्यस्थपदानाम् एकार्थमात्रप्रतिपादकानां प्रकरणादिनियमनासम्भवात् वक्तादिवैशिष्टेयनार्थ्या व्यञ्जनयैवासभ्यरूपद्वितीयार्थस्य प्रतीतिरित्यर्थगतत्वमेव; किञ्च दोषगुणालङ्कारादीनां शब्दार्थगतत्वव्यवस्थायां शब्दपरिवृत्तिसहत्वासहत्वाभ्यां व्यवस्थितेश्च। अत्र तु बलशुक्रोभयार्थवाचकस्यापि बलस्य शुक्रजत्वेनैकत्वस्वीकारादेकार्थस्य वीर्य्यशब्दस्य परिवृत्तावपि असभ्यरूपार्थप्रत्ययनादश्लीलत्वाखण्डनमित्यर्थगतत्वमेव। यत्र तु शब्दपरिवर्त्तने दोषस्यापि खण्डनं तत्रैव शब्दगतत्वमिति ध्येयम्)। एवमादि प्रोक्तग्राम्यतादिदोषाकलितं, काव्यमिति शेषः, (आदिपदेन दोषान्तरवतां ग्रहणम्,) उभयोरपि गौड़वैदर्भयोः, मार्गयोः न शंसन्ति न आद्रियन्ते, विद्वांस इति शेषः। (ननु गौड़वैदर्भयोः वैपरीत्यमेव दृश्यते, तत्कथमत्र साम्यमित्यपि न वाच्यम् "एषां विपर्य्ययः प्रायो दृश्यते गौड़वर्त्मनि" इत्यत्र प्राय इत्यनेन कुत्रचित् साम्यमिति स्वयमेवोक्तत्वात्)।।६७।।

प्रभा

वाक्यार्थगतं ग्राम्यमुदाहरति–**खरमिति**। वीर्यवान् पराक्रमशाली पुरुषो दाशरथी रामः। खरं तन्नामकं राक्षसम्। प्रहृत्य।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्रान्तो विश्रान्तिं लेभे। अथवा पुरुषः कोपि शूरः। खरं तीक्ष्णम्। प्रहृत्य शत्रुमभिहत्य विश्रान्तः विश्रान्तिं लेभे। एवं प्राकरणिकोर्थः प्रथममाविर्भवति। पश्चात् वक्त्रादिवैलक्षण्येन वीर्यवान् शुक्रवान्। पुरुषः कश्चित् कामुको युवा। खरं गाढम्। प्रहृत्य मदनध्वजप्रहारं दत्त्वा विश्रान्तो ग्लानिं प्राप्त इत्यर्थ आर्थ्या व्यञ्जनया प्रतीतिपदवीमारोहति। एवं वाक्यार्थगताश्लीलदोषेण दुष्टत्वान्नात्र माधुर्यम्। न चेदं वाक्यगतमश्लीलत्वम्। एकार्थमात्रसंकेतितानां खरमित्यादिवाक्यघटकपदानां शाब्द्या व्यञ्जनाया अनाश्रयत्वेन असभ्यार्थोपस्थापकत्वाभावात्। वाक्यार्थस्यैव वक्तृविशेषादिभिरार्थ्या व्यञ्जनया द्वितीयार्थोपस्थापकत्वम्। एवं च शब्दपरिवृत्त्यसहत्वसहत्वाभ्यां शब्दार्थगतत्वनिश्चयोवगन्तव्यः। तथा च यत्र शब्दपरिवृत्त्यसहमश्लीलं तद्वाक्यगतम्। यत्र च तत्सहं तदर्थगतम्। प्रकृतोदाहरणे खरादिपदानां गाढादिपदैः परिवर्तनेपि अश्लीलतायाः सद्भावात् शब्दपरिवृत्तिसहत्वेन अर्थगतत्वं ज्ञेयम्। एवं च यत्र एकार्थमात्रप्रतिपादकानां पदानां प्रकरणादिभिः प्रस्तुतेर्थे निश्चितेपि वाक्त्रादिवैशिष्टसचिवया आर्थ्या व्यञ्जनया अपरार्थस्य भानं तत्रार्थगतत्वम्। यत्र च अनेकार्थस्य शब्दस्य प्रकरणादिभिः प्रस्तुतार्थे निश्चिते शाब्द्या व्यञ्जनया अप्रस्तुतार्थप्रतीतिस्तत्र शब्दगतत्वम्। यदुक्तं प्रकाशे–

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
संयोगाद्यैरवाच्यार्थधीकृव्द्यापृतिरञ्जनम्।। इति। (२.१९)

न चात्र वीर्यपदस्य शुक्रबलवाचकत्वेन द्व्यर्थता अस्तीति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाब्दी व्यञ्जना शङ्कितव्या। बलस्य केवलवीर्यजन्यत्वेन एकत्वाङ्गीकारात्। वीर्यपदस्य परिवृत्तावपि अश्लीलार्थभानस्य अनपायाञ्च। तथा च नेदं वाक्यगतमश्लीलत्वम्। अपि तु अर्थगतमेव। एवमादि निरुक्तग्राम्यतादि। आदिशब्देन नेयत्वादयो दोषा अग्रे वर्ण्यमाना ग्राह्याः। उभयोर्गौडवैदर्भयोर्मार्गयोः। न शंसन्ति न प्रशंसन्ति। तत्तन्मार्गानुयायिन इति शेषः। एवं च अनुप्रासकृतवैलक्षण्येपि ग्राम्यतादोषविषये उभयोरैकमत्यमिति भावः॥६७॥

विवृति

पदसन्धिना वाक्यार्थान्तरप्रतीतिकरत्वेन च पुनर्द्विविधं शब्दग्राम्यं दर्शयति–**पदेति**। यच्छब्दभवच्छब्दौ सन्धिना श्लिष्टौ याभवच्छब्दप्रतीतिकरौ ग्राम्यौ। वीर्यवान् रामः स्वरं राक्षसं प्रहृत्य हत्वा विश्रान्त इति वाक्यम्, कश्चित् पुरुषः रतौ स्वरं प्रचण्डं प्रहृत्य वीर्यवान् विश्रान्तः इति वाक्यार्थान्तरप्रतीतिकरत्वात् ग्राम्यम्। 'कन्ये कामयमानं मां' –इत्यत्र वाक्यार्थ एव ग्राम्यत्वमित्यर्थग्राम्यत्वम्; अत्र तु उदाहरणे ग्राम्यवाक्यार्थान्तरप्रतीतिकृत् वाक्यमिति शब्दग्राम्यत्वम्। अर्थग्राम्यत्वशब्दग्राम्यत्वे गौडवैदर्भयोरुभयोरपि मार्गयोः परित्याज्ये इत्याह–**एवमादीति**॥६७॥

अत्र तस्या एव ग्राम्यतायाः प्रकारविशेषमाह–**पदेति**। पदानां सन्धिः पदसन्धानम्। तस्य वृत्तिः। तया वा, वाक्यार्थत्वेन वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुष्प्रतीतिकरं यत् तदपि ग्राम्यमेव। यथा–या भवतः प्रिया इत्युक्ते, या अङ्गना भवतः प्रिया इति गम्यमेव; अत्र याभवतः पुरुषस्य प्रिया इति च गम्यते। श्रोतुर्हि अन्तः पदसन्धानप्रतीत्या दुष्प्रतीतिकरम् एतत्। वीर्यवान् पुरुषः कोऽपि स्वरं तीक्ष्णं प्रहृत्य, प्रहारं कृत्वा, युद्धान्ते विश्रान्तोभवति इत्युक्ते, श्रोतुः काऽपि दुष्टा वाक्यार्थप्रतीतिर्जायते।।६७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगिनीभघवत्यादि सर्वत्रैवानुमन्यते।
विभक्तमिति माधुर्यमुच्यते सुकुमारता॥६८॥

रत्नश्री

भगिनी भगवती सुभगा दुर्भगेत्यादि सर्वत्रैव शास्त्रे काव्ये लोके चानुमन्यते आद्रियते। ततस्तादृशमग्राम्यं सभ्यमेव। ततश्च प्रयुज्यते एव कविभिः॥

माधुर्यं निगमयन्नाह-विभक्तमित्यादि। इत्यनेन प्रकारेण माधुर्यं विभक्तं निर्दिष्टम्। सुकुमारतेदानीमुच्यते निदिश्यते तदनन्तरमुपदिष्टत्वादिति॥

हृदयङ्गमा

ग्राम्यतायाः प्रतिप्रसवमाह, भगिनीति।–भगिनीभगवती आदिर्यस्य तत् पदम्, आदिपदग्राह्यं योनिलिङ्गादिकञ्च, सर्वत्र काव्येषु व्यवहारेषु च, अनुमन्यते अदुष्टतया लोकैः अङ्गीक्रियते, तत्तच्छब्दप्रयोगे दोषानुसन्धानविरहेण साधारणानां वैरस्यानुदयात् इति भावः। (उक्तञ्च,–"ग्राम्यं घृणावदश्लीलामङ्गलार्थं यदीरितम्। तत् संवीतेषु गुप्तेषु लक्षितेषु न दुष्यति॥" इति। तत्र संवीतं यथा,–"तस्मै हिमाद्रेः प्रयतां तनूजां यतात्मने योजयितुं यतस्व। योषित्सु तद्वीर्यनिषेकभूमिः सैव क्षमेत्यात्मभुवोपदिष्टम्॥" अत्र तद्वीर्यनिषेकभूमिः इति अश्लीलस्यापि संवीतत्वात् गुणत्वम् इति। संवीतत्वं हि अनादिप्रयोगत्वेन सर्वजनव्यवहृतत्वम्; तच्चोक्तं यथा,–"संवीतस्य हि लोकेऽस्मिन्न दोषान्वेषणं क्षमम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिवलिङ्गस्य संस्थाने कस्यासभ्यत्वभावनम्।।'' इति। गुप्तेषु असभ्यार्थे अप्रसिद्धेषु; यथा,–''सुदुस्त्यजा यद्यपि जन्मभूमिर्गजैरसम्बाधमयाम्बभूवे। स तेऽनुमेयः सुभगेऽभिमानी भगिन्ययं नः प्रथमाभिसन्धि।।'' अत्र जन्मभूमिसम्बाध-भगिनीशब्दानाम् अश्लीलार्थान्तरत्वेऽपि प्रथमार्थप्रभावभाव-नागुप्तत्वात् गुणत्वम्। तञ्चोक्तं,–''वस्तु महात्मागुप्तस्य पदार्थस्य विभावनात्। भगिनीभगवत्यादि नासभ्यत्वेन भाव्यते।।'' इति। लक्षितेषु लक्षणया असभ्यार्थप्रतिपादकेषु; यथा,–''ब्रह्माण्डकारणं योऽप्सु निदधे वीजमात्मनः। उपस्थानं करोम्येष तस्मै शेषाहिशायिने।।'' अत्र ब्रह्माण्डोपस्थानशब्दयोः असभ्यार्थस्मृति-हेतुत्वेऽपि अन्यत्र लक्षितत्वात् गुणत्वात्। तथा सुरतप्रसङ्गसभायां शान्तबीभत्सरसादौ व्यङ्ग्ये च अश्लीलत्वस्य गुणत्वमन्यैरङ्गीकृतम्)। इति उक्तप्रकारेण, माधुर्य्यं विभक्तं विभज्य दर्शितम्। अधुना सुकुमारता क्रमप्राप्तस्तदाख्यगुणः, उच्यते।।६८।।

प्रभा

पूर्वोक्तग्राम्यताया अपवादमाह–**भगिनीति** भगिनी भगवती आदिशब्देन योनिलिङ्गादीनां संग्रहः। यथा शिवलिङ्ग विश्वयोनिरित्यादि। सर्वत्र व्यवहारे काव्येषु वैदर्भ्यादिरीतिषु चानुमन्यते निर्दुष्टतया सर्वैः स्वीक्रियते। शिष्टपरिगृहीतानां शब्दानां प्रयोगे दोषानुसंधानायोगात्। श्रोतृणां वैरस्योत्पादनेन वैमुख्यजनकत्वाभावाद् इति भावः। तदुक्तं भोजराजेन–

ग्राम्यं घृणावदश्लीलामङ्गलार्थं यदीरितम्।
तत् संवीतेषु गुप्तेषु लक्षितेषु न दुष्यति।। इति। (१.१०५)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संवीतेषु अपुष्टतयाङ्गीकृतेषु। स एव संवीतस्यादुष्टत्वं पुनर्दृष्टान्तपूर्वकमाह–

संवीतस्य हि लोकेस्मिन् न दोषान्वेषणं क्षमम्।
शिवलिङ्गस्य संस्थाने कस्यासभ्यत्ववासना। इति।

संवीतादीनामुदाहरणानि–

तस्मै हिमाद्रेः प्रयतां तनूजां यतात्मने योजयितुं यतस्व।
योषित्सु तद्वीर्यनिषेकभूमिः सैव क्षमेत्यात्मभुवोपदिष्टम्।।

इति।

अत्र तद्वीर्यनिषेकभूमिः इति पदस्याश्लीलत्वेपि संवीतत्वाद् गुणत्वम्। गुप्तत्वं नाम प्रसिद्धार्थेनाप्रसिद्धासभ्यार्थस्य गोपनम्। यथा–

सुदुस्त्यजा यद्यपि जन्मभूमिर्गजैरसंबाधमयांबभूवे।
स तेनुनेयः सुभगोभिमानी भगिन्ययं नः प्रथमाभिसंधिः।।

इति। अत्र जन्मभूमिसंबाधसुभगभगिनीशब्दानां जन्मभूसंकट-सुन्दरस्वस्त्राद्यर्थेषु प्रसिद्धानां योन्यादिरूपाश्लीलार्थान्तरत्वेपि प्रथमार्थप्रभावेन गुप्तत्वात् गुणत्वम्। तथा चोक्तम् तत्रैव–

वस्तुमाहात्म्यगुप्तस्य पदार्थस्य विभावनात्।
भगिनीभगवत्यादि नासभ्यत्वेन भाव्यते।। इति।

लक्षितानि असभ्यार्थबोधकानि यथा–

ब्रह्माण्डकारणं योप्सु निदधे बीजमात्मनः।
उपस्थानं करोम्येष तस्मै शेषाहिशायिने।। इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र ब्रह्माण्डोपस्थानशब्दयोरसभ्यस्मृतिहेतुत्वेपि अन्यत्र लक्षितत्वाद् गुणत्वम्। क्वचिदाश्रयसंबन्धादश्लीलादीनां गुणत्वम्। तदुक्तं भोजराजेन–

किंचिदाश्रयसंबन्धाद्धत्ते शोभामसाध्वपि।
कान्ताविलोचने न्यस्तं मलीमसमिवाञ्जनम्।।

इति। (१.१०६)

यथा–

आन्त्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कङ्कण-
प्रायप्रेङ्खितभूरिभूषणरवैराघोषयत्यम्बरम्।
पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्ललद्-
व्यालोलस्तनभारभैरववपुर्दर्पोद्धतं धावति।।

अत्राश्रयस्य पिशाचाङ्गनानां बीभत्सरसोचितत्वात् तद्वर्णनमदोषः। एवं शृङ्गारे शान्तरसे च न दोषः। तदुक्तं प्रकाशे–अश्लीलत्वं क्वचिद्गुणः। (७.३०३) यथा सुरतारम्भगोष्ठ्याम्–द्व्यर्थैः पदैः पिशुनयेञ्च रहस्यवस्तु। इति कामशास्त्रस्थितौ–

करिहस्तेन संबाधे प्रविश्यान्तर्विलोडिते।
उपसर्पन् ध्वजः पुंसः साधनान्तर्विराजते।।

इत्यत्र करिहस्तादयः शब्दा असभ्यार्थबोधकाः सुरतप्रसङ्गवर्णनोद्युक्तस्य कामिन उक्तित्वान्न दोषावहाः। अत्राप्रस्तुतसमरवृत्तान्तार्थस्तु स्फुट एव। पद्यार्थस्तु प्रकाशटीकायां द्रष्टव्यः। शान्तेपि रसे अश्लीलत्वं न दोषास्पदम् यथा–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तानोच्छूनमंडूकपाटितोदरसंनिभे।
क्लेदिनि स्त्रीव्रणे सक्तिरकृमेः कस्य जायते।। इति।

एवमादयो ग्राम्यतादोषस्य बहवोपवादाः सरस्वतीकण्ठा-भरणादिषु द्रष्टव्याः। माधुर्यमुपसंहरति-**विभक्तमिति**। इति एवं पूर्वोक्तगौडवैदर्भमार्गयोर्विभक्तम्। गौडा वृत्त्यनुप्रासप्रधानं प्रबन्धं मधुरं मन्यन्ते वैदर्भास्तु श्रुत्यनुप्रासप्रधानम् इति विभागद्वयेन स्थितम्। माधुर्यम् माधुर्यगुणः। अस्तीति शेषः। विभक्तं रसघटितत्वात् विशेषेण दर्शितमिति केचित्। उच्यते सुकुमारता क्रमप्राप्तं सौकुमार्यम् उच्यते।।६८।।

विवृति

भगिनीभगवत्यादि पुनः श्रुतिदुष्टाभासमप्यतिसमर्थरूढत्वात् कविभिः सर्वथैवानुमन्यते। आदिशब्दात् गण्डः पाण्डुः इत्याद्यन्यदप्येव मादरणीयम्। इदानीं प्रकृतोपसंहारेणोत्तरं व्यांख्यातुमाह–विभक्तमिति माधुर्यम्। कन्ये कामयमानं मां इत्याद्यमधुरम्, कामं कन्दर्पचण्डाल इत्यादि मधुरमिति माधुर्यं विभाजितम्। इदानीं सुकुमारतोच्यते।।६८।।

भगिनीति। भगिनीभगवत्यादिपदं ग्राम्यार्थान्तरप्रतीतिकरमपि सर्वत्रैव लोकवेदयोः दृष्टप्रयोगत्वात् न दुष्टम्। विस्तरेणोक्तं माधुर्यमुपसंहृत्य सौकुमार्यं लिलक्षयिषति।।६८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

**अनिष्ठुराक्षरप्रायं सुकुमारमिहेष्यते।
बन्धशैथिल्यदोषो हि दर्शितः सर्वकोमले॥६९॥**

रत्नश्री

अनिष्ठुराणि अपरुषाणि अक्षराणि वर्णाः प्रायाणि भूयांसि यस्मिंस्तथा अनिष्ठुरैर्वाक्षरैः प्रायं समधिकं काव्यमित्यनूद्य सुकुमारमपरुषमिष्यत इति विधिः। निष्ठुराणि तु स्वल्पानीति प्रायग्रहणेन सूचितम्। इहेति वैदर्भमार्गे सर्वानिष्ठुराक्षरं किं न सुकुमारमिष्यत इति चेदाह-बन्धेत्यादि। हिर्यस्मात्सर्वाणि अक्षराणि कोमलानि सुकुमाराणि यस्मिंस्तत्तथा। सर्वैरेवाक्षरैः कोमलं तस्मिन् काव्ये बन्धस्य निवेशनस्य शैथिल्यं लाघवं तदेव दोषो वैकृतं दर्शित उदाहृतः पूर्वम्। मालतीमाला लोलालिकलितेति [1.43]। तस्मादनिष्ठुराक्षरप्रायमेव सुकुमारमिहेष्यते न सर्वानिष्ठुराक्षरमिति योज्यम्॥

सुकुमारतामुदाहरन्नाह-

हृदयङ्गमा

अनिष्ठुरेति।-अनिष्ठुराणि अपरुषाणि, अक्षराणि प्रायो बाहुल्येन यत्र तादृशं, पद्यमिति शेषः, सुकुमारं सौकुमार्य्यगुणयुक्तमित्यर्थः, 'प्रायः'पदेन अन्तरान्तरा परुषाक्षराण्यपि निवेशनीयानीति सूचितम्। (अत एवोक्तञ्च,-"बन्धस्याजरठत्वञ्च सौकुमार्य्यमुदाहृतम्" इति)। तु-शब्दोऽत्र हेतुवाचकः ; यतः सर्वकोमले केवलसुकुमाराक्षर-प्रयोगे, बन्धस्य रचनायाः, शैथिल्यदोषः श्लथत्वरूपदोषः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अगाढ़ता इति यावत्, दर्शितः "मालतीमालालोलालिकलिला यथा" इत्यत्राभिहितः, मयैव इति शेषः। [तथा च कोमलाक्षराणां बहूनां मध्ये परुषाक्षरविन्यासेन बन्धस्य गाढ़तया यत् सहृदयहृद्यत्वं तदेव सौकुमार्य्यपदवाच्यम्; अल्पप्राणमहाप्राणाक्षर-घटितबन्धाशैथिल्ये तु श्लेष इत्यनयोर्भेदः। इदञ्च सौकुमार्य्यं शब्दगुणः, अर्थगुणस्तु—अर्थस्याश्लोलत्वाभावरूपत्वेनापारुष्यम्; तदुक्तं वामनेन,—"अपारुष्यं सौकुमार्य्यम्" (का० सू० वृ० ३अधि० २अ० ११सू०) इति। सामग्रोसम्भवेऽपि चित्तद्रुतिमनामादयन् नीरसः पारुष्यमभिधीयते, अतथाभूतस्तु झटिति तन्मयीभवनयोग्यान्तःकरणः सुकुमारः, तदिदमपारुष्यमिति तदर्थः। यथा,—"सद्यः पुरीपरिसरेऽपि शिरीषमृद्वी सीता जवात्त्रिचतुराणि पदानि गत्वा। गन्तव्यमस्ति कियदित्यमकृद्ब्रुवाणा रामाश्रुणः कृतवती प्रथमावतारम्।।" इति, अत्र सीतायाः पुरीपरिसरेऽपि कियदस्ति गन्तव्यमिति वचनं श्रृण्वतो रामस्य शिरीषमृदुतदङ्गावलोकनेन अश्रुणः पातात् तदश्रुनिमित्तभूता चित्तद्रुतिरेव सौकुमार्य्यमिति सुधीभिर्विभाव्यम्।।६९।।

प्रभा

सुकुमारं लक्षयति-**अनिष्ठुरेति**। निष्ठुराणि श्रुतिकटूनि तद्विपरीतानि अनिष्ठुराणि अपरुषाणि कोमलानीत्यर्थः। एतादृशानि यान्यक्षराणि तानि प्रायः बाहुल्येन यत्र तादृशं वाक्यं सुकुमारम् सौकुमार्यगुणयुक्तम्। इह साहित्यशास्त्रे। इष्यते कविभिरभिलष्यते। प्रायःशब्देन कोमलवर्णानां सामस्त्यं नापेक्ष्यते। तदेव सप्रयोजनं विशदयति—**बन्धेति**। सर्वकोमले कोमलवर्णात्मके काव्ये।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बन्धस्य शैथिल्यरूपो दोषो दर्शितः–अल्पप्राणाक्षरोत्तरं शिथिलं मालतीमाला लोलालिकलिला यथा–इति पूर्वमेव कथितः। (१. ४३) दोषोपि इत्यत्र दोषस्तु इति पाठे हेत्वर्थकस्तुशब्दो ज्ञेयः। एवं च कोमलाक्षराणां मध्ये मध्ये च परुषाक्षरविन्यासेन मौक्तिकमालाया अन्तरान्तरा रत्नविन्यासेनेव प्रबन्धस्य चारुत्वं सौकुमार्यम्। न चैवं सति श्लेषसौकुमार्ययोरभेदापत्तिरुभयोरपि लक्षणैक्यादिति वाच्यम्। श्लेषस्य महाप्राणमिश्रिताल्पप्राणाक्षर-विन्यासविशेषेण सौकुमार्यस्य चानिष्ठुराक्षरप्रायत्वेन च द्वयोः परस्परभिन्नत्वात्। नन्वल्पप्रप्राणाक्षराण्येव सुकुमाराणीति चेन्न। अल्पप्राणान्यक्षराणि रचनाविशेषेण निष्ठुराणि महाप्राणान्यपि च कोमलानि भवन्ति। निष्ठुरत्वं नाम श्रुतिकटुत्वम्। तञ्चैकजातीयानां संयुक्तवर्णानाम् तथा क्षकारह्लाकारादीनामित्यनुभवसिद्धम्। यथा–

व्यग्रैरप्याग्रहेन्दुग्रसनगुरुभरैर्नो समग्रैरुदग्रैः
प्रत्यग्रैरीषदुग्रैरुदयगिरिगतो गोगणैर्गौरयन् गाम्।
उद्गाढार्चिर्विलीनामरनगरनगग्रावगर्भामिवाह्ना-
मग्रे श्रेयो विधत्ते ग्लपयतु गहनं ग्लपयतु गहनं स ग्रहग्रामणीर्वः।।

यथा वा–क्षुत्क्षामान् रूक्षरक्षोरदखरनखरक्षुण्णविक्षोभिताङ्गान्। इति। यथा वा अग्रे कविनानेवैव दर्शितम्–न्यक्षेण क्षपितः पक्षः क्षत्रियाणां क्षणादिति। (१.७२) अत्राल्पप्राणानामपि श्रुतिकटुत्वं वर्तते। महाप्राणानां रचनाविशेषेण श्रुतिमनोहरत्वं यथा–मधुरया मधुबोधितमाधवी इति पूर्वोदाहृते पद्ये। (११ पत्रे) अत्र धकारस्य महाप्राणत्वेपि श्रुतिमाधुर्यं वरीवर्ति। नवीनास्तु इदं सौकुमार्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुतिकटुत्वदोषाभावफलं मन्वानां श्रुतिकटुत्वदोषपरिहारेणैव तल्लाभान्न ततः स्वतन्त्रतया गुणत्वेन स्वीकुर्वन्ति।। सौकुमार्यस्यान्येषां लक्षणान्युदाहरणानि च। तत्रादौ भरतः-

सुखप्रयोज्यैर्यच्छन्दैर्युक्तं सुश्लिष्टसंधिभिः।
सुकुमारार्थसंयुक्तं सुकुमारं तदिष्यते।। इति। (१६.१००)

उदाहरणम्-

अङ्गानि चन्दनरजः परिधूसराणि
ताम्बूलरागसुभगोधरपल्लवश्च।
अच्छाञ्जने च नयने वसनं तनीयः
कान्तासु भूषणमिदं विभवावशेषः।।इति।

भोजराजस्तु आचार्यदण्डिन एव लक्षणोदाहरणानि स्वीकरोति। (१.६८) वामनः अजरठत्वं सौकुमार्यं अजरठत्वमपारुष्यम्। यथा-अस्त्युत्तरस्यां दिशि देवतात्मा इति। (३. १. २१) जगन्नाथः अकाण्डे शोकदायित्वाभावरूपमपारुष्यं सुकुमारता। यथा-त्वरया याति पान्थोयं प्रियाविरहकातरः। इति। (60 पत्रे) अत्र प्रियामरणकातरः इति पाठे पारुष्यं तद्रहितत्वात् सुकुमारता इति भावः। आचार्यदण्डिना शब्दगुणत्वेन सौकुमार्यं स्वीकृतम्। परे तु अपारुष्यं सौकुमार्यं तच्चार्थगुणत्वेन स्वीकुर्वन्ति। अपारुष्यं नाम परुषेप्यर्थे वक्तव्ये अपरुषरूपेणाभिधानम्। यथा मृत इति वक्तव्ये कीर्तिशेषं गत इति। यथा वा-

स किलेन्द्रप्रयुक्तेन शौरिणा भूमिनन्दनः।
चक्राघातोपदिग्धाध्वा नीतोत्यन्तप्रवासिताम्।। इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भोजोपि अर्थगुणं सौकुमार्यमाह–अनिष्ठुरत्वं यत् प्राहुः सौकुमार्यं तदुच्यते इति। (१.८०) उदाहरति च–

सद्यः पुरीपरिसरोपि शिरीषमृद्वी
सीता जवात् त्रिचतुराणि पदानि गत्वा।
गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम्।। इति।

अयं अमङ्गलदोषाभावः, अतो न गुणः। तदुक्तं दर्पणे–ग्राम्यदुःश्रवतात्यागात् कान्तिश्च सुकुमारता। (८.१२) गतार्थेति भावः।।६९।।

विवृति

भगिनीति। सर्वत्र वैदर्भगौड़योः। अथ सुकुमारमुच्यते।।

अनिष्ठुराक्षरप्रायं सुकुमाराक्षरप्रचुरं सुकुमारमितीष्यते। यद्येवं मालतीमालादि सुकुमारं स्यादित्याशंक्याह–**बन्धेति।** कल्पप्राणाक्षरयुक्तं शिथिलमुक्तम्।।६९।।

तल्लक्षयति–**अनिष्ठुरेति।** अनिष्ठुराक्षरप्रायं मृद्वक्षरबहुलं निष्ठुराक्षरमिश्रं सुकुमारम्।।६९।।

तस्य लक्षणमाह–**अनिष्ठुरेति।** निष्ठुराः किल क्षकारादयः ; तदन्यत् अनिष्ठुरम्। तव्द्यामिश्रमिह वैदर्भमार्गे सुकुमारमित्युच्यते। सर्वकोमलेषु अक्षरेषु बन्धशैथिल्यदोषो दर्शितः।।६९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मण्डलीकृत्य बर्हाणि कण्ठैर्मधुरगीतिभिः।
कलापिनः प्रनृत्यन्ति काले जीमूतमालिनि॥७०॥

रत्नश्री

वर्हाण्यङ्गरुहाणि मण्डलीकृत्य छत्राकारेण वितत्य मधुरा मनोहरा गीतिः केकालक्षणं गानं येषां तैः कण्ठैर्लक्षिता मधुरं गायन्त इत्यर्थः। कला[26b]पिनो मयूराः प्रनृत्यन्ति जीमूतमालिनि मेघधारिणि। मलमल्लधारणे। काले समये प्रावृषीति यावत्॥

प्रतिविशिष्टस्यानेकस्य काव्यधर्मस्याभावेऽपि सौकुमार्य-गुणादीदृशं काव्यमुपादेयमिति सौकुमार्यं वर्णयन्नाह-

हृदयङ्गमा

अस्य उदाहरणमाह, मण्डलीति।–कलापिनः मयूराः, जीमूतमालिनि काले वर्षासु, बर्हाणि पुच्छानि, मण्डलीकृत्य मण्डलाकारेण विस्तार्य्य, मधुरगीतिभिः मधुरगीतिसदृशस्वनैः इत्यर्थः कण्ठैः उपलक्षिताः सन्तः, (विशेषणे तृतीया) प्रनृत्यन्ति। (अत्र मकारककारदीनां कोमलाक्षराणां मध्ये प्रथमपादे 'मण्ड' इति 'कृत्य' इति 'बर्ह' इति संयोगत्रयाणां, द्वितीये 'ण्ठे' इति 'र्म' इति संयोगद्वयस्य, तृतीये पादे च 'नः' इति 'प्रनृत्यन्ति' इति च विसर्ग-संयुक्ताक्षरयोः, चतुर्थे दीर्घस्वराणामन्तरान्तरा सन्निवेशात् परुषत्वम्; ततः अनिष्ठुरप्राया रचनेयं सौकुमार्य्यमाश्रयति। अत्र च कलापिषु नर्त्तकव्यवहारसमारोपात् समासोक्तिरलङ्कारः, तदुक्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दर्पणकारेण,–"समासोक्तिः समैर्यत्र कार्य्यलिङ्गविशेषणैः। व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः।।" इति)।।७०।।

प्रभा

सुकुमारतामुदाहरति–**मण्डलीति**। मधुराः गीतयो यत्र तादृशैः। कण्ठैः–रुपलक्षिताः केकारवं कुर्वन्त इत्यर्थः। कलापिनो मयूराः। जीमूताः मेघास्तेषां मालाः सन्ति यस्मिन् तादृशे वर्षाकाले। बर्हाणि पिच्छानि। मण्डलीकृत्य मण्डलाकारं विधाय। नृत्यन्ति। अत्र मयूरे नर्तकव्यवहारप्रतीतेः समासोक्तिः। नर्तका अपि गानपूर्वकं नृत्यन्ति। अत्र पूर्वोक्तनिष्ठुरवर्णरचनाभावात् सौकुमार्यम्।।७०।।

विवृति

सुकुमारमुदाहरति–

स्पष्टम्।।७०।।

सौकुमार्यमुदाहरति–**मण्डलीकृत्येति**।।७०।।

उदाहरणमाह–**मण्डलीकृत्येति**। मधुरगीतिभिः कण्ठैः उपलक्षिताः।।७०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यनूर्जित एवार्थो नालङ्कारोऽपि तादृशः।
सुकुमारतयैवैतदारोहति सतां मुखम्॥७१॥

रत्नश्री

इत्ययमेवंविधोऽर्थः अभिधेयशरीरम्। ऊर्जितो दीप्तः प्रतिविशिष्टः। न तथाऽनूर्जित एव नोर्जितोऽपि। अलंकारस्तर्हि प्रतिविशिष्टस्तेनेदमादेयं काव्यं न सौकुमार्यगुणादिति चेदाह-नालंकारोऽपि तादृश इति। अलंकारोऽप्यत्र स्वभावोक्तिलक्षणः तादृशस्तथाभूतः प्रतिविशिष्टो न भवति यादृशोऽ[न्य]त्र। स च विभावनादिः। न केवलमर्थ इत्यपिशब्दार्थः। कोऽत्रार्थस्यालङ्कारस्य च भेदः येनोच्यतेऽलंकारोऽर्थश्चानूर्जित इति। य एवार्थः स एवालंकारोऽस्मिन् गम्यते। नैतदेवम्। अर्थो हि धर्मी, स्वभावोक्तिश्चालंकारो धर्मः प्रतीयत इति महान् भेदः, धर्मधर्मिभेदस्य सुप्रसिद्धत्वात्। अन्यत्राप्येवंविधोऽत्र भेदः। तथापि एतदिदमीदृशं काव्यं सुकुमारतयैव सौकुमार्येण केवलेन शब्दालंकारेण पुरस्कृतं सतां विदग्धानां मुखम् आननम् आरोहति गोचरीकरोति सुकुमारमित्येवेदृशं कविभिरुपादीयत इति यावत्। यदि पुनरर्थ ऊजिताऽलंकारश्च, सुतरां सुकुमारं काव्यं रमणीयमित्याकूतम्॥

हंसा भ्रमन्ति पद्मानां कानने मंदम[27a]न्थराः।
मञ्जु[भिर]ध्वनिभिः कर्णैश्चरणैर्वर्णविभ्रमैः॥

इत्यपरमुदाहरणमिति॥

सौकुमार्यविपर्ययं गौड़वर्त्मनि दर्शयन्नाह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयङ्गमा

उक्तरूपसौकुमार्य्यस्य गुणत्वमनङ्गीकुर्वतो नव्यान् प्रत्याह, इतीति।—इति उक्तविधः, अर्थः मण्डलीकृत्येतिपद्यप्रतिपाद्यः कलापिनृत्यरूपः इत्यर्थः, न ऊर्जितः न तेजस्वल एव, न अतिमनोरम इत्यर्थः, अलङ्कारश्च समासोक्तयनुप्राणितः स्वभावोक्तिरूपः, तादृशः वैचित्राजनकः, न, तथाऽपि एतत् पद्यं, सुकुमारतया तादृशसौकुमार्य्यगुणयुक्ताक्षरविन्यासेन, सतां सामाजिकानां, न तु साधारणानामिति भावः, मनः आरोहति आश्रयति, मोहयति इति यावत्। अयं भावः,—अर्थालङ्कारौ यथा पर्य्यालोचनया प्रतीयेते गुणस्तु न तथा, यतः अर्थस्य अलङ्कारस्य च बोधनात् पूर्वमेव गुणकृतवैशिष्ट्यं प्रतीयते, गुणस्य विन्यासविशेषरूपत्वात्। (अत एवोक्तं,—"तया कवितया किं वा तया वनितया तथा। पदविन्यासमात्रेण यया न ह्रियते मनः।।" इति। एतेन असति गुणवैचित्रो अर्थालङ्कारवैचित्रां सदपि काव्यं न तथा शोभयति। अत एवोक्तं भोजराजेन,—"अलङ्कृतमपि श्रव्यं न काव्यं गुणवर्जितम्।" अन्यञ्च,—"यदि भवति वचश्चुयतं गुणेभ्यो वपुरिव यौवनबन्ध्यमङ्गनायाः। अपि जनदयितानि दुर्भगत्वं नियतमलङ्करणानि संश्रयन्ते।।" एतेन गुणानामात्मनिष्ठत्वम् अलङ्काराणां शब्दार्थनिष्ठत्वमुक्तं भवति; उक्तञ्च,—"प्राणाः दश गुणाः" इति। वामनादिभिः रीतेरात्मत्वं गुणानाम् आत्मभूतरीतिनिष्ठत्वम् अलङ्काराणां तच्छरीरभूत-शब्दार्थनिष्ठत्वञ्चोक्तम्। ध्वनिकारेणापि ध्वनेरात्मत्वं गुणानाञ्च तन्निष्ठत्वं प्रतिपाद्यशब्दार्थयुगलस्य शरीरत्वमलङ्काराणाञ्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्निष्ठत्वमेवाङ्गीकृतम्। एवञ्च गुणत्वात् श्लेषादीनामात्मनि समवायसम्बन्धेन स्थितिः ; अलङ्कारत्वात् यमकोपमादीनां शरीरे संयोगवृत्त्या स्थितिरिति ग्रन्थकारस्याभिमतमिति मन्यामहे। न ह्यविपश्चिदपि कश्चिदभिवदेदभिजानीयाद्वा गुणानामात्मनि रीताविव अलङ्काराणां शरीरभूते शब्दार्थयुगले समवायवृत्त्या स्थितिरिति ध्येयम्)।।७१।।

प्रभा

भरतमुनिना स्वीकृतापि सुकुमारता कैश्चित् प्राचीाचार्यैर्न गुणत्वेन परिगणितास्ति। तदनुरोधनैवार्वाचीना अपि वर्णविशेषविन्यासात्मका हि सुकुमारता तस्या न गुणत्वं युक्तम्। अर्थस्यालंकारचमत्कृतेर्विना तस्याः स्वयं चमत्काराजनकत्वादिति वदन्तः सा ग्राम्यदुः श्रवणादिदोषपरिहारेण गतार्था भवतीति मन्यन्ते। तन्मतं खण्डयति–**इतीति**। इति मण्डलीकृत्येति पद्येन वर्णितोर्थ कलापिनर्तनरूपः। अनूर्जित एव अतेजिष्ठ एव रससंपर्कशून्यत्वेनेति भावः। तथालंकारोपि समासोक्तिरूपो न तादृशः न चमत्कारातिशयेन शृङ्गारं परिपोषयति। यथा पिबन् मधु (२. २०६) इत्यादिपद्ये। तथाप्येतत् पद्यं केवलं सुकुमारतयैव भवन्ति इत्यर्थः। अयमत्राशयः। यद्यप्यस्मिन् पद्येस्ति समासोक्तिः तथापि न तया सविशेषा चमत्कृती रसशून्यत्वात्। अतः सौकुमार्यगुणप्राधान्येनैवैतत् पद्यं काव्यं भवति। ततश्च सौकुमार्यं गुणत्वेन स्वीकार्यम्। गुणा एव अलंकारापेक्षया प्राधान्येन काव्यहेतवः। इममेवार्थमभिसंधाय प्राचीनैरुक्तम्–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तय कवितया किं वा तया वनितया च किम्।
पदविन्यासमात्रेण यया नापहृतं मनः।। इति।

असति गुणवैचित्र्येर्थालंकारौ न शोभेते। तदुक्तं भोजराजेन–

अलंकृतमपि श्रव्यं न काव्यं गुणवर्जितम्। इति।

यदि भवति वचश्च्युतं गुणेभ्यो वपुरिव यौवनवन्ध्यमङ्गनायाः।
अपि जनदयितानि दुर्भगत्वं नियतमलंकरणानि संश्रयन्ते।।
(१.५९.१५९) इति।

जगन्नाथेनापि रसात्मकं वाक्य काव्यम् इत्यस्य खण्डनप्रसङ्गे काव्ये शब्दप्राधन्यमुद्दिश्य यदुक्तं तदपि आचार्यदण्डिनोनुरोधेनैवेति ज्ञेयम्। तददोषौ शब्दार्थौ इति लक्षणं न विचारक्षममिति तु पूर्वं (१३ पत्रे) प्रपञ्चितमेत्व।।७१।।

विवृति

इत्यनूर्जित एवार्थः, नार्थगौरवं शब्दगतमाश्रयगतं वा। नालङ्कारोऽपि तादृशः नाप्यलङ्कार ऊर्जितः अतिशयोक्त्यादिः। तथाऽपि सुकुमारतयैव सुकुमारत्वादेवैत्तदारोहति सतां मुखम्।।७१।।

सौकुमार्यं प्रशंसति–**इतीति**। तदर्थः अपूर्वोऽर्थो रसवदर्थो वा न इति अनूर्जितः। तादृशः सुप्रसिद्धः शोभाकरो वा अलङ्कारः उत्प्रेक्षादिश्च नास्ति।।७१।।

सुकुमारप्रशंसारूपेण निगमयति–**इतीति**। अनूर्जितः अतेजिष्ठः। अलङ्कारश्च न सुन्दरः।।७१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीप्तमित्यपरैर्भूम्ना कृच्छ्रोद्यमपि बध्यते।
न्यक्षेण क्षपितः पक्षः क्षत्रियाणां क्षणादिति॥७२॥

रत्नश्री

दीप्तमूर्जितं साटोपमेतदिति मन्यमानैरपरैः पौरस्त्यैः कृच्छ्रौद्यं दुर्वचं कष्टोञ्चारणमसुकुमारतरमपि काव्यं बध्यते प्रयुज्यते न केवलसुकुमारमात्रमित्यपिशब्दः। भूम्ना प्रायः। ततश्च सुकुमारमपि किंचिदुष्णमधुन्यायेन येनोपयुज्यत इति सूचयति तदुदाहरति। [१]न्यक्षेण निःशेषेण क्षपितः निहतः क्षणात् सपदि स्तोकेन कालेनेत्यर्थः। क्षत्रियाणां राज्ञां पक्षो वर्गः परशुरामेणान्येन वा केनचिदिति गम्यते। नन्वेतद्विवक्षितं कृच्छ्रोद्यमात्रं तूदाहृतमिति यथा तादृशमित्यर्थः॥

अर्थव्यक्तिं व्याख्यातुमाह-

हृदयङ्गमा

गौड़वैदर्भयोः सौकुमार्य्ये मतभेदं दर्शयितुमाह, दीप्तमिति।—अपरैः गौड़ीयकविभिः, दीप्तिरौज्ज्वल्यम्, उत्साहोद्बोधेन चित्तविस्फारत्वमित्यर्थः, तद्युक्तं दीप्तं वीररौद्रबीभत्सरसात्मकतया समुत्तेजनमित्यर्थः, इति अस्मात् कारणात्, ओजस्वित्वादित्यर्थः, भूम्ना बाहुल्येन, कृच्छ्रोद्यमपि ओजोव्यञ्जकतया परुषवर्णात्मकत्वात् कष्टेनोञ्चार्य्यमपि, सौकुमार्य्यरहितमपि इति भावः, बध्यते ग्रथ्यते, विरच्यते इति यावत्; गौड़ीया हि वीररसादिरूपतेजस्विव्यङ्ग्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्व्यञ्जकपरुषाक्षरविन्यासस्यैवौचित्यात् तत्र सौकुमार्य्यं न अङ्गीकुर्वते इति भावः। यथा न्यक्षेण नेत्रहीनेन, अन्धेनेत्यर्थः, धृतराष्ट्रेणेति शेषः, क्षणात् अल्पेनैव कालेन, क्षत्रियाणां पक्षः समूहः, समग्रक्षत्रियकुलमित्यर्थः, क्षयितः नाशितः, कुरुक्षेत्रयुद्धे इति शेषः। केचित्तु न्यंञ्चन्ति नीचकर्म्म कुर्वन्ति इति न्यञ्चः कार्त्तवीर्य्याः, तान् स्यति विनाशयति इति न्यक्षः परशुरामः इति न्यक्षपदस्य कृच्छ्रार्थं सुष्ठु मन्यन्ते धृतराष्ट्रस्य क्षत्रियक्षये वीररसस्यासङ्गतेः। (अत्र वीररसवर्णनायां तादृशश्रुतिकटुपरुषवर्णप्रयोग एव चमत्कारमातनोतीति सौकुमार्य्यत्यागो गुण एवेति मन्यन्ते गौड़ीयाः। वैदर्भास्तु ईदृशेऽपि वीरबीभत्सरौद्ररसादिमत्प्रबन्धे सौकुमार्य्यमाद्रियन्ते इत्यनयोर्भेदोऽत्र मन्तव्यः ; यथा,–"कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुभिः निर्मर्य्यादैर्भवद्भिरुदायुधैः। नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिनामयमहमसृङ्मांमैः करोमि दिशां बलिम्।।" इति। अत्र रौद्रेऽपि रसे न अतिपरुषाक्षराणि विन्यस्तानि, अतो वैदर्भाः सौकुमार्य्यत्यागात् दोष एव; यदुक्तं भोजराजेन दोषप्रसङ्गे,–"सौकुमार्य्यविपर्य्यासात् कठोर उपजायते" इति)।।७२।।

प्रभा

गौडास्त्विदं सौकुमार्यं नापेक्षन्त इत्याह–**दीप्तमिति**। अपरैः गौडकविभिः। दीप्तम् दीप्तिः औज्ज्वल्यं तद्युक्तं तद्व्यञ्जकं समुत्तेजकमिति यावत्। दीप्तमिति हेतुना कृच्छ्रोद्यमपि कृच्छ्रेण कष्टेन उद्यं उच्चार्यमपि पदं वाक्यं चेति शेषः। भूम्ना बाहुल्येन।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बध्यते काव्ये प्रयुज्यते। ओजस्विरचनानुकूलतया परुषवर्णघटितमत एव कष्टोच्चार्यमपि तैः पंद वाक्यं वाङ्गीक्रियते। सर्वथा ओजोगुणविशिष्टरचनाप्रिया गौडा रसादिकमननुरुध्यैव तां रीतिमाद्रियन्ते। एतदुदाहरणेन विशदयति–**न्यक्षेणेति**। निर्गते अक्षिणी यस्य सः न्यक्षो घृतराष्ट्रस्तेन। क्षत्रियाणां पक्षः समूहः। अखिलक्षत्रियकुलमिति यावत्। क्षणात् क्षणमात्रादेव। क्षपितः दुर्मन्त्रेण पुत्रादिभिर्नाशितः। कुरुक्षेत्रे महासंग्रामे इत्यर्थः। अत्र धृतराष्ट्रस्य वर्णनप्रसङ्गे तस्यायुध्यमानत्वान्न वीररसप्रसङ्गः। अपि तु दुर्मन्त्रेण सकलक्षत्रियोत्सादात् करुणरसस्यैव वर्णनं प्रस्तुतम्। तत्र चौजः प्रधानरचनाया अयुक्तत्वान्न केवलमुञ्चारणेन अपि तु रसप्रसङ्गेनापि कृच्छ्रोद्यमेतादृशं प्रबन्धं गोडा विरचयन्ति। तच्च रसापकर्षकत्वान्न वैदर्भैरङ्गीक्रियते। अत्र प्रेमचन्द्रशर्मभिः स्वटीकायां यदुक्तम्–गौडा हि यत्र वीररसादिरूपमोजस्वि व्यङ्ग्यं तत्र परुषवर्णैस्तद्व्यञ्जनस्यावश्यकतया सौकुमार्यं नाद्रियन्ते। वैदर्भास्तु तत्रापि सौकुमार्यं प्रवेशयन्ति। यथा–

कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम्।। इति।

अत्र रौद्रेपि रसे नात्यन्तमुद्धता वर्णा इति। तत् सर्वं ग्रन्थकर्तुराशयविरुद्धम्। न हि ग्रन्थकर्त्रा वैदर्भाणां कुत्रचिदपि साक्षात् परंपरया वा निन्दा कृता दृश्यते यथा गौडानाम्। न वा वैदर्भैः कृतमनुमतमित्यादि पद्यमनुद्धतवर्णत्वेन निर्दोषमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रशंसितमस्ति। तथा चैतादृशं किमपि पद्यं प्रदर्श्य वैदर्भाणामुपहासविधानं गौडानामुपहासायैव भवतीत्याचार्यदण्डिन आशयं विजानन्तः पण्डिता अवगच्छेयुः। तथैव च गौडानां न्यक्षेणेत्यस्य परशुरामेणत्यर्थकरणमपि कष्टसाध्यं केवलं गौडदोषपरिहारार्थं वीररसवर्णनप्रसङ्गसंपादनायैवेति सुधियो विदांकुर्वन्त्वित्यलं परमत्सरोद्घाटनेन।।७२।।

विवृति

दीप्तमित्यपरैः गौडैर्भूम्ना बाहुल्येन कृच्छ्रेणोद्यते कृच्छ्रोद्यमसुकुमारं परुषाक्षरप्रायमपि बध्यते विरच्यते। उदाहरति—न्यक्षेण भार्गवेण पक्षः क्षपितः क्षत्रियाणां क्षणादिति एवंप्रकारम्।।७२।।

सौकुमार्यविपर्ययं दीप्तमिति नाम्ना अपरे गौडाः स्वीकुर्वत इत्याह दीप्तमिति। कृच्छ्रोद्यं, कृच्छ्रेण उच्चार्यं, श्रमेण पठनीयम्। न्यक्षेण कात्स्न्येन; 'यक्षं कात्स्न्यें निकृष्टे च' इति वैजयन्ती।।७२।।

सुकुमारस्य प्रत्युदाहरणमाह—**दीप्तमिति**। अपरैः गौडैः। न्यक्षेण साकल्येन।।७२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थव्यक्तिरनेयत्वमर्थस्य हरिणोद्धृता।
भूः खुरक्षुण्णनागासृग्लोहितादुदधेरिति॥७३॥

रत्नश्री

अर्थस्य काव्याभिधेयवस्तुनो नेयत्वं शब्दतोऽर्थतो वाप्रतीतिरन्यथावगमः स्यात्। गत्यन्तराभावात्। यद्वक्ष्यति-

न हि प्रतीतिः सुलभा शब्दन्यायविलंघिनी। इति।

[1.75]

नेत्यत्वभेदमनूद्यार्थव्यक्तिर्विधीयते। तदुदाहरति। हरीत्यादि, हरिणा वराहरूपधारिणा विष्णुना पृथिवी भूरुद्धृता समुत्तारिता उदधेः समुद्रात्। किंविशिष्टात्। खुरैर्महावराहस्येत्यर्थाद्गम्यते। चरणाग्रैः क्षुण्णानां चूणितानां नागानामुरगाणामसृजा रुधिरेण लोहितादरुणात् [7b]इतीदृशमनेयं काव्यम्। अत्र हि नागशोणितं शब्दोपात्तं यदुपाधिकमरुणत्वमर्णवरय। न्यायोपात्तं तु

उज्जहार खुरक्षुण्णमहोरगकुलाकुलात्।
महावराहः पृथिवीमरुणादर्णवात् क्षणमिति॥

अत्र यद्यपि नागरुधिरमशब्दोपात्तं यदुपाधिकलोहितत्वमुदधेः, तथापि खुरक्षुण्णमहोरगकुलाकुलादर्ण-वादरुणादित्युक्तेः सामर्थ्यात् स्फुटं नागरुधिरं गम्यते। तथाविधस्योदधेर्नागरुधि- राव्यभिचारात्। न हि सर्वत्र शाब्दी प्रतीतिः काव्ये, अर्थे अपि तस्या दर्शनात्। यदाह कालिदासः-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महेन्द्रमास्थाय महोक्षरूपं यः संप्रति प्राप्तपिनाकिलीलः।
चकार बाणैरसुराङ्गनानां गण्डस्थलीः प्रोषितपत्रलेखाः।।इति।

[रघुवंशे 6.72]

अत्र हि तेन राज्ञा बाणैरसुराः समरे हता इत्यर्थो विवक्षितः कविना। न चासुरवधः शब्दोपात्तः। तथापि असुराङ्गनानां गण्डस्थलीः प्रोषितपत्रलेखाश्चकार बाणैरित्युक्ते सामान्यादसुरा हता इति न्यायोपात्तोऽसुरवधस्तादृशस्य पत्रलेखाप्रवासस्या-सुरवधाव्यभिचारात्। न चेदृशं नेयत्वम्, प्रत्युत वक्रोक्तिरीदृशी गुण एवं काव्यस्य। ततः शब्देन न्यायेन वाचिना यत्रार्थो नेतव्यस्तादृशं नेयं विज्ञेयमन्यथा तथाविधं काव्यं सर्वं दुष्येदिति।।

नेयमुदाहरन्नाह–

हृदयङ्गमा

अर्थव्यक्तिं नाम गुणं सोदाहरणमाह, अर्थव्यक्तिरिति।–अर्थस्य अनेयत्वम् अध्याहारादिकष्ट-कल्पनामन्तरेण प्रयुक्तपदेभ्य एवोपस्थितिरित्यर्थः, अर्थव्यक्तिः। [उक्तञ्च क्रमदीश्वरेण,– "यावद्वाच्याभिधानं यत्तदर्थव्यक्तिलक्षणम्" इति। तथा भोजेनाप्युक्तं,–"यत्र सम्पूर्णवाक्यत्वमर्थन्यक्तिं वदन्ति ताम्" इति। इत्थञ्च यत्र यादृशो यावांश्च विशेषणविशेष्यप्रकारोऽभिमतः स सर्व एव उपात्तशब्दसमुदायमात्रेण निष्पत्यूहमवगम्यते तत्रार्थव्यक्तिरिति निष्कर्षः ; यथा,–"वागर्थाविव सम्पृक्तौ," अत्र 'वन्दे' इत्युत्तमपुरुषैकवचनेनैवाहमिति प्राप्तम्, "अस्मद्युत्तमः"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(१।४।१०७ पा०) इत्यत्र "स्थानिनि" इत्यभिधानात्; किम्? इति कर्म्मापेक्षायां 'पार्वतीपरमेश्वरौ' इति, तौ च कीदृशौ? 'जगतः पितरौ' इति, किमर्थं नमस्कुरुते? 'वागर्थप्रतिपत्तये' इति वाक्यस्य सम्पूर्णत्वेनार्थव्यक्तिरिति। इयञ्च शब्दमात्रगा, अर्थगायास्तु स्वभावोक्तयलङ्कारेण परिगृहीतत्वात् न पृथगुक्तिरिति नव्याः। प्राञ्चस्तु आर्थीमप्यर्थव्यक्तिमङ्गीकुर्वन्ति; तदुक्तं दर्पणकारेण,–"अर्थव्यक्तिः स्वभावोक्तयाऽलङ्कारेण तथा पुनः" इति। वामनस्तु वस्तुस्वभावस्फुटीकरणमार्थीमर्थव्यक्तिमाह, यथा,–"वस्तुस्वभावस्फुटत्वमर्थव्यक्तिः" (का० सू० वृ० ३अधि० २अ० १३सू०) इति। तथा भोजेनापि उक्तम्,–"अर्थव्यक्तिः स्वरूपस्य साक्षात् कथनमुच्यते" इति; स्वरूपस्य कविप्रतिभैकगोचरचमत्कारिरूपस्य, यत् साक्षात् कथनं कविशक्तिवशात् साक्षात्कारसोदरप्रतीतिजनकपदवत्त्वमर्थ-व्यक्तिरिति तदर्थः। तत्रोदाहरणं यथा,–"पृष्ठेषु शङ्खशकलच्छविषु च्छदानां रेखाभिरङ्कितमलक्तकलोहिताभिः। गोरोचनाहरितबभ्रुवहिःपलाशममोदते कुमुदमन्भसि पल्वलस्य।।" इति, अत्र कुमुदस्वरूपस्य साक्षादिव प्रतीयमानत्वेन यत् स्पष्टरूपाभिधानम् असौ अर्थगता अर्थव्यक्तिरिति। अपरे तु, पदानां झटित्यर्थबोधकत्वं शाब्दीमर्थव्यक्तिमाहुः ; यदुक्तम्,–अर्थव्यक्तिः पदानां हि झटित्यर्थसमर्पणम्" इति। अन्यञ्च,–"पश्चादिव गतिर्वाचः पुरस्तादिव वस्तुनः। यत्रार्थव्यक्तिहेतुत्वात् सोऽर्थव्यक्तिः स्मृतो गुणः।।" इति]। यथा हरिणा वराहरूपिणा विष्णुना, खुरैः स्वीयैः इति भावः, क्षुणानां नागानां पन्नगानां, रसातलवासिनाम्, असृग्भिः शोणितैः, लोहितात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रक्तात्, उदधेः समुद्रात्, भूः पृथ्वी, उद्धृता ऊर्द्धं नीता। अत्र यावन्त एव शब्दास्तावतामेव अर्थाः विना कष्टकल्पनां प्रतीयन्ते इति।।७३।।

प्रभा

क्रमप्राप्तामर्थव्यक्तिमुदाहरति—**अर्थेति**। अर्थस्य वाक्यार्थाङ्ग - भूतस्य अनेयत्वम् अध्याहारादिकष्टकल्पनानैरपेक्ष्येण प्रयुक्तपदेभ्य एवोपस्थितिः। अर्थव्यक्तिः, एतत्संज्ञको गुणः। तथा च यावन्तोर्था अन्वयोपयोगितयापेक्ष्यन्ते तद्बोधनाय तावतां पदानां विन्यासोर्थव्यक्तिः। उदाहरति—**हरिणेति**। हरिणा वराहरूपधारिणा विष्णुना। खुरक्षुण्णनागासृग्लोहितात् खुरेण शफेन अर्थात् स्वस्यैव क्षुण्णास्ताडिता ये नागा रसातलवर्तिनो भुजगास्तेषामसृग्भिर्लोहिताद् आरक्तात्। उदधेः संमुद्रात्। भूः पृथ्वी। उद्धृता ऊर्ध्वमानीता। अत्राप्रसिद्धस्योदधेर्लौहित्यस्य वर्णने किमपि कारणमवश्यं निर्देष्टव्यम्। तञ्च खुरक्षुण्णेतिविशेषणेन अत्र स्पष्टमेवोपात्तम्। अतो नात्रोन्नयनपरिश्रमस्य प्रयोजनमस्ति। अतो यादवपेक्षितार्थस्य विन्यस्तपदेनैव भानादत्रार्थव्यक्तिः। अयं शब्दगुणः।। अथ भरतादीनां लक्षणोदाहरणानि। तत्र भरतः-

सुप्रसिद्धा धातुना तु लोककर्मव्यवस्थिता।
या क्रिया क्रियते काव्ये सार्थव्यक्तिः प्रकीर्त्यते।। इति।

१६.१०१)

विवृणोत्येतद्धेमचन्द्रः (१९९ पत्रे)—यस्मिन्नतथास्थितोपि तथास्थित एवार्थः प्रतिभाति सोर्थव्यक्तिगुण इति। उदाहरति च—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्युतामिन्दोर्लेखां रतिकलहभग्नं च वलयं
द्वयं चक्रीकृत्य प्रहसितमुखी शैलतनया।
अवोचद्यं पश्येत्यवतु स शिवः सा च गिरिजा
स च क्रीडाचन्द्रो दशनकिरणापूरिततनुः।। इति।

सोयं प्रसादादभिन्न इति वामनादयः। यदुक्तं तेन—अर्थव्यक्तिहेतुत्वमर्थव्यक्तिः। यत्र झटित्यर्थप्रतिपत्तिहेतुत्वं स गुणोर्थव्यक्तिः। यथा—अस्त्युत्तरस्याम् इत्यादौ इति (३.१.२३) वामनाभिप्रायमेवान्ये विवृण्वन्ति यथा—यत्र पुरस्तादिव वस्तुनोवगतिः पश्चादिव वाचां सार्थव्यक्तिः। उदाहरणं तु—

महेश्वरे वा जगतां महेश्वरे जनार्दने वा जगदन्तरात्मनि।
न वस्तुभेदप्रतिपत्तिरस्ति मे तथापि भक्तिरतरुणेन्दुशेखरे।।

इति।

अयं प्रसाद एवेति परे। भोजराजः—पत्र संपूर्णवाक्यत्वमर्थव्यक्तिं वदन्ति ताम्। इति लक्षयित्वा उदाहरति। यथा—

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।। इति। (१.६९)

वाग्भटस्तु—यत्र सुखेनार्थप्रतीतिः सार्थव्यक्तिः। यथा—

बाले तिलकलेखेयं भाले भल्लीव राजते।
भ्रूलताचापमाकृष्य न विद्मः कं हनिष्यति।। इति। (३० पत्रे)

अयमर्थगुणोपि। यत्र वस्तुस्वभावस्फुटीकरणरूपोर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोर्थगुणः। तदुक्तं वामनेन– वस्तुस्वभावस्फुटत्वमर्थव्यक्तिः। वस्तूनां भावानां स्वभावस्य स्फुटत्वं यद् असावर्थव्यक्तिः। यथा–

पृष्ठेषु शङ्खशकलच्छविषु च्छदानां
राजीभिरङ्कित्मलक्तकलोहिनीभिः।
गोरोचनाहरितबभ्रुबहिः पलाश-
मामोदते कुमुदमम्भसि पल्वलस्य।। इति। (३.२.१३)

अत्र कुमुदस्वरूपस्य साक्षादिव प्रतीयमानत्वेन यत् स्पष्टरूपाभिधानमसावर्थव्यक्तिरिति स्ववृत्तौ भोजः। (१.८१) जगन्नाथोपि झगिपि प्रतीयमानार्थान्वयकत्वमर्थव्यक्तिरिति शाब्दीमभिधाय वस्तुनो वर्णनीयस्यासाधारणक्रिया-रूपयोर्वर्णनमर्थव्यक्तिरिति आर्थीमाह। (६८ पत्रे) यथा–

गुरुमध्ये कमलाक्षी कमलाक्षेण प्रहर्तुकामं माम्।
रदयन्त्रितरसनाग्रं तरलितनयनं निवारयांचक्रे।।
इति। (६० पत्रे)

अयं स्वभावोक्तावन्तर्भवतीति प्रकाशकारादयः। तदुक्तं–अभिधास्यमानस्वभावोक्त्यलंकारेण वस्तुस्वभावस्फुटत्व-रूपार्थव्यक्तिः स्वीकृता इति। (५८३ पत्रे) दपर्णकारः शब्दगुणामिमां प्रसादगुण एवान्तर्भावयति यथा–

अर्थव्यक्तेः प्रसादाख्यगुणेनैव परिग्रहः।
अर्थव्यक्तिः पदानां हि झटित्यर्थसमर्पणम्।।
इति (८.११-१२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा च शाब्दी अर्थव्यक्तिः प्रसादगुणेन आर्थीं स्वभावोक्त्यलंकारेण गतार्था इति ज्ञेयम्। अत्र केचिद् इमामर्थव्यक्तिं निर्हेतुदोषाभावरूपां परिकल्प्य यत्र तद्दोषावसरो नास्ति तत्र नेयत्वेपि अर्थव्यक्तिरस्तीति मन्यन्ते। तच्च यत्रातिप्रसिद्धितो नेयार्थो झटित्याविर्भवति तत्रैव संभवति। यथा—संप्रति संध्यासमयश्चक्रद्वन्द्वानि विघटयति। इति। अत्र संध्यायां चक्रवाकविघटनस्य कविसमयप्रसिद्धतया तत्कारणप्रतिपादकशब्दाभावेप्यर्थव्यक्तिरस्ति। भोजराजेनाप्युक्तम्—

अध्याहारादिगम्यार्थं नेयार्थं प्रागुदाहृतम्।
स गम्यते प्रसिद्ध श्चेन्न तद्दोषवदिष्यते।। इति। (१.१३०)

उदाहरति च—

मा भवन्तमनलः पवनो वा वारणो मदकलः परशुर्वा।
वाहिनीजलभरः कुलिशं वा स्वस्ति तेस्तु लतया सह वृक्ष।।

अत्र दहत्वितयादीनामध्याहार्यतया नेयत्वेप्यतिप्रसिद्ध्या प्रतीयमानत्वाद् गुणत्वम्। इति।।७३।।

विवृति

अर्थव्यक्तिं व्याचष्टे—

अर्थस्य यदनेयत्वं सार्थव्यक्तिः। यथा हरिणोद्धृता मुरवैरिणो त्क्षिप्ता भूः पृथिवी उदधेः ; किंभूतात्? खुरक्षुण्णनागासृग्लोहितात् उदधेर्लोहितत्वे खुरक्षुण्णनागासृक् हेतुः।।७३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थव्यक्तिं लक्षयति–**अर्थव्यक्तिरिति।** अनेयत्वम् उपात्तेनैव शब्देन वाक्यार्थप्रतीतिः। अर्थव्यक्तिम् उदाहरति–**हरिणेति**।।

अर्थव्यक्तिरिति। उक्तेनैव शब्देन विवक्षितार्थसिद्धिः अर्थव्यक्तिः। अनेयत्वं नाम वाक्ये शब्दान्तरस्य अध्याहारानाकांक्षा। अनेयत्वस्य उदाहरणमाह–**हरिणेति**। अत्र अर्थस्य शब्दान्तरनिरपेक्षता व्यक्ता।।७३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महीं महावराहेण लोहितादुद्धृतोदधेः।
इतीयत्येव निर्दिष्टे नेयत्वमुरगासृजः॥७४॥

रत्नश्री

लोहितादुदधेरुद्धृता मही महावराहेनेत्युक्ते नथं लोहितत्वमुदधेरिति नयं न तावत्स्वाभाविकम्। औपाधिकं तु भवेत्। न चोपाधिस्तादृशः शब्दोपात्तो न्यायलब्धो वा येन लोहितत्वमुदधेः स्यात्। [28a] यथोक्तं प्राक्। तस्मादभिप्रायमात्र मेतत् मयैवं विवक्षितमिति। न चैतावता प्रतीतिः प्राप्यते, शब्दस्य न्यायस्य तादृशस्यानुपादानात्। यदि पुनरपरः कश्चित्तादृशमर्थं कथञ्चित् स्वयमभ्यूह्य गृह्णीयात्तस्यैवासौ गुणः। काव्यं तु तादृशं दृष्टमेव। अत एव लोहितादुदधेरित्येतावद् वक्तुं न तु तथाविधः कश्चिद्विशेष उपात्तः, यतो नागरुधिरलोहितत्वमुदधेर्गम्येत। यथोक्तं प्राक्। ततश्चेयत्येव लोहितादुदधेरुद्धृता महावराहेण महीति एतावत्येव निर्विशेषशब्देन न्यायेन वा तादृशेन रहिते वाक्ये निर्दिष्टेन प्रयुज्य उरगासृजो नागरक्तस्य नेयत्वं मयैवं विवक्षितमिति विवक्षामात्रगम्यत्वं जायते। न तु शब्दोपात्तं न्यायोपात्तं वा नागशोणितं यदुपाधिकमरुणत्वमर्णवस्य। न च तादृशं सुलभं न्यायशब्दानां रूढस्यार्थस्य विवक्षामात्रेण दुष्प्रापत्वात्। तस्मादीदृशं नेयमवगम्यं परिहत्तव्यम् इति॥

नेयं सर्वैरेव नेष्यत इति दर्शयन्नाह-

हृदयङ्गमा

अनेयत्वमर्थव्यक्तिरित्यभिधानेन नेयत्वज्ञानस्यापेक्षणात् तत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कीदृगित्यपेक्षायां नेयत्वं दर्शयति, महीति।–महावराहेण लोहितात् उदधेः मही उद्धृता, इतीयति एवंप्रकारे, निर्दिष्टे प्रयुक्ते सति, उरगासृजः एतत्पदस्य, नेयत्वम् अध्याहारेण बोध्यत्वं, भवतीति शेषः ; तथा हि लोहितादित्युक्ते कथमित्यपेक्षायां खुरक्षुणनागासृजा इत्यंशो वक्तव्यः, तञ्चाध्याहारमन्तरेण न सम्भवति इति नेत्यत्वम्, अन्यथा अर्थस्य स्फुटता न स्यात् इति भावः। (शक्तया लक्षणया च यत्र अन्वयबोधानन्तरमनुपपत्तिरर्थस्य भवेत् तत्राध्याहारादिना तदुपपत्तिः नेयत्वं, तथा रूढिप्रयोजनाभावे कृताया लक्षणाया अङ्गीकारेणार्थबोधेऽपि अर्थस्य नेयत्वं, न तत्रार्थव्यक्तिरिति)।।७४।।

प्रभा

अनेयार्थप्रतियोगिभूतं नेयार्थं दर्शयति–**महीति**। पूर्वार्धस्यार्थः प्रोक्त एव। इति इयत्येव एतावन्मात्रे एव खुरक्षुण्णनागासृग् इति पदं परिहृत्येत्यर्थः। निर्दिष्टे प्रयुक्ते सति। उरगासृजो नेयत्वम् अध्याहारेण कल्पनीयत्वमवश्यं स्यात्। अन्यथा उदधेर्लौहित्यस्यासंभवाद् लोहितादिति विशेषणं व्यर्थं स्यात्। तथा च लौहित्यसंपादनाय कश्चिदुपाधिः कथनीयः। तदुपाधिवाचकपदाभावे चावश्यमेवाध्याहारः करणीय इति नास्त्यर्थव्यक्तिः। तदुक्तं भोजेन–

वाक्यं भवति नेयार्थमर्थव्यक्तेर्विपर्ययात्।।
मही महावराहेण लोहितादुद्धृतोदधेः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतीयत्येव निर्दिष्टे नेया लौहित्यहेतवः।। इति। (१.३४)

यत्र त्वन्वयबोधात् प्राक् बाधादिज्ञानेन लक्षणयार्थान्तरोपस्थितिस्तत्रार्थव्यक्तिरस्त्येव न तत्र नेयत्वम्। अभिधाशक्त्येव लक्षणयाप्युपस्थाप्यार्थस्यान्वयबोधविषयतायाम- वैलक्षण्यात्। अन्वयबोधोत्तरमनुपपत्त्युदयेन कल्पनीयार्थस्य नेयत्वात्। लक्षणायामपि यत्र रूढिप्रयोजनाभावेपि लक्षणास्वीकारस्तत्रार्थस्य नेयत्वमिति नार्थव्यक्तिः। एवादृशलाक्षणिकपदस्यैव नेयार्थत्वमुक्तं प्रकाशकारादिभिः। एतादृशलक्षणाया निषेधोपि भट्टकुमारिलेन तन्त्रवार्तिकेभिहितः। तथा हि–

निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत्।
क्रियन्ते सांप्रतं काश्चित् काश्चिन्नैव त्वशक्तितः।। इति। (३. १८; ७०० पत्रे)

अस्यार्थः–अभिधानवद् अभिधाशक्तिवत् सामर्थ्यात् प्रसिद्धेः शब्दस्वभावाद्वा निरूढा अनादिप्रसिद्धाः काश्चिल्लक्षणा भवन्तीति शेषः। यथा कर्मणि कुशलः। सांप्रतम् अधुना काश्चित् लक्षणाः क्रियन्ते प्रयोजनवशादिति शेषः। यथा गङ्गायां घोष इत्यादौ। काश्चिलक्षणा अशक्तितः प्रत्यायनसामर्थ्याभावान्नैव क्रियन्ते। तत्र रूढिप्रयोजनान्यतरासंभवादिति शेषः। यथा रूपी घट इत्यादौ। इति एवं रूढिप्रयोजनान्यतराभावाल्लक्षणा नैव कर्तव्या इत्यर्थः। कविरशक्त्या यत्रैवं लक्षणां करोति तत्रैव नेयत्वं यथा–

शरत्कालसमुल्लासिपूर्णिमाशर्वरीप्रियम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करोति ते मुखं तन्वि चपेटापतनातिथिम्।। इति।

अत्र जितमित्यर्थे चपेटापतनातिथिम् इत्यस्य लक्षणा वर्तते। परं तत्र रूढिप्रयोजनान्यतराभावात् मुख्यार्थातिरिक्तार्थस्याप्रतीतेर्नैव लक्षणा भवितुमर्हतीत्यलं प्रसक्तानुप्रसक्त्या।।७४।।

विवृति

नेयार्थमुदाहरति–

मही महावराहेण लोहितादुदधेरुद्धृता इति इयत्येव निर्दिष्टे नेयत्वमनभिव्यक्तिः उरगासृजः।।७४।।

अनेयार्थप्रतीत्यर्थं नेयार्थं दर्शयति–**महीति**।।७४।।

शब्दान्तरसापेक्षत्वस्य उदाहरणं दर्शयति–**महीति।** अत्र तु लोहितसमुद्रस्य असम्भवात्, केन स लोहितः इति अपेक्षायाम्, उरगरुधिरस्य नेयत्वात्, अध्याहार्योदाहरणमेतत्।।७४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेदृशं बहु मन्यन्ते मार्गयोरुभयोरपि।
न हि प्रतीतिः सुलभा शब्दन्यायविलङ्घिनी॥७५॥

रत्नश्री

ईदृशमनन्तरोक्तप्रकारं नेयमुभयोरपि वैदर्भगौड़ीययोर्मार्गयोर्वर्त्मनोः। न वैदर्भ एव। न बहु मन्यन्ते नाद्रियन्ते न प्रयुज्यन्ते तद्विदः।

तञ्च एषां विपर्ययः प्रायो लक्ष्यते गौड़वर्त्मनि।

[1.42]

इति प्रायोग्रहणेन संगृहीतं किं बहु मन्यत इति चे[28b]दाह-न हीत्यादि। हिशब्दो यस्मादर्थे। यतः प्रतीतिरर्थस्यावगमः शब्दं वाचकं न्यायसामर्थ्यं च तादृशमनुपदर्शनाल्लङ्घयति त्यजत्यनुपादा[ना]दिति, शब्दन्यायविलङ्घिनी न सुलभा न प्राप्यते कस्यचिद् विवक्षामात्रेण तादृशेन। तस्मान्नेच्छन्ति मूलहानेः। न्यायोपात्तः शब्दोपात्तो वा योऽर्थो न भवति स न प्रतीयतेऽन्तस्तत्त्वमात्रेणेत्यर्थः। तस्मात् शब्दादर्थाद्वा प्रतीतार्थमनेयं तद्विपरीतं तु नेयमिति स्थितम्॥

उदारत्वं निर्दिशन्नाह-

हृदयङ्गमा

अत्र उभयोरपि मार्गयोः साम्यं दर्शयति, नेति।-उभयोरपि वैदर्भीगौड्योः, मार्गयोः रीतिविशेषयोः, कवय इति शेषः, ईदृशं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वोक्तरूपं नेयत्वयुक्तं वाक्यं, न बहु मन्यन्ते न आद्रियन्ते, किञ्चात्र अन्यैरुक्तः अर्थव्यक्तिविपर्य्ययरूपो गुणगतदोष एव भवति ; (तदुक्तं,–''वाक्यं भवति नेयार्थ मर्थव्यक्तेर्विपर्य्ययात्'' इति)। हि यतः, शब्दन्यायः शाब्दबोधनियमः, शब्दोपात्तानां वृत्त्युपस्थाप्यानामेवार्थानामन्वयबोध इत्येवंस्वरूपः इत्यर्थः, तस्य विलङ्घिनी व्यतिक्रमसाधनी, प्रतीतिः अध्याहारादिकष्टकल्पनेन अन्वयबोधः इत्यर्थः, न सुभगा न साध्वीत्यर्थः। (अध्याहृतोपस्थापितार्थप्रतीतेः तात्पर्य्यार्थालोचनेनार्थान्तरप्रतीतेश्च शाब्दबोधोत्तरजायमानत्वात् न शाब्दबोधत्वं, विशिष्टशक्तिवादमत-मवलम्बा उक्तमिदमित्यवधेयम्)।।७५।।

प्रभा

नेयत्वदोषे गौडवैदर्भयोरैकमत्यं कथयति–**नेदृशमिति**। ईदृशं नेयार्थकं वाक्यम्। उभयोरपि मार्गयोर्गौडवैदर्भयोः। न बहु मन्यन्ते। आलंकारिका इति शेषः। अत्र हेतुं दर्शयति–**न हीति**। शब्दन्यायः शब्दजान्वयबोधपद्धतिर्वृत्त्युपस्थाप्यानामेवार्थानामन्वय इत्येवंरूपा तं विलङ्घयति अतिक्रामतीति शब्दन्यायविलङ्घिनी। अध्याहारेण यथाकथंचिदर्थसंपन्नेत्यर्थः। प्रतीतिः, अन्वितो वाक्यार्थः। न हि सुभगा न समीचीनः। अत्राहुः प्रेमचन्द्रशर्माणः– अर्थापत्त्याद्युपस्थापितार्थप्रतीतेस्तु न शाब्दबोधत्वं तदुत्तरमेव तस्याः सद्भावात्। एवं तात्पर्यपर्यालोचनया अर्थान्तरप्रतीतिरपि शाब्दबोधोत्तरकालीनैव। अतस्तादृशं वाक्यं नेयत्वदोषग्रस्तमिति भावः। यत्र तु द्वारं द्वारमित्यादौ त्वरादिना पिधेहीत्यादिसाकाङ्क्षपदान्तरानुपादानेन शाब्दबोधासंभवात् तदर्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुतार्थापत्त्या तादृशपदाध्याहारस्तत्र अध्याहृतपदेपि शक्तिग्रहाभ्युपगमेन तदर्थस्य वृत्त्युपस्थाप्यत्वेन न तन्नियमातिक्रमः। एतञ्च विशिष्टशक्तिवादमभिप्रेत्योक्तम्। उपाधिशक्तिवादिभिस्तु आक्षेपगम्याया अपि व्यक्तेः शाब्दबोधाभ्युपगमान्निरुक्तनियमो नाङ्गीक्रियते इति विभावनीयम् इति दिक्।।७५।।

विवृति

नैवंविधं बहुमन्यन्ते सन्तः मार्गयोः वैदर्भगौडीययोरुभयोः ; यतः—न हि प्रतीतिः सुभगा शब्दन्यायविलङ्घिनी। भामहेनाप्युक्तम्—

नेयार्थं नीयतेऽनुक्तो यत्रार्थः कविभिर्बलात्।
शब्दन्यायानुपारूढः कथञ्चित् स्वाभिसन्धिना।। इति।।७५।।

अर्थव्यक्तिः मार्गद्वयसाधारणी इत्याह—नेति। अत्र हेतुमाह—न हीति। आकांक्षासन्निधियोग्यतावशेन पदैः प्रयुक्तैरेव अभिहितानां वाक्यार्थानां प्रतीतिं हित्वा अन्याभिधेयवत्त्वस्याभावः शब्दन्यायः।।७५।।

नेति। शब्दन्यायविलङ्घिनी या सा प्रतीतिः सुभगा न। यावदर्थोऽभिमतः तावच्छब्देन भवितव्यम्; शब्दस्यापि यावदर्थप्रतिपादनशक्तिः तावदर्थेन भवितव्यम्; इति शब्दशास्त्रन्यायः।।७५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्कर्षवान् गुणः कश्चिद्यस्मिन्नुक्ते प्रतीयते।
तदुदाराह्वयं तेन सनाथा सर्वपद्धतिः॥७६॥

रत्नश्री

यस्मिन् कस्मिंश्चित् उक्ते प्रयुक्ते कश्चिद्विवक्षितो गुणो विशेषस्त्यागादिलक्षण उत्कर्षवानधिमात्रः प्रतीयते अवगम्यते तत् काव्यमुदाराह्वयमुदारं नाम वेदितव्यमिति विधिः। उदारमित्याह्वयः संज्ञा यस्येति विग्रहः। यद्येवं स एवोत्कर्षवान् गुण उदारोऽस्तु, काव्यं कथमुदारमुयच्यते इति चेदाह–तेनेत्यादि। यतस्तेनोत्कर्षवता गुणेन वाच्यत्वेनापि रूपेण सर्वा पद्धतिः सर्वं तत्काव्यं विवक्षितं यत्किञ्चित् सनाथा युक्ता, तस्मादुदारगुणयोगात् सर्वं तत्–काव्यमुदारमिति द्रष्टव्यम्॥

तदुदाहरन्नाह–

हृदयङ्गमा

औदार्य्यं गुणं निरूपयति, उत्कर्षेति।–यस्मिन् वाक्ये, उक्ते कथिते सति, कश्चित् उत्कर्षवान् वर्णनीयस्य विषयस्य उत्कर्षप्रतिपादको लोकोत्तरचमत्कारकः, गुणः धर्मविशेषः, प्रतीयते बुध्यते, तत् उदाराह्वयम् औदार्य्यगुणयुक्तम्, एवञ्च उत्कर्षजनकधर्मप्रतीतिमद्वर्णनम् उदारत्वमिति लक्षणम्। [उत्कर्षश्च क्वचित् दीप्तत्वेन, क्वचित् कोमलत्वेन, क्वचित् त्यागशौर्य्यादिना, क्वचित् ग्राम्यत्वेन, क्वचिदग्राम्यत्वेन च सम्भवति; अत एवोक्तं वामनेन ग्राम्यत्वप्रसङ्गे अग्राम्यत्वमुदारता इति, लक्षणञ्च,–"अग्राम्यत्वमुदारता" (का० सू० वृ० ३अधि०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२अ० १२सू०) इति; उदाहृतञ्च तेनैव तत्र,–"त्वमेवं सौन्दर्य्या स च रुचिरतायां परिचितः, कलानां सीमानं परमिह युवामेव भजथः। अयि! द्वन्द्वं दिष्ट्या तदिति सुभगे! संवदति वा मतः शेषञ्चेत् स्याज्जितमिह तदानीं गुणितया।।" इति]। ततश्च स्फुटभेदयोरपि गौड़वैदर्भयोरीदृशोदारत्वे साम्यमेव दर्शितमित्याह, तेनेति।–तेन उदारत्वगुणेन, काव्यपद्धतिः गौड़वैदर्भीया काव्यरीति, सनाथा पूर्णा, उत्कर्षवतीति भावः। ["एषां विपर्य्ययः प्रायो दृश्यते गौड़वर्त्मनि" इत्यत्र प्रायः-पदोपादानात् कुत्रचित् गौड़वैदर्भयोः साम्यमपीत्यभिप्रायः। इदञ्च अर्थगतम्; शब्दगतन्तु विकटत्वलक्षणं, विकटत्वञ्च पदानां नृत्यत्प्रायस्त्वं यस्मिन् सति पदानि नृत्यन्तीव इति जनस्य वर्णभावना भवति तत् विकटत्वमित्यर्थः, उक्तञ्च वामनेन, –"विकटत्वमुदारता"(का० सू० वृ० ३अधि० १अ० २३सू०) इति; उदाहृतञ्च तेनैव यथा,–"स्वचरणविनिविष्टैर्नूपुरैर्नर्त्तकीनां झणिति रणितमासीत् तत्र चित्रं कलञ्च" इति। प्रत्युदाहरणं यथा,–"चरणकमललग्नैर्नूपुरैर्नर्त्तकीनां झटिति रणितमासीत् मञ्जु चित्रञ्च तत्र" इति। एतेनैतदपि सूच्यते, विकटत्वं हि वक्रत्वं, न हि शब्दार्थयोवेक्रतामन्तरेण काव्यपदवींप्राप्तिः सम्भवति ; तञ्चोक्तं,–"यत्तु वक्रं वचः शास्त्रे लोके च वच एव तत्। वक्रं यदनुरागोदौ तत्र काव्यमिति श्रुतिः।।" इति; एतदुवैपरीत्ये तु अलङ्कारहीनम् औदार्य्यविपर्य्ययदोषमङ्गीकुर्वन्त्यन्ये; यदाहुः,– "यस्तु रीतेरनिर्वाहादौदार्य्यस्य विपर्य्ययः। वाक्यं तदनलङ्कारमलङ्कारविदो विदुः।।" यथा,–"दीर्घपुच्छश्चतुष्पादः ककुद्मान् लम्बकम्बलः। गोरपत्यं बलीवर्द्दस्तृणमत्ति मुखेन सः।।"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदिदमपुष्टार्थत्वादनुत्कृष्टविशेषणमनुदारं निरलङ्कारमाचक्षते। सोऽयमौदार्य्यविपर्य्ययो नाम शब्दार्थप्रधानो गुणविपर्य्ययदोषः इति]।।७६।।

प्रभा

उदारं लक्षयति–**उत्कर्षवानिति**। यस्मिन् वाक्ये। उक्ते सति। उत्कर्षवान् वर्णनीयोत्कर्षप्रतिपादको लोकोत्तरचमत्काराधायी। गुणो धर्मविशेषः। प्रतीयते ज्ञानविषयो भवति। तद्वाक्यमुदाराह्वयम् उदारसंज्ञकम्। तेन औदार्यगुणेन काव्यपद्धतिर्गोडवैदर्भीया काव्यरीतिः। सनाथा प्रकृष्टाश्रया। औदार्याश्रयेण काव्यं सविशेषमुल्लसतीत्यर्थः। अत्रोत्कर्षवान् इत्यनेन वर्ण्योत्कर्षजनकगुणोपेक्ष्यते नापकर्षजनकः। तेन–

हे हेलाजितबोधिसत्व वचसां किं विस्तरैस्तोयधे
नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः।
तृष्यत्पान्थजनोपकारघटनावैमुख्यलब्धायशो-
भारप्रोद्वहने करोषि कृपया साहाय्यकं यन्मरोः।।

इत्यत्र नोदारतेति केचित्। परे तु उत्कर्षवान् वर्णनभङ्गिविशेषेण चमत्कारजनको गुण उत्कर्षापकर्षस्वरूपो वर्ण्यस्य धर्म औदार्यमिति स्वीकुर्वन्ति। हे हेलाजितेत्यत्र औदार्यगुणं च मन्वते। सर्वपद्धतिरिति पाठे सर्वा गौडवैदर्भीरूपा इति अयमेवार्थः। औदार्ये गौडवैदर्भयोरैक्यमस्तीति भावः। गुणव्यञ्जकता वाक्यस्य वाक्यार्थद्वारा। तेनास्य गुणस्यार्थगतत्वम्। शब्दगतस्त्वयं विकटत्वस्वरूपो वामनादिभिः स्वीकृतो वर्तते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विकटत्वं च पदानां नृत्यत्प्रायत्वम्। उदाहरति च वामनः–

स्वचरणविनिविष्टैर्नूपुरैर्नर्तकीनां
झणिति रणितमासीत् तत्र चित्रं कलं च। (३.१.२२)

इति। न पुनः–

चरणकमललग्नैर्नूपुरैर्नर्तकीनां
झटिति रणितमासीन्मञ्जु चित्रं च तत्र।

इति। अत्रेतरेषां लक्षणोदाहरणानि। तत्रादौ भरतः–

दिव्यभावपरीतं यच्छृङ्गाराद्भुतयोजितम्।
अनेकभावसंयुक्तमुदारं तत् प्रकीर्तितम्।। (१६.१०३)

अत्रोदाहरति हेमचन्द्रः–

ये पूर्वं यवसूचिसूत्रसुहृदो ये केतकाग्रच्छद-
च्छायाधाम पुनर्मृणाललतिकालावण्यभाजोत्र ये।
ये धाराम्बुविडम्बिनः क्षणमधो ये तारहारश्रिय-
स्तेमी स्फाटिकदण्डउम्बरजितो जाताः सुधांशोः कराः।। इति।
(१९९ पत्रे)

शब्दगुणमिममुदाहरति हेमचन्द्रः–

अत्रान्तरे झणितहारलतानितम्ब-
संवाहनस्खलितवेगतरङ्गिताङ्गी।
देवी व्यपास्य शयनं धृतमानतन्तु-
रन्तःपुरं गतवती सह सौविदल्लैः।। इति (१९९ पत्रे)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थगुणं तु अग्राम्यत्वमुदारता इति लक्षयति वामनः। अस्य उदाहरणं च–

त्वमेवंसौन्दर्या स च रुचिरतायाः परिचितः
कलानां सीमान्तं परमिह युवामेव भजथः।
अयि द्वन्द्वं दिष्ट्या तदिह सुभगे संवदति मा-
मतः शेषं चेत् स्याज्जितमिह तदानीं गुणितया।।
इति। (३.२.१३)

अत्र प्रथमं त्वं स चेति पृथक्तयोक्तेस्तदनन्तरं युवामिति सामान्यमिश्रीकरणादनन्तरं द्वन्द्वमिति विशिष्टसंश्लेषदर्शनात् अन्ते ततः शेषमिति विवक्षितार्थव्यञ्जनमुखेन फलपर्यवसायित्वम् औचित्यशालिना क्रमेण कामन्दक्या मालतीमुद्दिश्योक्तम् इति उदारता इति कामधेनुकाराः। अस्य प्रत्युदाहरणम्–स्वपिति यावदयमिति पूर्वोक्तः श्लोकः (६७ पत्रे)। भोजराजः शब्दौदार्यम्–विकटाक्षरबन्धत्वमार्यैरौदार्यमुच्यते। इति लक्षयति, उदाहरति च–

आरोहत्यवनीरुहं प्रविशति श्वभ्रं नगैः स्पर्धते
खं व्यालेढि विचेष्टते क्षितितले कुञ्जोदरे लीयते।
अन्तर्भ्राम्यति कोटरस्य विहरत्यालम्बते वीरुधः
किं तद्यन्न करोति मारुतवंश यातः कृशानुर्वने।।
इति। (१.७०)

अर्थगुणं तु भूत्युत्कर्षमुदारता इति संवर्ण्योदाहरति–

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तोये काञ्चनपद्मरेणुकपिशे पुण्याभिषेकक्रिया।
ध्यानं रत्नशिलागृहेषु विबुधस्त्रीसंनिधौ संयमो
यद्वाञ्छन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी।।
इति। (१.८१)

वाग्भटो हि विकटबन्धत्वमौदार्यम् इति निर्दिश्योदाहरति--

वाचाला कनकमयध्वजाग्रसङ्गि-
व्यालोलस्फुरदुरुकिङ्किणीनिनादैः।
चैत्याली जगति न कस्य राहडस्य
प्रेङ्खन्ती भवति मनः प्रहर्षणीयम्।। (३० पत्रे) इति।

जगन्नाथः शब्दगुणस्य–कठिनवर्णघटनारूपविकटत्वलक्षणो-दारता इति लक्षणं प्रदर्श्योदाहरति यथा–

प्रमोदभरतुन्दिलप्रमथदत्ततालावली-
विनोदिनि विनायके डमरुडिण्डिमध्वानिनि।
ललाटतटविस्फुटन्नवकृपीटयोनिच्छटो
हटोद्धतजटोद्भटो गतपटो नटो नृत्यति।। (५७ पत्रे)

अर्थगुणं तु–चुम्बनं देहि मे भार्ये कामचाण्डालतृप्तये। इत्यग्राम्यार्थपरिहारमुदारता इति। सोयं शब्दगुण ओजसि अन्तर्भवति अर्थगुणस्तु अग्राम्यतादोषपरिहाररूप इति वदन्त्यर्वाञ्चो दर्पणकारादयः।।७६।।

विवृति

उदारत्वमुदाहरति–
उत्कर्षवान् सातिशयः कश्चित् शौर्यत्यागादिर्गुणो यस्मिन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुक्तोऽपि प्रतीयते, तदुदाराह्वयम्। तेन सनाथा सर्वपद्धतिः सर्वकाव्यरचना।।७६।।

औदार्थं लक्षयति–**उत्कर्षवानिति**।।७६।।

उदारगुणं दर्शयति उत्कर्षवानिति। सर्वपद्धतिः गौडवैदर्भयोः पद्धतिः, सर्वकाव्यनाटकादिपद्धतयो वा।।७६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थिनां कृपणा दृष्टिः स्त्वन्मुखे पतिता सकृत्।
तदवस्था पुनर्देव नान्यस्य मुखमीक्षते॥७७॥

रत्नश्री

अर्थिनां याचकानां दृष्टिश्चक्षुः कृपणा दीना निरानन्ददौर्गत्योपहतत्वात् याच्ञामरणावस्थाप्राप्तत्वाञ्च त्वन्मुखे वदने सकृदेकवारं पतिता प्रवृत्ता सती तदवस्था सा [29a]कृपणा अवस्था यस्या इति विग्रहः। पुनस्तथैव कृपणा अप्राप्तकामत्वादन्यस्य दातुर्मुखं नेक्षते न पश्यति देवेति कश्चिद्राजा स्तूयते। त्वामेकवारमर्थितया प्राप्य पुनरन्यं न याचते त्वत्त एव पूर्णमनोरथत्वात्। आकारमात्रेण वार्थितां ज्ञात्वा कृतार्थयसि यावद् याच्ञाक्षराणि कृपणानि नोद्गीरन्तीत्यर्थः॥

कः पुनरिहोत्कर्षवान् गुणो येन सनाथं सर्व तत्काव्यमुदारं स्यादिति विवृण्वन्नाह-

हृदयङ्गमा

उदारत्वस्य उदाहरणं दर्शयति, अर्थिनामिति।-हे देव! अर्थिनां कृपणा दीना, दृष्टिः त्वन्मुखे असकृत् वारंवारं, पतिता पुनः किन्तु, तदवस्था दीनेत्यर्थः, अन्यस्य मुखं न ईक्षते। (एतेन राज्ञः एतादृशी प्रभूतदानशक्तिर्यत् दात्रन्तरोपसर्पणमर्थिनां नास्तीति सूचितं सहृदयानाम् अतिशयेन चमत्कारीति हृदयमिति)॥७७॥

प्रभा

उदारमुदाहरति-**अर्थिनामिति**। कस्यचिद्राज्ञः प्रशंसेयम्। हे देव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाराज। अर्थिनां याचकानाम्। कृपणा दीना। दृष्टिस्त्वन्मुखे सकृद् एकवारमेव। पतिता सती। पुनः पश्चात्। तदवस्था दीना भूत्वा। अन्यस्य मुखं नेक्षते। त्वयैव परिपूरिताशानां नान्यत्र याच्ञार्थं गमनमिति भावः। एतेन राज्ञ ईदृशी दानशक्तिर्यद्याचकाः परिपूर्णमनोरथा नान्यं दातारं पश्यन्ति इति भङ्ग्यन्तरेण दानमाहात्म्यवर्णनेन सहृदयानां चमत्कारविशेषो भवति। अत उदारगुणमेतत् पद्यम्।।७७।।

विवृति

तदुदाहरति–

अन्यञ्च अन्यदपि समानन्यायं सदृशमूह्यताम्।।७७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति त्यागस्य वाक्येऽस्मिन्नुत्कर्षः साधु लक्ष्यते।
अनेनैव पथान्यञ्च समानन्यायमूह्यताम्।।७८।।

रत्नश्री

इत्यस्मिन्न[न]न्तरोक्ते वाक्ये काव्ये त्यागस्य दानस्य गुणोत्कर्षः अतिशयः साधु सम्यक् परिस्फुटं क्रियाविशेषणं, लक्ष्यते प्रतीयते। तस्मात्तद्योगेनोत्कर्षवता गुणेनेदं काव्यं सर्वं सनाथमुदारमाख्यायत इति योज्यम्। प्रकारमिममन्यत्राति[दि]शन्नाह–अनेनेंत्यादि। अनेनैवोक्तेन पथा विधिना अन्यञ्च परमपि समानः सदृशः न्यायः प्रकारो यस्य तत् समानन्यायमेवंजातीयकमू[ह्य]तां स्वयमनुगम्यताम्। दिशो दर्शितत्वाञ्च शक्यमनुसर्तुंमीदृशमिति भावः। तद्यथा–

त्वन्नामग्रहणादेव देव! त्वदरियोषितः।
शोकारुणानि चक्षुंषि वहन्ति विधवा इव।।इति।

अपरप्रकारं दर्शयन्नाह–

हृदयङ्गमा

इतीति।–इति उक्तरूपे, अस्मिन् वाक्ये, त्यागस्य दानस्य, उत्कर्षः वैचित्र्यविशेषाधायकत्वं, साधु सम्यक्, लक्ष्यते प्रतीयते, सामाजिकैरनुभूयते इत्यर्थः। ''साधु'' इत्यत्र ''खलु'' इति पाठे–खलु निश्चितमित्यर्थः। अन्यत्रापि पद्ये, अनेन एव प्राक्प्रदर्शितेनैव, पथा रीत्या, समानः सदृशः, न्यायः नियमः यत्र तत् यथा तथा, ऊह्यतां विभाव्यताम्, एताम् एव रीतिमवलम्ब्य पद्यं विरच्यतामित्यर्थः।।७८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

उदाहरणं लक्षणेन संयोजयति—**इतीति**। इति पूर्वोक्तप्रकारेण दर्शितस्य वर्णनीयस्य राज्ञो दानस्य उत्कर्षश्चमत्कारविशेषेण परिपोषः। अस्मिन् वाक्ये अर्थिनां कृपणेत्यादिवाक्ये। साधु सम्यक्। लक्ष्यते दृश्यते। खलु इति पाठे निश्चयेनेत्यर्थः। अनेनैव पथा ईदशवर्णनप्रकारेण। अन्यद् वीर्यधैर्यादेरुत्कर्षापकर्षादेर्वर्णनम्। समानन्यायं समानः सदृशो न्यायो व्यवस्थितिरुत्कर्षेण वर्णनरूपा यस्य तत् तादृशमुदाहरणम्। ऊह्यतां विभाव्यताम्। अनेन गुणवर्णन एव उदारो भवतीति न । अपि तु दोषस्याप्युत्कर्षेण वर्णने स भवति। यथा हे हेलाजितेत्यादौ इति सूचितम्।।७८।।

विवृति

तदुदाहरति **अर्थिनामिति।** तदवस्था कृपणावस्था। त्यागोत्कर्षवत्, शौर्यादिगुणोत्कर्षलक्षकवाक्यम् ऊह्यम्।।७८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्लाघ्यैर्विशेषणैर्युक्तमुदारं कैश्चिदिष्यते।
यथा लीलाम्बुजक्रीडासरोहेमाङ्गदादयः॥७९॥

रत्नश्री

श्लाघ्यैरुत्कृष्टैर्विशेषणैरुपाधिभिर्युक्तं संगतमुदारं कैश्चिदि-[29b]ति पौरस्त्यैरिष्यते। [तन्मते] तदप्यस्त्विति भावः। यथेत्युदाहरति। लीलार्थमम्बुजं, क्रीडार्थं सरः, हेममयमङ्गदमिति [सर्वत्र] मध्यपदलोपी समासः। लीलाम्बुजक्रीड़ासरोहेमा[ङ्गदा.... ......आ]दिर्येषां ते। इमे श्लाघ्यविशेषणयुक्तप्रकारा लीलादीनां विशेषणानां श्लाघ्यत्वात्। तद्योगात् काव्यमुदारं द्रष्टव्यम्। आदिशब्देनादर्शभित्तिमणिमेखला- कुसुमस्त्रग्विभ्रममण्डनाङ्ग-लेखादिपरिग्रहः॥

ओजः किंलक्षणमिति निर्दिशन्नाह-

हृदयङ्गमा

मतभेदं दर्शयति, श्लाघ्यैरिति।—श्लाघ्यैः विशेष्यस्य उत्कर्षाधायकत्वेन सामाजिकमनोरमैः, विशेषणैः (बहुवचनात् एकस्य द्वयोः वा विशेषणयोः सद्भावे न अयं गुण इति सूचितम्) युक्तं समन्वितं, वाक्यंम् उदारम् औदार्य्यगुणयुक्तं, कैंश्चित् कविभिः, इष्यते। (अभिप्रायानुरूपविशेषणवद्वाक्यस्या-पुष्टार्थत्वदोषराहित्यात् परिकरालङ्कारत्वाञ्च गुणत्वकथनमयुक्त-मित्यस्मिन् पक्षे स्वस्यानभिमतमिति सूचनार्थं कैंश्चित् इत्युक्तिरित्यवधेयम्)। उक्तमर्थमुदाहरति, यथेति।—यथा लीलाम्बुजक्रीड़ामरो हेमाङ्गदादयः 'लीलाम्बुज' इत्यत्र लीलेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेषणेन तदुपयोगिनो वर्णाकारसौरभ्यातिशयस्य, 'क्रीड़ासरः' इति कथिते तत्र क्रीड़ार्थक-कमलकैरवादिजनितशोभादिकस्य, तथा 'हेमाङ्गद' इत्युक्ते अङ्गदस्य हेमनिर्मितत्वेन सुदृश्यत्वादिकस्य प्रतीतिः सहृदयमनोहारिणीति विभावनीया।।७९।।

प्रभा

उत्तानपदतौदार्यं युतं श्लाघ्यैर्विशेषणैः। इत्यग्निपुराणस्थम् (३४६.९) उदारतालक्षणं वर्णयति–**श्लाघ्यैर्विशेषणैरिति**। श्लाघ्यैर्विशेष्यस्योत्कर्षाधायकत्वेन मनोहरैः। विशेषणैर्युक्तम्। उदारम् उदारगुणवत्। इति कैश्चिदभियुक्तैः। इष्यते अङ्गीक्रियते। अत्र कैश्चिदित्यनेन साभिप्रायविशेषणत्वस्यापुष्टार्थत्वदोषाभाव-रूपत्वादन्यैः परिकरालंकारेणोक्तत्वाच्च न गुणत्वमुचितमित्यस्मिन् कल्पे स्वस्यास्वरसः सूचित इति यत् प्रेमचन्द्रमहाशयैरुक्तं तन्न मनोहरम्। प्रकृतकविना अर्थालंकारे परिकरस्यापरिगणितत्वात् दोषविचारेपि अपुष्टार्थत्वदोषस्यानुक्तत्वाच्चेति ज्ञेयम्। उदाहरति–**यथेति**। अत्र लीलाशब्देन वर्णाकारसौरभ्यातिशयः क्रीडाशब्देन कमलसारसविहारनौसनाथत्वम् हेमशब्देन च महार्धत्वं रत्नखचितत्वं च सूच्यते। एवं मणिनूपुरं रत्नकाञ्ची कनककुण्डलम् इत्यादीन्युदाहरणानि ऊह्यानि।।७९।।

विवृति

अर्थिनामिति। तदवस्था कृपणा। अन्यच्च शौर्याद्यपि।।

श्लाघ्यैरुचितैः विशेषणैर्युक्तमुदारं कैश्चिदाचार्यैरिष्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथेत्युदाहरणे। लीलाम्बुजं क्रीडासरः हेमाङ्गदम्। आदिशब्देन रत्नकुण्डलमत्तविलासिनीमदकरिप्रभृति ग्राह्यम्। अम्बुजादेर्लीलादिविशेषणं श्लाध्यम्। एतदप्युदारमितीष्यत एव॥७९॥

औदार्यं प्रकारान्तरेण लक्षयति-**श्लाघ्यैरिति**। वस्तुवैशिष्ट्यप्रतीतिकृद्विशेषणं दर्शयति–**यथेति**। कैश्चिदिति उभयविधः उदारार्थः प्रदर्श्यते॥७९॥

श्लाघ्यैरिति। कैश्चिदाचार्यैः॥७९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ओजः समासभूयस्त्वमेतद्‌गद्यस्य जीवितम्।
पद्येऽप्यदाक्षिणात्यानामिदमेकं परायणम्।।८०।।

रत्नश्री

समासस्यैकार्थवृत्तेर्भूयस्त्वं बाहुल्यमित्यनूद्य ओजो विधीयते। तदेतदोजः समासबाहुल्यलक्षणं गद्यस्योक्तरूपस्य जीवितं हृदयं सारं न पद्यस्य तत्प्रधानत्वाद्द्यस्येति। वैदर्भाणां दाक्षिणात्यानाम्। गौड़ानां तु इदमोज एकं केवलं परायणं शरणं पद्येऽपि विषये न केवलं गद्ये ततश्चात्रापि मतभेद इति।।

तस्यैव प्रकारान्तरं विषयं च दर्शयन्नाह–

हृदयङ्गमा

ओजोगुणं निरूपयति, ओज इति।–समासः द्वयोर्बहूनां वा पदानाम् एकीकरणं, तस्य भूयस्त्वं बाहुल्यं, दीर्घता इत्यर्थः, बहुभिः पदैः समास इति यावत्, ओजः, एतत् गद्यस्य पूर्वोक्तस्य उत्कलिकादिरूपस्य प्रबन्धविशेषस्य, जीवितं प्राणभूतम्; इदञ्च उभयोरपि मार्गयोः सामान्यम्। वैषम्यं दर्शयितुमाह, पद्येऽपीति। –अदाक्षिणत्यानां दाक्षिणात्यव्यतिरिक्तानां गौड़ानाम् इत्यर्थः, पद्येऽपि अपिशब्दोऽत्र गद्यसङ्ग्रहार्थं प्रयुक्तः ; इदम् एकम् अद्वितीयं, परायणं परमा गतिः तेषां बन्धगाढ़ताप्रियत्वादिति भावः। [इदञ्च शब्दगतं, समासस्य शब्दमात्रगतत्वात्। वामनस्तु बन्धस्य यत् गाढ़त्वं तत् शब्दगतमोजः इत्याह, यथा,–"गाढ़बन्धत्वमोजः" (का० सू० वृ० ३अधि० १अ० ५सू०) इति। अभिधेयस्य प्रौढ़ित्वमर्थगतमोज इति च,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा,–"अर्थस्य प्रौढ़िरोजः" (का० सू० वृ० ३अधि० २अ० २सू०) इति तल्लक्षणमभिधाय "पदार्थे वाक्वचनं वाक्यार्थे च पदाभिधा। प्रौढ़िर्व्यासससमासौ च साभिप्रायत्वमस्य च।।" इति तस्याः पञ्चविधत्वं व्यवस्थापितवान्। तत्र पदार्थे वाक्यवचनं यथा,–"अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः।" अत्र "चन्द्र" इत्येकस्मिन् पदार्थे वक्तव्ये "अत्रेर्नयनसमुत्थं ज्योतिः" इति वाक्यवचनम्। वाक्यार्थे पदाभिधा यथा,–"दिव्येयं न भवति, किन्तर्हि मानुषौ" इति वक्तव्ये "निमिषति" इत्याह इति यथा वा क्वचित्,–"निदाघशीतलहिमकालोष्णशरीरा सुकुमारी वरयोषित्" इति वाक्यार्थे वक्तव्ये "वरवर्णिनौ" इति पदाभिधानम्। क्वचित् एकस्य वाक्यार्थस्य किञ्चिद्विशेषनिवेशादनेकैः वाक्यैरभिधानं व्यासः, क्वचित् बहुवाक्यप्रति पाद्यस्य एकवाक्येन अभिधानमित्येवंरूपः समासश्च इति। तत्र व्यासो यथा,–"अयं नानाकारो भवति सुखदुःखव्यतिकरः सुखं वा दुःखं वा न भवति भवत्येव च ततः। पुनस्तस्मादूर्द्ध्वं भवति सुखदुःखं किमपि तत् पुनस्तस्मादूर्द्ध्व भवति न च दुःखं न च सुखम्।।" इति। समासो यथा,–"ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम्। सिद्धञ्चास्मै निवेद्यार्थं तद्विसृष्टाः स्वमुद्ययुः।।" इति। पदान्तरप्रयोगमन्तरेण तदर्थप्रत्याययनप्रागल्भं साभिप्रायत्वं, तद्यथा,–"सोऽयं सम्प्रति चन्द्रगुप्ततनयश्चन्द्रप्रकाशो युवा। जातो भूपतिराश्रयः कृतधियां दिष्टया कृतार्थश्रमः।।" इति, आश्रयः कृतधियामित्यस्य च सुबन्धुसाचिव्योपक्षेपपरतवात् साभिप्रायत्वम् इति। केचित्तु प्रोक्तचतुर्विधं प्रौढ़िरूपभोजः शब्दगुणः, साभिप्रायत्वन्तु अर्थगुण इत्याहुः]।।८०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

क्रमप्राप्तमोजो लक्षयति–**ओज इति**। समासभूयस्त्वम् समसनम् पदयोः पदानां वा एकीकरणं समासः। अथवा समस्यते एकीक्रियते अनेकं पदं यस्मिन् स समासः। अकर्तरि च कारके संज्ञायामिति घञ्। तेषां भूयस्त्वं बाहुल्यम्। बहुपदसमास इत्यर्थः। ओजः ओजोगुणः। एतत् समासभूयस्त्वरूपमोजः। गद्यस्य गद्यप्रबन्धस्य। जीवितं प्राणभूतम्। इदं चोभयोर्मार्गयोः समानम्। अदाक्षिणात्यानां गौडानां पद्येपि अपिना गद्यसमुच्चयः। एकं परायणम् अद्वितीयावलम्बनम्। विकटबन्धप्रिया हि गौडास्तत्संपादकानुप्रासदीर्घसमासादिषु अत्यन्तादरशालिन इत्यर्थः। समासस्य शब्दमात्रगतत्वेन इदमोजः शब्दगुणः। वामनस्तु अर्थस्य प्रौढिरोजः (३.२.२) इति अर्थगतमपि तं स्वीकरोति। सा च प्रौढिः पञ्चविधा। तथाहि–

पदार्थे वाक्यवचनं वाक्यार्थे च पदाभिधा।
प्रौढिर्व्याससमासौ च साभिप्रायत्वमस्य च॥ इति।

एकपदार्थस्य बहुभिः पदैरभिधानं पदार्थे वाक्यवचनम्। यथा चन्द्र इत्येकपदार्थे वक्तव्ये–अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः। इति वाक्यवचनम्। बहूनां पदार्थानामेकपदेनाभिधानं वाक्यार्थे पदाभिधा यथा–दिव्येयं न भवति किंतु मानुषी इति वक्तव्ये निमिषति इति पदप्रयोगः। व्यासो विस्तार एकवाक्यार्थस्यानेकवाक्येन प्रदिपादनम्। यथा–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम्।
सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः।। इति।

ते खमुद्ययुरित्येकेनैव वाक्येनामन्त्रणप्रेक्षणनिवेदन-विसर्जनाद्यर्थानां नानावाक्यार्थप्रतिपाद्यानां प्रतिपादनात् समासः। अस्य वाक्यार्थस्य साभिप्रायत्वं सहेतुकत्वम्। यथा–

सोयं संप्रति चन्द्रगुप्ततनयश्चन्द्रप्रकाशो युवा
जातो भूपतिराश्रयः कृतधियां दिष्ट्या कृतार्थश्रमः।। इति।

अत्राश्रयः कृतधियामित्यस्य वसुबन्धुसाचिव्योपक्षेपपरत्वात् साभिप्रायत्वम्। अथवा सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः। इत्यत्र सुधांशुकलितोत्तंस इति विशेषणस्य तापहरणरूप-प्रकृतार्थोपयुक्तत्वात् साभिप्रायत्वमिति केचित्। तत्र चत्वारः प्रथमभेदा उक्तिवैचित्र्यमात्ररूपा न तु गुणरूपास्तेषामभावेपि यः क़ौमारहर इत्यादिप्रबन्धेषु काव्यव्यवहारात्। यश्च साभिप्रायत्वरूप ओजोगुणस्तस्यापुष्टार्थत्वदोषपरिहारस्वरूपेण गतार्थत्वान्न पृथक् परिगणनमावश्यकमिति प्रकाशकारादयः। (५८२ पत्रे)।। अत्रान्येषां लक्षणोदाहरणानि। तत्र भरतः–

समासवद्भिर्विविधैर्विचित्रैश्च पदैर्युतम्।
सा तु (यत् तु) स्वरैरुदारैश्च तदोजः परिकीर्त्यते।।
(१६.९९) इति।

अत्र हेमचन्द्रः–अवगीतस्य अहीनस्य वा वस्तुनः शब्दार्थसंपदा यदुदात्तत्वं निषिञ्चन्ति कवयस्तदोज इति भरत इति भरतमनूद्य उदाहरति–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोमायवः शकुनयोत्र शुनां गणोत्र
लुम्पन्ति कीटकृमयः परितस्तथैते।
त्वं संपद सकलसत्त्वकृतोपकारां
न [नो] दृष्टवान् यदसि तच्छव वञ्चितोसि।।
(१९५ पत्रे) इति।

अयं कवेर्वर्णनप्रकारो न तु काव्यगुण इति आचार्यदण्डिन आकूतमभिधाय समासभूयस्त्वमोज इति तल्लक्षणमभिधत्ते। वामनस्तु–गाढबन्धत्वमोजः (३.१.५) इति शब्दगतौजसो लक्षणं विधाय विलुलितमकरन्दा मञ्जरीर्नर्तयन्ति इति उदाहरति। हेमचन्द्रस्तु वामनेन लक्षितस्यौजसः–

भस्मवर्म फणिनः पतिर्गवा-
मस्थिपङ्क्तिरिति ते परिग्रहः।
ईश इत्ययमनन्यचुम्बित-
श्चन्द्रचूड तदपि त्वयि ध्वनिः।। (१९५ पत्रे) इति।

एतदुदाहरणं दर्शयति। भोजराजस्तु–ओजः समासभूयस्त्वम् इति शब्दगुणस्य लक्षणं विधाय–

जयति भुजगरज्जुग्रन्थिनिष्पीडितेन्दु-
स्रवदमृतनिवृत्तप्रेतभावैः कपालैः।
विरचितनुतिबन्धो मूर्न्धि सद्यः पुरारेः
परिणतबहुकल्पब्रह्मणां ब्रह्मघोषः।। (१.७४)

इत्युदाहरति। अर्थगुणं तु–ओजः स्वाध्यवसायस्य विशेषोर्थेषु यो भवेत्। इति लक्षयित्वोदाहरति–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तान्येव यदि भूतानि ता एव यदि शक्तयः।
ततः परशुरामस्य न प्रतीमः पराभवम्।। (१.८२) इति।

अत्र परशुरामो विजयते एव इत्यभिप्रेतार्थे स्वनिश्चयप्रतिपादनत्वेनौजः। प्रकाशकारश्चित्तस्य विस्ताररूपदीप्तत्वजनकमोज इति (८.६९) लक्षयति। उदाहरणं तु चञ्चद्भुजेत्यादि ऊहनीयम्। दीप्तिहेतुरोज इति तु वाग्भटः। तच्च वीरबीभत्सरौद्रेषु क्रमेण विशेषतो रम्यम् इत्यभिधायोदाहरति। तत्र वीरे–

शैलोत्तुङ्गतरङ्गवेगगमनप्रोत्कम्पमानावनि-
स्तम्बक्षोभितभैरवार्णवभवत्कल्पान्तकालभ्रमम्।
क्रोधान्धाः खरदूषणत्रिशिरसः प्राप्तास्त एव द्रुतं
ब्रूत ब्रूत भटाः क्व सक्व स नरः शम्बूकजीवाहरः।।
(३० पत्रे) इति।

बीभत्से–उत्कृत्योकृत्य कृत्तिम् इत्यादिकं रौद्रे–चञ्चद्भुजभ्रमितेत्यादिकं च अनुसर्तव्यम्। दर्पणकारस्य लक्षणं प्रकाशकारानुरोधि एव। कविराजस्तु संयोगपरह्रस्वप्राचुर्यरूपं गाढत्वमोज इति लक्षणं विधाय–

साहंकारसुरासुरावलिकराकृष्टभ्रमन्मन्दर-
क्षुभ्यत्क्षीरधिवल्गुवीचिवलयश्रीगर्वसर्वंकषाः।
तृष्णाताम्यदमन्दतापसकुलैः सानन्दमालोकिता
भूमीभूषण भूषयन्ति भुवनाभोगं भवत्कीर्तयः।।
(रसगङ्गा. ५८ पत्रे)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युदाहरति। पदार्थे वाक्यरचना इत्याद्यर्थगुणस्य पञ्चप्रकारत्वं प्रपञ्च्य विविधान्युदाहरणन्यपि ददाति। तेषां च निष्प्रयोजकत्वं काव्यप्रकाशकारानुरोधेनैव दर्शयति। परं विस्तारभयान्न तदनुवादः क्रियतेस्माभिरित्यलम्।।८०।।

विवृति

ओजोलक्षणमाह–

समासभूयस्त्वं समासप्राचुर्यमोजः। एतत् गद्यस्य जीवितं वैदर्भाणामिष्टम्। पद्येऽपि, न केवलं गद्ये, अदाक्षिणात्यानां गौडानामिदं समासभूयस्त्वमेकं प्रधानं परायणं शरणम्।।

तदोजः। गुरूणां वर्णानां बाहुल्याल्पत्वामिश्रणैः उञ्चमोजोभवति। लघूनां बाहुल्याल्पत्वमिश्रणैरवचमोजइति द्विविधम्।।८०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद् गुरूणां लघूनां च बाहूल्याल्पत्वमिश्रणैः।
उच्चावचप्रकारं सद् दृश्यमाख्यायिकादिषु॥८१॥

रत्नश्री

तदोजः उच्चावचो व्याकुलः अनियतः प्रकारो गतिः प्रयोगो यस्य तदुच्चावचप्रकारं सत् भवत् दृश्यं विज्ञेयमाख्यायिकादिषु गद्यप्रबन्धेषु। आदिशब्देन कथादिपरिग्रहः। कथमुच्चावच-प्रकारान्तरं भवतीत्याह–गुरूणां संयोगपराणां दीर्घाणां च लघूनामक्षरा[30a]णां च बाहुल्येनोपचयेन अल्पत्वेनासञ्चयेन मिश्रणं समत्वेन चेत्येवं बाहुल्याल्पत्वमिश्रणैः कारणैरुच्चावचप्रकारम्। नियमाभावात् क्वचिद् गुरूणां बाहुल्यं लघूनामल्पत्वं, क्वचिल्लघूनां बाहुल्यं गुरूणामल्पत्वं, क्वचिदुभयेषां समत्वमितीयन्तः प्रकारा भवेयुरिति॥

पौरस्त्यानामोजःपद्यविषयमुदाहरन्नाह–

हृदयङ्गमा

तदिति।–तत् समासभूयस्त्वरूपम् ओजः, गुरूणां समासघटकपदावयवदीर्घप्रयत्नोच्चार्य्यमाणवर्णानां महाप्राणा-क्षराणामिति यावत्, लघूनाम् अल्पप्रयत्नोच्चार्य्यमाण-कोमलवर्णानाम् अल्पप्राणक्षराणाञ्च, बाहुल्यं प्रयोगाधिक्यम्, अल्पत्वम् ऊनप्रयोगः, मिश्रणं साम्यं, तः करणभूतैः, उच्चावचप्रकारं बहुविधं, तच्च क्वचित् गुरूणां बाहुल्येन लघूनाम् अल्पत्वेन, क्वचित् लघूनां बाहुल्येन गुरूणामल्पत्वेन, क्वचिच्च तेषामुभयविधानां मिश्रणेन च भवेत्; तत् आख्यायिकादिषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गद्यग्रन्थेषु दृश्यं लक्ष्णीयम्। (आदिना चम्पूविरुदादीनां ग्रहणम्; किञ्च आख्यायिकेत्युपादानात् कथायां रौद्रादिरसेऽपि दीर्घसमासो न विधेयः इत्यायातम्; गौड़ीयानान्तु पद्यग्रन्थेऽपि सूर्य्यशतकादौ समासबाहुल्यं पूर्वमुक्तमवधेयम्। तृतीयपादे "तत्" इत्यत्र "सत्" इति "प्रकारम्" इत्यत्र "प्रकारेण" "दृश्यम्" इत्यत्र "दृष्टम्" इति च पुस्तकान्तरे पाठः इति)।।८१।।

प्रभा

ओजोगुणस्य रचनाप्रकारं दर्शयति—**तदिति**। समासभूयस्त्वरूपमोजो गुरूणाम् पदघटकगुरुवर्णानाम्। लघूनां लघुवर्णानाम्। बाहुल्याल्पत्वमिश्रणैः क्वचिद् गुरूणां बाहुल्यं लघूनामल्पत्वं क्वचिदेतद्विरुद्धं लघूनां बाहुल्यं गुरूणामल्पत्वं क्वचिञ्च उभयोरपि समानं यन्मिश्रणम् संमेलनम् तैः। उञ्चावचप्रकारम् अनेकविधम्। भवतीति शेषः। अत्र केचित् गुरूणां महाप्राणानां लघूनामल्पप्राणानामिति व्याख्यां कुर्वन्ति। तदेतादृशं बहुप्रकारमोज आचयायिकादिषु गद्यप्रबन्धविशेषेषु दृश्यम्। आदिना चम्पूबिरुदादीनां संग्रहः।।८१।।

विवृति

मार्गद्वयसाधारणम् ओजो लक्षयति—ओज इति द्वयेन। तत् ओज गुरुबहुलं लघुबहुलम् उत्कलिकाप्रायं पद्यगन्धि इति-बहुप्रकारम्। गुरुबहुलं यथा-'नाकनायकनिकायकामिनी' इति। लघुबहुलं यथा- 'अवनिपवनवनगगनदहनत- पनतुहिनकिरणयजमानमयीः' इति। मिश्रं यथा 'त्वङ्गत्तुङ्गतरङ्गदलिततारकम्' इति।।८१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ओज इति। गद्यस्य जीवितं प्रधानभूतम्; एतद्दाक्षिणात्यानाम्। पद्येऽपि गद्येऽपि गोडानां इदं एकं परायणम् प्रधानगतिः इत्यर्थः। अथ ओजोगुणस्य वृत्तिप्रकारं दर्शयति–तदिति। तत् ओजोगुणसमवेतं, गुरूणां लघूनां च परस्परबाहुल्यात्, अल्पतया च, मिश्रणैश्च समेत्य, उञ्चावचप्रकारं नैकभेदम्। तत् आख्यायिकादिषु द्रष्टव्यम्॥८१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्तमस्तकपर्यस्तसमस्तार्कांशुसंस्तारा।
पीनस्तनस्थिताताम्रकम्रवस्त्रेव वारुणी॥८२॥

रत्नश्री

वारुणी पश्चिमा दिक्। भातीति गम्यते। किभूता? अस्तस्य पर्वतस्य मस्तके शिरसि शिखरे पर्यस्तः पतितः समस्तो निरवशेषः, दिनपरिणतेः तत्र संहारात्। अर्कस्यादित्यस्यांशूनां रश्मीनां संस्तरः सन्तानो यस्यामिति समासबाहुल्यं समान्येन दर्शितम्। विशे[षेणा]तिप्रसङ्गात्। एवंविधा कथमिव भातीत्याह–पीनेत्यादि। पीने महति स्तने पयोधरे स्थितं सक्तम् आताम्रं लोहितं कम्रं कान्तं वस्त्रं वसनं यस्यास्तथेति भाति। इह लोहितत्वं शब्दोपात्तमाताम्रशब्दप्रयोगात्। पूर्वं तु न्यायोपात्तम्, अस्तपर्वतपतितानामादित्यरश्मीनां लोहितत्वाव्यभिचारात्। न चेदृशी नेयं यथोक्तं प्राक्। अत एवोक्तम्–

न हि प्रतीतिः सुलभा शब्दन्यायविलङ्घिनी।

[1.75]

अस्तपर्वतः स्तनसदृशो वारुण्याः। अर्कांशुसंस्तर[स्तत्र] पतितः ताम्रवस्त्रतुल्यइति द्रष्ट[30b]व्यम्॥

हृदयङ्गमा

गौड़ाभिमतं पद्येऽपि समासभूयस्त्वप्रकारं दर्शयति, अस्तेति।–अस्तमस्तके अस्ताचलशृङ्गे, पर्य्यस्ताः पतिताः, समस्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ये अर्कांशवः सूर्य्यकिरणाः, तैः संस्तरः आच्छादनं यस्याः तादृशी, वारुणी वरुणाधिष्ठिता, दिगिति शेषः, पीनस्तने स्थितम् आताम्रम् ईषल्लोहितं, सायङ्कालीनसौरकिरणस्य तथात्वात् इति भावः, कम्रं कमनीयं, वस्त्रं यस्याः तथाभूता कामिनीव, राजते इति शेषः। (अत्र द्वयोरप्यर्द्धयोः समासबाहुल्यम्। भोजराजेनापि,–"ओजः समासभूयस्त्वम्" इति लक्षणमभिधाय समासबहुलं पद्यमेव उदाहृतं, यथा,–"जयति भुजगरज्जुग्रन्थिनिष्पीडितेन्दुः स्रवदमृतनिवृत्तप्रेतभावैः कपालैः। विरचितनुतिबन्धो मूर्द्धि सद्यः पुरारेः परिणतबहुकल्पब्रह्मणां ब्रह्मघोषः।।" अत्र भुजगरज्जुग्रन्थि इत्यादिना समासबाहुल्यादोजोनाम शब्दगुण इति)।।८२।।

प्रभा

ओज उदाहरति–**अस्तेति**। अस्तः अस्ताचलस्तस्य मस्तकं शिखरं तत्र पर्यस्ताः प्रसृता ये समस्ताः सायंकाले तत्रैव सर्वेषाम् अवस्थानात् संपूर्णा अर्कांशवः सूर्यकिरणाः तैः संस्तर आच्छादनं यस्याः सा तादृशी। सूर्यकिरणव्याप्तेत्यर्थः। वारुणी वरुणस्वामिका पश्चिमदिक्। पीनः पुष्टो यः स्तनस्तस्मिन् स्थितम् आताम्रं किंचिल्लोहितं कम्रं मनोहंर च वस्त्रं यस्यास्तादृशी। नायिका इव शोभते। अत्र पीनस्तनेत्यनेन सायंकालीनसूर्यमण्डलस्य वारुण्याः स्तनत्वेनारोपः सूचितः। एतदनुप्रासपरिपूर्णतया अनुप्रासाकुलधियां गौडानाम् ओजस उदाहरणं ज्ञेयम्। वैदर्भाणामंग्रे (१.८४) वक्ष्यति।।८२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

गौडाभिमतमोजो दर्शयति–

अस्तमस्तके पर्यस्तः समस्तार्कांशुसंस्तरः यस्याः सा अस्तमस्तकपर्यस्तसमस्तार्कांशुसंस्तरा पीनस्तने स्थितमाताभ्रं वस्त्रं यस्याः सा पीनस्तनस्थितातामवस्त्रेव वारुणी पश्चिमा दिक्।।८२।।

क्रमेण उदाहरति **अस्तेति**। अस्तमस्तकम् अस्ताचलशिखरम्। वारुणी पश्चिमा दिक्।।८२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति पद्येऽपि पौरस्त्या बन्धन्त्योजस्विनीगिरः।
अन्ये त्वनाकुलं हृद्यमिच्छन्त्योजो गिरां यथा॥८३॥

रत्नश्री

इत्येवंविधा अहृद्या ओजस्विनीः समासबाहुल्यवतीः गिरः 'शब्दान् पद्येऽपि काव्ये, न केवलं गद्ये। बध्नन्ति रचयन्ति पौरस्त्या गौड़ाः। दाक्षिणात्या अपि क्वचित् पद्येऽप्योजः प्रयुञ्जते। तत्तु विशेषविवक्षायां तुशब्दः। अनाकुलमगहनम्। अत एवं हृद्यं सुभगम् ओजः कथितलक्षणम् इच्छन्ति प्रयुञ्जते इति॥

कीदृशं तदित्युदाहरति-

हृदयङ्गमा

गौड़ाभिमतं समासभूयस्त्वं दर्शयित्वा मतान्तरमवतारयति, इतीतिं द्वाभ्याम्।–पौरस्त्याः गौड़वासिनः, इति पूर्वोक्तप्रकारे, पद्येऽपि ओजस्विनौः समासबहुलाः, गिरः बन्धन्ति, अन्ये तु पण्डिताः, गिरां वाचाम्, अनाकुलम् (अत्र भावनिर्देशः) अनाकुलत्वमित्यर्थः, दीर्घसमासादीनां झटिति प्रतीतेरन्तरायत्वात् तद्राहित्यरूपमिति यावत्, हृद्यं सहृदयमनोहारि च, ओजः इच्छन्ति, तथा च समासस्य दीर्घत्वम् अल्पत्वम् अभावो वा भवतु श्रोतृणां बुद्धेरनाकुलत्वसम्पादनेन तन्मनोहारितवम् ओजः पदार्थः इति निष्कर्षः॥८३॥

प्रभा

पूर्वोदाहरणं गौडानामिति स्पष्टमभिधत्ते–**इतीति**। पौरस्तस्याः गौडाः। इति पूर्वश्लोकोक्तप्रकारेण। पद्येपि ओजस्विनीः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समासबाहुल्येन ओजोगुणवतीः। गिरो वध्नन्ति रचयन्ति। वैदर्भाभिमतमोजो लक्षयति। **अन्ये त्विति**। अन्ये तु वैदर्भास्तु। गिरामनाकुलम् भावप्रधानो निर्देशोनाकुलत्वमित्यर्थः। अथवा न विद्यते आकुलं विषमोच्चारणं यस्य इत्यनाकुलम्। सुखोच्चारणमित्यर्थः। एतादृशं हृद्यं पारूष्यशैथिल्यादिदोषपरिमार्जनेन मनोहारि। ओज ओजोगुणम् इच्छन्ति। अयमत्राशयः। ओजोगुण उभयोर्गौडवैदर्भयोरिष्टः। परं गौडा अनुप्रासलोभात् कष्टपदबहुलसमासविन्यासेन सहृदयानां बुद्धिं व्याकुलयन्ति। वैदर्भास्तु बन्धपारुष्यशैथिल्यादिदोषपरिहारेण प्रसन्नार्थानां पदानां समासेन बुद्धेरनाकुलत्वं साधयन्ति। तादृशसमासभूयस्त्वं च ओज इति मन्यन्ते। समासभूयस्त्वमुभयोरपि अभिप्रेतम्। परं बुद्धेराकुलीकरणानाकुलीकरणविषय उभयोर्भेदः। गौडा अनुप्रासानुकूलतया क्लिष्टत्वं न विचारयन्ति। वैदर्भास्तु तत्परिहरन्तीति भावः।।८३।।

विवृति

अन्येऽपि वैदर्भाः पुनः। वारुणी वरुणस्येयं वारुणी पश्चिमा दिक्।।८३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पयोधरतटोत्सङ्गलग्नसन्ध्यातपांशुका।
कस्य कामातुरं चेतो वारुणी न करिष्यति॥८४॥

रत्नश्री

वारुणी दिगपरा। किंभूता? पयोधरो मेघः स्तनश्च। शब्दश्लेषोऽयम्। तस्य तटः एकदेशः स एवोत्सङ्गो मध्यभागः। तत्र लग्नः स्थितः सन्ध्यातपः। दिनपरिणतिः स एवांशुकं रक्तं वस्त्रं यस्याः सा तथाभूता कस्य नाम कामिनश्चेतश्चित्तं कामातुरं मन्मथाक्रान्तं न करिष्यति? सर्वस्यैव करोति रागानुकूलत्वात्तस्या अवस्थायाः। तादृशमनाकुलं हृद्यमोजः प्रयुञ्जते वैदर्भाः।

सलीलहसितज्योत्स्नाकीलिताधरपल्लवः।
मुखं मृगदृशां कस्य हृदयं न हरिष्यति।।
धाविता अपि ते दन्ताः श्यामा मुग्धे मुधा श्रमः।
मुखाब्जसौरभाकृष्टप्रतिबिम्बितषट्पदाः।।
विदग्धमधुरस्निग्धमुग्धसम्भ्रान्तलोचनम्।
ललितभ्रूलतोल्लासहासहारि मुखं तव।।

इत्यपरमुदाहरणत्रयम्।।

कान्तं विभजय[31a]न्नाह—

हृदयङ्गमा

अत्र उदाहरति, यथेति—पयोधरो मेघ एव, पयोधरः स्तनः, स एव तटः प्रदेशः, तस्य उत्सङ्गे लग्नं सन्ध्यातपः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सायङ्कालीनसौरकिरणाभास एव, अंशुकं यस्याः तादृशी, वारुणी प्रतीची दिक् इत्यर्थः, कस्य चेतः कामातुरं न करिष्यति? इत्यन्वयः। (अत्र पूर्वार्द्धे समासबाहुल्यमपि पूर्ववत् न श्रोतृबुद्धिमाकलयति परं श्रोत्रसुखमेव तेषां समुत्पादयति, परार्द्धे 'कामातुरम' इत्यत्र समासस्याल्पत्वम्, अन्यत्र च समासो नास्ति, तथाऽपि बन्धशैथिल्याभावात् सामाजिकान् सुखयति; एवञ्च दीप्तरसानुप्रविष्टार्थप्रतिपादकसन्दर्भेऽपि समासमन्तरेण यत्र दीप्तार्थता न प्रतिहन्यते तत्र समासाभावेऽपि गुणत्वमेवाङ्गीकृतं, न तु गुणविपर्य्ययात् दोषत्वम्; उक्तञ्च,—"ओजः समासभूयस्त्वं तद्दीप्तार्थेषु बध्यते। विपर्य्ययोऽस्यासमस्तं तद्दीप्तञ्चेन्न दोषभाक्।।" इति; तत्रोदाहृतं यथा,—"यो यः शस्त्रं बिभर्त्ति स्वभुजगुरुमदः पाण्डवीनां चमूनाम्" इत्यादि, "अत्रासमास्तत्वेऽपि प्रौढ़बन्धत्वात् गुणत्वम्" इति समावेश्च दर्शितः। अत एवात्र ओजः शैथिल्यात्मकशब्दगुणः प्रसादः इति प्राक् प्रतिपादितः इति विभावनीयम्)।।८४।।

प्रभा

वैदर्भाभिमतम् ओज उदाहरति—**पयोधरेति**। पयोधरो मेघ एव पयोधरः स्तनस्तस्य तटः प्रान्तप्रदेशस्तस्य उत्सङ्गे मध्यप्रदेशे लग्नं संलग्नं संध्यातपः संध्याकालीनसौरकिरणा एव अंशुकं आरक्तवसनं यस्याः सा। एतादृशी वारुणी पश्चिमदिक्। कस्य सहृदयस्य चेतः कामातुरं मदनव्यथितम्। न करोति। आरक्तवसनावगुण्ठितस्तनमनोहराया नायिकायाः स्मरणेनेति भावः। अत्र पूर्वार्धे दीर्घसमासवद्वाक्यमपि अस्तमस्तकेतिवत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्लिष्टपदशून्यत्वात् न बुद्धिमाकुलयति। प्रत्युत प्रसन्नार्थतया उच्चारणसौकर्येण च चित्तश्रवणयोः सौख्यमादधाति। अत्र तृतीयचरणे अल्पसमासश्चतुर्थचरणे तु समासाभावः। तथापि रचनाया गाढत्वेन लालित्येन च इदं पद्यं रसिकानां मन आकर्षति। अनेन कुत्रचिदंशे समासहानावपि न ओजोगुणहानिरिति मन्तव्यम्।।८४।।

विवृति

अयं गुणः गौडानामभिमततमः, दाक्षिणात्याः केचित् केचित् तमङ्गीकुर्वत इत्याह-**इतीति**। अन्येऽपीति। अनाकुलं अनुद्धटपदम्। तदुदाहरति-**पयोधरेति**।।८४।।

गद्य एव ईदृश्यः पर्याकुलाः ओजस्विन्यो द्रष्टव्या गिरः। पद्येऽपि ताः पौरस्त्यैः ग्रथ्यन्त इत्याह-**इतीति**। वैदर्भास्तु न ईदृशीः अङ्गीकुर्वन्ति इत्याह। अनाकुलम् आकुलताशून्यं, तेन हृद्यं हृदयहारि इच्छन्तिः उदाहरति-**पयोधरेति**।।८४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कान्तं सर्वजगत्कान्तं लौकिकार्थानतिक्रमात्।
तच्च वार्ताभिधानेषु वर्णनास्वपि दृश्यते॥८५॥

रत्नश्री

सर्वस्य वैदर्भस्येतरस्य वा जगतो जनस्य कान्तं मनोहरं यत् तत् कान्तं विज्ञेयमिति विधिः कुत एवमित्याह–लौकिकार्थानतिक्रमादिति। लोकविदितोऽर्थो लौकिकम्। तस्य लौकिकस्यार्थस्याभिधेयस्यानतिक्रमात् अनुवृत्तेः कारणात्। लौकिकार्थानुवृत्तेर्हि काव्यं साधारणं सर्वेषां कान्तं भवति। तस्य विनियोगविषयं दर्शयन्नाहतञ्चेत्यादि। तञ्च कान्तम्। अर्थान्तरसमुञ्चये चकारः। तदाह–वार्ताभिधानेषु प्रवृत्तिनिवेदनेषु वर्णनास्वपि वस्तुगुणोद्भाविनीषु च दृश्यते प्रयुज्यते॥

तदुदाहरति–

हृदयङ्गमा

कान्तिगुणं निरूपयति, कान्तमिति।–लौकिकस्य लोकसिद्धस्य, अर्थस्य अनतिक्रमात् अत्यागात्, तन्मात्रस्यैव वर्णनात् इत्यर्थः, सर्वजगतां साधारणानां, कान्तं मनोरमम्, अध्याहारादिदोषाभावादन्वयबोधसौकर्य्येणार्थसुगमत्वात् सहृदयानां हृद्यमित्यर्थः, पद्यमिति शेषः, कान्तं कान्तिगुणविशिष्टम्; तथा च सहृदयमनोरञ्जकलोकसिद्धवस्तुवर्णनमेव कान्तिगुण इति। (उक्तञ्च क्रमदीश्वरेण यथा,–"वर्णनाऽत्युक्तिशून्या या सा कान्तिरभिधीयते" इति। इयं कान्तिरर्थगा,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थानुसन्धानमन्तरेणास्याः प्रतीतिविरहात्)। तच्च कान्तिमत् वाक्यं, वार्त्ता प्रियालापः, ("अनामये प्रियालापे वार्त्तं वार्त्ता च कथ्यते" इति वचनात्) तस्या अभिधानेषु कथनेषु, तथा वर्णनासु वस्तुस्वरूपमात्रनिरूपणेषु, दृश्यते, अनामयप्रश्नेषु प्रियालापेषु वर्णनासु च यथावत् सत्यनिरूपणस्यैव औचित्यात् अयथावर्णने लौकिकव्यवहारविसंवादः स्यादिति भावः। (केचित्तु वार्त्ताभिधानेषु इत्यस्य इतिहासवर्णनेषु इत्यर्थं कल्पयन्ति, इतिहासानां यथावद्वर्णनस्य एव न्याय्यत्वात्, असत्यवर्णने सामाजिकानां तत्र मिथ्याज्ञानेन प्रवृत्तिरेव न स्यात्, ततश्च प्रबन्धस्य रामादिवत् प्रवर्त्तितव्यं न रावणादिवत् इति कृत्याकृत्यप्रवृत्तिनिवृत्त्यपदेशश्च न सम्भवतीत्याहुः। एतेन वार्त्तावर्णनाभ्यामन्यत्र अयथावद्वर्णनेऽपि न दोषः, अत एव नवीनैः व्यञ्जकार्थस्य स्वतः सम्भवित्वेन प्रौढोक्तिसिद्धत्वेन च काव्यस्य द्वैविध्यमुक्तम्)।।८५।।

प्रभा

कान्तिं लक्षयति—**कान्तमिति**। लौकिकस्य लोकप्रसिद्धस्य अर्थस्य वस्तुनोनतिक्रमाद् अपरित्यागात् लोकप्रसिद्ध्यनुरूप-वस्तुवर्णनादित्यर्थः। सर्वजगत्कान्तम् सर्वजगतां विदग्धादिबालान्तानां कान्तं कमनीयम्। अर्थबोधसौकर्येण चमत्कारजनकतया च सर्वमनोहरमिति भावः। ईदृशं वाक्यं कान्तं कान्तिगुणविशिष्टम्। एवं च लोकप्रसिद्ध्यनुरोधेन वस्तुवर्णनं कान्तिरिति लक्षणं संपन्नम्। अयं च कान्तिगुण आचार्यदण्डिनो मतेन अर्थगुणः। अर्थानुसंधानतः प्रागस्य अनुदयात्। कान्तेर्विषयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दर्शयति–**तञ्चेति**। तत् कान्तिगुणयुतं वाक्यम्। वार्ताभिधानेषु वार्ताया लौकिकोपचारवचनस्य अभिधानानि कथनानि तेषु। तथा च वर्णनासु प्रशंसावचनेषु दृश्यते। केचित्तु वार्ताभिधानेषु अनामयप्रियालापप्रस्तावेषु। इतिहासे यथावद्वर्णनस्यौचित्यादित्याहुः। अनेन व्यञ्जकार्थस्य स्वतःसंभवित्यवेन प्रौढोक्तिसिद्धत्वेन च प्रकाशकारादीनां काव्यभेदकरणं संगच्छते। तदुक्तं प्रकाशकारेण–

अर्थशक्त्युद्भवोप्यर्थो व्यञ्जकः संभवी स्वतः।
प्रौढोक्तिमात्रात् सिद्धो वा कवेस्तेनोम्भितस्य च।।
(४.३९) इति।

अत्रान्येषां लक्षणोदाहरणानि। तत्र भरतः–

यन्मनः श्रोत्रविषयमाह्लादयति हीन्दुवत्।
लीलाद्यर्थोपपन्नां वा तां कान्तिं कवयो विदुः।।
(१६.१०३) इति।

अत्रोदाहरति हेमचन्द्रः–

ददृशुर्द्वारदेशस्थां सीतां वल्कलधारिणीम्।
अङ्गदाहादनङ्गस्य रतिं प्रव्रजितामिव।। (२०० पत्रे) इति।

स एवाग्रे कथयति–तदिदं माधुर्यसाधारणम् इति वामनीया इति। वामनस्तु औज्ज्वल्यं कान्तिः। (३.१.२५) औज्ज्वल्यं नाम नवप्रतिभाप्रकर्षः। यदभावे पुराणी बन्धच्छायेयमिति व्यपदिशन्ति। इदमुदाहरति स्वटीकायां हेमचन्द्रः–

स्त्रीणां केतकगर्भपाण्डुसुभगच्छेदावदातप्रभे
मन्दं कुड्मलिताः कपोलफलके लावण्यनिष्यन्दिनि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यां कामपि कामनीयककलामातन्वते नूतनां
शीतांशोर्बिसकन्दकन्दलशिखामुग्धश्रियो रश्मयः।।

(२०० पत्रे) इति।

ओजोपि औज्ज्वल्ययोगात् कान्तिः स्यात्। तत्परिजिहीर्षया लोकसीमानतिक्रमाद्। इत्युक्तम्। अस्य गुणस्य वार्तावर्णनात्वेन द्विविधत्वं प्रोच्य उदाहरति हेमचन्द्रः। तत्र वार्तायाम्–

एते वयममी दाराः कन्येयं कुलजीवितम्।
ब्रूत येनात्र वः कार्यमनास्था बाह्यवस्तुषु।। (२०० पत्रे) इति।

वर्णनायां–

तदाननं निर्जितचन्द्रकान्ति कन्दर्पदेवायतनं मनोज्ञम्।
प्रदक्षिणीकर्तुमितः प्रवृत्ते विलोचने मुग्धविलोचनायाः।। इति।

लोकसीमातिक्रमणे न कान्तिः तत्र वार्तायामतिक्रमणं यथा–

मम दृष्टस्य राजेन्द्र तव दीर्घेण चक्षुषा।
चरणद्वितयस्याग्रे नित्यं लुठति वासवः।। इति।

एवमेव वर्णनायां यथा–

वदनस्य तवैणाक्षि लक्ष्यते पुरतः शशी।
पिण्डीकृतेन बहुना कज्जलेनैव निर्मितः।। इति।

वामनस्तु दीप्तरसत्वं कान्तिरिति अर्थगतायाः कान्तेर्लक्षणं विधायोदाहरति–

प्रेयान् सोयमपाकृतः सशपथं पादानतः कान्तया
द्वित्राण्येव पदानि वासभवनाद्यवन्न यात्युन्मनाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावत् प्रच्युतपाणिसंपुटलसन्नीवीनितम्बं धृतो
धावित्वैव कृतप्रणाममहहा प्रेम्णो विचित्रा गतिः।।
इति। (३.२.१४)

अत्र शृङ्गाररसस्य दीप्तत्वम्। एवमन्येषामपि रसानां कामधेनुव्याख्यायाम् उदा-५१ हरणानि द्रष्टव्यानि। भोजराजस्तु यदुज्ज्वलत्वं बन्धस्य काव्ये सा कान्तिरुच्यते। (१.६९) इति शब्दगुणं कान्तिमभिधायोदाहरति–

निरानन्दः कौन्दे मधुनि विधुरो बालबकुले
न साले सालम्बो लवमपि लवङ्गे न रमते।
प्रियङ्गौ नासङ्गं रचयति न चूते विचरति
स्मरँल्लक्ष्मीलीलाकमलमधुपानं मधुकरः।। इति।

अर्थगुणं तु वामनवद् दीप्तरसत्वं स्वीकरोति उदाहरति च–

मा गर्वमुद्वह कपोलतले चकास्ति
कान्तस्वहस्तलिखिता मम मञ्जरीति।
अन्यापि किं न सखि भाजनमीदृशीनां
वैरी न चेद्भवति वेपथुरन्तरायः।। (१.८१) इति।

वाग्भटस्तु आचार्यदण्डिमतानुरोधेन लौकिकार्थानतिक्रमेणौज्ज्वल्यं कान्तिरिति लक्षणं विधायोदाहरति–

सजलनिबिडवस्त्रव्यक्तनिम्नोन्नताभिः
परिगततटभूमिः स्नानमात्रोत्थिताभिः।
रुचिरकनककुम्भश्रीमदाभेगतुङ्ग-
स्तनविनिहितहस्तस्वस्तिकाभिर्वधूभिः।। (२९ पत्रे) इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशकारादयस्तु ग्राम्यपदाघटितत्वेनोज्ज्वलत्वरूपां कान्तिं स्वीकृत्य तां ग्राम्यरूपदोषाभावेन्तर्भावयन्ति। जगन्नाथस्तु अविदग्धवैदिकादिप्रयोगयोग्यानां पदानां परिहारेण प्रयुज्यमानेषु पदेषु लोकोत्तरशोभारूपमौज्ज्वल्यं कान्तिरिति लक्षणं विधायोदाहरति–

नितरां परुषा सरोजमाला न मृणालानि विचारपेशलानि।
यदि कोमलता तवाङ्गकानामथ का नाम कथापि पल्लवानाम्।। (५८ पत्रे) इति।

अर्थगुणस्य तु दीप्तरसत्वं कान्तिः (६२ पत्रे) इत्येव लक्षणं विहितम्। उदाहरणं च–नवोच्छलितयौवनस्फुरदखर्वगर्वज्वरे इत्यादि।।८५।।

विवृति

कान्तिं व्याचष्टे–

लौकिकार्थानतिक्रमात् लोके विदितो लौकिकः लोकप्रसिद्धः, सचासावर्थश्च तस्यानतिक्रमात्। तञ्च कान्तं वार्ताभिघानेषु वार्ताप्रतिपादनेषु तथा वर्णनास्वपि दृश्यते।।८५।।

कान्तलक्षणमाह–**कान्तमिति**। लौकिकार्थानतिक्रमात् लोकानुभवसंवादात् इति यावत्।।८५।।

वैदर्भाणां कान्तस्वरूपमाह–**कान्तमिति**। कान्तं नाम सर्वजगत्कमनीयम्। तञ्च लौकिकार्थानतिक्रमात् लोकिकार्थानुल्लङ्घनेन मवितव्यम्। तत् कान्तं वार्ताभिधानेषु वर्णनासु च विद्यते। वार्ता नाम अन्योन्यकथनम्। वर्णना नाम प्रशंसावचनम्।।८५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहाणि नाम तान्येव तपोराशिर्भवादृशः।
सम्भावयति यान्येवं पावनैः पादपांसुभिः॥८६॥

रत्नश्री

केनचित् तपोधनेन कश्चिद् गृहमेधी स्वगृहागतेन वार्तापृष्टः सन् अभिधत्ते गृहाणि गेहानि नाम तान्येवोच्यन्तेऽर्थतो नामतश्च नान्यानि। अत एव नामेत्युक्तम्। संभावनायां वा नामशब्दः। कतमानि? यानि गृहाणि एवमागमनोत्सवेन पादपांसुभिश्चरणरेणुभिः पावनैः पवित्रैः जाह्नवीजलैरिव संभावयति मानयति पुनाति भवादृशः त्वद्विधः तपोराशिः साक्षाद्धर्मसञ्चयः। तथाभिधं वार्ताभिधानं सर्वजगत्कान्तं लौकित्वात् तादृशस्यार्थस्य। उक्तं च–

अग्निचित् कपिला स[त्री] राजा भिक्षुमहादधिः।
[31b] दृष्टा माता पुनन्त्येते त्वं पुनः स्मरणादपि।।इति।

हृदयङ्गमा

वार्त्ताभिधाने कान्तिं दर्शयति, गृहाणीति।–तानि एव गृहाणि गृहपदवाच्यानि, प्रशंसनीयानि गृहाणि इत्यर्थः, गृहपदस्य लक्षणया प्रशस्तगृहपरत्वादिति भावः ; तपोराशिः अधिकतपाः, भवादृशः महात्मजनः, पावनैः पवित्रैः, पादपांशुभिः चरणरजोभिः, यानि गृहाणि, सम्भावयति संशोधयति। (इयं हि प्रियालापरूपवार्त्ता, ततश्च महात्मजनपदस्पर्शेन स्थानस्य प्राशस्त्यरूपवर्णनीयार्थस्य लोकसिद्धत्वादियं वार्त्ताभिधानरूपा कान्तिरिति अवधेयम्)।।८६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

तत्र वार्ताभिधाने कान्तिमुदाहरति–**गृहाणीति**। तान्येव गृहाणि गृहपदवाच्यानि प्रशस्तानि गृहाणीत्यार्थः। नाम इति संभावनायां निपातः। भवादृशो युष्मत्सदृशः। तपोराशिः तपः संघस्वरूपः। यानि गृहाणि। पावनैः पवित्रैः। पादपांसुभिश्चरणधूलिभिः। संभावयति। गौरवं प्रापयति। अत्र सत्पुरुषचरणसंपर्केण गृहादीनां प्राशस्त्यवर्णनं लोकव्यवहारप्रसिद्धमेवेतीयं वार्ताभिधानरूपा कान्तिः।।८६।।

विवृति

वार्ताभिधानेषु तावत् गृहाणि नामेत्यादि। वर्णनासु अनयोरनद्याङ्गीत्यादि।।८६।।

कान्तं वार्ताभिधाने वर्णनायां च क्रमेण उदाहरति-**गृहाणीति** द्वयेन।।८६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनयोरनवद्याङ्गि स्तनयोर्जृम्भमाणयोः।
अवकाशो न पर्याप्तस्तव बाहुलतान्तरम्॥८७॥

रत्नश्री

अनवद्याङ्गि सर्वाङ्गसुन्दरि! अनयोः तव स्तनयोः जृम्भमाणयोः परिवर्द्धमाणयोः बाहुलतान्तरं हृदयं पर्याप्तः परिपूर्णः अवकाशः स्थानं[न] भवति। स्वल्पमेतत्स्थानं यत् बाहुलतान्तरं नाम। अतिमात्रस्तनौन्नत्याद् इत्ययमपि लौकिकः एवार्थः। ततः सर्वजगत्कान्तमीदृशं वर्णनमिति।।

कीदृशं सम्भाव्यते येन सर्वजगत्कान्तं स्यादिति चेदाह–

हृदयङ्गमा

वर्णनायां कान्तिं दर्शयति, अनयोरिति।–हे अनवद्याङ्गि! सुन्दरि!, जृम्भमाणयोः वर्द्धमानयोः, अनयोः स्तनयोः तव बाहुलतान्तरे वक्षसि, अवकाशः स्थानं, न पर्य्याप्तः न प्रभूतः, स्तनयोरतिपीनोन्नततया वक्षसश्च क्षुद्रतया यथेष्टस्थानालाभात् इति भावः। (अत्र पीनोन्नतयोः स्तनयोः क्षुद्रायतने वक्षसि स्थानाप्राप्तिवर्णनं लोकसिद्धमिति कान्तिगुणः)।।८७।।

प्रभा

वर्णनायां कान्तिमुदाहरति–**अनयोरिति**। हे अनवद्याङ्गि शोभनगात्रे। तव बाहुलतान्तरे भुजद्वयस्य मध्ये वक्षसि। जृम्भमाणयोः वर्धमानयोः। स्तनयोः कुचकलशयोः। अवकाशः अवस्थितये स्थानम्। न पर्याप्तः नालम्। करिकुम्भसदृशयोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पयोधरयोस्तदपेक्षया ह्रस्वस्वरूपे वक्षसि परस्परविमर्देन कथमपि स्थितिरस्तीति भावः। अत्र वर्णनायां पीनस्तनयोर्वक्षसि संसबाधावस्थानं लोकप्रसिद्धमेव। अतो लौकिकार्थस्यानतिक्रमेण वर्णनादत्र कान्तिगुणः॥८७॥

विवृति

वार्ताऽभिधानोदाहरणम्-गृहाणीति। वर्णनोदाहरणम् अनयोरिति। अवकाशो न पर्याप्तः, न परिपूर्णः। बाहुलतान्तरं बाहुलतयोर्मध्यम्॥८७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति संभाव्यमेवैतद्विशेषाख्यानसंस्कृतम्।
कान्तं भवति सर्वस्य लोकयात्रानुवर्तिनः॥८८॥

रत्नश्री

इति परत इदमेवंविधं विशेषाख्यानसंस्कृतं संभाव्यं नैव लोके न सम्भाव्यत एव लौकिकार्थानुसारेण प्रयुक्तत्वात्। प्रकृतापेक्षया तयोर्विशेषः पादपांसूनां च पावनत्वं स्तनयोश्च तादृशविजृम्भनं विशेषोऽतिशयः तस्याख्यानेनोद्भावनेन संस्कृतं व्युत्पन्नम्। विशेषो वा आख्यायते येन तदेव संस्कृतं सुप्रयुक्तत्वात्। काव्यं सम्भाव्यमिति प्रकृतम्। ततश्च लोकयात्रानुवर्तिनः लोकार्थानुसारिणः सर्वविदग्धस्येतरस्य वा जनस्य कान्तं मनोहरम्, तादृशं काव्यं भवति जायते।

अद्य जाता वयं देव प्राप्ताः सर्वाश्च सिद्धयः।
यदेवं पुण्यया स्पृष्टा दृष्ट्या स्मितप्रसन्नया॥

[प्र]पश्यात्मानमेतस्मिन्नुज्ज्वले गण्डमण्डले।
दर्पणानयनश्रान्त्या तन्वि किं दूयसे मुधा॥

इति अ[32a]परमुदाहरणयुगलम्॥

गौडाभिमतं वार्ताभिधानं वर्णनं च दर्शयन्नाह–

हृदयङ्गमा

उक्तयोः पद्ययोः कान्तिं सङ्घटयति, इतीति।–इति पूर्वोक्तश्लोकद्वयप्रतिपाद्यं वस्तु, सम्भाव्यमेव भवितुमर्हति एव, न तु असम्भववदपि प्रौढोक्तया कल्पनीयम् इति भाव; एतञ्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेषाख्यानेन विशेषः आख्यायते अनेनेति विशेषाख्यानं वैचित्रप्रतिपादकविशेषणं, तेन संसकृतं शोभितं सत्, लोकयात्रानुवर्त्तिनः लौकिकाचारपरायणस्य, सर्वस्य जनस्य, कान्तं मनोरमं, भवति। [एतेन औत्कर्षप्रतिपादकविशेषणवतो लोकप्रसिद्धवस्तुनो वर्णनेनैव कान्तेः सम्भवः, न तु लोकसिद्धवस्तुमात्रवर्णनेनेति ; तथात्वे "सूर्य्योऽस्तं याति" "गौः शेते" इत्यादेरपि लोकसम्भाव्यत्वेन कान्तिमत्त्वात् काव्यत्वापत्तिः, तादृशविशेषणवद्वर्णनस्य वैचित्राजनकत्वात् वैचित्रास्यैव गुणादिरूपत्वात्, गुणालङ्कारादिमत्त्वस्यैव काव्यत्वमिति सुधीभिर्विभाव्यम्। अन्ये तु यत्र श्रृङ्गारादयो रसा दीप्ततया प्रतिभान्ति, तत्रैवार्थगा कान्तिरित्याहुः ; तथा ह्युक्तं वामनेन,–"दीप्तरसत्वं कान्तिः" (का० सू० वृ० ३अधि० २अ० १४सू०) इति; उदाहरणञ्च तत्रैव यथा,–"प्रेयान् सायमपाकृतः सशपथं पादानतः कान्तया द्वित्राण्येव पदानि वासभवनादयावन्न यात्युन्मनाः। तावत् प्रच्युतपाणिसम्पुटलसन्नीवीनितम्बं धृतो धावित्वैव कृतप्रणामकमहो। प्रेमणो विचित्रा गतिः।।" इति। औज्ज्वल्यरूपा तु शब्दगुणः ; यथोक्तं वामनेन,–"औज्ज्वल्यं कान्तिः" (का० सू० वृ० ३अधि० १अ० २५सू०) इति। औज्ज्वल्यञ्च हालिकादिव्यवहृतपदपरित्यागेनालौकिकशोभा-शालित्वं, तञ्च "पत्रम्" इति वक्तव्ये "किसलयम्" इत्यादि, "जलधौ" इति वक्तव्ये "अधिजलधि" इति, "राज्ञि" इति वक्तव्ये "राजनि" इति, "कमलमिव" इति वक्तव्ये "कमलायते" इत्यादि। अन्यञ्च,–"यदुज्ज्वलत्वं बन्धस्य काव्ये सा कान्तिरिष्यते" इति, यथा– "कुरङ्गीनेत्रालीस्तव-कितवनालीपरिसरः" इति]।।८८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

उपरिनिर्दिष्टोदाहरणद्वये कान्तिलक्षणं संगमयति–**इतीति**। इति वार्तावर्णनाविषये। उदाहरणद्वयदर्शितप्रकारामिदं संभाव्यमेव लोकप्रसिद्धतया संभवनीयमेव न तु प्रौढोक्त्या कल्पनीयम्। एवमेव एतत्। विशेषाख्यानसंस्कृतम् विशेषेण यथा स्यात् तथा यदाख्यानं कथनं तेन संस्कृतं सुशोभितम्। कान्तम् कान्तिगुणयुतम् भवति। कस्य भवतीत्याह–**सर्वस्येति**। लोकयात्रानुवर्तिनो लोकव्यवहारनिष्णातस्य। सर्वस्य जनस्य। वार्तावर्णनयोः केवलं सामान्यपदप्रयोगेण कथने न कान्तिगुण, अपि तु सहृदयहृदयहारिविशिष्टवर्णनप्रकारेणैव कान्तिगुणो भवतीति भावः। अन्यथा–

गोरपत्यं बलीवर्दो घ्रासमत्ति मुखेन सः।
मूत्रं मुञ्चति शिश्नेन अपानेन तु गोमयम्।।

इत्यत्रापि कान्तिगुणसद्भावः स्यात्। अतश्चमत्कृतिसापेक्षोयं गुण इति ध्येयम्।।८८।।

विवृति

अनयोरुदाहरणयोः कान्तिमत्त्वं उयपादयति **इतीति**। ऋषिकल्पविशिष्टशापानुग्रहक्षमपुरुषोपश्लाघने परिणद्धोद्भिद्यमानस्तनकन्याविषयेऽपि कथ्यमानं एतत् कान्तं भवति।।८८।।

वार्तावर्णनयोरेवंभूतं वाक्यं संभवति, लोकयात्रानुवर्तिनां कान्तमपि सम्भवति इत्याह–**इतीति**। एतत् उक्तप्रकारं, विशेषवचसा संस्कृतं, पूज्यमेव लोकयात्रानुवर्तनशीलस्य।।८८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकातीत इवात्यर्थमध्यारोप्य विवक्षितः।
योऽर्थस्तेनातितुष्यन्ति विदग्धा, नेतरे जनाः॥८९॥

रत्नश्री

लोकातीतोऽलौकिक इव लोकरञ्जनात्। व्युत्पन्नास्तु रज्यन्ते। अत, एव इवशब्दप्रयोगः। योऽर्थोऽव्यर्थमतिमात्रमध्यारोप्यते परिकल्प्यते, यथा च सर्वजगत्कान्तं काव्यं जायते। अध्यारोपमात्रं तु पूर्वस्मिन्नपि विद्यते इति अत्यर्थमित्युक्तम्। विवक्षितः प्रयुक्तः काव्यरूपेण तेन तथाविधेनार्थेन अभिधेयेन तथाविधार्थानुवर्तिना काव्येनेति यावत्। विदग्धा व्युत्पन्ना अतितुष्यन्ति अनुरज्यन्ते सुतरां तथाविधोक्त्या, अहतबुद्धित्वात्। इतरेऽविदग्धा नातितुष्यन्ति, तादृशामभावितस्वभावत्वात्। असंभाव्यमेतदतिप्रसङ्गोऽयमिति नानुरज्यन्ते इत्यर्थः। अत एव सर्वजगत्कान्तं न भवति, विदग्धानामेव रञ्जनात्। यथेत्युदाहरति-

हृदयङ्गमा

निरुक्तकान्तौ गौड़ानां वैमत्यमाह, लोकेति।—इवशब्दोऽत्र अप्यर्थकः। अत्यर्थम् अतिशयेन, लोकातीतः अलौकिकः अपि, योऽर्थः अध्यारोप्य कल्पयित्वा, विवक्षितः वक्तुमिच्छया प्रयुक्त इत्यर्थः, तेन विदग्धाः सहृदयाभिमानिनः, (इति सोल्लुण्ठनाक्तिः) गौड़ीया इत्यर्थः, अतितुष्यन्ति, तेषां प्रौढ़ोक्तिप्रियत्वात् इति भावः। (अध्यारोपादिना विवक्षितार्थस्य योग्यताभावादन्वयोबोधाभाव इत्यपि न वाच्यं, "बाहुलता" इत्यादौ रूपकालङ्कारे "सत्यपि बाधे प्रमातुरिच्छाप्रयुज्यत्वमाहार्य्यम्" इत्युक्ताहार्य्यज्ञानेनाभेदान्वयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वैरपि आलङ्कारिकैरङ्गीकृतत्वात्। अत एवोक्तम्,–“अत्यन्तामत्यपि ह्यर्थे ज्ञानं शब्द: करोति हि इति)। इतरे जना: वैदर्भीया: कवय:, न, तेषां यथावद्वर्णनप्रियत्वादिति भाव: ; सुतरामुक्तलक्षणा कान्तिर्गौडै: न अङ्गीक्रियते इति फलितार्थ:।।८९।।

प्रभा

कान्तिगुणविषये गौडानां विपर्ययं दर्शयति–**लोकातीत इति**। अत्र इवशब्द: प्रायोर्थे। अत्यर्थम् अत्यन्तम्। लोकातीत इव लोकप्रसिद्धिमतिक्रान्तप्राय: योर्थ:। अध्यारोप्य कल्पयित्वा स्वप्रतिभया संभाव्य इत्यर्थ:। विवक्षितो वक्तुमिष्ट:। तेन कल्पितार्थेन। विदग्धा अत्युक्तिकुशला गौडा इत्यर्थ:। अग्रे गौडोपलालितमिति कथनादत्र विदग्धा गौडा एव। अतितुष्यन्ति नितरां प्रमोदन्ते। इतरे लोकयात्रानुवर्तिनो वैदर्भा न तुष्यन्ति। अत्र केचिद् इवशब्द: अप्यर्थे। तथा च लोकातीतोपि योर्थोध्यारोप्य विवक्षित इति योजयन्ति। तथैव च विदग्धा गौडा: सोल्लुण्ठनोक्तिरियमिति कथयन्ति। अथवा विगतं दग्धं दाह: असंभव्यर्थानुभवकृतमन:क्लेशो येषां ते विदग्धा गौडा इत्यर्थमाविष्कुर्वन्ति। ननु आरोपितार्थस्यान्वयायोग्यत्वेन कथं शाब्दबोध इति वाच्यम्। शाब्दबोधे योग्यताया हेतुत्वेन सर्वैरभ्युपेतत्वाद् इति चेत् सत्यम्। परं रूपकालंकारादिवद् आहार्यारोपेण शाब्दबोधस्य सर्वैरालंकारिकै: स्वीकृतत्वात् नात्र अनुपपत्ति:। अत एवोक्तम्–अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्द: करोति हि। इति।।८९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

गौडाभिमतमुदाहरति

देवधिष्ण्यमिव देवायतनमिव। वर्णनामाह अल्पमित्यादि ।।८९।।

कान्तिविपर्ययं अत्युक्तिनामगुणं गौडाभिमतं लक्षयति-लोकेति।।

शब्द इव अर्थे तत् उदाहरति-देवेति द्वयेन।।८९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवाधिष्ण्यमिवाराध्यमद्यप्रभृति नो गृहम्।
युष्मत्पादरजःपातधोतानःशेषकिल्विषम्॥९०॥

रत्नश्री

देवायतनमिव यथा अद्य प्रभृति एतद्दिनमारभ्य नोऽस्माकं गृहमिदमाराध्यमुपास्यं पूजनीयं कृतम्। युष्माकं पादयोश्चरणपद्मयो रजसां रेणूनां पातेन संसर्गेणाघमर्षणेन धौतमपनीतं निःशेष समस्तं किल्विषं पापं यस्मिंस्तथा। यत एवं तस्मादाराध्यमितिः प्रकृतम्। वार्ताभिधानमात्रमीदृशमलौकिकार्थमेव। ततश्च सर्वजगत्कान्त-मिति॥

हृदयङ्गमा

वार्त्तायां निरुक्तकान्तेर्वैपरीत्यं वर्णयति, देवेति।—अद्य प्रभृति नोऽस्माकं, गृहं युष्माकं पादरजः पातेन चरणरेणुपातेन, धौतं निःशेषं, समस्तं किल्विषं पातकं यस्य तथाभूतं सत्, देवधिष्णां देवतास्थानमिव, आराध्यं सेवनीयं, भविष्यति इति शेषः। (अत्र महात्मनां चरणरजः स्पर्शे गृहस्य पावनत्वं लोकसिद्धमपि देवावासस्येव आराध्यत्वकीर्त्तनमारोपितमिति कान्ति-विपर्य्ययोऽवगन्तव्यः)॥९०॥

प्रभा

वार्ताभिधाने गौडाभिमतं कान्तेरुदाहरणं दर्शयति—**देवेति**। अद्यप्रभृति युष्मत्पादरजः पातधौतनिः शेषकिल्बिषम्। भवतां पादरजश्चरणधूलिः, तस्याः पातः पतनं तेन धौतं शोधितं निःशेषं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किल्बिषं पातकं यस्य एतादृशम्। नो गृहम् अस्मदीयागारम्। देवधिष्ण्यमिव देवागारमिव। सर्वैः पूजनीयम् जातमिति शेषः। सत्पुरुषचरणधूलिसंपर्केण गृहस्य प्रशस्ततैव लोकप्रसिद्धा न तु देवागारमिवाराध्यता। सा तु प्रौढोक्त्या तस्मिन्नारोपिता इति ज्ञेयम्। अत्र लौकिकार्थातिक्रमान्नेयं वैदर्भाणां मते कान्तिरपि तु गौडानामेव॥९०॥

विवृति

भृशमतिक्रान्त इव लोकयात्राम्, असन्नपि यः परमार्थतया वक्तुमिष्टः, तेन अर्थेन पौरस्त्यास्तुष्यन्ति न तु वैदर्भाः इत्याह-**लोकेति**। विदग्धाः पण्डिताः तुष्टा भवन्ति। अत्युक्तेरभीष्टत्वात्तेषाम्। विदग्धा इति गौडानाक्षिपति॥९०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अल्पं निर्मितमाकाशमनालोच्यैव वेधसा।
इदमेवंविधं भावि भवत्याः स्तनतजृम्भणम्॥९१॥

रत्नश्री

इदं प्रत्यक्षम् एवंविधमतिशंय भवत्याः तव स्तनयाजृम्भणं व्यापन भावि भविष्यत्कालापेक्षया अनालोच्यादृष्ट्वैवाल्पं संकीर्णं यथा न मातः स्तनौ, आकाशं व्योम निर्मितं विहितं वेधसा विधिना यद्यालोचयिष्यन्नैवं स्तोकमाकाशं निरमास्यत् प्रथमं तावत् जातवेदा इति वर्णनमसंस्कृतमेव॥ नेदृशं सर्वजगत्कान्तं लौकिकार्थातिक्रमात्॥

किं तर्हीदमुच्यत इति आह–

हृदयङ्गमा

वर्णनायां निरुक्तकान्तेर्वैपरीत्यं वर्णयति, अल्पमिति।–भवत्याः स्तनयोर्जृम्भणं वृद्धिः, एवंविधं व्यापकमित्यर्थः, भावि भविष्यति, इदम् अनालोच्यैव अविचार्य्यैव, वेधसा विधात्रा, आकाशम् अल्पं निर्मितम्। (अत्र सर्वविमृष्यकारिणोऽपि विधातुरनालोचनादेव महतोऽप्याकाश-स्याल्पत्वनिर्म्माणम् इत्येवमत्युक्तिमूलकवर्णनेन विल्वदाड़िम्बफल सदृशयोरपि स्तनयोरसाधारणपीनोत्तुङ्गत्वमसम्भाव्यमानमपि प्रतिपादितं सर्वमेतद्वर्ण्यमानं लोकाप्रसिद्धमेव, ततश्च प्रागुक्तलक्षणा कान्तिर्नात्र सम्भवतीति विभाव्यम्। केचित्तु एवंविधकान्तिविपर्य्यये वैदर्भीरीतिमनुसृत्य कान्तिविपर्य्ययाख्यं गुणगतदोषमाहुः ;

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा,–''कान्तेर्विपर्य्ययाद्वाक्यं ग्राम्यमित्यभिधीयते।'' यथा,– विरहे ते विषीदन्तं निषीदन्तं तवान्तिके। कन्ये। कामयमानं मां त्वं न कामयसे कथम्?।।'' इदमुक्तेर्ग्राम्यतया कान्तिहीनमित्यर्थ-प्रधानोऽयं कान्तिविपर्य्ययो दोषः)।।९१।।

प्रभा

वर्णनायां गौडाभिमतां कान्तिमुदाहरति–**अल्पमिति**। भवत्याः। इदम् पुरो दृश्यमानम्। स्तनजृम्भणम् कुचकलशविकासः। एवंविधम् निखिलाकाशव्यापकम्। भावि भविष्यति। इति अनालोच्यैव अविचार्यैव। वेधसा विधात्रा। आकाशम्। अल्पम् स्तनविस्तारापेक्षयात्यल्पपरिमाणम्। निर्मितम्। अत्र आकाशस्याल्पत्ववर्णनेन स्तनयोः पीनतुङ्गत्वप्रतिपादन-मत्युक्तिविलास एव। तथा हि सर्वज्ञस्यापि विधातुरनालोचनपूर्विका सृष्टिर्बिल्वफलसदृक्षयोः स्तनयोर्मेरुमन्दरहिमालयादिभिरपि साकल्येनाव्याप्त आकाशे संबाधेन स्थितिरित्यादिवर्णन-मतिशयोक्तिरूपम्। अतो न वैदर्भानुरोधेनेदं कान्तम्। गौडास्तु एतदेव कान्तत्वेनाङ्गीकुर्वते।।९१।।

विवृति

देवेति। देवधिष्ण्यम् देवालयः ; कल्मषं पापम्। इदमपि वार्तोदाहरणम्; अल्पमित्येतत् वर्णनोदाहरणम्। भवत्याः इदं स्तनजृम्भणम् एवं भावि इति अनालोच्यैव वेधसा आकाशं अवकाशं अल्पं निर्मितम्।।९१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदमत्युक्तिरित्युक्तमेतद्गौडोपलालितम्।
प्रस्थानं प्राक्प्रणोतं तु सारमन्यस्य वर्त्मनः॥९२॥

रत्नश्री

इदमीदृशमनन्तरोक्तं काव्यमत्युक्तिरित्युक्तमाख्यायते तज्ज्ञैरिति अत्युक्तिर्नामेदमित्यर्थः। एतदिदमनन्तरोक्तं गौडैः पोरस्त्यैरुपलालितमिष्टमत्यन्तं न वैदर्भसंमतमित्याह-प्रस्थानमित्यादि। प्राक्प्रणीतं पूर्वमुदाहृतं गृहाणि नामेत्यादि प्रस्थानं प्रकारः सारं जीवितमन्यस्य वैदर्भस्य वर्त्मनो मार्गस्य। तादृशं दाक्षिणात्यैः प्रयु[ज्य]त इति यावत्॥

समाधिमधिकृत्याह–

हृदयङ्गमा

इदमिति।–इदम् ईदृशं काव्यम्, अत्युक्तिः इति उक्तम् अत्युक्तिसंज्ञया कथितं, कविभिः इति शेषः। (उक्तञ्च भोजराजेन यथा,–"लोकिकार्थमतिक्रम्य प्रस्थानं यत्र वर्ण्यते। तदुत्युक्तिरिति प्रोक्तं गौड़ानां मनसो मुदे॥" इति)। एतत् पद्यं, गौड़ैः कविभिः, उपलालितं हृद्यतया गृहीतम्; प्राक् पूर्वं, प्रणीतं कथितं, प्रस्थानं लोकसिद्धवस्तुवर्णनरूपम्, अन्यस्य वर्त्मनः वैदर्भीयस्य मार्गस्य, सारं समुत्कर्षरूपं, मनोहरमिति यावत्। अयमेव कान्तगुणे प्रसिद्धाप्रसिद्धवस्तुवर्णनरूपः गौड़वैदर्भयोर्भेद इति भावः॥९२॥

प्रभा

एवं गौडवैदर्भयोः कान्तिं प्रदर्श्योपसंहरति–**इदमिति**। इदम् एवंविधं काव्यम्। अत्युक्तिरतिशयोक्तिरिति नाम्ना उक्तम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आलंकारिकैरिति शेषः। अत्राह भोजराजः–

लौकिकार्थमतिक्रम्य प्रस्थानं यत्र वर्ण्यते।
तदत्युक्तिरिति प्रोक्तं गौडानां मनसो मुदे।। इति। (१.१४४)

एतद् अत्युक्तिवर्णनम्। गौडोपलालितम् गोडैः कान्तिगुणत्वेनाङ्गीकृतम्। प्राक्प्रणीतम्–कान्तं सर्वजगत्कान्तं लौकिकार्थानतिक्रमात्। इत्यादिना पूर्वं सोदाहरणं प्रपञ्चितम्। प्रस्थानम् मार्गः सरणिरिति यावत्। अन्यस्य वर्त्मनो वैदर्भमार्गस्य। सारं हृद्यम्। एवं गौडवैदर्भयोः कान्तिगुणविषये नैकमत्यमिति भावः।।९२।।

विवृति

प्राक् प्रणीतं तु गृहाणि नामेत्यादि अनयोरनवद्याङ्गीत्यादि च सारमन्यस्य वर्त्मनः वैदर्भमार्गस्य।।९२।।

इदमिति। अन्यस्य वर्त्मनो वैदर्भस्य सारं–गृहाणि नाम तान्येवेत्यादिश्लोकद्वयं पूर्वोक्तम्।।९२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यधर्मस्ततोऽन्यत्र लोकसीमानुरोधिना।
सम्यगाधीयते यत्र स समाधिः स्मृतो यथा॥९३॥

रत्नश्री

अन्यस्य वस्तुनः, प्रकृतापेक्षया। धर्मः गुणः प्रसिद्धस्ततस्तस्मान्मुख्यादन्यत्र गौणविषये सम्यक् साधु। लोकसीमानुवर्तित्वमेव सम्यक्त्वमिह द्रष्टव्यम्। आधीयतेऽध्यारोप्यते यत्र। केन? लोकसीमानुरोधिना लोकप्रतीत्यनुवर्तिना कविना। यथा लोकप्रतीतिः समाद[33a]धीत नान्यथेत्यर्थः। स एवंविधो धर्मः समाधिर्नाम काव्ये स्मृतो विज्ञेय इति विधिः। समाधीयतेऽध्यारोप्यते यस्मिन्निति समाधिः समारोपविषय उच्यते। यद्यपि समाधीयमानाद्धर्मादन्यो नास्ति समाधिः तथापि सामान्यविशेषभावेन भेदविवक्षया यत्रान्यधर्मः समाधीयते तत् समाधिरित्युक्तम्। गौणशब्दव्यवहारः काव्योपयोगी समाधिरिति यावत्। यथेत्युदाहरति॥

हृदयङ्गमा

समाधिं सोदाहरणं निरूपयति, अन्यधर्म इत्यादि।– लोकसीमानुरोधिना लोकस्थितिमनुवर्त्तमानेन, लोकप्रसिद्धिमनुसरतेति यावत्, वक्त्रा इति शेषः ; (एतेन स्वेच्छया लोकविरुद्धविसदृशधर्मारोपे नायं समाधिरिति सूचितम्। यथा,–"वृंहन्ति मशका यत्र तत्र निद्रा सुदुर्लभा" इत्यादौ करिधर्मस्य वृंहणस्य मशकरुते अध्यारोपः लोकविरुद्धः इति)। अन्यस्य अपरस्य अप्रकृतस्य, यो धर्मः गुणक्रियादिः, ततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मात् अप्रकृतात्, अन्यत्र तद्भिन्ने प्रकृते इत्यर्थः, यत्र वाक्यार्थे, सम्यक् आधीयते साध्यवसानगौण्या लक्षणया आरोप्यते, स समाधिः तदाख्यगुणयुक्तः, तथा च प्रकृते वस्तुनि तद्धर्मनिगरणेन सदृशस्याप्रकृतधर्मस्याहार्य्येण तादात्मारोपः लोकप्रसिद्धश्चेत् समाधिरिति फलितार्थः। (अन्यैरप्युक्तं,–''समाधिः सोऽन्यधर्माणां यदन्यत्राधिरोपणम्'' इति। धर्म इत्यनेन धर्मिणः समारोपे न अयं गुणस्तत्रातिशयोक्तिरलङ्कार एवेति सूच्यते; यथा,–''लतामूले लीनो हरिणपरिहीनो हिमकरः, स्फुरत्ताराकारा गलति जलधारा कुवलयात्। धुनीते बन्धूकं तिलकुसुमजन्माऽपि पवनः, वहिर्द्वारे पुण्यं परिणमति कस्यापि कृतिनः।।'' इत्यादौ धर्मिणि मुखादौ धर्मिणश्चन्द्रादेरध्यारोपः)।।९३।।

प्रभा

उद्देशवाक्यस्थमन्तिमं धर्मं समाधिं लक्षयति–**अन्यधर्म इति**। लोकसीमानुरोधिना लोकव्यवहारपरिपालनेन कविना। अन्यधर्मः अन्यस्याप्रस्तुतस्य धर्मो गुणक्रियारूपः। ततः तस्मादप्रस्तुतात्। अन्यत्र प्रस्तुते। यत्र यस्मिन् वाक्यार्थे। सम्यगाधीयते साध्यवसानलक्षणयोपचर्यते। स वाक्यार्थः। समाधिः समाधिगुणविशिष्टः। स्मृतः पूर्वाचार्यैः कथितः। सम्यगाधीयते उपचर्यते स समाधिरिति अन्वर्थकी संज्ञा। उपचारश्चात्र आहार्याभेदप्रतीतिरूपः। स एव हि लक्षणायाः प्रयोजनभूतः। यतो लक्षणाजन्यसादृश्यप्रतीतेरनन्तरमेव तन्मूलव्यञ्जनया तस्य प्रतीतिसंभवात्। तदुक्तं प्रकाशकृता गौणलक्षणाप्रस्तावे–भेदेपि ताद्रूप्यप्रतीतिः सर्वथैवाभेदावगमश्च प्रयोजनम्। (५९ पत्रे) इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्षणा चात्र साध्यवसानरूपा। सा च विषयस्यानुपादान एवं संभवति। तेन च विषयोपादाने सारोपगौण्यां न समाधेः संभवः। इत्थं च प्रस्तुतस्य धर्मं निगीर्य तत्र सदृशतया अप्रस्तुतधर्मस्य तादात्म्याध्यवसानं समाधिरिति लक्षणम् इति प्रेमचन्द्रशर्माणः। धर्म इत्यनेन धर्मिणः समारोपे नायं गुणः। तत्रातिशयोक्तिरलंकार एव। यथा–

लतामूले लीनो हरिणपरिहीनो हिमकरः
स्फुरत्ताराकारा गलति जलधारा कुवलयात्।
धुनीते बन्धूकं तिलकुसुमजन्मापि पवनो
बहिर्द्वारे पुण्ये परिणमति कस्यापि कृतिनः।। इति।

अत्र मुखादौ धर्मिणि धर्मिणश्चन्द्रादेरध्यवसानादतिशयोक्तिरलंकारः। लोकसीमानुरोधिना इत्यनेन स्वेच्छया लोकसीमातिक्रमणेन अन्यधर्मारोपश्चेत् समाधिर्न। यथा बृंहन्ति मशका यत्र तत्र निद्रा सुदुर्लभा इति। अत्र बृंहितं करिगर्जितम्। इति कोशात् करिधर्मस्य बृंहितस्य मशकरुतेरध्यवसानं लोकविरुद्धम्। यथेति पदस्य उत्तरश्लोकस्थेन उदाहरणवाक्येनान्वयः। अयमर्थगुणः अर्थे अर्थान्तरारोपात्। वामनादिभिस्तु आरोहावरोहक्रमरूपः शब्दगुणः समाधिरुक्तः। स चानुपद एव स्फुटीक्रियते।। अथान्यसाहित्यप्रबन्धेषु समाधेर्लक्षणोदाहरणानि। तत्र भरतः–

अभियुक्तैर्विशेषस्तु योर्थस्यैवोपलभ्यते।
तेन चार्थेन संपन्नः समाधि- परिकीर्त्यते।। इति। (१६.९७)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थस्य गुणान्तरसमाधानात् समाधिरिति अस्य व्याख्यां विधायोदाहरति हेमचन्द्रः-

परिणतशरकाण्डच्छायमच्छाच्छया यत्
किसलयितमिवासीञ्चारुलावण्यलक्ष्म्या।
तदनुदिवसमस्यास्तोयविच्छेदसीद-
न्नवकुवलयदामश्यामलं जातमङ्गम्।। इति। [१९७]

अयमतिशयोक्तिविशेष इति वामनीयाः। तथा च सूत्रयति वामनः —अथदृष्टिः समाधिः। अर्थो द्विविधः, अयोनिरन्यच्छायायोनिश्च। तत्राद्यो यथा–

आश्वपेहि मम सीधुभाजनाद्यावदग्रदशनैर्न दश्यसे।

चन्द्र मद्दशनमण्डलाङ्कितः रवं न यास्यसि हि रोहिणीभयात्।। इति। द्वितीयो यथा–

मा भैः शशाङ्क मम सीधुनि नास्ति राहुः
खे रोहिणी वसति कातर किं विभेषि।
प्रायो विदग्धवनितानवसंगमेषु
पुंसां मनः प्रचलतीति किमत्र चित्रम्।। [३.२.६] इति।

अत्र गातिस्थाघुपाभूमीभ्यः (२.६.७७) इति पाठं स्वीकृत्य भैः इति लुङो रूपं ज्ञेयम्। भोजराजः– समाधिः सोन्यधर्माणां यदन्यत्राधिरोपणम्। इति लक्षणं विधायोदाहरति–

प्रतीच्छत्याशोकीं किसलयपरावृत्तिमधरः
कपोलः पाण्डुत्वादवतरति तालीपरिणतिम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिम्लानप्रायामनुवदति दृष्टिः कमलिनी-
मितीयं माधुर्यं स्पृशति न तनुत्वं च भजते।। इति। (१.७२)

अत्र प्रतीच्छति अवतरति अनुवदति इत्यादिचेतनक्रियाधर्माणां अचेतनेष्वधरादिषु उपचारेणाध्यारोपणात् समाधिः। वाग्भटोपि अन्यस्य धर्मो यत्रान्यत्रारोप्यते स समाधिरित्याह। उदाहरति च-

रिपुषु सहजतेजः पुञ्जलीलायितैस्तै-

रजनि जनितकम्पस्तत्सुतो भूमिभर्ता।

प्रतिनृपतिवधूनां पल्लविन्यश्रुपूरै-

रधिवियदधिरूढा कीर्तिवल्लिर्यदीया।। (३० पत्रे) इति।

जगन्नाथोपि-अवर्णितपूर्वोयमर्थः। पूर्ववर्णितच्छायो वेति कवेरालोचनं समाधिः इति लक्षणं विधाय अवर्णितपूर्वमुदाहरति। तनयमैनाकगवेषणलम्बीकृतजलधिजठरप्रविष्टहिमगिरिभुजायमानाया भगवत्या भागीरथ्याः सखी इति। (६२ पत्रे) यमुनावर्णनमेतत्। इमं समाधिगुणं तु कविगतत्वेन काव्यामात्रस्य कारणं मत्वा तस्य गुणत्वमग्रे निराकृतं तेनैव (६३ पत्रे)।। अर्थगुणीभूतस्य समाधेरयं विस्तारः। शब्दगुणीभूतस्तु वामनेन-आरोहावरोहक्रमः समाधिः (३.१.१२) इति लक्षयित्वा तत्रारोहपूर्वकोवरोहो यथा-निरानन्दः कौन्दे मधुनि परिमुक्तोज्झितरसे। इति। अवरोहपूर्वकस्त्वारोहो यथा-नराः शीलभ्रष्टा व्यसन इव मज्जन्ति तरवः। इति चोदाहृतः। उदाहरति चेमं हेमचन्द्रः-

शृङ्गोत्खातभुवः कृतान्तमहिषात्संत्रस्त उच्चैः श्रवाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वैरावणकण्ठगर्जितमयं क्रुद्धोम्बिकाकेसरी।
संगीतागतकम्बलाश्वतरयोः प्रेक्षागृहद्वारि च।
प्रेक्ष्य स्कन्दशिखण्डिनं चकितयोः कस्मान्मुखं म्लायति।।
(१९८ पत्रे) इत्यादि।

प्रकाशकारा अपि आरोहावरोहक्रमरूपं समाधिमङ्गीकृत्य तस्यौजस्यन्तर्भावं कुर्वन्ति। (८.७२) एवमेव दर्पणकाराः। जगन्नाथोपि बन्धगाढत्वशिथिलत्वयोः क्रमेणावस्थापनं समाधिरिति शब्दगुणसमाधेर्लक्षणं विधायोदाहरति–

स्वर्गनिर्गतरिनिर्गलगङ्गातुङ्गभङ्गुरतरङ्गसखानाम्।
केवलामृतमुचां वचनानां यस्य लास्यगृहमास्यसरोजम्।। इति।

अस्य च ओजस्येवान्तर्भावं कुरुते। अन्ये तु आचार्यदण्डिनोक्ता समाधिरुपचरितवृत्तिस्वरूपा उपचरितवृत्तिर्गुणश्चेद् योगवृत्या किमपराद्धम् इति तां नैवाङ्गीकुर्वन्ति। वामनोक्तामर्थगुणसमाधिमयोनिरन्यच्छायायोनिस्वरूपामपि न गणयन्ति। सर्वस्यापि कविकाव्यप्रपञ्चस्य अयोनिरन्यच्छायायोनिस्वरूपत्वाद् इत्यलं पल्लवितेन।।९३।।

विवृति

समाधिलक्षणमाह–

अन्यस्य धर्मिणो धर्मः अन्यत्र धर्म्यन्तरे सम्यक् आधीयते एकधर्मि(र्म?)समवायादिकमवेक्ष्याध्यारोप्यते यत्र, तत्र समाधिरलङ्कारः। उदाहरणम्–**कुमुदानीत्यादि**। उन्मेषनिमेषावन्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करणसम्बन्धपूर्वेच्छाप्रयत्नकार्यो, न कुमुदादिधर्मौ। तौ नेत्रधर्मावपि कुमुदकुबलयेष्वध्यारोप्यते। अध्यारोपाञ्च तावुन्मेषनिमेषौ ब्रूत इति तद्वाचिनी श्रुतिर्लब्धा कुमुदादिभिरिति।।९३।।

समाधिं लक्षयति–**अन्येति।** अन्यस्य धर्मः अन्यधर्मः। ततोऽन्यत्र तस्माद्धर्मिणः अन्यस्मिन् धर्मिणि। लोकसीमानुरोधिना अर्थसादृश्यानुरोधिना। सम्यक् युक्तम् आधीयते यत्र तत्र स्यात्समाधिः। समाधिमुदाहरति**कुमुदानीति।** कुमुदेषु कमलेषु च सङ्कोचविकासयोः सादृश्यात्, निमीलनोन्मेषौ अध्यस्य, निमीलन्ति उन्मिषन्ति इति शब्दौ प्रयुक्तौ।।९३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुमुदानि निमीलन्ति कमलान्युन्मिषन्ति च
इति नेत्रक्रियाध्यासाल्लब्धा तद्वाचिनी श्रुतिः॥९४॥

रत्नश्री

कुमुदानि कैरवा निमीलन्ति निमिषन्ति कमलानि पद्मानि उन्मिषन्ति चेत्यत्र कतमो धर्मः समाहितः इत्याह-नेत्रेत्यादि। नेत्रस्य क्रिया निमेषोन्मेषलक्षणा प्रसिद्धो धर्मः तस्मात्ततोऽन्यत्र कुमुदादिषु अध्यासात् समाधानात् समारोपात् कारणात्। तद्वाचिनी नेत्रक्रियाभिधायिनी श्रुतिर्निमीलन्तीत्यादिका लब्धा प्राप्ता प्रयुक्तेति यावत्। अर्थानुगामित्वाच्छब्दस्य इत्येवंभूतो भाक्तः शाब्दो व्यवहारः काव्ये समाधिनाम्ना ख्यायते॥

कश्चिद्धर्मः गौणविषय एव शोभते काव्ये न मुख्यगोचर इति दशयन्नाह-

हृदयङ्गमा

कुमुदानीति।—यथा, कुमुदानि उत्पलानि, निमीलन्ति सङ्कोचतां प्राप्नुवन्ति, कमलानि उन्मिषन्ति विकाशन्ते च; (प्रभातवर्णनमिदं, दिवा कुमुदनिमीलनस्य कमलोन्मेषस्य च कविसमयप्रसिद्धत्वात्। अत्र निमीलनोन्मेषौ अप्रकृतस्य नेत्रस्य धर्मौ कुमुदकमलयोः दलसङ्कोचविकाशतादात्मेन आरोपितौ, धर्मधर्मिणोरनयोः सादृश्यातिशयमहिम्ना लोकसिद्धौ च)। एतदेव स्वयं निर्दिशति, इतीति।—इति उक्ताभ्यां, नेत्रक्रियाभ्यां निमीलनोन्मेषाभ्यां सह, अध्यासात् कुमुदकमलदलसङ्कोच-विकाशयोस्तादात्मयारोपात्, तदवाचिनी तयोः निमीलनोन्मेषयोः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाचिनी प्रतिपादिका, श्रुतिः निमीलन्तीत्यादि तत्तत्क्रियावाचकः शब्द इत्यर्थः, लब्धा सङ्कोचविकाशप्रतिपादकतया प्राप्ता; अनयोः सादृश्यातिशयवत्त्वेनाभिन्नप्रायत्वादेकशब्दप्रतिपाद्यत्वञ्च दृश्यते, यथा कुमुदं निमीलति चक्षुर्निमीलति कमलमुन्मिषति चक्षुरुन्मिषति इत्यादि। [अत्र हि प्रस्तुतधर्मं सङ्कोचविकाशरूपं निगीर्णस्वरूपं तञ्च सदृशतया निमीलनोन्मेषतादात्मोन प्रतीयते इति समाधिगुणः। अयञ्च अर्थगत एव प्रकृतेऽर्थे अप्रकृतस्य अर्थस्यैव आरोपादिति। अन्ये तु अर्थदृष्टिरूपस्यार्थगुणस्य समाधेः अयोनिरन्यच्छायायोनिश्च इति द्वैविध्यमाहुः ; तत्राह वामनः, –"अर्थदृष्टिः समाधिः" (का० सू० वृ० ३अधि० २अ० ६सू०) इति, "अर्थो द्विविधः अयोनिरन्यच्छायायोनिश्च" (का० सू० वृ० ३अधि० २अ० ७सू०) इति, तत्र अयोनिरकारणः, अवधानमात्रकारण इत्यर्थः ; तदयथा,–"आश्वपेहि मम सीधुभाजनात् यावदग्रदशनैर्न दश्यसे" इत्यादि। अन्यच्छायायोनिः अन्यस्य काव्यस्य छाया तदयोनिश्च; यथा,–"मा भैः शशाङ्क मम सीधुनि नास्ति राहुः" इत्यादि। विश्वनाथस्त्वत्रैवं मन्यते, –अयोनिरर्थः कविप्रसिद्धिमन्तरेणापि स्वकपोलकल्पितः उपमानोपमेयभावादिस्वरूपः, यथा,– "सद्योमुण्डितमत्तहूण-चिवुकप्रस्पर्द्धिनारङ्गकम्" इति, अत्र हूणचिवुकेन सह नारङ्गकस्य सादृश्यं प्राचीनकविभिः कैरपि न प्रतिपादितं केवलं स्वबुद्धया उद्भावितम्। अन्यच्छायायोनिः प्राचीनकविभिः सम्यक् व्यवहृतः, कविसमयप्रसिद्धोऽपि किञ्चित् वैचित्राभावेन रचितः ; यथा,–"निजनयनप्रतिविम्बैरम्बुनि बहुशः प्रतारिता काऽपि। नीलोत्पलेऽपि विमृशति करमर्पयितुं कुसुमलावी।।" अत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नयननीलोत्पलयोः प्रसिद्धमपि सादृश्यं किञ्चिद्विच्छित्तिविशेषेण निबद्धम्। शब्दगुणः समाधिस्तु गाढ़बन्धमध्ये शिथिलबन्धोः पादाने शिथिलबन्धमध्ये च गाढ़बन्धोपादाने वैरस्याभावः ; यदाह वामनः,–"आरोहावरोहक्रमः समाधिः" (का० सू० वृ० ३अधि० १अ० १३सू०) इति। "आरोहावरोहयोः क्रमः आरोहावरोहक्रमः समाधिः परिहारः। आरोहस्यावरोहे सति परिहारः, अवरोहस्य वा आरोहे सति इति ; तत्र आरोहपूर्वकः अवरोहो यथा,–"निरानन्दः कौन्दे मधुनि परिभुक्तोज्झितरसे" इति। अवरोहपूर्वकस्तु आरोहो यथा,–"नराः शीलभ्रष्टा व्यसन इव मज्जन्ति तरवः" (का० सू० वृ० ३अ० १३सू वृ०) इति। पूर्वत्र 'निरानन्दः कौन्दे' इत्यत्र गुर्वक्षरबाहुल्यादारोहः, 'मधुनि' इत्यत्र लवक्षरप्राचुर्य्यात् अवरोहः, अवरोहे प्रवर्त्तमाने सति आरोहस्य परित्यागः। उत्तरत्र 'नराः' इत्यत्र शैथिल्यादवरोहः, 'शीलभ्रष्टाः' इत्यत्रः गुर्वक्षरप्रचुरत्वादारोहः, आरोहे प्रवर्त्तमाने च अवरोहस्य परित्यागः इति समाधेर्द्वैविध्यम् इत्यभिप्रायः। केचित्तु क्रमेण आरोहणं क्रमेण अवरोहणम् इत्यर्थं कल्पयन्ति]।।९४।।

प्रभा

समाधिमुदाहरति–**कुमुदानीति**। कुमुदानि निमीलन्ति संकुचन्ति कमलानि उन्मिषन्ति विकसन्ति। अत्र निमीलोन्मेषौ नेत्रस्य धर्मौ कुमुदकमलयोः संकोचविकासतादात्म्येनाध्यवसितौ। सादृश्यातिशयमहिम्नेदमध्यवसानं लोकसिद्धम्। सादृश्यातिशया-देवानयोरेकशब्दप्रयोगप्रतिपाद्यत्वम्। यथा चक्षुरुन्मिषति कमलमुन्मिषति तथा चक्षुर्निमीलति कमलं निमीलति इत्यादि। इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंप्रकारेण। नेत्रक्रियाध्यासान् नेत्रक्रिया निमीलनोन्मीलनरूपा तया सहाध्यासात् तादात्म्यारोपात्। कुमुदकमलधर्माभ्यां संकोचविकासाभ्यां तद्वाचिनी तयोर्निमीलनोन्मेषयोर्वाचिनी प्रतिपादिका श्रुतिर्निमीलन्तीत्यादयः शब्दाः। लब्धा अधिगताः पदार्थानामेकत्व एकशब्दप्रतिपाद्यत्वं समुचितं यथा घटः घट इति। विभिन्नत्वे तु भिन्नशब्दप्रतिपाद्यत्वं यथा घटः पट इति।।९४।।

विवृति

अन्येति। यत्र यो धर्मः तस्मादन्यत्र स समाधीयत इति समाधिः स्मृतः। उदाहरणम्–**कुमुदानीति**। कुमुदादिषु लोचनक्रियारोपात् तेष्वपि लोचनक्रियावाची शब्दो लब्धः।।९४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम्।
अतिसुन्दरमन्यत्तु ग्राम्यकक्षां विगाहते॥९५॥

रत्नश्री

निष्ठ्यूतं वान्तम्, उद्गीर्णं च। आदिशब्देन रिक्तादिपरिग्रहः। तदीदृशं वचनं गौणी प्रधा[33b]नेतरा निरूढविषयाद्विषयान्तरपरिग्रहलक्षणवृत्तिप्रयोगरूपा व्यपाश्रयो यस्य तत्तथा। गौणमिति यावत्। अतिसुन्दरमत्यन्तमनोहरमलंकाररूपत्वात्। अन्यत्तु इतरत् पुनः गौणवृत्त्यव्यपाश्रयात् मुख्यमिति यावत्। ग्राम्यकक्षाम् असभ्यपदवीं विगाहते प्रतिपद्यते। ग्राम्यमहृद्यमिति काव्ये तदुक्तेरनुचितत्वादिति भावः॥

तदुदाहारति–

हृदयङ्गमा

समाधिं गौणलक्षणक्रान्तं दर्शयति, निष्ठूरतेति।–निष्ठूरतम् उद्गीर्णं वान्तम् इत्यादिपदं, गौणी या वृत्तिर्लक्षणा, गुणयोगात् इति भावः, सैव व्यपाश्रयः विशिष्टः आश्रयो यस्य तत्, मुख्यार्थसदृशेऽर्थे प्रयुक्तमित्यर्थः, अतिसुन्दरम् अतिमनोरमं, तदेव समाधिस्थानमिति भावः ; अन्यत्र तदभावे, गौणवृत्त्याश्रयाभावे मुख्यार्थे एव प्रयोगे इत्यर्थः, ग्राम्यकक्षां ग्राम्यतादोषकालुष्यं, विगाहते लभते, तथा च मुख्यार्थे प्रयुक्तं निष्ठूतादिपदं ग्राम्यमेव लाक्षणिकेऽर्थे तु तादात्मयारोपात् गुणवदिति फलितार्थः ; (तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चोक्तं,–"ग्राम्यं घृणावदश्लीलामङ्गलार्थं यदीरितम्। तत् संवीतेषु गुप्तेषु लक्षितेषु न दुष्यति।।" इति)।।९५।।

प्रभा

कानिचित् पदानि काव्ये गौणवृत्त्या एव शोभामावहन्ति न तु मुख्यवृत्त्या। तादृशपदप्रयोगे चायमेव गुण इति तानि पदानि दर्शयति–**निष्ठ्यूतेति**। निष्ठ्यूतम् उद्गीर्णम् वान्तम् इत्यादिपदम्। गौणवृत्तिव्यपाश्रयम् गौणवृत्तिर्गौणीलक्षणावृत्तिः सैव व्यपाश्रयो विशिष्टाश्रयो यस्य तत्। गौणालक्षणया मुख्यार्थसदृशेर्थे प्रयुक्तमित्यर्थः। अतिसुन्दरम् सहृदयहारित्वेन मनोहरम्। तदैव समाधिगुणवदिति भावः। ननु वान्तादिपदमतिसुन्दरमित्यनेन अयं समाधिगुणः शब्दस्य दर्शितो भवति। स तु पुनः अर्थगुणः अर्थस्यैवारोपादिति चेद् अत्र शब्दगतत्वं परंपरयेति बोध्यम्। अन्यत्र मुख्यार्थे। अभिधावृत्त्या प्रयुक्तं निष्ठ्यूतादिपदम्। ग्राम्यकक्षाम् ग्राम्यतादोषकालुष्यम्। विगाहते लभते। अभिधावृत्त्या प्रयुक्तं निष्ठ्यूतादिपदं सदोषमपि गौणवृत्त्या गुणवद्भवति। तत्र हेतुस्तु लक्षणाफलभूततादात्म्यारोप इति विभावनीयम्।।९५।।

विवृति

निष्ठ्यतादि गौणवृत्तिव्यपाश्रयं सुन्दरम्। अन्यत्तु मुख्यवृत्तिव्यपाश्रयं ग्राम्योक्तिमवगाहते।।९५।।

केचिद्धर्माः मुख्यधर्मिणः अन्यस्मिन् धर्मिणि आधीयमानाः शोभन्ते, न तु मुख्यधर्मिणी, इत्याह–**निष्ठ्यूतेति**।।९५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिविषय एव श्लाघ्यानि, पक्षान्तरे ग्राम्याणि, पदानि आह-**निष्ठ्यूतेति।** निष्ठ्यूतं लालाजलत्यागः ; उद्गिरणं नाम जलादेर्यथेष्टत्यागः ; वमनं नाम पूर्वमेव वर्तमानस्य द्रव्यस्य बलात् निष्क्रमणम्। आदिशब्दात् उञ्चारादयो गृह्यन्ते। ग्राम्यकक्ष्यां विगाहते हेयकल्पं भवात।।९५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पद्मान्यर्कांशुनिष्ठ्यूताः पीत्वा पावकविप्रुषः।
भूयो वमन्तीव मुखैरुद्गीर्णारुणरेणुभिः॥९६॥

रत्नश्री

पावकविप्रुषः तेजः कणिकाः अर्कांशुभिरादित्यकिरणैर्निष्ठ्यूता निरस्ताः पीत्वा भूयोऽत्यर्थम्। अतश्च वमन्तीव उद्गिरन्तीव पद्मानीत्युत्प्रेक्षते मुखैरुद्गीर्णा मुक्ताः अरुणा लोहिताः रेणवः परागा यैरिति विग्रहः। उत्प्रेक्षाबीजमनेन सूचितम्। सूर्योदये हि विकसन्ति पद्मानि तेजः कणान् पिवन्तीव लक्ष्यन्ते रक्तान्परागान्मुञ्चन्ति च पीतानग्निकणान् वमन्तीव दृश्यन्ते। निष्ठीवनादिकं हि सचेतनकर्तृकं श्लेष्मादिकर्मकम्। मुख्यकाव्ये च तादृशमनुचितम्। इह त्वर्कांशुपद्ममुखकर्तृकं तेजो रेणुकर्मकं प्रयुक्तमिति अतिसुन्दरम्। सचेतनकर्मकमपि यदि गौणकर्तृकं प्रयुज्येत तदा न ग्राम्यम्। यथा–

निष्ठ्यूतमिति [34a] नाम भाषसे हृदयगतां
मुदमुद्गिरन्निति॥

हृदयङ्गमा

उक्तमर्थमुदाहरति, पद्मानीति।–पद्मानि अर्कांशुनिष्ठूताः सूर्य्यमयूखैर्निक्षिप्ताः, पावकविप्रुषः अग्निस्फुलिङ्गान्, पीत्वा उद्गीर्णा अरुणा रेणवः परागाः यैः तादृशैः, मुखैः (विशेषणे तृतीया) भूयः पुनः पुनः, वमन्तीव। (सायङ्कालीनपवनासङ्गेन स्खलत्परागाणां पद्मानां वर्णनमिदम्। अत्र निष्ठूयतोद्गीर्णशब्दौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दैहिककफादिनिक्षेपे शक्तौ अपि सामान्यनिक्षेपरूपेऽर्थे लाक्षणिकौ, लक्षणा चात्र कफनिक्षेपो वह्निकणानिक्षेप इव इति सादृश्यप्रतीत्या गौणी; यदुक्तं विश्वनाथेन,–"सादृश्येतरसम्बन्धाः शुद्धास्ताः सकला अपि। सादृश्यात्तु मता गौण्यः॥" इति; तेन च सादृश्यप्रतीत्या तदर्थस्य सहृदयहृद्यतया समाधिरव्याहतः। 'वमन्ति इव' इत्यत्र तु पद्मकर्तृकवमनस्यान्वयबोधाभावात् सादृश्यासम्भवाच्च लक्षणा अवश्यमङ्गीकार्य्या इति चेन्न, इवशब्दस्य सम्भावनार्थत्वात् सम्भावनायामपि बाधोदयस्याकिञ्चित्करत्वेन आहार्य्यवदन्वयबोधाप्रतिबन्धकत्वात् अन्वयबोधो निर्बाध एव; प्रत्युत सम्भावनायाः लक्षणाजन्यताद्रूप्यप्रतीतेरवि वैचित्राजनकत्वमित्यवधेयम्। एतेन प्रागभिहितगौणवृत्तिपदं सम्भावनाया उपलक्षणमवगन्तव्यम्)॥९६॥

प्रभा

उक्तार्थमुदाहरति–**पद्मानीति**। पद्मानि कमलानि।–अर्कांशुनिष्ठ्यूता अर्कस्य सूर्यस्य अंशवः किरणानि तैः निष्ठ्यूताः बहिः क्षिप्ताः। पावकविप्रुषः वह्निस्फुलिङ्गान् पीत्वा। उद्गीर्णा। बहिस्त्यक्ता अरुणरेणवो रक्तपरागा यैस्तैर्मुखैः। उद्गीर्णरेणुत्वं पावकस्फुलिङ्गवमनोत्प्रेक्षायां कारणम्। भूयः पुनः पुनः वमन्तीव उद्गिरन्तीव। संध्याकालीनपवनान्दोलनस्खलत्परागपद्मवर्णनमिदम्। अत्र निष्ठ्यूतोद्गीर्णशब्दौ दैहिककफपित्तलालादिविशेषनिःक्षेपवाचकौ अपि सामान्यनिक्षेपार्थे लक्षणया प्रयुक्तौ सहृदयमनोहरतां प्राप्तौ इति समाधिगुणः। लक्षणया सामान्यशब्दस्य विशेषार्थकस्य पदस्यापि सामान्यार्थपरत्वं सर्वसंमतमेव। सा च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्षणात्र शक्यार्थलक्ष्यार्थयोः सादृश्याद् गौणीति ज्ञेयम्। वमन्तीवेत्यत्र उत्प्रेक्षैव। न लक्षणा। इवशब्दवैयर्थ्यापत्तेः। तथा च पूर्वश्लोके गौणवृत्तिपदं संभावनाया अपि उपलक्षकम्। आहार्यारोपवत् संभवनायामपि बाधोदयस्याकिंचित्करत्वेनान्वयबोधाप्रतिबन्धात्। लक्षणाफलीभूततादूप्यप्रतीतेरिव संभावनाया अपि चमत्कारजनकत्वेन गुणत्वं युज्यत इति प्रेमचन्द्रशर्माणः। एवं च–

आस्वाद्य निरवशेषं विरहिवधूनां मृदूनि मांसानि।
करकामिषेण मन्ये निष्ठीवति नीरदोस्थीनि।।

इत्यादिसापह्नवोत्प्रेक्षायां निष्ठीवतीत्यादिपदेषु न लक्षणा।।९६।।

विवृति

गौणवृत्तिव्यापाश्रयमुदाहरति–

इति हृद्यम्। मुख्यवृत्तिव्यपाश्रयं पुनरहृद्यम् निष्ठोवति वधूरिति यथा। न केवलमेकधर्मस्यैकस्योन्मेषादेः पद्म दावध्यारोपस्तथा, युगपन्नैकधर्माणामपि अध्यासश्च मतः। नैकधर्माणामित्यत्र नलोपनुटावचि न भवतः, 'नञः' इति वचनात् नस्य सानुबन्धस्य प्रतिषेधवाचिनो ग्रहणात्।।९६।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति हृद्यमहृद्यं तु निष्ठीवति वधूरिति।
युगपन्नैकधर्माणामध्यासश्च मतो यथा॥९७॥

रत्नश्री

इतिदृशं गौणं हृद्यम् अतिसुन्दरम्। अहृद्यं तु ग्राम्यं पुनरुच्यते-निष्ठीवति वधूरिति सचेतनायाः ष्ठीवनं मुख्यं प्रसिद्धमेव। एकधर्मसमाधिरयं दर्शितः। युगपत् एककालम् नैकेषां बहूनां धर्माणां क्रियादिरूपाणामध्यासः समाधिश्च मत इष्यते। चकार उक्तसमुञ्चये। यथेत्युदाहरति॥

गुरुगर्भेत्यादि–

हृदयङ्गमा

इतीति।–इति पूर्वोक्तं निष्ठूतादिपदं, हृद्यं गौणलक्षणयोगेन समाधिमत्त्वादिति भावः। बधूः निष्ठोवति कफादिकं त्यजति, इति वाक्यन्तु, अहृद्यं ग्राम्यतादोषकलुषिततया सहृदयानाम् अप्रियम्। (अभिधया वृत्त्या मुख्यार्थे प्रयुक्तं निष्ठीवति इति पदं जुगुप्सां प्रकटयति, तत्रापि बधूपदं ग्राम्यतामतिशयं वर्द्धयति बध्वाः कफवमनस्यात्यन्तजुगुप्साकरत्वात्)। प्रागुक्तस्य अन्यधर्मस्यान्यत्रारोपः समाधिरित्युक्तलक्षणस्य चारुत्वातिशयप्रदर्शनार्थं षहूनां धर्माणामारोपमाह, युगपदिति।–तत्र नैकधर्माणां बहूनाम् अन्यधर्माणां, युगपत् समकालमेव, न तु कालभेदेन अन्यत्र अप्रस्तुतादन्यत्र प्रस्तुते इत्यर्थः, अध्यासः तद्धर्म्मनिगरणेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदृशतया तादात्मयारोपः, स्मृतः चारुत्वातिशयजनकत्वा-दुत्कृष्टसमाधित्वेन पण्डितैः स्वीकृतः ; तथा च एकस्य अन्यधर्मस्य अन्यस्मिन्, तथा बहूनामपि अन्यधर्माणामन्यत्र समारोपः समाधिरिति फलितार्थः॥९७॥

प्रभा

निष्ठीवनादिशब्दानां गौणवृत्त्या प्रयोगं प्रशस्य मुखयवृत्त्या प्रयोगं सोदाहरणं दूषयति–**इतीति**। इति पूर्वं दर्शितं गौणवृत्त्या प्रयुक्तं निष्ठ्यूतादिपदं हृद्यम्। गौणार्थप्रतिपादकत्वेन समाधिगुणवत्त्वात् सहृदयमनोहारि। अहृद्यं तु ग्राम्यतादोषेण रसिकमनोद्वेजकं तु। वधूः उंह्यते पितृगेहाद्भर्तृगेहं सा वधूर्नवोढा स्त्री। निष्ठीवति खाट् इति कृत्वा कफं निक्षिपति इति। अत्र मुख्यार्थे प्रयुक्तेन ष्ठीविना जुगुप्सा प्रतीयते। वधूशब्दप्रयोगश्च वध्वाः शृङ्गारस्य आलम्बनविभावत्वेनाङ्गत्वात् शृङ्गारे बीभत्साङ्गभूतं कफनिक्षेपवर्णनमत्यन्तमनुचितमिति सविशेषं ग्राम्यतां दर्शयति। एवं अन्यधर्मस्यान्यत्रारोपरूपं समाधिं प्रदर्श्य अन्यधर्मस्ततोन्यत्र इति लक्षणवाक्ये सूत्रे लिङ्गवचनमतन्त्रम् इतिन्यायेन एकवचनं द्विवचनबहुवचनोपलक्षकमिति विशदयति–**युगपदिति**। नैकधर्माणाम् अन्यदीयगुणक्रियादिरूपानेकधर्माणाम्। युगपद् एकस्मिन् समय एव। अध्यासो निगरणेनाध्वसानम्। स्मृतः समाधिगुणत्वेन प्राचीनैरनुमतः। तथा च बहूनामप्यन्यधर्माणां युगपदन्यत्र समारोपः समाधिरिति निष्कर्षः॥९७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

तत् उदाहरति-**पद्मानीति।** पद्मेषु अर्कांशुषु च निष्ठोवनवमनोद्गिरणशब्दाः प्रयुक्ताः शोभन्ते। अपि तु निष्ठोवति वधूः, वमति, उद्गिरति वा इति अहृद्यम्। एकस्मिन् धर्मिणि अनेकधर्माध्यासं केचित् प्रतिषेधन्ति; तान् प्रतिषेधति-**युगपदिति**।।९७।।

उदाहरणम्-**पद्मानीति।** उद्गीर्णारुणरेणुभिः मुखैः वमन्तीव। उक्तस्य शोभनतां विपर्यासे अशोभनतां च प्रकाश्य अनेकधर्माणामपि एकस्मिन् अध्यासो दृश्यत इत्याह-इतीति। नैकधर्माणांम् अनेकधर्माणाम्।।९७।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुरुगर्भभरल्कान्ताः स्तनन्त्यो मेघपङ्क्तयः।
अचलाधित्यकोत्सङ्गमिमाः समधिशेरते॥९८॥

रत्नश्री

गुरुर्गृहीतसारत्वात् गर्भोऽन्तर्भागः 'स एव भरो भारः दुर्वहत्वात् तस्य वा भरोऽवसादः। तेन ल्कान्ता ग्लानाः स्तनन्त्यः ल्कान्त्यनुरूपं शब्दं कुर्वाणाः मेघपङ्क्तयः पयोदमाला इमा एता अचलस्य पर्वतस्य अधित्यकायाः उपरिभूमेरुत्सङ्गः समधिशेरतेऽध्यासते॥

कियन्तोऽत्र धर्मा अध्यस्ता इति दर्शयन्नाह–

हृदयङ्गमा

उक्तमर्थमुदाहरति, गुर्विति।–गुरवः जलपूर्णतया महत्यः, अन्यत्र,–भ्रूणसम्बन्धेन स्थूलोदरा इत्यर्थः ; यद्वा,–गुरोः महतः, प्रभूतस्येत्यर्थः, अन्यत्र,–परिपुष्टस्येत्यर्थः, (गर्भविशेषणम्) तथा गर्भस्य अन्तर्वर्त्तिजलपूरस्य, अन्यत्र,–कुक्षिस्थजीवस्य, भरेण क्लान्ताः मन्थराः, स्तनन्त्यः गर्जन्त्यः, अन्यत्र,–क्लान्तिजनितकुन्थनादिकं कुर्वत्यः, इमाः मेघपङ्क्तयः, अचलस्य पर्वतस्य, अधित्यका ऊर्द्ध्वभूमिः, ("उपत्यकाऽद्रेरासन्ना भूमिरूर्द्ध्वमधित्यका" इत्यमरः) तस्या उत्सङ्गं मध्यभागम्, अन्यत्र,–सख्याः क्रोडं, समधिशेरते। (अत्र मेघपङ्क्तिधर्मेषु तद्धर्मनिगरणेन सादृश्यात् गर्भिणीधर्माणां बहूनां युगपदध्यासात् वैचित्र्यातिशयः सहृदयहृदयहारीति भाव्यम्, अलङ्कारश्च समासोक्तिरिति)॥९८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

बहुधर्मारोपरूपसमाधिमुदाहरति–**गुरुगर्भेति**। गुर्व्यः एकत्र जलेनान्यत्र गर्भविस्तारेण स्थूलास्तथा गर्भभरेण गर्भस्य अन्तर्गतजलस्य भ्रूणस्य च भरेण क्लान्ता मन्दा इव। विशेषणोभयपदकर्मधारयः। अथवा गुरुरिति गर्भस्य विशेषणम्। स्तनन्त्यः गर्जन्त्यः। अन्यत्र क्लान्तिसूचकं शब्दं कुर्वन्त्यः एतादृश इमा मेघपङ्क्यो मेघावलयः। अचलाधित्यकोत्सङ्गम् अचलस्य पर्वतस्य अधित्यका उर्ध्वप्रदेशस्तस्योत्सङ्गम् मध्यम्। अन्यत्र अधित्यकेति स्त्रीलिङ्गसाम्यात् सखी ग्राह्या तस्या उत्सङ्गः क्रोडस्तस्मिन् समधिशेरते तं संश्रयन्त इत्यर्थः। अत्र मेघपङ्क्तिषु तत्तद्धर्मनिगरणेन बहूनां गुर्वादीनां गर्भिणीधर्माणां युगपदध्यासात् समाधिगुणः।।९८।।

विवृति

उदाहरति–

गर्भिणीधर्माः गर्भपरिक्लेशादयो बहवः स्त्रीधर्माः मेघपंक्तिषु दर्शिताः।।९८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्सङ्गे शयनं सख्याः स्तननं गौरवं क्लमः।
इतीमे गर्भिणीधर्मा बहवोऽन्यत्र दर्शिताः॥९९॥

रत्नश्री

सख्याः कस्याश्चित् उत्सङ्गे शयनं स्तननमार्तरुतं गौरवं गर्भकृत[दुर्भरत्व]ादिलक्षणं तत्कृतश्च क्लमः ग्लानिरित्येते गर्भिण्या अन्तर्वत्न्या धर्माः प्रसिद्धा बहवोऽनेके अन्यत्र मेघपङ्क्तिषु..........दर्शिता अध्यस्ता इत्ययमनेकधर्मसमाधिः॥

समाधिः सोऽयं व्यापकः सुभगश्चेति [34b] प्रशंसामुखेन निगमयन्नाह—

हृदयङ्गमा

उक्तश्लोके गर्भिणीधर्मं दर्शयति, उत्सङ्गेति।—अत्र उक्ते श्लोके, सख्या उत्सङ्गशयनं स्तननं गौरवं क्लम इति उक्तरूपाः, इमे बहवः, गर्भिणीधर्माः दर्शिताः, आरोपितत्वेनेति शेषः। (यदि च "स्तनितं गर्जितं मेघनिर्घोषे" इत्याद्यमरोक्त्या स्तननशब्देन मेघगर्जितमेव बुध्यते तथाऽपि शब्दमात्रार्थकस्तनधातुनिष्पन्नत्वेन 'स्तनन्त्य' इति पदस्य गर्भिण्यास्तादृशेऽपि शब्दे प्रयोगो युज्यते। अन्यच्च,—"मञ्जीरादिषु रणितप्रायं पक्षिषु च कूजितप्रभृति स्तनितमणितादि सुरते मेघादिषु गर्जितप्रमुखम्" इति वचनान्तरेण स्तनितशब्दस्य सुरतवाचकत्वमपि सिद्धं, तस्मात् स्तनधातो, केवलं मेघगर्जितमेवार्थो न, अपि तु सामान्यशब्दमात्रमपि। ननु शब्दमात्रार्थकतायां सिद्धायामपि कथं स्तनन्त्य इति पदेन गर्भिण्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुन्थनादिशब्दविशेषस्य उपपत्तिरिति चेन्न, उत्सङ्गशयनादीनाम् असाधारणगर्भिणीधर्माणाम् अन्तःपातात् वैचित्र्याधायकत्वाच्च स्तननस्यापि गर्भिणीधर्मरूपत्वस्य युक्तत्वात् वैचित्र्यस्यैव काव्यत्वात्, अवश्यमेव तदपेक्षणं न्याय्यम् इति विवेचनीयम्)।।९९।।

प्रभा

पूर्वश्लोकस्थानां बहूनां गर्भिणीधर्माणामध्यवसानं विशदयति–**उत्सङ्गेति**। अत्र पूर्वश्लोके उत्सङ्गशयनं स्तननं गौरवं क्लम इति इमे बहवो गर्भिणीधर्मा दर्शिता आरोपेणेति भावः। एतेषां गर्भिणधर्मत्वमाह वाग्भटः-

क्षामता गरिमा कुक्षौ मूर्च्छा छर्दिररोचकम्।
जृम्भाप्रसेकः। इत्यादि। (शारीरस्थान, १, ५०-५१)

ननु स्तनितं मेघगर्जितम् इति कोशात् स्तनन्तीशब्देन मेघगर्जनमेव लभ्यते। तत् कथं स्तननस्य गर्भिणीधर्मत्वमिति चेत् सत्यम्। स्ननितभणितादि सुरते मेघादिषु गर्जितप्रमुखम् इति कोशान्तेरणास्य स्तनितशब्दस्य सुरतशब्दत्वाभिधानान्न केवलं मेघगर्जित एव शक्तिः। तथा–आर्तस्तनितसंनादे रुधिराम्बुह्रदाकुले। इति हरिवंशस्थप्रयोगेण (९९.४८) तस्य सामान्यध्वनिपरत्वमपि ज्ञेयम्। एवं सामान्यध्वनिपरत्वेपि स्तनशब्दस्य गर्भिणीशब्दपरत्वं कथमिति चेत् गर्भिण्या अन्येषामसाधारणधर्माणामन्तःपतितत्वादस्याप्यत्र गर्भिणीशब्दविशेषवाचकत्वं ज्ञेयम्*।।९९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

तमुदाहरति– **गुर्विति**।।९९।।

उदाहरणं **गुर्विति**। स्तननं प्रकाशितस्वनम्(?)। अधित्यका पर्वतानां उपरितनमेखला। 'उपाधिभ्यां त्यकन्नासन्नदूरयोः'–इति त्यकन् प्रत्ययः।।९९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेतत् काव्यसर्वस्वं समाधिर्नाम यो गुणः।
कविसार्थः समग्रोऽपि तमेनमनुगच्छति॥१००॥

रत्नश्री

तदेतदनन्तरोक्तं काव्यस्य यथोक्तस्य गद्यपद्यमिश्रात्मकस्य सर्वस्वं सारं तत्परायणत्वात्काव्यस्येति सामान्योक्तिरियम्। किं तदिति निर्भिनत्ति। समाधिर्नामा यो गुण इति योऽयमनन्तरं विभक्तः समाधिर्नाम समाधिसमाख्यो गुणो धर्मस्ततश्च समग्रः सर्वोऽपि नैक एव, कविसार्थः कविजनः तमेनं प्रकृतं समाधिमनुगच्छति समाश्रयति प्रयुङ्क्त इति यावत्। ततश्चोभयोरपि वर्त्मनोरयं साधारण इतीदमपि प्रायो गुणेषु संगृहीतं दृष्टमिति॥

तदेवं प्रस्फुटान्तरत्वं मार्गयोर्यथाप्रतिज्ञातं प्रसाध्य निगमयन्नाह-

हृदयङ्गमा

समाधिगुणम् उपसंहरति, तदिति।–तत् तस्मात्, उक्तप्रकारेण अतीववैचित्र्यावहत्वात् इत्यर्थः, समाधिर्नाम यो गुणः एतत् काव्यस्य सर्वं स्वं धनं, सारभूतमित्यर्थः, समग्रः सकलः, कविसार्थः अपि कविसम्प्रदायोऽपि, गौड़ीयः वैदर्भीयो वा इत्यर्थः, तं तथाभूतम्, एनं समाधिम्, अनुगच्छति एतदनुसारेण काव्ये प्रवर्त्तते इत्यर्थः। (यदि च एतेषां गुणानां दशानां मध्ये केचित् तत्तद्दोषाभावरूपतया केचिञ्च अलङ्कृतिरूपतया नव्यैः अनादृताः केवलं त्रय एव गुणा दर्शिताः यथा,–"माधुर्य्यौजः प्रसादाख्यास्त्रयस्ते न पुनर्दश" इति, तथाऽपि प्राचां मतमनुसृत्य ग्रन्थकृता गुणत्वेन दश एव निरूपिताः इत्यवधेयम्)॥१००॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

समाधिं प्रशसन्नुपसंहरति–**तदेतदिति**। तत् तस्मादुक्तप्रकारेण काव्यस्य चारुत्वातिशयाधानात्। समाधिर्नाम यो गुणः। एतत् काव्यस्य सर्वस्वम् सारभूतं हृद्यम्। अवश्यमपेक्षणीयमित्यर्थः। समग्रः गौडवैदर्भः। कविसार्थः कविसंघः। तम् तथाभूतमेनं समाधिगुणम्। अनुगच्छति एतत्परिशीलनेन काव्यं विरचयति। एतेषु दशसु गुणेषु मध्ये केचित् तत्तद्दोषाभावरूपतया केचिदलंकृतिरूपतया नव्यैः प्रकाशकारादिभिरनादृताः केवलं माधुर्यौजः प्रसादाख्यास्त्रय एव गुणाः स्वीकृताः। तथैव वामनभोजादिभिः शब्दार्थरूपेण एत एव द्विविधाः स्थापिताः। अन्यैश्च तत्तद्गुणानां लक्षणोदाहरणानि च विभिन्नानि विहितानि। तदेतत् सर्वं तत्तद्गुणनिरूपणप्रसङ्गे अस्माभिर्विशदीकृतमेव। आचार्यदण्डिना तु भरतमुनिमतमेव प्रायः स्वीकृतमिति सुधीभिर्विचारणीयम्।।१००।।

विवृति

प्रकृतोपसंहारेण समाधिमभिष्टौति–

कविसार्थः कविवर्गः। अनुगच्छति अनुसरति।।१००।।

समाधिः उभयोर्मार्गयोः साधारण इत्याह–तदिति।।१००।।

तदिति। तदेतत् समाधिवचनं काव्यानां सर्वस्वम्। कविसार्थः विद्वत्परिषत्। अत्रापि समाधिगुणः काव्यसर्वस्वम् इति ब्रुवता काव्यस्योपपादनात्(पादानात्) मार्गद्वयस्यापि साधारणस्समाधिरभिहितो भवति।।१००।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति मार्गद्वयं भिन्नं तत्स्वरूपनिरूपणात्।
तद्भेदास्तु न शक्यन्ते वक्तुं प्रतिकवि स्थिताः॥१०१॥

रत्नश्री

इति यथोक्तेन प्रकारेण मार्गद्वयं वैदर्भो गौड़ीयश्च मार्गः भिन्नं प्रस्फुटान्तरम्। कुतः? तस्य मार्गद्वयस्य स्वरूपम् अविपरीतस्वभावः, श्लेषादिस्वरूपं विदर्भमार्गस्य तद्विपर्ययस्वरूपं गौड़ीयस्य। तस्य निरूपणात् विवेचनात् यथाविहिताद् हेतोः। यदि मार्गद्वयं विविच्यते यथावत् ततो लभ्यते परिस्फुटमन्तरम्। ये तु न विजानन्ति तैरेकीकृतमेतत्। ततश्चाभेदोऽत्र समारोपितः। भेदस्तु वास्तव इत्याकूतम्। यथोक्तं प्राक्। कियन्तस्तर्हि प्रभेदा वैदर्भमार्गस्य कियन्तो वा [35a] गौड़ीयस्य यतः परिस्फुटमन्तरं भेदसामान्यप्रविशेषमिदं तदिति गम्यत इत्याह-तद्भेदास्त्वित्यादि। तुशब्दोऽर्थान्तरविवक्षायाम्। तस्य मार्गद्वयस्य भेदा अवान्तराः प्रकाराः। यथोक्तसामान्यलक्षणन्यस्ता अनन्ताः गवाश्वप्रभेदवत्, किमाश्रयाः? प्रतिकवि स्थिताः कविं कविं प्रति प्रतिकवि। ये केचिदिह कवयः सम्भवन्ति मार्गद्वयानुसारिणस्ते तदाश्रया इतस्ततो व्यवस्थिताः। न तु क्वचिदेकत्र परिसंख्यातास्तिष्ठन्ति। तस्मात् वक्तुं साकल्येन विवरीतुं न शक्यन्ते आनन्त्यादिति भावः॥

यदि तावत्सन्ति किं न वक्तुं शक्यन्ते? वक्तुमशक्यास्तु न सन्त्येव ते। ततश्च यथोक्तमपि भेदसामान्यमसदिव।

निर्विशेषं च सामान्यं भवेच्छशविषाणवत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्येव शङ्कानैकान्तिकमेतत्। सतोऽपि कथञ्चिद् वक्तुमशक्यस्य दर्शनादिति प्रतिपादयन्नाह–

हृदयङ्गमा

इत्थं गौड़वैदर्भयोर्भेदं वर्णयित्वा तन्निरूपणम् उपसंहरति, इतीति।–इति उक्तप्रकारेण, तयोः गौड़वैदर्भयोः, स्वरूपनिरूपणात् लक्षणकीर्त्तनात्, मार्गद्वयम् उल्लिखितरीतिद्वयं, भिन्नं परस्परविलक्षणम्; तद्भेदाः ताभ्यां मार्गाभ्यां, भेदाः भिन्ना इत्यर्थः, लाटपाञ्चालादयः इति यावत् "क्तदभिहितो भावो द्रव्यवत् प्रकाशते" इति न्यायात्। यद्वा,–तद्भेदाः तस्य काव्यमार्गस्य, भेदाः गौड़वैदर्भाभ्यामन्ये प्रकारविशेषाः, प्रतिकवि तत्तद्देशीयकविषु, स्थिताः, तु किन्तु, ते वक्तुं न शक्यन्ते, अतिविस्तारादिति भावः। (तेषां लक्षणानि अन्यैः उक्तानि यथा,–"तत्रासमासा निःशेष-श्लेषादिगुणगुम्फिता। विपञ्चीस्वरसौभाग्या वैदर्भीरीतिरिष्यते।। समस्तपञ्चषपदामोजः कान्तिविवर्जिताम्। मधुरां सुकुमाराञ्च पाञ्चालों कवयो विदुः।। समस्तात्युद्भटपदामोजः कान्तिगुणान्विताम्। गौड़ीयेति विजानन्ति रीतिं रीतिविचक्षणाः।। अन्तराले तु पाञ्चालीवैदर्भ्योर्याऽवतिष्ठते। साऽवन्तिका समस्तैः स्यात् द्वित्रैस्त्रिचतुरैः पदैः।। समस्तरीतिर्व्यामिश्रा लाटीया रीतिरिष्यते। पूर्वरीतेरनिर्वाहे खण्डरीतिस्तु मागधी।।" इति। तासु पाञ्चाली यथा,– "गात्राभिघातदलिताङ्गदजर्जराणां गणडस्थलीलुलितकुण्डलताड़िताताम्। क्षोभस्फुटन्मुकुटकोटिविघट्टितानां नादोऽभवज्झणझणामुखरो मणीनाम्।।" अत्रौजः कान्तिविरहिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माधुर्य्यसौकुमार्य्यवती षड्धिके पदे समासरहिता च पाञ्चालीरीतिः। तथा आवन्तिका यथा,–"एतानि निःसहतनोरसमञ्जसानि शून्यं मनः पिशुनयन्ति पदानि तस्याः। एते च वर्त्मतरवः प्रथयन्ति तापमालिङ्गितोज्झितपरिग्लपितैः प्रबालैः॥" सेयं समस्तद्वित्रिचतुष्पदा वैदर्भीपाञ्चाल्योरन्तराल-वर्त्तिनी आवन्तिकानाम रीतिः। तथा लाटीया यथा,–"अयमुदयति मुद्राभञ्जनः पद्मिनीनामुदय गिरिवनालीबालमन्दारपुष्पम्। विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन् कुपितकपिकपोलक्रोड़ता-म्रस्तमांसि॥" सेयं समस्तरीतिमिश्रा लाटीया नाम रीतिः। तत्र मागधी यथा,–"करिकवलनशिष्टैः शाकशाखाग्रपत्रैः अरुणसरणयोऽमी सर्वतो भीषयन्ते। चलितशवर-सेनादत्तगोश्रृङ्गचण्डध्वनिचकितवराहव्याकुला विन्ध्यपादाः॥" सेयमारब्धरीतेरनिर्वाहात् खण्डरीतिर्मागधी)। अथवा तद्भेदाः तयोः गौड़वैदर्भयोः भेदाः अन्तर्गतविशेषा इत्यर्थः॥१०१॥

प्रभा

तत्र वैदर्भगौडीयौ वर्ण्येते प्रस्फुटान्तरौ (१.४०) इति पूर्वं प्रतिज्ञातं गौडवैदर्भमार्गवर्णनमुपसंहरति–**इतीति**। इति एतावप्पर्यन्तं कथितेन प्रकारेण। तयोर्गौडवैदर्भयोः स्वरूपम् असाधारणधर्मः तस्य निरूपणात्–वैदर्भमार्गस्य प्राणा दशगुणाः स्मृताः। एषां विपर्ययः प्रायो लक्ष्यते गौडवर्त्मनि। इत्यनेन (१.४२) विभिन्नधर्मत्वेन प्रतिपादनात्। मार्गद्वयम् गौडवैदर्भमार्गाद्वितयम्। भिन्नम् अत्यन्तविसदृशम्। वर्तत इति शेषः। तद्भेदा गौडवैदर्भभेदाः। आवन्तिकीलाटीयामागध्यादयः। प्रतिकवि स्थिताः तत्तद्देशीयैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कविभिरादृताः। वक्तुं न शक्यन्ते। एषां मिश्रणप्रकारः प्रागुपवर्णित एवास्माभिः। (४२-४३) पत्रयोः) केचित्तु तद्भेद-शब्देन रीतिभेदं पाञ्चाल्यादिरूपं स्वतन्त्रमेव स्वीकुर्वन्ति। तेपि तत्तद्देशकविभिः कल्पितत्वादनन्ताः। अतस्ते परिगणितुं नैव शक्यन्ते इति भावः॥१०१॥

विवृति

प्रकृतमुपसंहरति-

इत्यनन्तरोक्तप्रकारेण मार्गद्वयं भिन्नं तत्स्वरूपनिरूपणात् भिन्नलक्षणप्रतिपादनात्॥

यद्यपीक्ष्वादीनां माधुर्यस्यान्तरं महत् महान् भेदः, तथाऽपि तत् प्रतिव्यक्तिगतं माधुर्यं सरस्वत्यापि न शक्यते कथयितुं यथा, एवं प्रतिकविस्थिता भेदाः प्रतिपादयितुं न शक्यन्ते॥१०१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत्।
तथापि न तदाख्यातुं सरस्वत्यापि शक्यते॥१०२॥

रत्नश्री

इक्षुक्षीरगुडद्राक्षादीनां मधुरद्रव्याणां माधुर्यस्य सामान्यधर्मस्य प्रतिद्रव्यं विशेषात्मना अन्तरं भेदो महत् परिस्फुटम्। तथापि तदन्तरं सरस्वत्यापि वागधिदेवतयापि आख्यातुं वक्तुं विभागेनास्येदृशं माधुर्यमस्येदृशमिति न शक्यते। प्रागेवान्येन। केवलमनुभवगम्यं तत्। सामान्यशब्देन मधुरमिति तु व्यपदिश्यते। यद्यपीक्षोरन्यादृशं माधुर्यं क्षीरस्यान्यादृशमित्यादि कथ्यते तथापि न तथा शब्दाद् गम्यते यथानुभूयते परिस्फुटं तदन्तरम्। न चैतावता तदसदेवानुभव[35b]सिद्धस्य दुरपह्न[व]त्वात्। तथा मालतीमल्लिकाचम्पकपाटलादीनां सौरभ्यस्य महदन्तरं तथापि न तत्तथा वक्तुं शक्यते, यथानुभूयते। तथाविधा हि वाचिका शक्तिः सामान्यैकता नाम। को नु पर्यनुयुज्यताम्? यथोक्तमाचार्यधर्मकीर्तिना सकलविद्वज्जनचूडामणिना-

तद्रूपं सर्वतो भिन्नं तथा तत्प्रतिपादिका।
न श्रुतिः कल्पना [वा]स्ति सामान्येनैव वृत्तितः। इति॥

[प्रमाणवार्त्तिके 3.90]

यथा सुरभिकुसुम[ान्तर्भूतं] पारिजातं स्यात्। यदुक्तं सरस्वत्यापि च वक्तुं न शक्यत इति, [तत् साधु,] तयापि वाचकशब्दशक्तेरन्यथा कर्तुमशक्यत्वात्। तदेवं मार्गद्वयस्य प्रभेदाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यपि प्रतिकवि स्थिता विद्यन्ते वस्तुतस्तथापि वक्तुमान[न्त्या]त्. ....अतिप्रसङ्गाञ्च न शक्यन्ते विशेषेण प्रत्येकम्। नैतावता न सन्त्येव। सामान्येन तु मार्गद्वयस्य वैलक्षण्यं दर्शितमेव व्यक्तम्। प्रतिव्यक्ति तु वक्तुं को नाम शन्कुयात्। सर्वत्रैव लक्षणशास्त्रे सर्वभेदव्यापि सामान्यलक्षणमुच्यते। न तु तद्भेदाः परिसंख्यायन्ते। अत्रापि सैव व्यवस्था काव्यलक्षणशास्त्रत्वादस्य। न तु यथोक्तं सामान्यं भेदलक्षणपरिस्फुटाभमनुसरद्भिरभियुक्तैस्ते भेदा मार्गद्वयसंभविनो विवेचयितुं शक्यन्ते। यथेदृशं नीलमीदृशं पीतमिति व्युत्पादिते[36a]न भेदलक्षणेन व्यक्तमुभयसम्भविनः प्रतिभेदा यथादर्शनं विभज्यन्ते इत्यलं विस्तरेण।।

सेयं काव्यलक्षणप्रयोजनस्वभावा काव्यगुणदोषविवेकरूपा व्युत्पत्तिर्यामभिसन्धाय क्रियाविधिं निबबन्धुः सूरयः, तस्य किं प्रयोजनमितीदानीमवसरं प्राप्य प्रयोजनं वर्णयन्नाह–

हृदयङ्गमा

उक्तमर्थं दृष्टान्तेन समर्थयति, इक्षिविति।–इक्षुक्षीरगुड़ादौनाम्, (आदिना मधुरमात्राणां परिग्रहः) माधुर्य्यस्य अन्तरं भेदः, महत् स्फुटतया प्रतीतियोग्यं, तथाऽपि सरस्वत्याऽपि वाग्देव्याऽपि, किमु अन्यैरिति भावः ; तत् अन्तरम्, आख्यातुं कथयितुं, न शक्यते; एवमिक्षुप्रभृतीनामिव काव्यमार्गाणां मधुरिम्णः आनन्त्यात् तद्भेदाख्यानमसम्भवमिति स्फुटतया प्रतीयमानभेदं भेदद्वयमेव विशिष्य निरूपितमिति तात्पर्य्यार्थः।।१०२।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

समग्रभेदस्य निरूपणाशक्यत्वं दृष्टान्तेन विशदयति—**इक्षुक्षीरेति**। इक्षुः पुण्ड्रकादिः क्षीरं पयः गुडः इक्षुविकारः। आदिशब्देन शर्कराखर्जूरादयो ग्राह्याः। तेषां माधुर्यस्य मधुरतायाः। अन्तरं रुचिभेदः। महत् महानस्ति। तथापि विस्पष्टभेदेपि तद् आख्यातुं तत्तदुचितज्ञापकसंज्ञाविशेषेण कथयितुम्। सरस्वत्यापि वागधिष्ठात्र्या देवतयापि न शक्यते। माधुर्यस्य विविधभेदस्य निर्वचनमशक्यमिति भावः। अतः प्रधानौ एव गौडवैदर्भभेदौ दर्शितौ इत्यभिप्रायः॥१०२॥

विवृति

प्रतिपादितं मार्गद्वयभेदमुपसंहरति—**इतीति**॥१०२॥

इतीति। उक्तप्रकारेण प्रस्फुटान्तरौ वैदर्भगौडीयौ मार्गौ भिन्नौ। वैदर्भे च गौडे च तत्तत्कविवशात् पुनरपि भेदा भवन्ति। ते तु वक्तुं न शक्यन्ते। विद्यमानोऽपि भेदो वक्तुं न शक्यत इति दृष्टान्तेन समर्थयति—इक्ष्विति। इक्ष्वादीनां माधुर्यस्य अन्योन्यभेदः सुमहान्; तथाऽपि स माधुर्यविशेषः सरस्वत्यापि वक्तुं न शक्यते; स्वसंवेद्य इत्यर्थः। तद्वत् असावपीति यावत्॥१०२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम्।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः॥१०३॥

रत्नश्री

नैसर्गिकी स्वाभाविकी जन्मान्तराभ्यास[स]म्भविनी। सहजेति यावत्। प्रतिभा हेयोपादेयपरिच्छेदलक्षणा। सा च प्रकरणात् काव्यविषया। सहजा शक्तिरियम्। उत्पाद्यां दर्शयन्नाह–श्रुतं चेत्यादि। श्रुतं काव्याङ्गविद्याश्रवणं श्रुतमयं तञ्च व्याकरणक्रियाकल्पछन्दोविचित्याद्यनेकविद्याविषयत्वात्, अनेकशः प्रवृत्तत्वाञ्च बहु पर्याप्तं निर्मलं परिशुद्धम्, आम्नायविशुद्ध्या सन्देहविपर्यासविरहात्। एवं श्रुतमयं ज्ञानं परिपूर्णमभिधाय चिन्तामयं भावनामयं च दर्शयन्नाह–अमन्दश्चाभियोग इति। श्रुतस्य चिन्तनमूहापोहमुखेन यथाम्नायमविपरीतार्थनिश्चयनम्। निश्चितस्य च भावनमभ्यासः आवृत्तिः स्थिरीकरणमिति द्विविधोऽभियोगः अभ्यासः। स चामन्दः पर्याप्तः यावद्भावितत्वात्। तदेतत्त्रयरूपा काव्यविषया व्यु[त्प] [36b]त्तिः। एवं हि काव्यं व्युत्पन्नं भवति यदि तदङ्गं विद्यास्थानं श्रुतं चिन्तितं भावितं च यथावद् भवेत्। अन्यथा कीदृशी काव्यव्युत्पत्तिः सर्वत्रोपायव्युत्पत्तिलक्षण–त्वादुपेयव्युत्पत्तेः। [तदृते चो]पेयव्युत्पत्तिरसूत्रपटात् न हीयते। अभिमानमात्रं तु विजृम्भताम्। कस्तस्य निषेद्धा? तदेवंविधाः काव्यव्युत्पत्तिः कारणं काव्यसम्पदः काव्यरचनाया निरवद्यायाः हेतुः। अस्याः प्रस्तुताया यदर्था काव्यव्युत्पत्तिः। परकीयकाव्यपरिज्ञानं तु सुलभमेवेंदृशीं काव्यव्युत्पत्तिमाश्रितवता।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततश्च कीर्तिलाभः सत्कारः अन्यो वा पुरुषार्थ इति गम्यत एव। वक्ष्यति च कीर्तिमीप्सुभिः [1.105]इति।।

ननु केचिदेव सहजशक्तियुक्ताः। तत्किमिदानीं मा भूदन्येषामिह प्रवृत्तिः? येनोच्यते नैसर्गिकी च प्रतिभेत्यत्र आह–

हृदयङ्गमा

इत्थं काव्यस्वरूपं निरूप्य तत्कारणमाह, नैसर्गिकीति।–नैसर्गिकी स्वभावसिद्धा, प्रतिभा स्फुरन्ती मतिः, बहु नानाविध, व्याकरणकोषकलाच्छन्दोगजाश्वादिलक्षणात्मक-मित्यर्थः, निर्मलं सम्यक् परिशीलनेन सर्वथा विशुद्धं, श्रुतं शास्त्रज्ञानं लोकाचारादिज्ञानञ्च, तथा अमन्दः प्रगाढ़ः, अभियोगः अभिनिवेशः, काव्याभिज्ञात् शिक्षणेनाभ्यास इत्यर्थः, एतत् त्रयम् अस्याः काव्यसम्पदः काव्यरूपायाः सम्पत्तेः, कारणं हेतुः। [कारणमिति एकवचननिर्देशेन समस्तस्यैव कारणता, न तु प्रत्येकस्य इति सूचितम्। तथा हि काव्यनिर्मितौ यत्नव्युत्पत्तिहीनानां बालकादीनां सत्यामपि प्रतिभायां काव्योत्पत्तेरभावदर्शनात्, तदनन्तरे च काले सञ्जातव्युत्पत्तीनामभ्यासवतां तेषामेव काव्यदर्शनात् तथा यत्नव्युत्पत्तियुक्तानाञ्च केषाञ्चित् प्रतिभामन्तरेण तदभावदर्शनात्, तथा कृतयत्नानां दर्शनात्, अकृतयत्नानाञ्चादर्शनात् समस्तस्यैव कारणत्वं युक्तमिति निर्णयः। उक्तञ्च प्रकाशकारेण,–''शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्। काव्यज्ञ शिक्षयाऽभयास इति हेतुस्तदुद्भवे।।'' व्याख्यातञ्च तत्रैव,–''इति त्रयः समुदिता न तु व्यस्ताः, तस्य काव्यस्य,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उद्भवे निर्माणे समुल्लासे च, हेतुः, न तु हेतवः'' इति। केचित्तु–प्रतिभा एव काव्यकारणं, व्युत्पत्तिस्तु तस्य चारुत्वे हेतुः, अभ्यासो वृद्धिहेतुश्च, प्रतिभा च क्वचित् स्वतः प्रसरति क्वचित् वा देवानुग्रहात्, भावि-कवित्वानां बालानां सत्यामपि प्रतिभायां काव्यानुदयात् कालस्य तत्सहकारित्वमङ्गीकार्य्यमित्याहुः। उक्तञ्च,–''कवित्वं जायते शक्तेर्वर्द्धतेऽभ्यासयोगतः। तस्य चारुत्वनिष्पत्तौ व्युत्पत्तिस्तु गरीयसौ।।'' एतान्येव वामनेन काव्याङ्गतया दर्शितानि; तत्र हि प्रथमं स्थावरजङ्गमात्मकस्य लोकस्य वृत्तज्ञानमन्तरेण किं वर्ण्यते इत्यपेक्षायां लोकवृत्तं, ततश्च संस्कृताः शब्दाः, तदनु तदर्थाः, अनन्तरमितिवृत्तवैचित्राहेतुः श्रृङ्गाराङ्गं कलाकौशलं, ततो रसोपयोगी कामव्यवहारः, ततश्चार्थानर्थविवेकहेतुर्दण्डनीतिः, पश्चात् लक्ष्यज्ञत्वादयः इत्यादि क्रमेणोपदेशार्थं,–''लोको विद्या प्रकीर्णञ्च काव्याङ्गानि'' (का० सू० वृ० १अधि० ३अ० १सू०) इत्येतत् सूत्रं कृतं, ततश्च तस्यैव परिस्फुटार्थं,– ''लोकवृत्तं लोकः'' (का० सू० वृ० १अधि० ३अ० २सू०) ''शब्दस्मृत्यभिधानकोषच्छन्दोविचिति-कलाकामशास्त्रदण्डनीतिपूर्वा विद्या'' (का० सू० वृ० १अधि० ३अ० ३सू०) ''लक्ष्यज्ञत्वमभियोगः वृद्धसेवाऽवेक्षणं प्रतिभानमवधानञ्च प्रकीर्णम्'' (का० सू० वृ० १अधि० ३अ० ११सू०) ''तत्र काव्यपरिचयो लक्ष्यज्ञत्वम्'' (का० सू० वृ० १अधि० ३अ० १२सू०) काव्यबन्धोद्यमोऽभियोगः'' (का० सू० वृ० १अधि० ३अ० १३सू०) ''काव्योपदेशगुरुशुश्रूषणं वृद्धसेवा'' (का० सू० वृ० १अधि० ३अ० १४सू०) ''पदाधानोद्धरणमवेक्षणम्'' (का० सू० वृ० १अधि० ३अ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१५सू०) "कवित्ववीजं प्रतिभानम्" (का० सू० वृ० १अधि० ३अ० १६सू०) "चित्तैकाग्रामवधानम्" (का० सू० वृ० १अधि० ३अ० १७सू०) इत्येतैः सूत्रैः काव्यालङ्कारसूत्रकृता यत् सूत्रितं तेन प्रतिभादित्रयस्य काव्यानां निर्माणे समुल्लासे वा हेतुत्वमपि दर्शितम्, एतैर्विना काव्यशरीरं न सम्भवतीति काव्याङ्गत्वमेतेषां सिध्यति तदिदं सर्वमनवद्यम्]।।१०३।।

प्रभा

एतावता काव्यस्वरूपमुक्त्वा इदानीं तत्कारणमाह–**नैसर्गिकीति**। नैसर्गिकी स्वाभाविकी पूर्वजन्मसंस्कारसंपन्ना। प्रतिभा नवनवोल्लेखशालिनी प्रज्ञा। यदुक्तम्–

मनसि सदा सुसमाधिनि विस्फुरणमनेकधाभिधेयस्य।
अक्लिष्टानि पदानि च विभान्ति यस्यामसौ शक्तिः।। (रुद्रट १.१५) इति।

तथैव बहु विविधं पदवाक्यप्रमाणसाहित्यच्छन्दोलंकारश्रुति-स्मृतिपुराणेतिहासागमनाट्याभिधान - कोशकामार्थयोगादिरूपम् वाग्भटप्रभृतिभिः परिगणितम्। निर्मलम संशयादिदोषरहितम्। एतादृशं श्रुतम् शास्त्रम्। विविधशास्त्रनैपुण्यमित्यर्थः। एतल्लोकव्यवहारनैपुण्यस्यापि उलक्षणम्। तदुक्तं प्रकाशकारेण–शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्। (१.३) इति। तथा अमन्दः महान्। अभियोगः अभ्यासः। काव्यविच्छिक्षया पुनः पुनः प्रवृत्तिरित्यर्थः। यदाहुः–अभ्यासो हि कर्मसु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कौशलमावहति। न हि सकृन्निपतितमात्रेणोदबिन्दुरपि ग्रावणि निम्नतामादधतीति (हेम० ८ पत्रे) अभ्यसनप्रकारस्तु हेमचन्द्राचार्यैर्महता प्रपञ्चेन वर्णितः स तद्ग्रन्थादेव ज्ञातव्यः। अभ्यसनसौकर्याय विशिष्टदेशकालादिसाचिव्यमप्यपेक्ष्यत इति वामनः। (१.३.१८-२०) एतत् त्रितयं अस्या उक्तलक्षणायाः काव्यसंपदः कारणम्। काव्यप्रणयनावगमयोः कारणमित्यर्थः। उभयोरपि एतत्त्रितयजन्यत्वात्। प्रतिभाशून्येनापि पुरुषेण महता कालेन एकद्विश्लोककरणेतिव्याप्तिपरिहाराय संपदिति। तदुक्तं काव्यमीमांसायाम्–

मुक्तके कवयोनन्ताः संघाते कवयः शतम्।
महाप्रबन्धे तु कविरेको द्वौ दुर्लभास्त्रयः।। (५४ पत्रे) इति।

अत्र कारणमित्यकवचेनेन कारणतया व्यासक्ता न तु प्रत्येकं पर्याप्ता। तदुक्तं प्रकाशकृता–शक्तिर्व्युत्पत्तिः पौनः पुन्येन प्रवृत्तिरिति त्रयः समुदिता न तु व्यस्तास्तस्य काव्यस्य निर्माणे समुल्लासे च हेतुर्न तु हेतव इति। (१६ पत्रे) अन्ये हेमचन्द्रवाग्भटादयस्तु प्रतिभैव हेतुः शास्त्रव्युत्पत्त्यभ्यासौ तु प्रतिभायाः संस्कारकौ। तथा चौक्तम्– व्युत्पत्त्यभ्याससंस्कृता प्रतिभास्य हेतुरिति। (वाग्भट २ पत्रे) काव्यमीमांसायां तु–

स्वास्थ्यं प्रतिभाभ्यासो भक्तिर्विद्वत्कथा बहुश्रुतता।
स्मृतिदार्ढ्यमनिर्वेदश्च मतारोष्टौ कवित्वस्य।। (४९ पत्रे)

इत्येष्टौ कारणानि समाख्यातानि। अत्र कानिचित् साधारणानि कानिचिदसाधारणानि कारणानीति ज्ञेयम्। आचार्यदण्डिना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिगणितेषु प्रतिभाश्रुताभियोगेषु प्रतिभा द्विविधा सहजा उत्पाद्या सहजा उत्पाद्या च। यदाह रुद्रटः-

प्रतिभेत्यपरैरुदिता सहजोत्पाद्या च सा द्विधा भवति।
पुंसा सह जातत्वादनयोस्तु ज्यायसी सहजा।। (१.१६) इति।

तत्राद्या जन्मसिद्धा द्वितीया शास्त्राद्यभ्यासेन मणिमन्त्रौषधिना च संपद्यते इत्याहुः। उभयरूपा चेयं घटं प्रति चक्रदण्डाविव काव्यं प्रति परस्परसहकार्यतया कारणमिति केचित्। अपरे पुनः अनयोः प्रतिभयोर्मध्य एकतरा कवित्वसंपादनाय प्रभवति अपरा तदुत्कर्षायैव इति। अस्मिन् व्याख्याने न विद्यते इत्यद्यग्रिमश्लोकस्य अविरोधः संपद्यत इति विमर्शनीयम्।।१०३।।

विवृति

नैसर्गिकी च प्रतिभा स्वाभाविको बुद्धिगुणः। तथा श्रुतं च शास्त्रं बहु व्याकरणतर्कादिकं असन्दिग्धं निर्मलम्।।१०३।।

कवित्वोत्पत्तौ हेतुमाह–**नैसर्गिकीति**। पूर्वजन्मकृतविद्याभ्यासोत्पन्नज्ञानजनितसंस्कारागता या बुद्धिः सा नैसर्गिकी प्रतिभा। बहुश्रुतं शब्दस्मृत्यभिधानकोशच्छन्दोविचितिचित्रकलाकामशास्त्रदण्डनीतिज्ञानरूपम्। निर्मलं सत्संप्रदायागतं श्रुतम्। अमन्दः अभियोगः काव्यज्ञशिक्षया सन्दर्भनिर्माणपदावापयोश्च विपुलः अभ्यासः। इति त्रयः समुदिताः कवित्वोत्पत्तौ मनस उल्लासे च हेतुः।।१०३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न विद्यते यद्यपि पूर्ववासना-
गुणानुबन्धि प्रतिभानमद्भुतम्।
श्रतेन यत्नेन च वागुपासिता
ध्रुवं करोत्येव कमप्यनुग्रहम्।।१०४।।

रत्नश्री

पूर्ववासना जन्मान्तराभ्यासाहितः संस्कारः अभ्यासानुबन्धित्वात्। यथोक्तमाचार्यशूरेण-

अभ्यासयोगेन शुभाशुभानि
कर्माणि सात्म्यैव भवन्ति पुंसाम्।
तथाविधान्येव यदप्रयत्ना-
ज्जन्मान्तरे स्वप्न इवाचरन्ति।। इति।

[जातकमालायाम् पृ० 95]

पूर्वा चासौ पूर्वजन्मभावितत्वात्, वासना चेति विग्रहः। सैव गुणो विशेषः, सद्भिः स्तुतत्वात्। [37a] तस्या वा गुणः यथाप्रत्ययं प्रबोधः स्वानुरूपकार्यजननाभिमुखलक्षणो विशेषस्तं हेतुभावेन अनुबध्नाति, अपेक्षत इति पूर्ववासनागुणानुबन्धि। प्रतिभानं प्रज्ञा तञ्च प्रकरणात् काव्यविषयकम्। 'अद्भुतमाश्चर्यं लोकस्य कथमीदृशं प्रतिभानं यथेति विस्मयजनकत्वाद् दुर्लभं वाद्भुतम्। नैसर्गिकी प्रतिभेति यावत्। यद्यपि न विद्यते येषां तैरपि काव्याभ्यासः करणीयः। एवं नासौ निष्फला भविष्यतीत्याह-श्रुतेनेत्यादि। श्रुतेन काव्याङ्गविद्याविषयेण श्रवणेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहुना निर्मलेन। यथोक्तं प्राक्। यत्नेन चाभियोगेन अमन्देन यथोक्तं पूर्वम्। करणेन हेतुना पुरुषेणोपासिता समाराधिता अभ्यस्तेति यावत्। वाक् काव्याङ्गक्रियाकल्पादिविद्यालक्षणविशिष्टा अर्थात्प्रकरणाद्वा तदन्यथानुपपत्त्या काव्यसम्पदोऽर्थः सामर्थ्यम्। काव्यव्युत्पत्तिप्रस्तावः प्रकरणम्। यथोक्तम्–

अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः।
सामान्यवाचिशब्दानां विशेषस्थितिहेतवः।। इति।

[तुल वाक्यपदीयम्]

अपरन्यायो यथासम्भवमिह सर्वोऽनुसर्तव्यः सामान्योक्तिभूयस्त्वात्। कमपि कञ्चित् सहजशक्त्यविरहे यादृशं तत्कल्पमनुग्रहं काव्यरचनासाम[र्थ्यदान]लक्षणम्। ध्रुवमवश्यं करो[37b]त्वयेव उपासितुः पुरुषस्य। नात्र सन्देहः। तस्मान्नैसर्गिकी प्रतिभा नास्ति ममेति नोपासितव्यैव सरस्वती। कामधेनुरवश्यमेवानुग्रहीष्यतीति [ध्येयम्]।।

हृदयङ्गमा

उक्तकारणानां सर्वेषामभावेऽपि यत्नवतां शास्त्रानुशीलनपराणां कथञ्चित् फलसिद्धिरित्याशयेनाह, नेति।–यद्यपि पूर्ववासना प्राक्तनसंस्कारः, स्वाभाविकी शक्तिरित्यर्थः, तथा अद्भुतम् अलौकिकं, गुणानुबन्धि वैचित्र्यावहं, काव्यनिर्माणेनोत्कर्षजनकमित्यर्थः, प्रतिभानं सुचिक्कणां बुद्धिः, न विद्यते, तथाऽपि श्रुतेन शास्त्रानुशीलनेन, काव्यज्ञोपदेशेन वा, यत्नेन अभिनिवेशेन च, उपासिता सेविता, वाक् ध्रुवं निश्चितं, कमपि अनुग्रहं करोति एव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवश्यंमेव काव्यनिर्माणे किञ्चित् सामर्थ्यमातनोति इत्यर्थः। (सम्यक् सामर्थ्ये तु उक्तत्रितयमेव हेतुरिति न परस्परं विरोध इति)।।१०४।।

प्रभा

यद्यपि सहजा प्रतिभा पुरुषप्रयत्नेन लब्धुमशक्या तथापि तदभावेपि कवित्वं न सर्वथा दुःसंपाद्यमिति प्रतिपादयति–न विद्यते इति। अद्भुतम् अलौकिककाव्यसंपादनेनाश्चर्यावहम्। पूर्ववासनागुणानुबन्धि प्राक्तनसंस्कारगुणसंबद्धम् सहजमिति भावः। प्रतिभानम् प्रतिभाशक्तिः। यद्यपिं न विद्यते प्राक्तनप्रतिभाया अभावो यद्यप्यस्ति। तथापि यत्नः कर्तव्य इति अध्याहृत्य वाक्यमेतत् पूरणीयम्। किमर्थं प्रयतितव्यमिति चेत् कथयति–श्रुतेनेति। श्रुतेन काव्याद्यनुशीलेनेन। यत्नेन काव्यकरणाभ्यासप्रयत्नेन। उपासिता आराधिता। वाक्। कमपि अनिर्वचनीयम् अनुग्रहम् काव्यसंपादनसामर्थ्यरूपम्। करोत्वेव। ध्रुवमित्येन व्यभिचारशङ्का निरस्ता। कालिदासादीनां प्राक्तनप्रतिभाया अभावेपि केवलं वाग्देव्या आराधनेन यथा कवित्वलाभ आसीत् तथा अन्येषामपि पुरुषाणामुद्यमशीलानां भवेत्। पुरुषेण प्रयत्नवता भाव्यम् इत्यर्थः। एतेन–

अयं भस्मनि होमः स्याद् इयं वृष्टिर्मरुस्थले।
इदमश्रवणे गानं यज्जडे शास्त्रशिक्षणम्।। इति।

तथा–न हि यत्नशतेनापि शुकवत् पाठ्यते बकः। इत्यादि क्रियाशून्यानां दैववादतन्द्रिलानां यत्ननैष्फल्यप्रतिपादनपरं मतं निरस्तम्।।१०४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवृति

श्रुतानुबन्धि प्रतिभानमद्भुतं श्रुतमनुबन्धाति यः प्रतिभागुणः स च यद्यपि नास्ति, तथाऽपि श्रुतेन शास्त्रश्रवणेन यत्नेन च विनयवैयात्यव्रतचरणादिना च वाक् वाणी भारती सरस्वती देवता सम्यगुपासिता भक्त्या आराधिता ध्रुवमवश्यं कमप्यनुग्रहं प्रसादं करोत्येव न न करोति। क्रियायाः पर एवकारोऽत्यन्तायोगं व्यवच्छिनत्ति; यथा नीलं सरोजं भवत्येवेति।।१०४।।

नेति। जन्मान्तरवासनाजनितप्रतिभाभावेऽपि श्रुतेन शब्दस्मृत्यादिपरिज्ञानेन मन्त्रजपदेवतार्चनादिना च यत्नेन कवित्वं भवति।।१०४।।

पूर्वजन्मकृतपुण्यातिशयसंस्कारसञ्जातसमयज्ञानं यद्यपि न विद्यते, तथऽपि यत्नेन श्रुतेन च उपासिता भगवती वाग्देवी ध्रुवं निरतिशयं अनुग्रहं करोतीत्यत्र न सन्देहः इत्याह—नेति।।१०४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदस्ततन्द्रैरनिशं सरस्वती
श्रमादुपास्या खलु कीर्तिमीप्सुभिः।
कृशे कवित्वेऽपि जनाः कृतश्रमा
विदग्धगोष्ठीषु विहर्तुमीशते॥१०५॥

रत्नश्री

यत एवं न निष्फलं वागुपासनं तत्तस्मात् कारणात् अस्ततन्द्रैरनलसो भूत्वा अनिशम् अनवरतम् अभियोगाविच्छेदात् क्रमात् श्रुतचिन्ताभावनाक्रमेण सम्प्रदायसाद्‌नण्यार्थवर्तिना यथोक्तं प्राक्। उपास्या समाराध्या। अभ्यसनीया यावत्प्रसीदति। यथोक्तमाचार्यमातृचेटेन–

अधीत्य तावत् खिलमेव भिद्यते
कृषिस्तु तस्य श्रमणाद्विभाव्यते।
ततः स्वचिन्तामयबीजमुप्यते
विचारणाङ्गस्तु विवर्द्धतेऽङ्कुरः॥
ततः प्रसादोत्तमसस्यमाप्यते
विधानपर्याप्तममन्दनिश्चयैः॥ इति।

सरस्वती काव्याङ्गविद्यालक्षणा प्रकरणादेर्यथोक्तं प्राक्। खलु [ए]कान्तेन असंशयम् वा। कीर्तिः परिशुद्धकाव्यक्रियालक्षणा पूर्वोक्ता, काव्यसम्पदः एकान्तेन कीर्तिहेतुत्वात्। आवर्तते स एवार्थः पुनरर्थान्तराश्रयादिति न्यायात्। तत्सम्भवा ख्यातिर्वा, गुणेभ्य एव प्रभवन्ति कीर्तय इति वचनात्। तामनश्वरीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्पुरुषतनुमशेषजनसुभगां व्यापिनीं गुणाधिराजवैजयन्तीमीप्सुभि[रवाप्तु]कामैः पु[38a]रुषैः। उपास्येति प्रकृतम्। तथा लाभसत्कारादिकमपि द्रष्टव्यम्। न तु [सा वासना] मम नास्तीति आलस्यमालम्बनीयं तस्यानर्थहेतुत्वात् यथोक्तमाचार्याश्वघोषेण–

आलस्यं यदि न भवेज्जगत्यनर्थः
को विद्वानिह न भवेद्धनेश्वरो वा।।

आलस्य[ा]दवनिरियं ससागरा[हि]
संपूर्णा नरपशुभिश्च निर्धनैश्च।।

अथ कथञ्चित् स्वयं काव्यक्रियालसश्चेतत् तादृशः तथापि परकाव्यकोविदः स्वयं च किञ्चित्करः तद्विदामादेयो भविष्यतीति सर्वथावैफल्यपरिहारमाह–कृश इत्यादि। कवित्वे स्वयं काव्यकरणे कृशे मन्देऽपि सति सर्गबन्धाद्यनिर्वहणात्। कृशे वा असति कवित्वेऽपि मुक्तकादेरपि अकरणात्। तथापि दर्शनात्। भिन्ना हि शक्तिः पुंसाम्। यथोक्तम्–

एकस्तावद् रचयितुमलं श्रोतुमेवापरस्ता–
मन्यः कर्त्तुं तदुभयमपि ज्ञातुमेकोऽभियुक्तः।

नत्वेकस्मिन्नतिशयवतां सन्निपातो गुणाना–
मेकः सूते कनकमुपलस्तत्परीक्षाक्षमोऽन्यः।।इति।।

कृतश्रमा यथाविधानमुपासितवाचो जनाः पुरुषाः कृतोऽनुष्ठितः श्रमः श्रवणादिलक्षणो व्यवहारो यैरिति [38b] विग्रहः, परकाव्यकोविदत्वात्। विदग्धगोष्ठीषु विहर्तुमीशते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विदग्धाः कवयः तेषां गोष्ठीषु काव्यालापेषु विद्यारमणीमेखलानूपुर[शिञ्जितेषु] सकलकलानदीविश्रामसमुद्रेषु नानारसभावाभिनयमहानटेषु शब्दपारायणमहार्णवरत्नाङ्कुरेषु शास्त्रपरश्रिमफलोदयमहोत्सवेषु कविसागरामृतेषु बुधजनमनस्त-स्करेषु विविधालङ्कारहारिषु वन्दनीयेषु विदग्धताभूमिसीमान्तेषु विद्वत्सरणिप्रपाभूतातिशयेषु स्वयंकृतेषु अध्यात्मशास्त्रकला-कौशलवर्णनेषु सतामुचितेषु तदेकरूपेष्वपि प्रतिपुरुषमपूर्वपरिणामितया परमात्मदेशीयेषु सरस्वतीप्रसाद-महावरेषु लक्ष्मीपूजाभाजनेषु निरुद्वेगसुखस्वभावत्वात् कैवल्यकल्पेष्वतलभावगम्भीरत्वात् परार्थप्रसत्तिगुणयोगाञ्च सागरेष्विव महाह्रदेषु सत्पुरुषचरितादर्शभित्तिषु यशः-कुसुमामोदसुरभिषु महाकविकीर्तिस्तम्भेषु किं बहुना संसारसारसन्दोहेषु।

तदुक्तम्–

संसारविषवृक्षस्य द्वयमेवामृतं फलम्।
सुभाषितरसास्वादः सद्भिश्च सह सङ्गतम्।।इति।।

विहर्तुमभिज्ञाततयाऽन्तर्भवितुमीश[39a]ते कल्पन्ते। अकृतश्रमाणां तु पल्लवग्राहिणामवलेपिनामनात्मविदां विदग्धगोष्ठीविहार उपहास एव स्यात्। यथोक्तमाचार्यमातृचेटेन–

न पठ्यते साधुजनो न सेव्यते
न चिन्त्यते संसदि वक्तुमिष्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाविधानामत एव भारती
दरिद्रलीलेव भृशं न शोभते।।

कथं कथामार्गमहामहोदधि-
तटाम्बुसेवासमयेऽप्यशिक्षिताः।
प्रवेष्टुमिच्छन्ति तदुत्तरोत्तर-
प्रकर्षपातालतलाश्रयां गतिम्।।

स्थिोदकेषु व्यवदातविक्रम-
स्तरङ्गिणीं यः सहसा विगाहते।
नावाम्बुवेगोद्धतरोधसं गति
तृणाश्मनोरन्यतरां स गच्छति।।

सुदृष्टशास्त्रोऽपि हि सज्जनाकुले
विमृष्य साधुः सदसि प्रवर्तते।
वशीव सर्वत्र तु वीतसंभ्रमः
समुद्वमत्येव खलः स्ववाग्विषम्।।

पुनः प्रकर्षन्ति विशन्ति हृत् सतां
हरन्त्यवस्कन्द्य नरेद्रवद्धुरम्।
क्षिपत्यगाधेऽपि कथार्णवे मुखं
निपीतभूयिष्ठमिदं जगत् खलैः।।

विनागमं तद्विदुपासनं विना
विनाभियोगं प्रतिभागुणं विना।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विनाभिशापं मतिविभ्रमं विना
न वक्तुमिच्छा पुरुषस्य जायते।।इति।

वरमेवमनधीतविद्यो न पु[न]र्दुरधीतविद्यः। यथोक्तमाचा[39b]र्यकम्बलेन-

यः सर्वथा[न्ध]स्तिमिराहतश्च
तयोर्वरं पूर्वक एव नूनम्।
अन्धोऽहमस्मीत्यवलेपशून्यो
न भा[नुदृ]क्तैमिरिकोऽभिमानी।। इति।।

स्वयमेवमुपहतं तपस्विनमपरापरदूषणेच्छा बाधते। सेयमन्या विडम्बना। यथोक्तमाचार्यमातृचेटेन–

समातिरिक्तव्यसनी य एष संन्
परान् पराहन्त्यभिहत्य वाक्शरैः।
स पूतिनासा कुपितेन्द्रियः स्वयं
वृणोति दुर्गन्धभयेन नासिकाम्।।

परापचारेष्वतितीक्ष्णचक्षुषो
निमीलिताक्षश्च यथेष्टचेष्टिते
रजस्वलाः सन्त इमे स्वयं कथं
किरन्ति लोकस्य रजांसि सूच[काः]।।

यथातथा श[क्य]मिदं तितिक्षितुं
सदागसो यद्धि तुदन्त्यरुन्तुदाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अदुष्टसन्दूषण[वैशसं तु] यत्
तदासु[रं] कस्य मनो न कम्पयेत्।।

सतः प्रकाशानपि नेक्षते गुणान्
कुतोऽपि दोषानसतोऽवगच्छति।
कुतस्तदीदृङ्नयनं समुद्गतं
यदीक्षतेऽसत् सति न प्रवर्तते।।

तदप्यलं सोढुमपण्डिताज्जना-
दनीक्षमाणो हि [करोति दुःसहम्]।
गुणान्तरज्ञस्तु जनोऽतिदुर्जनः
विहन्ति साधूंस्तदुपेक्ष्यतां कथम्।।

गुणौघपुण्यस्य तु पत्तनं परं
गुणान्तरज्ञो जन एव केवलः।
ततोऽपि यद्यापदियं समु[त्थि]ता
क्व तर्हि गच्छन्तु परायणा गुणाः।।इति।।

[40a]कियदसच्चरितमलेन जिह्वां लिम्पामः। सेयं पूयतामत्यन्तशीते[न] प्रसन्नेन सुरभिणा भुवन[पावनेन] सच्चरितपुण्योदकेन।

ऋजुस्वभावोऽपि च बध्यते शठै-
र्न दोषविन्नैव न चाप्यरुन्तुदः।
नतो न सर्वत्र गतो न दीनता-
महो विचित्राः पुरुषस्य नीतयः।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परापवादेषु निरात्मवर्णवान्
गतो नियुक्तान्यगुणेषु वाग्मिताम्।
रिपूनपि श्रेयसि धातुमीहते
मनस्विनश्चेयमलौकिकी स्थितिः।।

यथा यथा दूषणतत्परः [पर]-
स्तथा तथा तद्गुणलापलालसः।
नितान्तदाक्षिण्यमहामहोदधे-
र्मनस्विनः केयमतीव वामता।।

प्रियंवदः क्षेपकृते क्षमापरः
[न कुप्यति] प्राणहरेऽपि दक्षिणः।
अलौकिकं सर्वमितीदमीदृशं
महानुभावः कुत एष शिक्षितः।।

प्रसन्नवाक्कायमनःक्रियापथः
पुनाति साक्षादिव धर्मसञ्चयः।
श्रुतोऽथ दृष्टः समुदाहरन् गिरः
सुनीतगर्भाः सुजनः स्मृतोऽपि वा।।

स एष साधुर्भुवनैकपावनः
प्रसन्नमृग्यः क्वचिदत्र दृश्यते।
अपि स्थिरां प्रीतिमिम[ां] न संहरेत्
कलेर्गुणोन्मूलनधर्मवर्मितः।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनस्तथैव स्थितिरूर्जिताश्रया
गुणोत्सवानामपि नाम सम्भवेत्।
गुणैश्च येषामिव सूर्यरश्मिभि-
र्न्यलीयतादो[40b]षविपक्षविक्रमः।।

निवृत्तनिःशेषविशेषविप्लवं
परस्परं सद्गुणलोलुपं जगत्।
यशस्करीं तां धुरमादिपौरुषां
पुनः प्रवृत्तां विदधातु शाश्वतीम्।।

निरस्तदौर्गत्यसमृद्धिशीकरः।
शुभोदयात्तृप्तसमस्तसज्जनः।
पुनंस्तथा सद्वरशास्त्रसंकथा-
विनोदरम्यः समय[ः]प्रवर्तताम्।।

प्रकृतमिदानीं समाप्यताम्। तदेवं काव्यरचनाकीर्तये काव्यव्युत्पत्तये च काव्यलक्षणशास्त्रस्य प्रयोजनमिति।

मतं खिलप्रायमिहास्ति दण्डिनः
तदेतदत्र प्रकृतं परिस्फुटम्।
इतः पुरस्तात् सममेव वर्तते
तदत्र नास्माभिरभावितो विधिः।।

अर्थप्रधाना प्रतिकर्मितेय-
मर्थान्वयाऽऽस्ते गणिकेव टीका।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दप्रधाना अपि लब्धवर्णा
[भवन्ति निष्काः सुमनः]प्रसिद्धाः॥

स्वयं निरामोदमपीह किञ्चन
प्रकर्षभूम्ना प्रथते सदाश्रयात्।
प्रसिद्धतां पश्य जनेक्षणालयं
कलङ्कमिन्दोः कियतीमुपागमत्॥

आचार्यदण्डिकृतौ काव्यलक्षणे मार्गविभागपरिच्छेदटीका रत्नश्रीर्नाम समाप्ता॥

हृदयङ्गमा

उपसंहरति, तदिति।—तत् तस्मात्, अस्ततन्द्रैः, अस्ता तन्द्रा येषां तैः आलस्यरहितैः इत्यर्थः, कीर्त्तिं कवित्वजनितयशः, ईप्सुभिः, जनैः इति शेषः, श्रमात् परिश्रममवलम्ब्य, सरस्वती खलु निश्चयेन, अनिशम् उपास्या सेव्या, अवश्यमेव शास्त्रं परिशीलितव्यमिति भावः। कथमित्याह, कृश इति।—कवित्वे काव्यकरणसामर्थ्ये, कृशे अल्पेऽपि, कृतश्रमाः कृतशास्त्रपरिशीलनप्रयासा जनाः, विदग्धगोष्ठीषु कविसमाजेषु, विहर्त्तुम् ईशते प्रभवन्ति, अल्पस्यापि अस्य ज्ञाने करणे च ऐहिकामुत्रिकफलसिद्धिर्भवति, "एकः शब्दः सुप्रयुक्तः सम्यक् ज्ञातः स्वर्गे लोके च कामधुग्भवति" इति श्रुतेः॥१०५॥

इति श्रीजीवानन्दविद्यासागर भट्टाचार्य्यविरचितायां काव्यादर्शटीकायां प्रथमः परिच्छेदः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभा

पुनरपि सविशेषं प्रयतितव्यं तेन मनोरथा निश्चयेन फलन्तीति कथयति–**तदिति**। तत् तस्मात्। उपसिता वाग् ध्रुवमनुग्रहं करोति इति हेतोः। अस्ततन्द्रैः परित्यक्तालसैः। अनिशम् सततम्। श्रमात् यत्नतः। कीर्तिमीप्सुभिः कवित्वादिकीर्त्याभिलाषुकैः। सरस्वती वाग्देवी। खलु निश्चयेन। उपास्या। उपासनाया अनैष्फल्यं दर्शयति–**कृशे इति**। कदाचित् कवित्वे काव्यनिर्माणे। कृशेपि स्वल्पेति। विदग्धगोष्ठीषु सहृदयसमाजेषु। कृतश्रमः काव्यशास्त्रे विहितव्यासङ्गाः। जनाः पुरुषा। विहर्तुम् काव्यरहस्यावगमसामर्थेन व्यवहर्तुम्। ईशते समर्था भवन्ति। एतेन काव्यकरणासमर्था अपि काव्यरहस्यहबोद्धारः पुरुषाः कीर्तिं विद्वत्समाजेषु संमानं च लभन्ते। अतः सर्वथा सरस्वत्युपासितव्या तदुपासना निष्फला नैव संपद्यते इति आदिष्टं भवतीत्यवगन्तव्यम्।।१०५।।

इति श्रीवैराजक्षेत्रवासिभी
रड्डीकुलावतंसैर्बालकृष्णाचार्यतनुजै रङ्गाचार्यसूरिभिः
विरचितायां काव्यादर्शव्याख्यायां प्रभाख्यायां प्रथमः
परिच्छेदः।।

विवृति

इत्याचार्यदण्डिविरचिते काव्यादर्शे प्रथमः परिच्छेदः।

यत एवं तस्मात् अस्ततन्द्रैः निरस्तालस्यैः अनिशमनवरतं सरस्वती क्रमादुपास्या, शनैः शास्त्राभ्यासो भक्तिपूर्वकः कर्तव्यः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खलु स्फुटं कीर्तिमिच्छुभिः। ननु यदि प्रतिभादयो न स्वाभाविकाः सन्ति गुणाः, ततः किं सरस्वत्युपासनेन वृथा हृद्रोगजननेनेत्यत आह–**कृश** इत्यादि। कविता‍गुणे कृशेऽपि कृतः श्रमः शास्त्राभ्यासो यैस्ते कृतश्रमाः पुरुषाः विदग्धानां शास्त्राभ्यासव्युत्पन्नबुद्धीनां कवीनां च गोष्ठीषु विहर्तुं क्रीडितुं वक्तुं च ईशते प्रभवो भवन्ति, विद्वन्मध्ये गण्यन्त इत्यर्थः।।१०५।।

इति आचार्यदण्डिविरचितकाव्यादर्शटीकायां वादिजङ्घालदेवविरचितायां मार्गविभावनापरिच्छेदः प्रथमः।।

तदिति। तत् सरस्वत्युपासनस्य अवन्ध्यत्वात्, अस्ततन्द्रैः मन्त्रजपादिना काव्यलक्षणादिपरिशीलनेन च अनिशमुपास्यमाना कीर्तिमीप्सुभिः सरस्वती कवित्वाभावेऽपि पण्डितगोष्ठीषु दोषगुणविवेचनवैदग्ध्यं ददाति।।१०५।।

इति तरुणवाचस्पतिविरचितायां काव्यादर्शटीकायां प्रथमः परिच्छेदः।

तत् तस्मात् निरस्तालस्यैः कीर्तिकामैः पुरुषैः क्रमेण सरस्वती समाराध्या। कवित्वे कात्स्न्र्येन असत्यपि, प्रयत्नप्राबल्येन जना विद्वद्गोष्ठीषु विहर्तुम् ईशते, क्रीडितुं समर्था भवन्ति, इत्याह–तदिति। अस्ततन्द्रैः निरस्तालसभावैः। विदग्धगोष्ठीषु विद्वत्समाजेषु। शेषं सुबोधम्।।१०५।।

इति दण्ड्यलङ्कारव्याख्याने हृदयङ्गमे वैदर्भगौडमार्गविभागो नाम प्रथमः परिच्छेदः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Acc. २११५८
31158

NEPAL SANSKRIT UNIVERSITY
पुस्तकालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ALL MAHAPURANAS

Text with Shloka Index & Introduction

Agni Mahapurana
664 pp 450.00

Bhagavata Mahapurana-
4vols 2304 pp Set 1500.00

Bhavishya Mahapurana
3vols 1400 pp Set 1200.00

Brahma Mahapurana
728 pp 450.00

Devi Bhagavata Mahapurana
1154 pp 800.00

Ganesha Purana
832 pp 1993 450.00

Garuda Mahapurana
668 pp 400.00

Harivansha Purana
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
1802 pp 2vols set 900.00

Kurma Mahapuran
298 pp 300.00

Linga Mahapurana
774 pp 400.00

Markandeya Mahapurana
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
828 pp 450.00

Narada Mahapurana
932 pp 600.00

Padma Mahapurana
2381pp 4vols set 1600.00

Shiva Mahapurana
1504 pp 2vols set 900.00

Shiva Mahapurana (Small Type)
412 pp 400.00

Skanda Mahapurana
5600 pp 8 vols set 4000.00

Skanda Mahapurana (small type)
1452 pp 3vols set 1500.00

Vamana Mahapurana
472 pp 400.00

Vayu Mahapurana
540 pp 400.00

Vishnudharmottara Mahapurana
1246 pp 900.00

Vishnu Mahapurana-with two commentaries
680 pp 500.00

विष्णुमहापुराण
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
—डा० श्रद्धा शुक्ला
2 vols Press

Maha Bhagavat Devipurana
Press

Ekamara Purana
490 pp 150.00

Kalki Purana
316pp 120.00

Kuber Purana (Text With Study) Press

Narasimha Purana
380 pp 100.00

Saura Purana
290 pp 100.00

Srimadbhargavopapuranam
—Brijesh Kumar Shukla
pp 348 Rs. 124.00

Vasuki Purana
260 pp 100.00

Ashtadasha Purana Darpana Contents of 18 Puranas
432 pp 180.00

PURANAS WITH TEXT, TRANS & NOTES IN ENGLISH VERSWISE

Vishnu Purana—*H.H. Wilson*
1065 pp 2 vols Set 500.00

Matsya Purana—*N.S. Singh*
1252 pp 2 vols 500.00

Narasimha Purana —*Dr.S.Jena*
750 pp 400.00

Kalika Purana
Prof. Biswanarayan Shastri
1770 pp 3vols set 900.00

NAG PUBLISHERS
11/A (UA) Jawahar Nagar, Delhi - 110007 (INDIA)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu